शीघ्रमेत्य ममाख्येयं तन्नः श्रेयो भविष्यति ॥ १३

इति श्रीमहाभारते आदिपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

---

7 [a]) G2.4.5 भीतो. Ñ1.2 V1 G5 ह्यहं. M1.5 सहितोयं यदस्माकं. — [b]) B4 M1 स (for च). — [c]) Ñ1.2 V1 D (except Da D2.4.5) T1 transp. कुरु and प्रसा°. Ñ3 अस्य त्वं (for दे°). — [d]) D1 M2.4 शमयस्व.

8 Ś1 (with prefixed श्री) S ब्रह्मा (G4 पितामहः); K Ñ3 D2.5 पितामह उ° (K1 as in G4). — After पितामह उ°, K2.4 ins. two lines given in App. I (No. 20). — [a]) Ś1 Ñ1.2 V1 B (except B5) Dn D5 G2.3 मयैव तद्; M1.5 मया चैतद्. T2 मे (for वै). K1 मयैव तद्धि तीर्णं वै; K2 मयि चैत° (m °तत्कथितं वै); K4 Da D1 °तद्धिचीर्णं वै; D2 मयैतद्विदितं चैव; T1 मयैव तद्धि संपूर्णं; G1 मम चै(? read वै)विद्धि विदितं; G4-6 M2-4 मयैतच्चिंतितं पूर्वं. Cd विचीर्णं. — [b]) B Da D4 G2.3 M3 °सा सुराः; T2 M1.5 °सा घृतं; G4 °सा पुरा. — [c]) Ś1 K1 ऐलाप°. — [d]) G1 यदन्ना°; G4.5 M2.4 यदस्य व्याहृतं.

9 [b]) D5 corrupt. Ś1 K1 कालप्राप्तं; Ñ3 D2 काले प्राप्तं; T2 G (except G4.5) काले प्राप्ते. Ñ1.2 V1 Dn D1.3.4.6.7 T1 स्वयं; Ñ3 D2 G2-5 M तदा; B Da च तत् (B5 चरेत्) (for तथा). — [c]) D1.2 विनश्यं(D2 °श्यं)ति च. Ś1 K1 Da1 G6 ते; D2 वै (for ये). — [d]) = 1. 34. 10[d].

10 [b]) S (except T1 G1) रतः सदा. — [c]) Ś1 K2 D6.7 तस्यैषा; Ko.3 G1-5 M1.3 (*inf. lin.*).5 तस्यैव; B4.5 Da1 D3 तस्यै स; D4.5 T2 G6 तस्यै स्व-. Ś1 K2 D6.7 G2.5 (*sup. lin.*) भगिनी. — [d]) Ś1 °रोः प्रदीयतां. M1.5 प्रयच्छत.

11 [a]) Ś1 यदैलप°; K1 यदैलाप°. Ñ1.2 V1 B D (except D2) T1 एलापत्रेण यत्प्रोक्तं; T2 G1 M1.5 एलापत्रेण तु (M1.5 च) वचः (cf. 1[a]); G2-6 M2-4 एलापत्रेण वचनं. — [b]) Ś1 T2 तदुक्तं; Ñ1.2 V1 B D (except D2) T1 वचनं; G2.3 यथोक्तं; M1.5 तवो°; M2-4 पुरो°. G2.3 भुजगस्य तु; G6 °गोत्तम. D1 M2-4 हि (for ह). — [c]) G2.3.6 भुजगानां. G2 तु तद्; G3 तु यद् (for हितं). G4-6 M (except M1.5) चैव (for देवाः). — [d]) T2 G M1 तथा तन्; M5 तदा तन् (for तत्तथा). M2-4 तत्कुरुष्वाविचारयन् (M3 °ष्व भुजंगम).

12 Ś1 K1 S (G1.3 M1.5 om.) सूतः; Ko.3.4 Ñ1.2 V1 B1 Dn D1.3.6.7 सौतिरु°. — [a]) Ñ V1 B1 D (except Da D2.5) T1 तु (for स). — After 12[ab], Ñ2 V1 B5 (marg.) D (except Da D2.5) T1 ins.:

390* संदिश्य पन्नगान्सर्वान्वासुकिः शापमोहितः ।
स्वसारमुद्यम्य तदा जरत्कारुमृषिं प्रति ।

— [c]) Ś1 युक्तान् (for बहून्). Ś1 G2.3 M1.5 °स्कारोः — [d]) K1.2 D4 T2 G4.5 समादधात्; D2 तदाद°. D5 नित्यं युक्तान्समाददत्; G2.3 नियुक्तान्स समावदत्.

13 [c]) Ś1 Ko.2.4 समाख्येयं; Ñ1.2 V1 B D (except D2) T1 तदाख्येयं. G1 शीघ्रमेव ममाख्यात. — [d]) Ñ3 ततः; Da1 G1.2 M (except M5) तन्न; D7 यन्नः; T1 G4.5 तत्र.

Colophon om. in G4.5. — *Sub-parvan:* All MSS. except T2 G4.5 आस्तीक (v. l. आस्तिक, अस्तीक). — *Adhy. name:* Ko.2-4 पितामहवाक्यं; Ñ1.2 V1 जरत्कार्वन्वेषणं. — *Adhy. no.* (figures, words or both): Ko 34; K3 (marg. *sec. m.*) T 32; Ñ1.2 Dn3 39; B1 38; B2 D4 (marg.).5 37 (D5 ins. पंचमोध्यायः before the figure 37); D3 G2.3 24; G1 M1.2.4.5 22; G6 M3 23. — *S'loka no.:* Da1 13; Dn 14. — *Aggregate s'loka no.:* Dn2 1630.

३६

शौनक उवाच ।
जरत्कारुरिति प्रोक्तं यत्त्वया सूतनन्दन ।
इच्छाम्येतदहं तस्य ऋषेः श्रोतुं महात्मनः ॥ १
किं कारणं जरत्कारोर्नामैतत्प्रथितं भुवि ।
जरत्कारुनिरुक्तं त्वं यथावद्वक्तुमर्हसि ॥ २

सूत उवाच ।
जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम् ।
शरीरं कारु तस्यासीत्तत्स धीमाञ्शनैः शनैः ॥ ३
क्षपयामास तीव्रेण तपसेत्यत उच्यते ।
जरत्कारुरिति ब्रह्मन्वासुकेर्भगिनी तथा ॥ ४

एवमुक्तस्तु धर्मात्मा शौनकः प्राहसत्तदा ।
उग्रश्रवसमामन्त्र्य उपपन्नमिति ब्रुवन् ॥ ५

सूत उवाच ।
अथ कालस्य महतः स मुनिः संशितव्रतः ।
तपस्यभिरतो धीमान्न दारानभ्यकाङ्क्षत ॥ ६
स ऊर्ध्वरेतास्तपसि प्रसक्तः
स्वाध्यायवान्नीतभयक्लमः सन् ।
चचार सर्वां पृथिवीं महात्मा
न चापि दारान्मनसाप्यकाङ्क्षत् ॥ ७
ततोऽपरस्मिन्संप्राप्ते काले कस्मिंश्चिदेव तु ।

C. 1. 1664
B. 1. 40. 10
K. 1. 40. 10

36

1 Śi K1 S (T2 G3 with prefixed श्री) शौनकः. — a) Ñ1.2 V1 Dn D1.3.6.7 T1 ख्यातः (cf. 1. 13. 10 etc.); D4 G1 प्रोक्तः. — b) Ñ1.2 V1 Dn D1.3.6.7 T1 G1 यस्त्वया; B Da D2.4.5 त्वया यत्(by transp.). — cd) Ñ1.2 V1 D (except Da D2.4.5) T G (except G4.5) M1.5 तद् (for एतद्). Ñ V1 D (except Da D2.4.5) T1 transp. तस्य and श्रोतुं. M1.5 तत्र (for तस्य). T2 ऋषेर्ज्ञातुं; G5 नाम ऋषेः. G4 ऋषेर्नाम महामतेः.

2 b) Śi D1 नाम तत्. — c) Ñ1.2 V1 D (except Da D1.2.5) T1 G1.5 °निरुक्तिं त्वं; T2 G2.3.6 °निमित्तं स्म (T2 त्वं; G6 मे); M2.4 °नियुक्तं त्वं. M1.3.5 तत् (for त्वं). — After 2, B4 D3.4.6.7 T1 ins.:

391* तत्तस्य वचनं श्रुत्वा प्रोवाच स महाद्युतिः ।

3 D6 T2 G2 om. सूत उ°. Śi K1 T1 G1.3–6 M सूतः; Ko.3.4 Ñ1.2 V1 B1.4 Dn D1.3.7 सौतिरु°. — a) M जरेति च क्षपामाहुः. — c) Śi K1 चारु (for का°). — d) M1.3.5 तु (for स).

4 b) T G4–6 °सेत्येतदुच्यते. — c) Ñ3 °ति प्रोक्तं (cf. 1a). — d) K2 transp. वासु° and भगि°. G2 -पतिं; G3.6 M -पतिः (for तथा).

5 b) Ñ3 G2.3 ग्रहसन्; T2 G1.6 प्राह तं. G3 तथा. K1 प्राहसं शौनकस्तदा. — After 5ab, G2 ins. 392*, which is followed by 393* (cf. v. l. 6). — c) Śi K1 उग्रप्रभावमा°. — K3.4 Ñ2.3 (om. line 3) V1 B D (D2 om. line 3) T G1.4.5 ins. after 5: G2, after 5ab:

392* शौनक उवाच ।
उक्तं नाम यथापूर्वं सर्वं तच्छ्रुतवानहम् ।
यथा तु जातो ह्यास्तीक एतदिच्छामि वेदितुम् ।
तच्छ्रुत्वा वचनं तस्य सूतः प्रोवाच शाश्वतः ।

[Ñ3 T2 G1.2.4.5 om. शौनक उ°. — (L. 1) K3.4 Ñ3 B Da D2.5 T2 G1.2.4.5 यथावच्च (T2 G1.2.4.5 °तत्वं) सर्वं यत्पृष्टवानहं. — (L. 3) K3.4 B1.4 T2 G1.2.5 सौतिः प्रो°. T2 G2.4.5 शाश्वतं; G1 शाश्वतः.]

6 Śi K1 S (T2 G4.5 om.) सूतः; K3.4 Ñ1.2 V1 Dn D1 सौतिरु°. — K4 Ñ2.3 V1 B D T1 ins. after सूत उ° (resp. its v. l.): T2 G1.2.4.5, after 392* (cf. v. l. 5):

393* संदिश्य पन्नगान्सर्वान्वासुकिः सुसमाहितः ।
स्वसारमुद्यम्य तदा जरत्कारुमृषिं प्रति ।

[(L. 1) Ñ3 B Da D2.4.5 G1.2.4.5 शापमोहितः (for सुसमा°). — (L. 2) Cf. 1. 13. 31.]

— b) G4.5 स ऋषिः. Śi संश्रित°; K (except K1) B1.2.5 Da2 Dn शंसित° (Dn3 संक्षित°); cf. 1. 1. 2, 53 etc. — c) T2 शीमान् (sic). — d) K3.4 ब्रह्मचर्ये व्यवस्थितः; Ñ1.2 V1 D (except Da D2.5) स दाराञ्जाभ्य° (D3 °भि°). G1 अभिकांक्षति.

7 a) Śi Ko.1.3 T2 G (except G1) M स ह्यूर्ध्वं°; K2.4 Ñ V1 Dn D1 T1 स तूर्ध्वं°. G1 प्रयुक्तः; G2.3 °सिक्तः. B Da D2.5 °रेता हि महात(D5 °न्त)पस्वी. — b) Ñ1.3 शीलगुणोपपन्नः; Ñ2 V1 Dn D1.3.4.6.7 T1 °भयः कृतात्मा; B5 °भयः कृशश्च; G2 °भयः समश्च. K3 B1–4 Da D2.5 G1.3 M (except M1.5) च (for सन्). — c) B Da D2.4.5 °वीं वसुधां. Ko जितात्मा; K3 यता°. — d) Ko.2 (mas in text).3.4 T2 G3 M2.3 अभि-; Ñ1.2 V1 Dn2 अधि-; G2.3 हि (for अपि). Śi K1.3.4 Da Dn2 D1.4 अकांक्षत; K2 °क्षतां; G3 °क्षयत्. — After 7, G4.5 ins. an

C. 1. 1664
B. 1. 40. 10
K. 1. 40. 10

परिक्षिदिति विख्यातो राजा कौरववंशभृत् ॥ ८
यथा पाण्डुर्महाबाहुर्धनुर्धरवरो भुवि ।
बभूव मृगयाशीलः पुरास्य प्रपितामहः ॥ ९
मृगान्विध्यन्वराहांश्च तरक्षून्महिषांस्तथा ।
अन्यांश्च विविधान्वन्यांश्चचार पृथिवीपतिः ॥ १०
स कदाचिन्मृगं विद्ध्वा बाणेन नतपर्वणा ।
पृष्ठतो धनुरादाय ससार गहने वने ॥ ११
यथा हि भगवान्रुद्रो विद्ध्वा यज्ञमृगं दिवि ।
अन्वगच्छद्धनुष्पाणिः पर्यन्वेषं ततस्ततः ॥ १२
न हि तेन मृगो विद्धो जीवन्गच्छति वै वनम् ।
पूर्वरूपं तु तन्नूनमासीत्स्वर्गगतिं प्रति ।
परिक्षितस्तस्य राज्ञो विद्धो यन्नष्टवान्मृगः ॥ १३
दूरं चापहृतस्तेन मृगेण स महीपतिः ।
परिश्रान्तः पिपासार्त आससाद मुनिं वने ॥ १४
गवां प्रचारेष्वासीनं वत्सानां मुखनिःसृतम् ।
भूयिष्ठमुपयुञ्जानं फेनमापिबतां पयः ॥ १५
तमभिद्रुत्य वेगेन स राजा संशितव्रतम् ।
अपृच्छद्धनुरुद्यम्य तं मुनिं क्षुच्छ्रमान्वितः ॥ १६
भो भो ब्रह्मन्नहं राजा परिक्षिदभिमन्युजः ।
मया विद्धो मृगो नष्टः कच्चित्त्वं दृष्टवानसि ॥ १७
स मुनिस्तस्य नोवाच किंचिन्मौनव्रते स्थितः ।
तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासजत् ॥ १८
धनुष्कोट्या समुत्क्षिप्य स चैनं समुदैक्षत ।
न च किंचिदुवाचैनं शुभं वा यदि वाशुभम् ॥ १९

---

additional colophon: इत्यास्तिके (G4 interp. पर्वणि) द्वाविंशोध्यायः.

8 c) D2 M (except M5) परीक्षि°. Ś1 K1 Ñ3 परिक्षिदवरेणासीत्; Ko.2 परि(K2 °री)क्षिदवनेरासीत्; K3.4 B Da D2.4.5 G4.5 परी(B1–4 D4 °रि)क्षिदिति नामासीत्; Ñ1.2 V1 Dn D1.3.6.7 T1 परीक्षिन्नाम राजासीत्. — d) Ñ1.2 V1 D (except Da D2.4.5) T1 ब्रह्मन् (for राजा). K3 Ñ1 °वंशधृक्; K4 °कृत्; Ñ2 V1 B D T1 G4.5 °जः.

9 b) Ko.2.3 विभुः; Ñ V1 B D T1 G1–3 M युधि (for भुवि). — After 9ab, T2 G6 ins. 394*. — c) Ñ3 स तथा; G6 पांडुस्तु (for ब°). G1 मृगयासक्तः. — d) M1.3.5 पुरेव प्र°. — D3 G1.2.4.5 ins. after 9: T2 G6 after 9ab:

394* तथा विख्यातवाँल्लोके परिक्षिदभिमन्युजः ।

10 b) M2.4 तदा. — c) Ś1 °धांस्त्वन्यान्; K2.4 B5 °धान्वध्यान्; Dn1 D7 G2 °धानन्यान्. — d) D5 तथा च; G6 जघान (for च°).

11 a) B4 M1.5 मृगान्. T2 G4.5 घोरं (for विद्ध्वा). — b) M1.5 गतप°. K4 Ñ V1 B D (except D5) बाणेनानत°; T1 °नानतिदारुणा; T2 G4.5 विध्वा तीक्ष्णेन पत्रिणा. — d) Ś1 K1 D5 चचार; D3.6.7 स राजा (for स°).

12 a) Ñ1.2 V1 D (except Da D2.4.5) T1 यथैव. G2.3 पुरा यथा हि भगवान्. — b) G2.3 °गं प्रति. — d) Ś1 K G1–3.6 M1–4 पर्यन्वेषंस्त(K3 °ष्टु त)तस्ततः; Ñ1.2 V1 B D T1 °न्वेष्टुमितस्ततः (B1m °न्वेषान्वित°; D5 °न्वेषन्वित°); G4.5 °न्विष्यंस्तत°; M5 पयसेषस्तत° (sic).

13 a) G2.3 M (except M1.5) स हि. — b) K3 नैव ते; K4 Ñ V1 B D G4.5 वै वने; G2.3 वै स्वयं. — Ko om. 13cdef. — c) K3.4 °दृष्टं; Ñ3 पूर्णं; D7 पूर्वं रूपं. Ś1 तद्वीर्यं; Ñ2 V1 D (except Da D2.4.5) T1 तत्पूर्णं; G2.3 M तस्या(M1.5 °त्रा)सीत्. T2 G1.4–6 अभूत(G1 अपूर्व)पूर्वं (G6 °र्वम्) तत्रा(G4.5 °त्वा)सीत्. — d) Ñ1.2 V1 Dn D1.6.7 T1 सोगात्; T2 G M राज्ञः (for आसीत्). — e) Ñ V1 B D T1 परिक्षितो (D5 °क्षिष्टो) नरेंद्रस्य (D2 परीक्षिता नरेंद्रेण); T2 G1–3.6 M1.5 परीक्षिता (G6 °तो) महाराज्ञा (G6 °ज्ञो); G4.5 M2–4 पांडवेयस्य ब्रह्मर्षेः.

14 a) G2.3 त्वप°; G4.5 चापि हृतस्. — cd) G4.5 °सार्तस्त्वास°.

15 a) G2.3 °ल्वालीनं. — b) D5 मुखनिर्गतं; G2.3 अभिनिः°. — c) Ś1 K1 Da D3.5.7 T2 °भुंजानं. — d) G (except G2.3) फेनं वै.

16 D2 om. 16ab. — a) B5 तमभिप्रेत्य; M5 तदभिश्रु°. — b) G4.5 स ऋषिं. Ś1 संश्रितं; K (except K1) Dn1.n2 D1 T1 शंसि(K4 °शि)तं (cf. 1. 1. 2, 53 etc.). Ś1 K1 om. 16cd. — d) T2 G1 तमृषिं; N3 (*inf. lim. sec. m.* as in text) G2–6 M (except M1.5) तं मृगं. K2 Da1 कृच्छ्रमास्थितं (Da1 °श्रितः); D2 क्षुत्तृषा°; D5 क्षुत्समं°.

17 Before 17, B3 D4 ins. परीक्षिदुवाच. — a) G1 ब्राह्मण राजाहं. — d) K1.2 Ñ1.2 V1 B D (except Da D2.6) T1 M1.5 तं (for त्वं).

18 Before 18, B3 ins. सौतिरुः; D4m सूत उ°. — a) Ś1 किं च नोवाच; Ñ1.2 V1 D (except Da D1.2.5) T1 तं तु नो°; M तं न चो°. — b) Ś1 तस्य (for किंचित्). Ś1 K3 °व्रतान्वितः; M1.5 °व्रतस्थितः. — d) K2.4 B4 Dn3

स राजा क्रोधमुत्सृज्य व्यथितस्तं तथागतम् ।
दृष्ट्वा जगाम नगरमृषिस्त्वास्ते तथैव सः ॥ २०
तरुणस्तस्य पुत्रोऽभूत्तिग्मतेजा महातपाः ।
शृङ्गी नाम महाक्रोधो दुष्प्रसादो महाव्रतः ॥ २१
स देवं परमीशानं सर्वभूतहिते रतम् ।
ब्रह्माणमुपतस्थे वै काले काले सुसंयतः ।
स तेन समनुज्ञातो ब्रह्मणा गृहमीयिवान् ॥ २२
सख्योक्तः क्रीडमानेन स तत्र हसता किल ।
संरंभी कोपनोऽतीव विषकल्प ऋषेः सुतः ।
ऋषिपुत्रेण नर्मार्थं कृशेन द्विजसत्तम ॥ २३
तेजस्विनस्तव पिता तथैव च तपस्विनः ।
शवं स्कन्धेन वहति मा शृङ्गिन्गर्वितो भव ॥ २४
व्याहरत्स्वृषिपुत्रेषु मा स्म किंचिद्वचो वदीः ।
असद्विधेषु सिद्धेषु ब्रह्मवित्सु तपस्विषु ॥ २५
क्व ते पुरुषमानित्वं क्व ते वाचस्तथाविधाः ।
दर्पजाः पितरं यस्त्वं द्रष्टा शवधरं तथा ॥ २६

C. 1. 1685
B. 1. 40. 31
K. 1. 40. 31

इति श्रीमहाभारते आदिपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥

D1-3.5-7 T1 G M2-4 °सृजत्; M1.5 समुत्सृ° (cf. v. l. 1. 37. 8).

19 [a]) Ñ1.2 V1 D (except Da D2.4.5) T1 transp. धनु° and समु°. B5 G2.3 समाक्षिप्य; T2 समुकृष्य (sic). — [b]) D6 G (except G6) न चैनं. K3 Ñ1.2 V1 B D (except Da D5.6) T1 समुपैक्षत; G1-3 M (M3 *inf. lin.*) समवै° (G3 °वे°). — [c]) Ñ V1 B Da Dn D1.7 न स; D4 न हि; D6 नासौ; T1 स न. — G3 om. 19[d]-21[c].

20 G3 om. 20 (cf. v. l. 19). — [c]) G4-6 नगरीं. — [a]) K1 ऋषिरास्ते; Ñ1.2 V1 B D T1 °स्वासीत् (D2 °रासीत्; D5 तं दृष्ट्वा ते). G4.5 तथाविधः. K2m D2.6 T2 G2.6 M5 च (for सः). — Dn D1 (om. line 1).3 (in reverse order).4 (om. line 1).6.7 T1 (om. line 1) ins. after 20:

395* न हि तं राजशार्दूलं क्षमाशीलो महामुनिः ।
स्वधर्मनिरतं भूपं समाक्षिप्योऽप्यधर्षयत् ।
[D4 न (for स्व-).]

K (except K1) Ñ1.3 V1 B Da D2 G (except G3.6) ins. after 20: Dn D1.4.6.7 T1, after 395*: D3, after line 1 of 395*:

396* न हि तं राजशार्दूलस्तथा धर्मपरायणम् ।
जानाति भरतश्रेष्ठस्तत एनमधर्षयत् ।

21 G3 om. 21[abc] (cf. v. l. 19). — [a]) Ś1 K1.4 रोषण°; K3 रोषेण° (for तरु°). — [b]) Ś1 K D5 गवि जातो (for तिग्म°). G4.5 °यशाः. — [c]) Ś1 G2 महाक्रुद्धो; K (except K1) °तेजा. — [d]) K (except K1) °दोतिकोपनः; Da °दो महातपाः.

22 [a]) Ko M4 सदैवं; K2 G1 °दैव; D2 G4 °देव. Ś1 K (except K4) Ñ3 D3.6.7 परमेशानं; Ñ2 V1 Dn D1 T1 °मासीनं; G1.4 वर°; G2 पशु°; G3 पति°. — [d]) Ś1 यतव्रतः; K1 द्विजोत्तमः; D5.7 तु सं°. — [f]) Ś1 K1.2 ब्रा(K2 ब्र)ह्मणो. Ś1 Ñ1.2 V1 D (except Da D2.4.5) S °मेयिवान्; Ñ3 °मेधिना.

23 [b]) G (except G4.5) सहसा किल. D5 सततं वसता किल (m as in text). — [c]) Ñ2 V1 Dn D1.3.5-7 T2 G2.3.6 M1.2.5 संरंभात्; B Da D2 G1 °रब्धः. — [d]) K (except K1) Ñ1.2 V1 D (except D5) T1 मुनेः. M1.3 ins. तु before ऋषेः. — After 23[ed], K2.4 Ñ1.2 V1 B D (except D5) T1 G1.2 ins.:

397* उद्दिश्य पितरं तस्य यच्छ्रुत्वा रोषमाहरत् ।
[K2 भरतस्य. K2.4 तत्; Dn D1.3.7 T1 यः (for यत्).]

— [e]) K3 ऋषेः; Ñ1 सखि- (for ऋषि-). Ś1 K1.2 B3 Da1 धर्मार्थं; Ñ2 V1 Dn D1-3.7 धर्मार्थे; Ñ3 धर्मात्मा; T1 कर्मा°; T2 G (except G4.5) तत्वा°. — [f]) Ñ3 Da D4 G2.3.6 °सत्तमः.

24 Before 24, Ś1 Ñ2.3 V1 B3-5 D (except Da D2.5) T1 ins. कृश उ°. — [b]) K (except K1) तथा चैव. D3.6.7 यशस्विनः. — [c]) Ś1 Ko.1 M1.5 शावं (M5 °पं) (!); K3.4 सर्पं. K3 transp. स्कंधे° and वह°. — [a]) T1 मादितो (for गर्वि°).

25 [a]) K1 °पुत्रेण; K4 Ñ3 °रनृषिपुत्रेषु (Ñ3 °ण). — [b]) Ñ3 S मा च (G2.3 न च; M1.5 as in text). B1.3-5 Da व(B4 त)दोत्तरं; Ñ1.2 V1 B2 Dn D1.3.4.6.7 T वद; D2 G2.3.6 °दत्; D5 °दीत्; M1.3 ब्रवीः; M5 ब्रवीत्. K1 मा स्म किंचिद्धि चाब्रवीः.

26 [b]) Ś1 T G1.2 M क्व च. M (except M1.5) वादास्तथा°. — [cd]) Ñ3 G2.3 यत्त्वं. K3 T G M1.3.5 द्रष्टा. Ñ1.2 V1 B D (for D5 see below) द्रष्टा (D3.6.7 दृष्ट्वा) यस्त्वं (by transp.). Ś1 K1 शावपरं; Ko.2-4 शाववहं; M1 शाव°; M2.4 शावधनुं; M5 शाप°. Ñ3 G3.6 तदा. D5 तत्तेजपितरं यंस्त्व (sic) दृष्ट्वा शवधरस्तथा. — After 26, Ñ2 V1 B4 D (except Da D2.5) ins.:

३७

C. 1. 1690
B. 1. 41. 1
K. 1. 41. 1

सूत उवाच ।
एवमुक्तः स तेजस्वी शृङ्गी कोपसमन्वितः ।
मृतधारं गुरुं श्रुत्वा पर्यतप्यत मन्युना ॥ १
स तं कृशमभिप्रेक्ष्य ह्यनृतां वाचमुत्सृजन् ।
अपृच्छत कथं तातः स मेऽद्य मृतधारकः ॥ २

कृश उवाच ।
राज्ञा परिक्षिता तात मृगयां परिधावता ।
अवसक्तः पितुस्तेऽद्य मृतः स्कन्धे भुजंगमः ॥ ३

शृङ्ग्युवाच ।
किं मे पित्रा कृतं तस्य राज्ञोऽनिष्टं दुरात्मनः ।
ब्रूहि त्वं कृश तत्त्वेन पश्य मे तपसो बलम् ॥ ४

कृश उवाच ।
स राजा मृगयां यातः परिक्षिदभिमन्युजः ।
ससार मृगमेकाकी विद्ध्वा बाणेन पत्रिणा ॥ ५
न चापश्यन्मृगं राजा चरंस्तस्मिन्महावने ।
पितरं ते स दृष्ट्वैव पप्रच्छानभिभाषिणम् ॥ ६
तं स्थाणुभूतं तिष्ठन्तं क्षुत्पिपासाश्रमातुरः ।
पुनः पुनर्मृगं नष्टं पप्रच्छ पितरं तव ॥ ७
स च मौनव्रतोपेतो नैव तं प्रत्यभाषत ।
तस्य राजा धनुष्कोट्या सर्पं स्कन्धे समासृजत् ॥ ८

398* पित्रा च तव तत्कर्म नानुरूपमिवात्मनः ।
कृतं मुनिजनश्रेष्ठ येनाहं भृशदुःखितः ।
[(L. 2) B4 कृतरूपं पितुश्चैव यें.]

Colophon om. in Da1. — *Sub-parvan:* All MSS. except Da1 Dn2.n3 T आस्तीक (v. l. आस्तिक, अस्तीक); to it Ñ1.2 V1 add परिक्षिदुपाख्याने. — *Adhy. name:* K (except K1) कृशवाक्यं; G2 मृगान्वेषणं; G3 शेषं. — *Adhy. no.* (figures, words or both): Ko 35; K3 (*sup. lin. sec. m.*) T 33; Ñ1.2 V1 Dn3 40; B1 39; B2 D4 (marg.).5 38 (D5 reads षष्ठ अध्यायः before 38); G M 23 (G2.3 25; G6 M3 24). — *Śloka no.:* Ñ3 31; Dn1 33; Dn2.n3 32.

37

1 Ś1 K1 S (M2.4 om; T2 G3 with prefixed श्री) सूतः; Ko.3.4 Ñ1.2 V1 B1 Dn Dn1.3.6.7 सौतिरुं. — a) M2.4 तु (for स). — b) D5 °समन्वितं; G1 परमकोपनः. Ś1 K श्रृंग्या (Ś1 K1.2 °गी; Ko °गा) क्षेपसमन्वितं. — c) Ś1 K1.2 मृतहारं; K3 शवं; D5 मृतावहं; G4.5 °भारं (cf. v. l. 2). Da °रुं दृष्ट्वा. — d) G4.5 °तप्यन्महामनाः.

2 a) T2 (before corr.) M4 °प्रेत्य. — b) Ñ3 वाक्यमुं. — c) Ñ1.2 V1 D (except Da D4) T1 अपृच्छत्तं. — d) Ś1 K2 Da2 G1.2.6 समेत्य. Ś1 K1 मृतहारकः (cf. v. l. 1). B4 सखे मे मृतवाहकः (m as in text); D3 G4.5 सर्वभूतहिते रतः; D5 शंस मे मृतहारकः. — After 2, D3 T2 G (except G3.6) ins.:

399* अनन्यचेताः सततं विष्णुं देवमतोषयत् ।
वन्याशभोजी सततं मुनिर्मौनव्रते स्थितः ।
एवंभूतः स तेजस्वी स मेऽद्य मृतधारकः ।
[Cf. v. l. 16.—(L. 3) G1.2.5 सखे (for स मे). Latter half = 2^d.]

3 Ś1 K1 S om. उवाच. B3 reads 3, 4 in marg. — a) K2 तत्र; M1.5 तं तु (for तात). — d) Ñ3 T2 G4–6 M1.5 कंठे (for स्कन्धे).

4 Ś1 K1 S om. उवाच. — a) Ñ3 S (except T1) तात (for तस्य). — b) K1 राज्ञो दुष्टं. G4.5 राज्ञे—°त्मने. — c) Ñ1.2 V1 D (except Da D2.5) T1 तत् (for त्वं).

5 Ś1 K1 S om. उवाच. — a) Ś1 K1 D5 मृगयायां वै; T2 G1–3 M1.3.5 °यांशीलः. — d) Ñ2 V1 B D (except D5) T1 °न शीघ्रगं.

6 a) G1 °श्यन्महातेजा. — b) T2 स च; G1 मृगं (for चरन्). Ś1 तपोवने. — c) G3 °रं तव. T2 °रं ते वै दृष्ट्वाथ. — d) K3 Dn3 D5.6 T1 G6 M1.5 °भाषणं. G2.3 पप्रच्छ न बभाष तं.

7 a) M1.5 मौनव्रते च (M5 °न) तिं. — b) G (except G2.3) M1–3 °श्रमान्वितः. — d) G1 °रं तदा.

8 a) G2.3 °व्रतो वाचा. — b) K1 D5 G1 न चैनं; T2 G6 वचो न; G2.3 M1.5 न च तं. — d) Ñ3 G6 मृतं सर्पं; D1 सर्पं स्कंधम्; D2 मृतं स्कंधे; G4.5 कंठे सर्पं. Ś1 K1 Ñ1.2 V1 B (except B4) Dn2 D4 T2 समासजत्; D1 G6 अवां; M4 समुत्सृ (cf. v. l. 1. 36. 18).

9 a) G6 स्कंधे तव. Ñ V1 B1 D T1 पिता सोपि

शृङ्गिंस्तव पिताद्यासौ तथैवास्ते यतव्रतः ।
सोऽपि राजा स्वनगरं प्रतियातो गजाह्वयम् ॥ ९

सूत उवाच ।

श्रुत्वैवमृषिपुत्रस्तु दिवं स्तब्ध्वेव* विष्ठितः ।
कोपसंरक्तनयनः प्रज्वलन्निव मन्युना ॥ १०
आविष्टः स तु कोपेन शशाप नृपतिं तदा ।
वार्युपस्पृश्य तेजस्वी क्रोधवेगबलात्कृतः ॥ ११

शृङ्ग्युवाच ।

योऽसौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य च ।
स्कन्धे मृतमवास्राक्षीत्पन्नगं राजकिल्बिषी ॥ १२
तं पापमतिसंक्रुद्धस्तक्षकः पन्नगोत्तमः ।
आशीविषस्तिग्मतेजा मद्वाक्यबलचोदितः ॥ १३
सप्तरात्रादितो नेता यमस्य सदनं प्रति ।
द्विजानामवमन्तारं कुरूणामयशस्करम् ॥ १४

सूत उवाच ।

इति श्रुत्वा नृपं क्रुद्धः शृङ्गी पितरमभ्ययात् ।
आसीनं गोचरे तस्मिन्वहन्तं शवपन्नगम् ॥ १५
स तमालक्ष्य पितरं शृङ्गी स्कन्धगतेन वै ।
शवेन भुजगेनासीद्भृयः क्रोधसमन्वितः ॥ १६
दुःखाच्चाश्रूणि मुमुचे पितरं चेदमब्रवीत् ।
श्रुत्वेमां धर्षणां तात तव तेन दुरात्मना ॥ १७
राज्ञा परिक्षिता कोपादशपं तमहं नृपम् ।
यथार्हति स एवोग्रं शापं कुरुकुलाधमः ॥ १८
सप्तमेऽहनि तं पापं तक्षकः पन्नगोत्तमः ।
वैवस्वतस्य भवनं नेता परमदारुणम् ॥ १९
तमब्रवीत्पिता ब्रह्मंस्तथा कोपसमन्वितम् ।

C. 1. 1/10
B. 1. 41. 19
K. 1. 41. 20

(D2.5 °ताद्यापि); B2.4.5 °सौ च; T2 G2.3.6 °ता चासौ; G1 M °ता सौम्य (M1.5 तत्र); G4.5 °थासौ. — b) D2 धृतव्रतः. — d) Ñ2 V1 D (except Da D2.4) T1 प्रस्थितो (D5 प्रतीर्ध) गजसाह्वयं.

10 Ś1 K1 S (M1.5 om.) सूतः; Ko.3.4 Ñ1.2 V1 B1 Dn D1.3.7 सौतिरु°. — a) K (except K1) Ñ3 D5 G4–6 M1.5 एतद्; T2 एव (for एवम्). Ś1 Ko.1 G3 M2–4 स; Ñ3 च; D5 T2 G2 M1.5 -स्य; G1 सन् (for तु). G6 ऋषितः सख्युः. — b) Ś1 K1 G3–5 M स्तब्धेव. Ko दिवं तस्त्वेव धिष्ठितः; K2 दिवं भूत्वेव धिष्ठिते; K3 दिदक्षुश्चाधितस्थिवान्; K4 दिधक्षुश्चापि धि°; Ñ1.2 V1 Dn D1.3.6.7 T1 शवं स्कंधे प्रतिष्ठितं; Ñ3 स दिवंस्त्ववं°; B Da D2.4 भृशं स्तब्धेव तस्थिवान्; D5 वाचं तस्य च तिष्ठतः; T2 वाचं तत्रैव वि°; G1 शवं स्कंधेवतिष्ठति; G2 वचस्तब्ध्वैव विस्मितः; G6 वचः स्तब्ध्वा च वि°. — a) G1 M2–4 तेजसा; G2.3 वह्निना (for मन्यु°).

11 a) Ñ1.2 V1 D (except Da D2.4.5) T1 हि (for तु). — d) Ś1 K क्रोधाद्दे(Ko.1 °द्दे)वं°; T2 G2.3.6 M1.5 °समन्वितः; M2–4 क्रोधेन च बं°.

12 Ś1 K1 S om. उवाच. — b) Ñ1.2 V1 D (except Da D2.5.6) T1 ह (for च). — c) K1 मृतं स्कंधे; G1.2.4 कंठे मृतम्. Ś1 K1 Ñ1.2 V1 D (except Da D2.5) T1 समास्रा°; K2 G5. इवास्रा°; T2 इदं स्रा°.

13 a) D5 तमेवम्. K (except K1) B5 D2 G3 अभिसं°. — b) = 19b. Ñ1.2 V1 B D (except D5) T1 पन्नगेश्वरः. — d) Ko.2.4 B4 D5 °नोदितः.

14 c) D5 विप्राणाम°. — After 14, B3 ins. an additional colophon, while Ko.4 ins.:

400* नो चेत्ततस्तक्षकोऽपि यास्यते यममन्दिरम् ।

15 Ś1 missing. Ko.3.4 Ñ1.2 V1 B1 Dn D3.6.7 सौतिरु°; K1 S (G3 om.) सूतः. — a) Ñ1.2 V1 Dn D1.3.4.6.7 T1 -तिसंक्रुद्धः; B Da भृशं शृंगी (B1 क्रुद्धः); B4m D2 नृपं शृंगी. — b) B2–5 Da D2 क्रुद्धः पि°. K2–4 Ñ1.2 V1 B1 D (except Da D2.3.5) T G5 अभ्यगात्; G2.3 अव्ययं. — c) Ñ1.2 V1 B D गोव्रजे; T1 °व्रतः. — d) Ś1 K1 M1.3.4 शाव°; M5 शाप°.

16 a) G4.5 स तमालोक्य; G6 वृद्धमालोक्य; M1.5 समालक्ष्याथ. — D5 (? hapl.) om. 16b–17a. — c) Ś1 K1.4 M1 शावेन; M5 शापे°. — d) Ñ1.3 भृशं (for भूयः). Ñ2 V1 B D (D5 om.) T1 °समाकुलः; Ñ3 G2.3 कोप°; G4.5 °वशं गतः; M1.3 (*inf. lin.* as in text).5 शोक°. — After 16, G1 repeats lines 1 and 3 of 399* (cf. v. l. 2).

17 a) D5 om. 17a (cf. v. l. 16). K1.3 G4.5 om. च. — b) Ś1 K1 °रं चैवम°; D5 चेदं वचनम°; M4 वचनं चेदम°. — After 17b, T2 G1–3 M2–4 ins. शृंगी. — d) K4 कृतां; G6 राज्ञा (for तव).

18 ab) M1.5 °पं तं महानृपं. G6 कोपात्तमशपं तात राजानं दुष्टचेतसं. — c) Ś1 K1 यद्; G2.3 तथा (for यथा). T2 G तथा (G1 नृपं; G2 सदा) चोग्रं; M1.5 स एवोग्रः; M2 सदेवो° (for स ए°). — d) T2 G6 शप्तः कु°.

19 D7 om. 19ab. — b) = 13b. — After 19ab, G1 ins. सूतः, while M (except M1.5) repeat 13cd.

C. 1. 1711
B. 1. 41. 20
K. 1. 41. 21

न मे प्रियं कृतं तात नैष धर्मस्तपस्विनाम् ॥ २०
वयं तस्य नरेन्द्रस्य विषये निवसामहे ।
न्यायतो रक्षितास्तेन तस्य पापं न रोचये ॥ २१
सर्वथा वर्तमानस्य राज्ञो ह्यस्माद्विधैः सदा ।
क्षन्तव्यं पुत्र धर्मो हि हतो हन्ति न संशयः ॥ २२
यदि राजा न रक्षेत पीडा वै नः परा भवेत् ।
न शक्नुयाम चरितुं धर्मं पुत्र यथासुखम् ॥ २३
रक्ष्यमाणा वयं तात राजभिः शास्त्रदृष्टिभिः ।
चरामो विपुलं धर्मं तेषां चांशोऽस्ति धर्मतः ॥ २४
परिक्षित्तु विशेषेण यथास्य प्रपितामहः ।
रक्षत्यस्मान्यथा राज्ञा रक्षितव्याः प्रजास्तथा ॥ २५
तेनेह क्षुधितेनाद्य श्रान्तेन च तपस्विना ।
अजानता व्रतमिदं कृतमेतदसंशयम् ॥ २६
तस्मादिदं त्वया बाल्यात्सहसा दुष्कृतं कृतम् ।
न ह्यर्हति नृपः शापमस्मत्तः पुत्र सर्वथा ॥ २७

इति श्रीमहाभारते आदिपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

— ^{c}) Ñ1.2 V1 B D (except D5) T1 G6 सदनं; M1.5 नगरं.

20 Before 20, Ko.4 ins. शमीक उ°; B3 D4 (marg.) सौतिरु°; T2 G2.6 M (except M1.5) सूतः. — ^{a}) D3.6 मुह्यं; D7 मह्यं (for ब्रह्मन्). — ^{b}) Cf. 16^{d}. D5 क्रोधस°. — After 20^{ab}, K3 Ñ V1 B D (except D5) ins. शमीक उ°; T1 शमीकः. — After 20, Ko.4 ins. a passage of six lines given in App. I (No. 21).

21 ^{c}) G1.4.5 M3.4 न्यायेन. G1–3 °तास्तात. — ^{d}) D4 transp. तस्य and पापं. Ś1 K1.4 B4.5 Da D2.6 T2 G (except G4.5) शापं.

22 ^{b}) B2 Da D2 तु; T2 G (except G1) अपि (for हि). T1 °धैः सह. — After 22, G (except G3.6) ins. 402* (cf. v. l. 26), all om. line 3.

23 ^{a}) Ś1 K1 यतो रा°. Ñ1.2 V1 D (except Da D2.4.5) T1 न संरक्षेत्. — ^{b}) Ñ1.2 V1 B D T1 G1 नः (G1 वै) परमा भवेत् (D5 वै नः सदा भ°). G2 (*inf. lin.* as in text) प्रजा वै नः पराभवत्. — ^{c}) K (except K1) Da1 M (except M1.5) °यामश्च°.

24 ^{b}) Ś1 K1 शस्त्रवृष्टि(K1 °त्ति)भिः; Ñ1.2 V1 B D (except D5) धर्मद°. — ^{c}) K2.4 Ñ3 T G1.4.5 M1.2.4.5 चराम; G2.3 M3 °मि. — ^{d}) K3.4 B Da D2 om. च. G1 तु (for च). Ñ V1 D (except Da D2; D5 corrupt) T G2.3.6 M1.5 भागोस्ति (M1.5 °स्तु). — After 24, Ñ1.2 V1 B D T1 ins.:

401* सर्वथा वर्तमानस्य राज्ञः क्षन्तव्यमेव हि ।
[Cf. 22. — B Da D2.4.5 °मानानां राज्ञां.]

25 ^{c}) Ñ1.2 V1 B D तथा. Ś1 K यथान्यायं (K1 °य्यं). M1.5 रक्षत्वस्मांस्तथा राज्ञो. — ^{d}) Ko.2–4 D5 इति; Ñ1.2 V1 B Dn D2.4.6.7 M1.5 विभो (for तथा). Ś1 K1 रक्षितव्याः (K1 °व्यं) पिता त्विति; Da D1 °व्या प्रजा विभो; D2 °व्यास्तथा विभो.

26 ^{a}) T2 G4.6 M क्षुधितेनै(M2.4 °ने)त्य; G2.3 °तेनेत्थं. — ^{b}) Ko.3.4 च यशस्विना; B1 च तर° (m as in text); S (except T1 G5) मृगलिप्सुना (G6 °प्सया). — ^{c}) Ko.2.4 D5 पापमिदं; K3 Ñ V1 B Da Dn D1.3.4.6.7 T1 G5 कृतं मन्ये; D2 कृतं बाल्यात्; T2 M1.5 कृतमिदं; G2.3.6 कृतं तात. — ^{d}) K3 D2 पापम्; Ñ V1 B Da Dn D1.3.4.6.7 T1 G5 व्रतम्; T2 G2.3.6 ध्रुवम् (for कृतम्). Ñ V1 B Da Dn D1.3.4.6.7 T1 G5 इदं मम; D2 G2.3 न संशयः (for असं°). M1.5 कर्म नैवात्र संशयः. — K3.4 (om. line 6) Ñ (Ñ1 om. line 4) V1 B D T1 ins. after 26: G (except G3.6; all om. line 3), after 22:

402* अराजके जनपदे दोषा जायन्ति वै सदा ।
उद्वृत्तं सततं लोकं राजा दण्डेन शास्ति वै ।
दण्डाद्भयमतिभयं भूयः शान्तिरुत्पद्यते तदा ।
नोद्विग्नश्चरते धर्मं नोद्विग्नश्चरते क्रियाम् ।
राज्ञा प्रतिष्ठितो धर्मो धर्मात्स्वर्गः प्रतिष्ठितः । [5]
राज्ञो यज्ञक्रियाः सर्वा यज्ञाद्देवाः प्रतिष्ठिताः ।
देवावृष्टिः प्रवर्तेत वृष्टेरोषधयः स्मृताः ।
ओषधिभ्यो मनुष्याणां धारयन्सततं हितम् ।
मनुष्याणां च यो धाता राजा राज्यकरः पुनः ।
दशश्रोत्रियसमो राजा इत्येवं मनुरब्रवीत् । [10]

[(L. 1) G1.2.4.5 दोषो जायेत वै तदा. — (L. 2) K3 Da1 D1 G1.2.4.5 उद्धृतं. G1.2.4.5 °जा धर्मेण. — (L. 4) G1.2.4.5 राज्ञा प्रवर्तते धर्मो नोद्विग्नश्चरते प्रजाः. — (L. 5) K3 B1–4 Da D4.5 प्रवर्तते; K4 B5 D2 °वर्त्यते; D1.3 °वर्तितो (for प्रतिष्ठितो). — (L. 8) B4 Da D4.5 धारयेत्; G1.2.4.5 जायते. — (L. 10) D3 सुखदः श्रोत्रियो राजा; G1.2.4.5 सुदुःखः श्रोत्रियः सोम (G1 साम; G4 सोम्य).]
— After 402*, K3.4 Ñ3 B Da D2.4 repeat 26^{cd}; while

३८

शृङ्ग्युवाच ।
यद्येतत्साहसं तात यदि वा दुष्कृतं कृतम् ।
प्रियं वाप्यप्रियं वा ते वागुक्ता न मृषा मया ॥ १
नैवान्यथेदं भविता पितरेष ब्रवीमि ते ।
नाहं मृषा प्रब्रवीमि स्वैरेष्वपि कुतः शपन् ॥ २

शमीक उवाच ।
जानाम्युग्रप्रभावं त्वां पुत्र सत्यगिरं तथा ।
नानृतं ह्युक्तपूर्वं ते नैतन्मिथ्या भविष्यति ॥ ३
पित्रा पुत्रो वयःस्थोऽपि सततं वाच्य एव तु ।
यथा स्याद्गुणसंयुक्तः प्राप्नुयाच्च महद्यशः ॥ ४
किं पुनर्बाल एव त्वं तपसा भावितः प्रभो ।
वर्धते च प्रभवतां कोपोऽतीव महात्मनाम् ॥ ५
सोऽहं पश्यामि वक्तव्यं त्वयि धर्मभृतां वर ।
पुत्रत्वं बालतां चैव तवावेक्ष्य च साहसम् ॥ ६
स त्वं शमयुतो भूत्वा वन्यमाहारमाहरन् ।
चर क्रोधमिमं त्यक्त्वा नैवं धर्मं प्रहास्यसि ॥ ७
क्रोधो हि धर्मं हरति यतीनां दुःखसंचितम् ।
ततो धर्मविहीनानां गतिरिष्टा न विद्यते ॥ ८

C. 1. 1732
B. 1. 42. 8
K. 1. 42. 8

Ñ2 V1 Dn D1.7 T1 G4.5 repeat 26: a further indication of the spurious character of the passage.

27 a) K3 Ñ2.3 V1 B D (except D5) T1 कस्मात्. Ko.2.4 एतत् (for इदं). G2.3 °दं कृतं. — b) G1 स मत्तः; G2 रक्षिता (for अस्मत्तः). T सर्वदा. — After 27, Ko.4 ins. four lines given in App. I (No. 22).

Colophon. *Sub-parvan:* All MSS. except Dn3 आस्तीक (v. l. आस्तिक, अस्तीक). — *Adhy. name:* Ko.2.4 ऋषिशापदानं; Ñ1.2 V1 G2.3 परिक्षिच्छापः. — *Adhy. no.* (figures, words or both): Śi m 48; K3 (*sup. lin. sec. m.*) T 34; Ñ1.2 V1 Dn3 41; D4 m 39; D5 7; G M 24 (G2.3 26; G6 M3 25). — *S'loka no.:* Ñ3 Da1 Dn1.n2 33; Dn3 32. — *Aggregate s'loka no.:* Dn2 1694.

38

1 Śi K1 S (M4 with prefixed श्रीः) शृंगी. — a) Śi यद्येदं (sic); Ko G2.3 यदेतत्; K1 यद्येवं. — c) B4 विप्रियं वा प्रि°. Ko.2.4 D5 T2 G2.3.6 M1.3 अपि. — d) D5 G2.4.5 प्रागुक्ता (D5 °क्तं). Ñ1.2 V1 B D T1 भवेत्; G2.3.6 मम (for मया).

2 a) D3.6.7 न चान्य°; T2 G1.6 °न्यथा तत्; G5 °न्यथावत्; M2.4 °न्यथैवं. G2.3 याव(G3 यत्व)दुक्तं तु भवता. — b) Ko.2.4 B3.4.5 m D5 T2 G पितरेतद् (G2.3 पुनरेव); M1.5 °रेवं. — c) T1 न हि (for नाहं). D4 °हं वृथा. Ñ1.2 V1 B D2–7 T1 ब्रवीम्येवं. — d) D2 संरब्धोपि; D3 स्वैरं वापि. Śi K D5 कुतोन्यथा.

3 Śi D6 S om. उवाच. — a) G2 M2 °प्रतापं. M (except M2) त्वा. — b) K3 Ñ1.2 V1 B D T1 M तात; T2 G2.3.6 तव (for पुत्र). T G2.3.6 सत्यां गिरं. — c) K3 Ñ1.2 V1 B D च (for हि).

4 c) Ñ3 B1.2.4.5 D2.4 G5 °युक्तश्च; B3 Da D5 G4 °युक्तस्तु (for °संयुक्तः).

5 a) G2.3 किं बाल एव त्वं वत्स. — b) K3 द्योतितप्रभः; G1 भावितात्मना. K2.4 D2 प्रभुः; Ñ1.2 V1 B1.2 m Dn D1.3.4.6.7 T1 सदा (for प्रभो). — c) S (except T1 G2.6) चेत् (for च). — d) Śi Ko.1.2 m Ñ3 D5 मनीषिणां; K2–4 मनस्वि° (for महा°). — After 5, D3.6 S (except T1 G3.6 M1.5) ins.:

403* उत्सीदेयुरिमे लोकाः क्षमा चास्य प्रतिक्रिया ।

6 c) Śi K1 पुत्रतां; D2 पुत्र ते. G1.4.5 बालकत्वं च. T2 G2.3.6 M1.5 पुत्रत्वाद्बाल(G2 °ल्य)भावाच्च. — d) Śi K B1.3 Da D2.4.5 तथावे(Śi K1.3 D5 वी)क्ष्य. Ko.2 इह (for च).

7 a) Ñ1.2.3 (*sup. lin. sec. m.*) V1 Dn D1.3.6.7 T शमपरो (Ñ3 orig. corrupt); B Da D2.4 सुसंयतो; G1 M4 °यितो; G2.3 °यिता. — b) Ñ1.2 V1 B4 D (except Da D2.4.5) T1 °माचरन्. G6 नातः साहसमाचर. — c) D2.5 G2.3.6 चरन्. G1 कोपम्. Ñ1.2 V1 Dn D1 T1 हत्वा; B Da D2–4.6.7 हित्वा. — d) K1 D3.4.7 G3.6 M नैव.

8 a) G4.5 °मैं हंतीमं. — b) Ko पूर्वसंचितं. — c) G2.3 तपोधर्मं°. — After 8, Ko.4 ins. two lines given in App. I (No. 23); cf. v. l. 11.

9 a) G4 क्षमैव तु; G5.6 क्षम एव; Cd as in text. M (except M1.5) तु (for हि). — b) Śi सिद्धिदायकः.

C. 1.1783*
B. 1.42. 9
K. 1.42. 9

शम एव यतीनां हि क्षमिणां सिद्धिकारकः ।
क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥ ९
तस्माच्चरेथाः सततं क्षमाशीलो जितेन्द्रियः ।
क्षमया प्राप्स्यसे लोकान्ब्रह्मणः समनन्तरान् ॥ १०
मया तु शममास्थाय यच्छक्यं कर्तुमद्य वै ।
तत्करिष्येऽद्य ताताहं प्रेषयिष्ये नृपाय वै ॥ ११
मम पुत्रेण शप्तोऽसि बालेनाकृतबुद्धिना ।
ममेमां धर्षणां त्वत्तः प्रेक्ष्य राजन्नमर्षिणा ॥ १२

सूत उवाच ।

एवमादिश्य शिष्यं स प्रेषयामास सुव्रतः ।
परिक्षिते नृपतये दयापन्नो महातपाः ॥ १३
संदिश्य कुशलप्रश्नं कार्यवृत्तान्तमेव च ।
शिष्यं गौरमुखं नाम शीलवन्तं समाहितम् ॥ १४
सोऽभिगम्य ततः शीघ्रं नरेन्द्रं कुरुवर्धनम् ।
विवेश भवनं राज्ञः पूर्वं द्वाःस्थैर्निवेदितः ॥ १५
पूजितश्च नरेन्द्रेण द्विजो गौरमुखस्ततः ।
आचख्यौ परिविश्रान्तो राज्ञे सर्वमशेषतः ।
शमीकवचनं घोरं यथोक्तं मन्त्रिसंनिधौ ॥ १६
शमीको नाम राजेन्द्र विषये वर्तते तव ।
ऋषिः परमधर्मात्मा दान्तः शान्तो महातपाः ॥ १७
तस्य त्वया नरव्याघ्र सर्पः प्राणैर्वियोजितः ।
अवसक्तो धनुष्कोट्या स्कन्धे भरतसत्तम ।
क्षान्तवांस्तव तत्कर्म पुत्रस्तस्य न चक्षमे ॥ १८
तेन शप्तोऽसि राजेन्द्र पितुरज्ञातमद्य वै ।
तक्षकः सप्तरात्रेण मृत्युस्ते वै भविष्यति ॥ १९
तत्र रक्षां कुरुष्वेति पुनः पुनरथाब्रवीत् ।
तदन्यथा न शक्यं च कर्तुं केनचिदप्युत ॥ २०
न हि शक्नोति संयन्तुं पुत्रं कोपसमन्वितम् ।

— [a]) Śi1 K1 परलोकः. Ñ3 D5 T2 G2.3.6 M1.5 चापि (for चैव). Ñ3 D5 G2.3 M1.5 तपस्विनां.

10 [a]) K3 पुण्यं तस्माच्चरेथास्त्वं. — [c]) G4.5 लोकं. — [d]) D3 T1 G4.5 समनंतरं.

11 [a]) G6 अहं (for मया). Śi1 K1 अत्र (for तु). — [b]) Śi1 K1 °महँसि. G6 वक्तुं तद्वाक्यमद्य वै. — [c]) K2 °ष्ये तथा शिष्यं; Ñ1.2 V1 B D T1 °ष्यास्यहं तात (B5 शिष्यं); T2 G1–5 M °ष्यामि ताता(G2.3 तत्रा)हं. G6 शिष्यं धर्मभृतस्तात. — [d]) S (except T1) नृपस्य वै. — After 11, K4 ins. two lines given in App. I (No. 23); cf. v. l. 8.

12 [b]) Ñ1.2 V1 B1 बालेन कृश(B1 °त)बु°. — [c]) K (except K1) ममैतां; G4.5 ममैनां.

13 Śi1 K1 S (G3 om.) सूतः; Ko.4 Ñ1.2 V1 B1 D (except Da D2.4.5) सौतिरु°. — [a]) D6 G3 पुत्रं; M1.5 सूतं (for शिष्यं). G1 M2.3 स्वं; G2.3.6 वै. — [d]) K (except K1) Cd कृपापन्नो; D5 दयायानो; G2 यथा वर्क्तुं; G3 यथा°. K1 G1.4.5 महामनाः.

14 [a]) Śi1 K गुणान्वितं.

15 [b]) K4 B4 D1 G (except G6) M (except M1.5) कुलवर्धनं. — [c]) G2.3 भवनद्वारं.

16 [a]) Ñ1.2 V1 D (except Da D2.4.5) T1 G6 तु (for च). — [b]) K2 Ñ1.2 V1 B D G1.3 M (except M1.5) तदा (B4 D7 °था); T1 G2.6 as in B4 D7. — [c]) Ñ1.2 V1 D (except Da D2.4.5) T1 M2.3 (*inf. lin.* as in text).4 च परि-; G4.5 विपरि- (for परिवि-). G2.3 आचख्याव(G2 °वि)परिश्रांतो. — [a]) K3.4 Ñ1.2 V1 B D (except D5) T1 G2 राज्ञः. — [f]) G2.3 मित्रसं°.

17 Before 17, K3 B1.2 ins. ऋषिरु°; Ñ2.3 V1 B3–5 Dn D1–4.7 गौरमुख उ°; D6 T1 G2.3.6 M गौरमुखः. — [a]) Śi1 राजर्षे. — [b]) Ñ1.2 V1 Da1 Dn (except Dn1) transp. विष° and वर्त°. D1 transp. वर्त° and तव. G2.3.6 वसते तव; M1.5 वसतीह ते. — [c]) T2 G2.3.6 M1.5 ऋषिः शमदमोपेतो. — [a]) Śi1 G4.5 M2–4 transp. दान्तः and शान्तः. M2.4 (*sup. lin.* as in text) जितेंद्रियः. T2 G2.3.6 M1.5 मौनव्रतसमन्वितः (G2.3 °परायणः).

18 T2 G2.3.6 transp. 18[b] and 18[d]. — [b]) M1.3 (*inf. lin.* as in text).5 मृगयां परिधावता (=1. 37. 3[b]). — [d]) For 18[d], M1.5 read 18[b]. Ñ1.2 V1 B D T1 स्कंधे मौनान्वितस्य च (B3.5 Da D5 ह). K1 ins. प्रमाणं नवरालम्नयं between °ष्कोट्या and स्कन्धे. — M1.5 om. 18[e/f]. — [e]) G2.3 क्षं(G3 क्षां)तव्य°. Śi1 K1 तात (for तव). — [f]) D5 च नाक्षमत् (for न च°).

19 [ab]) D5 °जेंद्र न पितुः संनिधौ परं. M1.5 तस्य पुत्रेण शप्तोसि श्रुत्वेमां धर्षणां पितुः. — [c]) Śi1 Ko.1 D2 G6 M1.5 तक्षकात्. — [d]) Śi1 K1 Ñ3 T2 G2.3.6 M1.5 transp. ते and वै. Ñ1.2 V1 B D T1 तव (for ते वै).

20 [ab]) T2 G (except G1) तस्य (for तत्र). M (except M1.5) °रभाषत. D5 पुनः पुनरुवाचेदं तव रक्षां कुरुष्विति. — [c]) Śi1 वै; T2 G1–3 M (except M4) हि

ततोऽहं प्रेषितस्तेन तव राजन्हितार्थिना ॥ २१
इति श्रुत्वा वचो घोरं स राजा कुरुनन्दनः ।
पर्यतप्यत तत्पापं कृत्वा राजा महातपाः ॥ २२
तं च मौनव्रतधरं श्रुत्वा मुनिवरं तदा ।
भूय एवाभवद्राजा शोकसंतप्तमानसः ॥ २३
अनुक्रोशात्मतां तस्य शमीकस्यावधार्य तु ।
पर्यतप्यत भूयोऽपि कृत्वा तत्किल्बिषं मुनेः ॥ २४
न हि मृत्युं तथा राजा श्रुत्वा वै सोऽन्वतप्यत ।
अशोचदमरप्रख्यो यथा कृत्वेह कर्म तत् ॥ २५
ततस्तं प्रेषयामास राजा गौरमुखं तदा ।
भूयः प्रसादं भगवान्करोत्विति ममेति वै ॥ २६
तस्मिंश्च गतमात्रे वै राजा गौरमुखे तदा ।
मन्त्रिभिर्मन्त्रयामास सह संविग्नमानसः ॥ २७
निश्चित्य मन्त्रिभिश्चैव सहितो मन्त्रतत्त्ववित् ।
प्रासादं कारयामास एकस्तम्भं सुरक्षितम् ॥ २८
रक्षां च विदधे तत्र भिषजश्चौषधानि च ।
ब्राह्मणान्सिद्धमन्त्रांश्च सर्वतो वै न्यवेशयत् ॥ २९
राजकार्याणि तत्रस्थः सर्वाण्येवाकरोच्च सः ।
मन्त्रिभिः सह धर्मज्ञः समन्तात्परिरक्षितः ॥ ३०
प्राप्ते तु दिवसे तस्मिन्सप्तमे द्विजसत्तम ।
काश्यपोऽभ्यागमद्विद्वांस्तं राजानं चिकित्सितुम् ३१
श्रुतं हि तेन तदभूदद्य तं राजसत्तमम् ।
तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनम् ॥ ३२
तं दष्टं पन्नगेन्द्रेण करिष्येऽहमपज्वरम् ।

C. 1. 1759
B. 1. 42. 35
K. 1. 42. 36

(for च). — [a]) K2 वाक्यं (for कर्तुं).

21 [a]) Ś1 यो न; K1 तव; D7 न च (for न हि). Ñ1.2 V1 Dn D1.3.7 तं यंतुं; D5 तं शसुं. — [b]) B5 क्रोधसं°. — [c]) G2.3 इदानीं प्रे°.

22 Before 22, Ko.2 (marg.).4 B3.4 Dn3 D1.4 ins. सौतिरु°; K3 Ñ2 V1 Dn1.n2 D3.5 (marg.).7 सूत उ°; D6 S (except G3) सूतः. — [b]) G2.3 कुरुणां (!) वरः. — [a]) Ko.4 रोषात्; K2 शोचन; Ñ3 ब्रह्मन्; D6 राजन्. Ko.2–4 Ñ3 महामनाः; D2.5 °यशाः. S (except T1) कृत्वा ब्रह्मन्महात्मनः.

23 [a]) Ñ1.2 V1 Dn D1.3.4.6.7 T1 °व्रतं श्रुत्वा; Da °व्रतचरं. G2.3 तच्च गौरमुखाद्घोरं. — [b]) Ñ1.2 V1 D (except Da D2.5) T1 वने (for श्रुत्वा). Ś1 K1 Ñ3 G1.4.5 ततः; Ko T2 G6 °था (for °दा). G2.3 शापस्य विवरं तदा. — Ś1 K1 D3 (hapl.) om. 23[a]–25[a]. — [a]) Ko G2 °संताप°.

24 Ś1 K1 D3 om. 24 (cf. v. l. 23). — [b]) Ko.3 T2 G4–6 °कस्योपधार्य तु (K3 °धारयन्). Ñ1.2 V1 B D (D3 om.) T1 च (for तु). — [a]) M2.4 transp. कृत्वा and तत्.

25 Ś1 K1 D3 om. 25[a] (cf. v. l. 23). K3 मृत्यु-भयाद्राजा. G (except G3.6) M1.3.5 तदा (for °था). M2.4 °था श्रुत्वा. — [b]) G2.3 दृष्ट्वा वै; M2.4 राजा वै. K3 पर्य°; G3 °पद्यत. — [c]) M1.3.5 °चतामर°.

26 [d]) K2 अद्य; Ñ1.2 V1 B (except B5) D T1 M4 इह (for the first इति). S (except T1) एष (for the second इति). — After 26, B3 ins. an additional colophon; while T2 G (except G3) ins.:

404* श्रुत्वा तु वचनं राज्ञो मुनिगौरमुखस्तदा ।
तमनुज्ञाप्य वेगेन प्रजगामाश्रमं गुरोः ।

27 Before 27, B3 ins. सौतिरु°. — [a]) S (except T1 G1) तु (for च). Ñ1.2 V1 B D T1 अथ; Ñ3 स; T2 G (except G2) M1.5 तु (for वै). — [b]) Ś1 Ko-2 ततः; D3 °था (for °दा). — [a]) G2.3 सर्वैः (for सह). K4 सह संव्यग्र°; B3 D2 सहसोद्विग्न°. Cd has उद्विग्नमनसः (sic).

28 [ab]) Ñ1.2 V1 B D T1 संमंत्र्य (for नि°), and स तथा मंत्र°. M1.3.5 °तो हितमात्मनः. — [a]) G2.3.6 चैक°. D5 एकस्तंभेन र°.

29 [c]) K3 मंत्रसंसिद्धान्; Ñ1.2 V1 B D T1 मंत्र-सिद्धांश्च. — [a]) Ñ1.2 V1 B D T1 न्ययोजयत्; M2.4 °वेद°.

30 [b]) Da °व चकार सः; D3 °व करोति सः. — [c]) G1.2.4–6 मंत्रज्ञैः; G3 M1.5 मंत्रज्ञः. — After 30, K3.4 Ñ2.3 (marg. *sec. m.*) V1 B D T1 ins.:

405* न चैनं कश्चिदारूढं लभते राजसत्तमम् ।
वातोऽपि निश्चरंस्तत्र प्रवेशे विनिवार्यते ।

[(L. 1) K4 B (except B1) D (except Dn) T1 Nilp °दा रोढुं. K4 B1.2.5 Da D2.5 द्विजसत्तम. — (L. 2) Da विचरं°.]

31 [a]) Ñ1.2 V1 B D T1 च; G2 हि (for तु). — [b]) K3.4 Ñ V1 B (except B4) D (except D5) T1 °सत्तमः. — [c]) Ś1 K (except K3) D5 कश्यपो.

32 G1.4.5 transp. 32 and 33. — [a]) G2 कृतं; G3 ज्ञा°. K3 तत्सर्वं; B5 तदहः; D5 तद्धृतं. — [b]) Ko.3 Ñ1.2 V1 B D T1 G5 यथा (for अद्य). — For 32[a], Ko.2.4 G1 subst. 36[a].

C. 1. 1759
B. 1. 42. 35
K. 1. 42. 36

तत्र मेऽर्थश्च धर्मश्च भवितेति विचिन्तयन् ॥ ३३
तं ददर्श स नागेन्द्रस्तक्षकः काश्यपं पथि ।
गच्छन्तमेकमनसं द्विजो भूत्वा वयोऽतिगः ॥ ३४
तमब्रवीत्पन्नगेन्द्रः काश्यपं मुनिपुंगवम् ।
क्व भवांस्त्वरितो याति किं च कार्यं चिकीर्षति॥३५

काश्यप उवाच ।

नृपं कुरुकुलोत्पन्नं परिक्षितमरिंदमम् ।
तक्षकः पन्नगश्रेष्ठस्तेजसाद्य प्रधक्ष्यति ॥ ३६
तं दष्टं पन्नगेन्द्रेण तेनाग्निसमतेजसा ।
पाण्डवानां कुलकरं राजानममितौजसम् ।
गच्छामि सौम्य त्वरितं सद्यः कर्तुमपज्वरम् ॥ ३७

तक्षक उवाच ।

अहं स तक्षको ब्रह्मंस्तं धक्ष्यामि महीपतिम् ।
निवर्तस्व न शक्तस्त्वं मया दष्टं चिकित्सितुम्॥ ३८

काश्यप उवाच ।

अहं तं नृपतिं नाग त्वया दष्टमपज्वरम् ।
करिष्य इति मे बुद्धिर्विद्याबलमुपाश्रितः ॥ ३९

इति श्रीमहाभारते आदिपर्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

३९

तक्षक उवाच ।

दष्टं यदि मयेह त्वं शक्तः किंचिच्चिकित्सितुम् ।
ततो वृक्षं मया दष्टमिमं जीवय काश्यप ॥ १
परं मन्त्रबलं यत्ते तद्दर्शय यतस्व च ।

---

33 For G1.4.5 cf. v. l. 32. — [a]) G1.4.5 M (except M1.5) भुजगेंद्रेण. — [c]) M1.5 मेर्थं च धर्मं च. — [d]) G1.4 M2.3 भवेदिति; G2.3 विद्य(G3 °द्ये)तेति.

34 [b]) M1.5 (? hapl.) om. 34[b]–35[a]. Dn2 D5 G2.3 प्रति (for पथि). K4 M2.4 transp. काश्य° and पथि. — [d]) S (except M1.3.5) वयोधिकः; Cd as in text.

35 M1.5 om. 35[a] (cf. v. l. 34). — [b]) K3 G1 M °सत्तमं; G4.5 द्विज°. — K1 om. 35[c]–36[b]. — [c]) G1 M (except M1.5) क्व वै भवानितो याति. — [d]) Ś1 भोस्त्वं (for कार्यं). Ś1 D6 G3 चिकीर्षसि; D5 °र्षितं.

36 Ś1 D6 S om. उवाच. — K1 om. 36[ab] (cf. v. l. 35). — [d]) Cf. v. l. 32. B1.5 D2 अभि-; B4 वि-; T2 सं- (for अद्य). Ś1 प्रधक्ष्यति स्वतेजसा.

37 [b]) Ñ1.2 V1 Dn °तेजसं. — [c]) M1.5 कुलधरं. G4.5 पांडवेयं महात्मानं. — [e]) Ñ3 S (except G2) त्वरितः. Ñ1.2 V1 B D T1 transp. सौम्य and त्वरि°. — [f]) D5 सखे (for सद्यः). — After 37, G (except G3.6) ins.:

406* विज्ञातविषविद्योऽहं ब्राह्मणो लोकपूजितः ।
अस्माद्रुरुकटाक्षेण कल्योऽहं विषनाशने ।

38 Ś1 K1 D6 S तक्षकः. — [a]) T2 G2.3.6 हि; Cd स (as in text). — [cd]) G2 निवर्तयेथा श°; G3 निवर्तय न श°. G1.4–6 निवर्तस्व मया दष्टं न शक्यं स्याच्चि°.

39 Ś1 K1 D6 S om. उवाच. — [a]) K3 transp. अहं and तं. D5 हि; T2 G तु (for तं). Ñ1.2 V1 B D T1 °तिं गत्वा. — [c]) Ñ2 D (except D2.5) T1 M (except M1.5) करिष्यामीति. — [d]) Ś1 K1 °मु(K1 °म)पाश्रिता. Ñ2 Dn1.n3 D7 M2.4 °समन्विता; B3 D4 T2 G3.6 M1.3.5 °समाश्रितः (G6 M1 °ता; M5 °त); Dn2 D1.3.5.6 T1 °समन्वितः (T1 °तं); G2 °समाश्रयं.

Colophon om. in D2. — *Sub-parvan:* All MSS. (D2 om.) आस्तीक (v. l. आस्तिक, अस्तीक). — *Adhy. name:* Ko.2.4 राज्ञो रक्षाविधानं; K3 तक्षककाश्यपसमागमः; Ñ1.2 V1 काश्यपागमनं; T2 G3 काश्यपतक्षकसंवादः. — *Adhy. no.* (figures, words or both): Ś1 49; Ko 37; K1 9; K3 (marg. *sec. m.*) T 35; Ñ1.2 V1 Dn3 42; B1 41; B2 D3.4m 40; D5 8; G M 25 (G2.3 27; G6 M3 26). — *S'loka no.:* Ñ3 43; Dn 41. — *Aggregate s'loka no.:* Dn2 1735.

39

1 Ś1 K1 D3 S (T2 with prefixed श्री) तक्षकः. — [a]) Ñ1.2 V1 B D T1 transp. दष्टं and यदि. — [b]) Ko.3 B2 कचित्; K2 कं°; M1.3.5 किल. — [c]) G M (except M1.5) transp. वृक्षं and दष्टं. Ś1 इदं; G1 इमं (for मया). Ko.2 Ñ3 दग्धं. — [d]) Ś1 मया; D7 इदं.

2 [b]) D1 G1.4.5 M (except M1.5) दर्शयस्व य°. T1 ततः स्वयं; G2.3 यतव्रत. K2 तद्दर्शयत तत्वतः (m as in text). — [c]) M2.3 °नं दर्शामि. — After 2, M ins.:

407* सूतः ।
एवमुक्तस्तक्षकेण काश्यपः पुनरब्रवीत् ।
[M1.5 om. सूतः.]

न्यग्रोधमेनं धक्ष्यामि पश्यतस्ते द्विजोत्तम ॥ २

काश्यप उवाच ।

दश नागेन्द्र वृक्षं त्वं यमेनमभिमन्यसे ।
अहमेनं त्वया दष्टं जीवयिष्ये भुजंगम ॥ ३

सूत उवाच ।

एवमुक्तः स नागेन्द्रः काश्यपेन महात्मना ।
अदशद्वृक्षमभ्येत्य न्यग्रोधं पन्नगोत्तमः ॥ ४
स वृक्षस्तेन दष्टः सन्सद्य एव महाद्युते ।
आशीविषविषोपेतः प्रजज्वाल समन्ततः ॥ ५
तं दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत् ।
कुरु यत्नं द्विजश्रेष्ठ जीवयैनं वनस्पतिम् ॥ ६
भस्मीभूतं ततो वृक्षं पन्नगेन्द्रस्य तेजसा ।
भस्म सर्वं समाहृत्य काश्यपो वाक्यमब्रवीत् ॥ ७
विद्याबलं पन्नगेन्द्र पश्य मेऽस्मिन्वनस्पतौ ।
अहं संजीवयाम्येनं पश्यतस्ते भुजंगम ॥ ८
ततः स भगवान्विद्वान्काश्यपो द्विजसत्तमः ।
भस्मराशीकृतं वृक्षं विद्यया समजीवयत् ॥ ९
अङ्कुरं तं स कृतवांस्ततः पर्णद्वयान्वितम् ।
पलाशिनं शाखिनं च तथा विटपिनं पुनः ॥ १०
तं दृष्ट्वा जीवितं वृक्षं काश्यपेन महात्मना ।
उवाच तक्षको ब्रह्मन्नेतदत्यद्भुतं त्वयि ॥ ११
विप्रेन्द्र यद्विषं हन्या मम वा मद्विधस्य वा ।
कं त्वमर्थमभिप्रेप्सुर्यासि तत्र तपोधन ॥ १२
यत्तेऽभिलषितं प्राप्तुं फलं तस्मान्नृपोत्तमात् ।
अहमेव प्रदास्यामि तत्ते यद्यपि दुर्लभम् ॥ १३
विप्रशापाभिभूते च क्षीणायुषि नराधिपे ।
घटमानस्य ते विप्र सिद्धिः संशयिता भवेत् ॥ १४
ततो यशः प्रदीप्तं ते त्रिषु लोकेषु विश्रुतम् ।
विरश्मिरिव घर्मांशुरन्तर्धानमितो व्रजेत् ॥ १५

काश्यप उवाच ।

धनार्थी याम्यहं तत्र तन्मे दित्स भुजंगम ।
ततोऽहं विनिवर्तिष्ये गृहायोरगसत्तम ॥ १६

C. 1. 1081
B. 1. 43. 16
K. 1. 43. 16

---

3 M om. काश्यप उ°. Ś1 K1 T1 कश्यपः; Ko.2.4 Da1 कश्यप उ°; D6 T2 G काश्यपः. — b) K3 B1-3 यद्येतम°; Ñ1.2 V1 B4.5 D T1 यद्येतदभि° (D4 यद्येनम°); Ñ3 यमेवम°; G4 यद्येवम°; M4 यमेतम°. — c) G1.4.5 °या दग्धं. — After 3, T2 G1 M ins.:

408* पश्य मन्त्रबलं मेऽद्य न्यग्रोधं दश पन्नग ।

4 Ñ1.3 om. सूत उ°. Ś1 K1 S (G2.3 with prefixed श्री) सूतः; Ko.3.4 Ñ2 V1 B1 D (except Da D2.4.5) सौतिरु°. — a) M1.5 पन्नगेश्वरः.

5 a) Ñ1.2 V1 B D T1 M1.5 तु (for सन्). — b) K2 महामुने; K3 °द्युतिः. Ñ1.2 V1 B D T1 पन्नगेन महात्मना.

6 a) Ś1 (*sup. lin.* as in text) तं दष्ट्वा; G3 संदष्ट्वा; M5 संदग्धं. G1 तं च दष्ट्वा स नागेंद्रः. — c) G2.3 कुरुतत्वं.

7 Before 7, Ś1 K1 S (except G3) ins. सूतः; Ko.3.4 Ñ1.2 V1 B1 Dn D1.3.7 सौतिरु°; K2 Ñ3 B2-5 Da D2.4.5 सूत उ°; D6 सौतिः. — Ko om. 7a-8b. — a) G4.5 °भूते—वृक्षे. M (except M1.5) तु तं (for ततो).

8 Ko om. 8ab (cf. v. l. 7). — Before 8, B3 ins. काश्यप उ°. — b) Ñ1.2 V1 D (except D2.5) T1 G2 मेद्य. — c) Ko.3 Ñ3 (*sup. lin. sec. m.* as in text) अयं; G2.3 अमुं.

9 Before 9, D5 ins. सूत उ°; T2 G M (except M1.5) सूतः. — a) K3.4 ततः सोचिंतयद्विद्वान्; D5 ततः स नागो भग°; G2.3 ततस्तु सहसा वि°. — b) K3 मुनिस°.

10 a) D3.6 S (except T1 M1) सांकुरं. Ñ1.2 V1 Dn D1 T1 कृतवांस्तत्र; M कृतवान्पूर्वं (for स कृ°). — b) Ś1 K D3.6.7 पुनः (for ततः). Ś1 पर्णमया°; K1 °वया°; B5 G1.4.5 पत्र°; G2.3 °फला°; M5 °दला°.

11 a) Ś1 दष्ट्वा तु; B4 दष्ट्वा च; D5 स दष्ट्वा. — cd) K1.3 Ñ V1 B D T G1.6 M ब्रह्मन्नेतद्; G2.3 °न्निदम्; Nilp as in text. D3.6.7 अप्यद्भुतं.

12 a) Ñ1.2 V1 B D T1 द्विजेंद्र. Ś1 K1 सद्विषं; G2 मद्वि°. K1.2 हन्यात्. Ñ3 विप्रेण तद्विषं हत्वा (°न्या *sup. lin. sec. m.*). — c) Ko.2.4 B1.2.4 D2.5 T1 G4.5 M किं त्व°. Ñ3 G6 °भिप्रेक्ष्य; T2 G2.3 M2.4 °भिप्रेत्य. — d) K3 गच्छसे द्विजसत्तम.

13 a) Ś1 K (K3m as in text) Ñ3 अभिकांक्षितं; D3.6 G (except G3.6) °षितुं. — c) G6 तत्तेहं संप्र°. — d) T2 G (except G4.5) निवर्तस्व द्विजोत्तम.

14 a) T2 G2.3 तु; M1.5 अपि (for च). — b) G2.3 °षि नृपोत्तमे. — cd) Ñ3 G2 यतमान°. M1.5 transp. विप्र and सिद्धिः.

15 a) D5 सुदीप्तं; G2.3 प्रतिष्ठां (G3 °ष्टुं). — b) Cf. 1, 2, 12d. — c) Ñ1.2 V1 B D T1 निरंशु°. G2.3

C. 1. 1082
B. 1. 43. 17
K. 1. 43. 17

तक्षक उवाच ।
यावद्धनं प्रार्थयसे तस्माद्राज्ञस्ततोऽधिकम् ।
अहं तेऽद्य प्रदास्यामि निवर्तस्व द्विजोत्तम ॥ १७

सूत उवाच ।
तक्षकस्य वचः श्रुत्वा काश्यपो द्विजसत्तमः ।
प्रदध्यौ सुमहातेजा राजानं प्रति बुद्धिमान् ॥ १८
दिव्यज्ञानः स तेजस्वी ज्ञात्वा तं नृपतिं तदा ।
क्षीणायुषं पाण्डवेयमपावर्तत काश्यपः ।
लब्ध्वा वित्तं मुनिवरस्तक्षकाद्यावदीप्सितम् ॥ १९
निवृत्ते काश्यपे तस्मिन्समयेन महात्मनि ।
जगाम तक्षकस्तूर्णं नगरं नागसाह्वयम् ॥ २०
अथ शुश्राव गच्छन्स तक्षको जगतीपतिम् ।
मन्त्रागदैर्विषहरै रक्ष्यमाणं प्रयत्नतः ॥ २१
स चिन्तयामास तदा मायायोगेन पार्थिवः ।
मया वञ्चयितव्योऽसौ क उपायो भवेदिति ॥ २२
ततस्तापसरूपेण प्राहिणोत्स भुजंगमान् ।
फलपत्रोदकं गृह्य राज्ञे नागोऽथ तक्षकः ॥ २३

तक्षक उवाच ।
गच्छध्वं यूयमव्यग्रा राजानं कार्यवत्तया ।
फलपत्रोदकं नाम प्रतिग्राहयितुं नृपम् ॥ २४

सूत उवाच ।
ते तक्षकसमादिष्टास्तथा चक्रुर्भुजंगमाः ।
उपनिन्युस्तथा राज्ञे दर्भानापः फलानि च ॥ २५
तच्च सर्वं स राजेन्द्रः प्रतिजग्राह वीर्यवान् ।

शीतांशुर्. — [d]) Śi Ki Ñs G1.4.5 इह; Ko.2–4 Ds Gs इव (for इतो).

16 Śi Ki T1 कश्यपः; Ko.2–4 कश्यप उ°; T2 G M काश्यपः. — [a]) M1.5 त्वद्य (for तत्र). — [b]) Gs तद्दत्स्व; M (except M1.5) दित्स (Ms देहि) तन्मे (for तन्मे दित्स). Śi Ki दत्स्व; Ks Ñ1.2 V1 B D T1 देहि; G1.4.5 दिश. — [c]) Gs अस्मात् (for अहं). — [d]) Ñs गृहीतोर°. Ñ1.2 V1 B D T1 स्वापतेयं प्रगृह्य वै (Ds गृहीत्वोरगसत्तम). — After 16, Ds ins.:

409* यत्तेयं च प्रगृह्य वै विनिवर्ते भुजंगम ।

17 Śi Ki S om. उवाच. — [b]) Gs विप्र (for राज्ञः). D1 °द्राजससत्तमात्. — [c]) Ñ1.2 V1 B D T1 एव (Da °वं; Ds °नं; D7 °तत्); M1.5 तेभ्यः. M2–4 धनं तेहं प्र°. — [d]) Ds तपोधन; G2.3.6 M1.5 महामुने. Ñs निवर्त द्विजसत्तम. — After 17, Ko.4 ins. two lines given in App. I (No. 24).

18 Śi Ki S सूतः; Ko.3.4 Ñ1.2 V1 B1 D (except Da D2.4.5) सौतिरु°. — K2 om. 18^{ab}. — [c]) Śi Ki D1 G (except Gs.6) M स (for सु-).

19 [a]) G2.3 °ज्ञानात्. M2.4 °ज्ञानेन ते°. — [b]) M1.5 तु (for तं). Ko.1.3 Ñs T2 G2.3 M1.5 ततः. — [d]) K1.3.4 Da G2.6 उपाव°. — After 19^{cd}, Ds ins. a passage of four lines given in App. I (No. 25). — Before 19^{ef}, T2 ins. सूतः. — [e]) G2 वरं; G3 धनं (for वित्तं). — After 19, Bs ins. an additional colophon.

20 Before 20, Bs ins. सूत उ°. — [a]) G2 °त्ते ब्राह्मणे. — [b]) K4 महामनाः; Dns Ds °मुनिः. — [cd]) Śi transp. तक्षकः and नगरं.

21 [a]) B1–3 Ds गच्छंस्तं. — [b]) G2.3 तं गुप्तं ज°. — [c]) Ñ Dn D1 मंत्रैर्गदैः; Ds मंत्रविद्भिः; G4.5 तत्रागतैः. Ñs विषहणैः. T G2.3.6 M मंत्रैर्विषहरै(M2–4 °णै)र्दिव्यैः; G1 विप्रैर्विषहरैरेव.

22 Before 22, Ñ2 V1 B1.4 Dns D1 ins. सौतिरु°; Ñs B2.3.5 Dn1.n2 D2–7 सूत उ°; T1 सूतः. — [c]) G1.2 मायया वंचित°. M अयं (for असौ).

23 [cd]) Śi फलपातोदकं; Ks Ñs Gs °पात्रो°; B (B4 marg.) D (except Da Ds) Ms °दर्भो°; T1 °पुष्पादिकं; M1.2.4.5 °मूलो° (cf. v. l. 24). Ds transp. गृह्य and राज्ञे. Śi Ki.4 G4.5 राज्ञो. M1.3.5 तस्य राज्ञोथ. M2.4 स (for अथ).

24 T2 G2–6 M1.5 om. तक्षक उ°. Śi Ki Ds.6 T1 G1 M2–4 om. उवाच. — [b]) Ñ1 V1 कार्यचिंतया; M1.3 (*inf. lin.*).5 °गौरवात्. — [c]) Śi फलपातो°; Ko.1.3 Gs °पात्रो°; Ñ2.3 Da1 Dn D1 °पुष्पो°; B (B4 marg.) D2–4.6.7 °दर्भो° (cf. v. l. 23). T2 G1 (by corr.).4.5 नागाः (for नाम). — [d]) Śi Ki °तुं क्षमं.

25 Ds.6.7 T2 M2.4 om. सूत उ°. Śi Ki G M1.3.5 सूतः; Ko.3.4 Ñ1.2 V1 B1 Dn D1 सौतिरु°. — [b]) D5 कर्तुं; G6 निन्युर् (for चक्रुर्). — K1 om. from निन्यु- (25^c) up to गम्यता- (26^a). — [c]) Śi Ko.3 T1 G4 M1.2.5 तदा. M1.3.5 राज्ञो. — [d]) Śi K (K1 om.) D5 दर्भानंबु; D2 दर्भमूल; S (except T1 M4) °नंभः.

26 K1 om. up to गम्यता- (cf. v. l. 25). — [c]) T2 G1.4.5 श्रुत्वा. D1 T2 G6 M (except M1.5) तु (for च). Ñ1.2 V1 B4 D (except D2.4.5) T1 G1–3 transp. च and

Fig. 22.2 Skeleton of a human being

कृत्वा च तेषां कार्याणि गम्यतामित्युवाच तान् ॥ २६
गतेषु तेषु नागेषु तापसच्छद्मरूपिषु ।
अमात्यान्सुहृदश्चैव प्रोवाच स नराधिपः ॥ २७
भक्षयन्तु भवन्तो वै स्वादूनीमानि सर्वशः ।
तापसैरुपनीतानि फलानि सहिता मया ॥ २८
ततो राजा ससचिवः फलान्यादातुमैच्छत ।
यद्गृहीतं फलं राज्ञा तत्र कृमिरभूदणुः ।
ह्रस्वकः कृष्णनयनस्ताम्रो वर्णेन शौनक ॥ २९
स तं गृह्य नृपश्रेष्ठः सचिवानिदमब्रवीत् ।
स्तअमभ्येति सविता विषादद्य न मे भयम् ॥ ३०
सत्यवागस्तु स मुनिः कृमिको मां दशत्वयम् ।
तक्षको नाम भूत्वा वै तथा परिहतं भवेत् ॥ ३१
ते चैनमन्ववर्तन्त मन्त्रिणः कालचोदिताः ।
एवमुक्त्वा स राजेन्द्रो ग्रीवायां संनिवेश्य ह ।
कृमिकं ग्राहसत्तूर्णं मुमूर्षुर्नष्टचेतनः ॥ ३२
हसन्नेव च भोगेन तक्षकेणाभिवेष्टितः ।
तस्मात्फलाद्विनिष्क्रम्य यत्तद्राज्ञे निवेदितम् ॥ ३३ C. 1. 1801 B. 1. 43. 36 K. 1. 43. 36

इति श्रीमहाभारते आदिपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

तेषां. — [a]) K (except K1) Ds.6.7 ह (for तान्).

28 Before 28, Bs ins. परीक्षिदुं; D4 राजोवाच.

29 Before 29, Bs D4 ins. सौतिरुं. — [a]) G2.3.6 अथ (for ततो). — [b]) K (except K1) फलान्यत्तुमियेष सः; D5 °न्यादाय वैच्छत. — After 29[ab], Ñ2.3 V1 Bs.4 (om. line 2).5 Dn D1.4 ins.:

410* विधिना संप्रयुक्तो वै ऋषिवाक्येन तेन तु ।
यस्मिन्नेव फले नागस्तमेवाभक्षयत्स्वयम् ।

— [c]) Ś1 यत्तु त्रातुं; K1 यत्तु त्रातां; Ñ1 यत्तत्र तु; Ñ3 यत्तत्रांतं; V1 यत्तदात्तं; B Da Ds.4.6.7 यत्तद्दत्तं; D2 यत्तु दृत्तं; T2 G (except G1) M1.5 यज्ञ(G2 स ज)ग्राह. B Da D2–4.6.7 राज्ञे; T2 G (except G1) M1.5 राजा. Ñ2 Dn D1 T1 ततो भक्षयतस्तस्य. — [d]) Ñ1.2 V1 Dn D1 T1 फलात्; G2.3 M तस्मिन् (for तत्र). Here and below many MSS. write क्रिमि- for कृमि-, a difference ignored in the foll. readings. B Da D2.4 कृमिस्तत्र भवेदणुः (B2 °ल्पः; B4.5m °थ); Ds.6.7 कृमिस्तत्राभवत्तनुः. — [e/f]) Ś1 ताम्रनयनः कृष्णो व°. Ko.2.3 Ñ1.2 V1 Dn D1 T1 ताम्रवर्णोथ; Bs D2–7 M4 ताम्रव°. Ds.6.7 सोभवत् (for शौ°).

30 [a]) K2 G2.3 तत् (for तं). Ds स गृह्य तं नृ°; D6.7 G1 तं गृह्य नृपतिश्रे°. — Before 30[ab], Bs ins. परीक्षिदुं; D4 राजोवाच. — [d]) Ds विषादस्मात्; T2 °दस्य.

31 [b]) A few MSS. मा (for मां). G3 दशेदयं; G5 °शत्विति. Ś1 K1 कृमिः कोपाद्°; Ñ1.2.3 (*sup. lin. sec. m.*) B D (except D3) T1 कृमिर्मां दशतामयं. — [c]) G4.5 M3.4 transp. भूत्वा and वै. G3 भूतो वै; M2 वै नागः. — [d]) B3 Da परिकृतं.

32 Before 32, Bs D4 ins. सौतिरुं (cf. v. l. 28–9). — [a]) K4 तं; M (except M1.5) न (for ते). K2 B4m G1.3 चैवं; D7 चैतं. Ś1 अनुमन्यंत; Ko B4 Dn D1 T1 °नुवर्तं; G2 °न्वमन्यंत. — [b]) Ko.2.4 D1.5 °नोदिताः; T1 G1 °चोदितः; M (except M1.5) °तं. — [d]) B2 Ds.6.7 संन्य(D3 °नि)वेशयत्; G2.3 तं नियम्य ह. — [e]) G2.3 प्राह तं. M1.3 (*inf. lin.* as in text).5 ग्रहसंस्तूं. — [f]) M (except M1.5) °धुः कालचोदितः.

33 Ds om. 33[ab]. — [a]) K3 हसन्निव च; Ñ1.2 V1 B1–3 Dn D1.2.4 ग्रहसन्नेव; T1 ग्रहसन्निव. T2 G2.3.6 M (except M1.5) नागेन. — [b]) Ś1 K1 °णाभ्यवेष्टयत; Ñ V1 Dn T1 °केण त्व(Ñ3 °णान्व)वेष्टयत; Ñ3 (*sup. lin. sec. m.*) °केन स वेष्टि°; B1–3 D2 °केनान्ववेष्टय(B1 °ष्ट)त; D1 °केन त्ववेष्टयत्; D4 °णान्व°; D5 °क्षकः समवेष्टयत्; G2.3 °णाभ्य°; M1.5 °णाभ्यवेष्टत; M4 *inf. lin.* °णाभ्यवेष्टयत. — [c]) K2 transp. फलात् and विनि°. — [d]) Ś1 K M1.5 राज्ञो. — After 33, K3.4 Ñ2.3 V1 B D T G (except G3) ins.:

411* वेष्टयित्वा च भोगेन विनद्य च महास्वनम् ।
अदशत्पृथिवीपालं तक्षकः पन्नगेश्वरः ।

[(L. 1) K3 B D1.4 तु (for च). Ñ2.3 V1 Dn T1 G1.2 वेगेन.]

Colophon. *Sub-parvan:* All MSS. (except T2) आस्तीक (v. l. आस्तिक, अस्तीक). — *Adhy. name:* Ko.2.4 M1.5 क(M1.5 का)श्यपनि(Ko °श्यप परि)वर्तनं; K3 परीक्षितस्वर्गगमनं; Ñ1.2 V1 तक्षकदंशः. *Adhy. no.* (figures, words or both): Ko 38; K1 50; K3 (*sup. lin. sec. m.*) Ñ3 T 36; Ñ1.2 V1 Dn3 43; B1 42; B2 D4m 41; D5 9; G M 26 (G2.3 28; G3 M3 27). — *S'loka no.:* Ñ3 Da1 Dn 36. — *Aggregate s'loka no.:* Dn2 1771.

४०

C. 1. 1802
B. 1. 44. 1
K. 1. 44. 1

सूत उवाच ।
तं तथा मन्त्रिणो दृष्ट्वा भोगेन परिवेष्टितम् ।
विवर्णवदनाः सर्वे रुरुदुर्भृशदुःखिताः ॥ १
तं तु नादं ततः श्रुत्वा मन्त्रिणस्ते प्रदुद्रुवुः ।
अपश्यंश्चैव ते यान्तमाकाशे नागमद्भुतम् ॥ २
सीमन्तमिव कुर्वाणं नभसः पद्मवर्चसम् ।
तक्षकं पन्नगश्रेष्ठं भृशं शोकपरायणाः ॥ ३
ततस्तु ते तद्गृहमग्निना वृतं
प्रदीप्यमानं विषजेन भोगिनः ।
भयात्परित्यज्य दिशः प्रपेदिरे
पपात तच्चाशनिताडितं यथा ॥ ४
ततो नृपे तक्षकतेजसा हते
प्रयुज्य सर्वाः परलोकसत्क्रियाः ।
शुचिर्द्विजो राजपुरोहितस्तदा
तथैव ते तस्य नृपस्य मन्त्रिणः ॥ ५
नृपं शिशुं तस्य सुतं प्रचक्रिरे
समेत्य सर्वे पुरवासिनो जनाः ।
नृपं यमाहुस्तममित्रघातिनं
कुरुप्रवीरं जनमेजयं जनाः ॥ ६
स बाल एवार्यमतिर्नृपोत्तमः
सहैव तैर्मन्त्रिपुरोहितैस्तदा ।
शशास राज्यं कुरुपुंगवाग्रजो
यथास्य वीरः प्रपितामहस्तथा ॥ ७
ततस्तु राजानममित्रतापनं
समीक्ष्य ते तस्य नृपस्य मन्त्रिणः ।
सुवर्णवर्माणमुपेत्य काशिपं
वपुष्टमार्थं वरयांप्रचक्रमुः ॥ ८
ततः स राजा प्रददौ वपुष्टमां
कुरुप्रवीराय परीक्ष्य धर्मतः ।
स चापि तां प्राप्य मुदा युतोऽभव-

40

1 Śi1 K1 S (G2–5 om.) सूतः; Ko.3.4 B1 Dn8 D1 सौतिरु°. — a) Ñ1.2 V1 Dn ते तथा; G2.3 तत्क्षणात्. — b) D5 भोगिना; T G2.3.6 नागेन. — c) K1 Ñ V1 B D G1 विषण्ण°.

2 a) D3.6 M2–4 च (for तु). B3 (m as in text) G1.5 M2–4 नागं. G1.4.5 M2–4 दृष्ट्वा (for श्रुत्वा). T2 दह्यमानं तथा दृष्ट्वा; G2.3 तं दशंतं तदा द्दं°; G6 M1.5 दह्यं (G6 °हं)तं तं तथा द्दं°. — b) Ko सचिवास्ते. — c) K4 अपश्यंश्चैव वै सर्वे; Ñ1.2 V1 B D T1 °श्यंत (B4 °स्ते) तथा यांतं. — d) K1 अद्भुतं; K4 ते यांतं (for आकाशे). K1.3.4 M नागमुत्तमं.

3 b) K2 D3.6.7 G2 M1.5 °वर्चसः. — d) K1 Ñ3 D4 G2.3 M2.4 °शं कोप°. — After 3, Śi1 K1 ins. ५१; Śi1 marg. ins. an additional colophon: इत्यादिपर्वण्येकपंचाशत्तमोध्यायः(!).

4 b) G2.3 वह्निना (for भो°). — d) K4 Ñ1.2 V1 B D T1 °त राजाशनिताडितो (D2 °पातितो).

5 a) B2 तस्यापि; M1.5 येन्येथ (for ते तस्य).

28 ^{a}) K4 D5 भविता लोके. — ^{b}) T G महायशाः; M त्रिशांपतिः. — ^{c}) K1 इमां यः; D1 स इमां. K3 °रोपांतां; Ñ V1 B D (except D5) °रापांगीं. S स च सर्वां समुद्रांतां. — ^{d}) D5 पालयिष्यति; G3 सम्यग्प्रक्ष्यति.

29 ^{a}) D5 परांश्चाभि°; T1 परस्याभि°; G1 बालस्याभि°. Ko चातिप्र°; K1 साभ्यप्र°; K2 D1 M3 चापि प्र°. — ^{b})

विनिधाय ततो भारं संनिधाय फलानि च ॥ ३०
मया पतिर्वृतो योऽसौ दुःषन्तः पुरुषोत्तमः ।
तस्मै ससचिवाय त्वं प्रसादं कर्तुमर्हसि ॥ ३१

कण्व उवाच ।

प्रसन्न एव तस्याहं त्वत्कृते वरवर्णिनि ।
गृहाण च वरं मत्तस्तत्कृते यदभीप्सितम् ॥ ३२

वैशंपायन उवाच ।

ततो धर्मिष्ठतां वव्रे राज्याच्चास्खलनं तथा ।
शकुन्तला पौरवाणां दुःषन्तहितकाम्यया ॥ ३३

इति श्रीमहाभारते आदिपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

वैशंपायन उवाच ।

प्रतिज्ञाय तु दुःषन्ते प्रतियाते शकुन्तला ।
गर्भं सुषाव वामोरूः कुमारममितौजसम् ॥ १
त्रिषु वर्षेषु पूर्णेषु दीप्तानलसमद्युतिम् ।

C. 1. 2989
B. 1. 74. 2
K. 1. 95. 10

G2.4.5 विक्रांतस्य; G3 M दुःषंतस्य. — [c]) Ko भ्रमिष्य°. — [d]) G3 M स्व(M5 स)चक्रं चक्र°.

30 S (om. it here) reads 30 in the course of passage No. 45 given in App. I (cf. v. l. 23). — [b]) B1.6 त्वथ चाब्र°; B4.5 अथ चाब्र°; S पुनरब्र°. — [c]) K D5 निधाय काय(D5 °यि)कं तच्च (K1 विधाय कालिकं ताश्च); S निधाय कामं तस्यर्षेः. Cd mentions कायकं. — [d]) S कंदानि च फला°.

31 S transp. 31 and 32 (om. कण्व उ°). In S, moreover, 31 recurs (in a slightly altered form) in the course of passage No. 45 given in App. I (cf. v. l. 23). Before 31, Ko.2-4 Ñ V1 B D ins. शकुंतलोवाच; K1 S शकुंतला. — [a]) Dn D1.4 वृतो राजा. — [b]) = 27[b]. S (first time) दैवयोगादिहागतः. — After (the repetition of) 31[ab], S ins.:

618* मम चैव पतिर्दृष्टो देवतानां समक्षतः ।

— [cd]) S (first time) तस्य तात प्रसीद त्वं भर्तां मे सुमहायशाः.

32 For S cf. v. l. 31. S om. कण्व उ°; K1 om. उ°. — [b]) B4.5 त्वदर्थे. — After 32[ab], S ins.:

619* ऋतवो बहवस्ते वै गता व्यर्थाः शुचिस्मिते ।
सार्थकं सांप्रतं ह्येतन्न च पापोऽस्ति तेऽनघे ।

— [c]) G1 त्वं गृहाण वरं. — [d]) K1 D2 S (except G1) त्वत्कृते (K1 °त्ये); Ñ V1 B Da Dn D1.4.5 त्वं शुभे (B4 त्वं च ते).

33 K1 S om. उ°. — After वैशं°, S ins.:

620* इत्येवमुक्त्वा सहसा प्रणिधाय मनस्विनी ।

With 33[ab], cf. 614*. — [a]) M तस्य धर्मिं°. — [b]) S (except T2) राज्ये चास्खलनं (G3 M5 °लितं). — [c]) G3 M (except M5) पौरवस्य. — [d]) Ñ3 °प्रिय° (for °हित°). G3 M दुःषंतस्य हितैषिणी. — After 33, D4 (marg. *sec. m.*) S ins.:

621* एवमस्त्विति तां प्राह कण्वो धर्मभृतां वरः ।
पस्पर्श चापि पाणिभ्यां सुतां श्रीमिव रूपिणीम् ।

कण्वः ।

अद्य प्रभृति देवि त्वं दुःषन्तस्य महात्मनः ।
पतिव्रतानां यद्वृत्तिस्तां वृत्तिमनुपालय ।

वैशंपायनः ।

इत्येवमुक्त्वा धर्मात्मा तां विशुध्यर्थमस्पृशत् ।
स्पृष्टमात्रे शरीरे तु परं हर्षमवाप सा ।

Colophon. *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* T1 संभव. K Ñ V1 B Da Dn1.n2 D1.2.4.5 T2 G1.3-5 M (om. the sub-parvan name) mention only शाकुंतल (Ñ1.2 V1 B3 शकुंतलोपाख्यान). — *Adhy. name:* K4 T2 G1.4 शकुंतलाविवाहः. — *Adhy. no.* (figures, words or both): Ko 68; K1 89; B5 66; Da1 D4 (marg. *sec. m.*) 71; Dn3 72; T1 85; T2 35; G M 36. — *S'loka no.:* Ñ3 Da1 34; Dn1.n3 33; Dn2 32. — *Aggregate s'loka no.:* Dn2 2965.

68

☞ This adhy. is missing in D3; the MS. is *wholly* ignored here.

1 In Ś1, 1-19 are missing (cf. v. l. 1. 61. 84). K1 D5 S om. उवाच. — [a]) Ko.3 च (for तु). — [b]) Ñ V1 Da1 Dn T G शकुंतलां; D4 (by corr.) M6-8 दिने दिने. — After 1[ab], M3.5 ins.:

C. 1. 2969
B. 1. 74. 2
K. 1. 95. 10

रूपौदार्यगुणोपेतं दौःषन्ति जनमेजय ॥ २
जातकर्मादिसंस्कारं कण्वः पुण्यकृतां वरः ।
तस्याथ कारयामास वर्धमानस्य धीमतः ॥ ३
दन्तैः शुक्लैः शिखरिभिः सिंहसंहननो युवा ।
चक्राङ्कितकरः श्रीमान्महामूर्धा महाबलः ।
कुमारो देवगर्भाभः स तत्राशु व्यवर्धत ॥ ४
षड्वर्ष एव बालः स कण्वाश्रमपदं प्रति ।
व्याघ्रान्सिंहान्वराहांश्च गजांश्च महिषांस्तथा ॥ ५
बद्ध्वा वृक्षेषु बलवानाश्रमस्य समन्ततः ।
आरोहन्दमयंश्चैव क्रीडंश्च परिधावति ॥ ६

622* आश्रमे न्यवसत्तत्र काश्यपस्य महात्मनः ।

D4 (marg. *sec. m.*) Sins. after 1[ab] (Ms. 5, after 622*):

623* गर्भश्च ववृधे तस्यां राजपुत्र्यां महात्मनः ।
शकुन्तला चिन्तयन्ती राजानं कार्यगौरवात् ।
दिवारात्रमनिद्रैव स्नानभोजनवर्जिता ।
राजप्रेषणिका विप्राश्चतुरङ्गबलान्विताः ।
अद्य श्वो वा परश्वो वा समायान्तीति निश्चिता । [5]
दिनान्पक्षानृतून्मासानयनानि च सर्वशः ।
गण्यमानानि वर्षाणि व्यतीयुस्त्रीणि भारत ।
त्रिषु वर्षेषु पूर्णेषु ऋषेर्वचनगौरवात् ।
ऋषिपत्न्यः सुबहुशो हेतुमद्वाक्यमब्रुवन् ।
शृणु भद्रे लोकवृत्तं श्रुत्वा यद्वोचते तव । [10]
तत्कुरुष्व हितं देवि नावमान्यं गुरोर्वचः ।
देवानां दैवतं विष्णुर्विप्राणामग्निरेव च ।
नारीणां दैवतं भर्ता लोकानां ब्राह्मणो गुरुः ।
सूतिकाले प्रसूयेति भगवांस्ते पिताब्रवीत् ।
करिष्यामीति कर्तव्यं तदा ते सुकृतं भवेत् । [15]
पत्नीनां वचनं श्रुत्वा साधु साध्वित्यचिन्तयत् ।

[(L. 1) M6–8 गर्भः स. D4 M6–8 राज्ञः पत्न्यां. — D4 T2 G3 M6–8 om. line 3. — (L. 4) M (except M3) °प्रेष्यकरा. D4 G3 M (except M3) °बलैः सह. — (L. 6) M6–8 दिनपक्षमासान्सर्तून्सा गणयामास चायनैः. — Before line 10, T1 G1. 2 M ins. ऋषिपत्न्यः.]

— [c]) K2 गर्भं सुषुवे; Ñ1. 2 V1 B1. 4–6 D2 असूयत च; B3 Da D1 असूत गर्भं. D4 transp. गर्भं and सुषाव. MSS. indiscriminately वामोरूः and °रूः. — [d]) D5 कुमारं चामि°.

2 Ś1 missing. — [b]) B4. 5 कुमारममितद्यु° (cf. 1[d]); S प्र(T2 G4 M6–8 प्रा)जायत शकुंतला. — After 2, D4 (marg. *sec. m.*) S ins.:

624* जाते तस्मिन्नन्तरिक्षात्पुष्पवृष्टिः पपात ह ।
देवदुन्दुभयो नेदुर्ननृतुश्चाप्सरोगणाः ।
गायद्भिर्मधुरं तत्र देवैः शक्रोऽभ्युवाच ह ।
शकुन्तले तव सुतश्चक्रवर्ती भविष्यति ।
बलं तेजश्च रूपं च न समं भुवि केनचित् । [5]
आहर्ता वाजिमेधस्य शतसंख्यस्य पौरवः ।
अनेकैरपि साहस्रै राजसूयादिभिर्मखैः ।
स्वार्थं ब्राह्मणसात्कृत्वा दक्षिणाममितां ददत् ।
देवतानां वचः श्रुत्वा कण्वाश्रमनिवासिनः ।
सभाजयन्तः कण्वस्य सुतां सर्वे महर्षयः । [10]
शकुन्तला च तच्छ्रुत्वा परं हर्षमवाप सा ।
द्विजानाहूय मुनिभिः सत्कृत्य च महायशाः ।

3 Ś1 missing. — [b]) Ñ1 B4 G2. 4. 5 M3 पुण्यवतां. — [c]) Ñ V1 B D विधिवत् (Ñ3 तस्यार्थे); G3 तस्याधि-. — [d]) B5 धर्मतः; S चासकृत्. — After 3, S (except T2) ins.:

625* यथाविधि यथान्यायं क्रियाः सर्वास्त्वकारयत् ।

4 Ś1 missing. — [a]) M5 दंतैः शिखरिभिर्युक्ता. — [b]) K1 भृशं; K2. 3 D5 बृहत्; Ñ2 V1 B Da Dn D1. 2. 4 महान्; T2 G2. 4. 5 [s]भवत्. — After 4[c], T2 G (except G3) ins.:

626* स्वयं विष्णुरिवापरः ।
चतुष्किष्कुर्महातेजाः.

After 4, S ins.:

627* ऋषेर्भयात्तु दुःषन्तः स्मरन्नैवाह्वयत्तदा ।
गते काले तु महति न सस्मार तपोवनम् ।

[(L. 1) T2 G3 °न्नैवास्मरत्तदा; M °न्नपि न चास्मरत् (M5 °न्नानुस्मरंस्तदा). — (L. 2) G2. 4–6 तपोधनां; M3. 5 जनाधिपः.]

5 Ś1 missing. — [a]) Ñ3 D5 °लः सन्. K4 षड्वार्षिकोथ बालोसौ; TG °र्षं (T1 G1 °र्षस्) तु ततो बालः; M °र्षः स तदा बालः. — [c]) Ñ V1 Dn D5 सिंहव्याघ्रान्; B Da D1. 2. 4 सिंहान्व्याघ्रान् (by transp.). — [d]) Dn D1 transp. गजान् and महिषान्. S वृकां(G2 °क्षां)श्च. D2 गजाश्च (*sup. lin.* °श्च-) महिषा°; D4 महिषांश्च निवासिनः. — After 5, D4 S ins.:

628* ऋक्षांश्चापि द्विपानन्यान्व्यालानाश्रमपीडकान् ।
बलाद्भुजाभ्यां संगृह्य बलवान्संनियम्य च ।

[(L. 1) T1 G पद्भ्यां (for अन्यान्). T2 G °श्चाभ्याहनद्व्यालानन्याना°.]

6 For D4 cf. v. l. 7 also. Ś1 missing. D4 om. 6[a]–7[b]. — [a]) Ñ1. 2 V1 B3. 6 Dn D1 बबंध वृक्षे; B1. 4. 5 Da D2

ततोऽस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः ।
अस्त्वयं सर्वदमनः सर्वं हि दमयत्ययम् ॥ ७
स सर्वदमनो नाम कुमारः समपद्यत ।
विक्रमेणौजसा चैव बलेन च समन्वितः ॥ ८
तं कुमारमृषिर्दृष्ट्वा कर्म चास्यातिमानुषम् ।
समयो यौवराज्यायेत्यब्रवीच्च शकुन्तलाम् ॥ ९
तस्य तद्वलमाज्ञाय कण्वः शिष्यानुवाच ह ।
शकुन्तलामिमां शीघ्रं सहपुत्रामितोऽश्रमात् ।
भर्त्रे प्रापयताद्यैव सर्वलक्षणपूजिताम् ॥ १०
नारीणां चिरवासो हि बान्धवेषु न रोचते ।
कीर्तिचारित्रधर्मघ्नस्तस्मान्नयत माचिरम् ॥ ११
तथेत्युक्त्वा तु ते सर्वे प्रातिष्ठन्तामितौजसः ।
शकुन्तलां पुरस्कृत्य सपुत्रां गजसाह्वयम् ॥ १२
गृहीत्वामरगर्भाभं पुत्रं कमललोचनम् ।

C. 1. 3001
B. 1. 74. 14
K. 1. 96. 50

बध्वा च वृक्षे. S दौःषंतिः (for बलं°). — [b]) N (except K1; Ś1 missing; D4 om.) M3. 5 समीपतः. — [c]) Ko. 4 T1 आरोहद्°; B1. 4. 6 Da D1 M आरुह्° (M5 °रुंध°). T2 G (except G1) आरुरोह द्रुमांश्चैव. — [d]) Ko. 2. 4 T2 G3–6 स्म; K1 Ñ3 स; D2 तु (for च). — After 6, D4 (suppl. fol. *sec. m.*) S ins.:

629* वनं च लोडयामास सिंहव्याघ्रगणैर्वृतम् ।
ततश्च राक्षसान्सर्वान्पिशाचांश्च रिपून्रणे ।
मुष्टियुद्धेन तान्हत्वा ऋषीनाराधयत्तदा ।
कश्चिदितिसुतस्तं तु हन्तुकामो महाबलः ।
वध्यमानांस्तु दैतेयान्मर्षी तं समभ्ययात् । [5]
तमागतं ग्रहस्यैव बाहुभ्यां परिगृह्य च ।
दृढं चाबध्य बाहुभ्यां पीडयामास तं तदा ।
मर्दितो न शशाकास्मान्मोचितुं बलवत्तया ।
प्राक्रोशद्भैरवं तत्र द्वारेभ्यो निःसृतं त्वसृक् ।
तेन शब्देन वित्रस्ता मृगाः सिंहादयो गणाः । [10]
सुस्रुवुश्च शकृन्मूत्रमाश्रमस्थाश्च सुस्रुवुः ।
निरसुं जानुभिः कृत्वा विससर्ज च सोऽपतत् ।
तद्दृष्ट्वा विस्मयं जग्मुः कुमारस्य विचेष्टितम् ।
नित्यकालं वध्यमाना दैतेया राक्षसैः सह ।
कुमारस्य भयादेव नैव जग्मुस्तदाश्रमम् । [15]

[In D4 certain additional stanzas (encerpted from S) have been written out on four suppl. fol., *sec. m.*, on a different kind of paper, the suppl. sheets being ins., in the MS., after 19[ab]. — (L. 12) D4 परासुर्दनुजो भूमौ पपात परिपीडितः.]

7 Ś1 missing. D4 om. 7[ab] (cf. v. l. 6). — S ins. after 7[ab]: D4 (marg. *sec. m.*), after 5:

630* कण्वेन सहिता दृष्ट्वा कर्म सर्वेऽतिमानुषम् ।

— [c]) Ñ1. 3 B5 यस्त्वं°. — [d]) Ko सर्वांश्च; K4 सर्वान्हि. Ñ1. 2 V1 Dn D5 S °त्यसौ.

8 Ś1 missing. — [b]) M5 समवर्धत. — [d]) T1 जयेन. — After 8, D4 (suppl. fol. *sec. m.*) S ins.:

631* अप्रेषयति दुःषन्ते महिष्यास्तनयस्य च ।
पाण्डुभावपरीताङ्गीं चिन्तया समभिप्लुताम् ।
लम्बालकां कृशां दीनां तथा मलिनवाससम् ।
शकुन्तलां च संप्रेक्ष्य प्रदध्यौ स मुनिस्तदा ।
शास्त्राणि सर्ववेदाश्च द्वादशाब्दस्य चाभवन् ।

[Before line 1, D4 T2 G3. 6 M3 ins. वैशं°.]

9 Ś1 missing. — [b]) K2 चाप्यति°; K3 चाप्यत्यमा°. — [c]) B4 (m as in text). 5 समर्थो. M °राज्यस्य. — [d]) S इत्यनुध्याय स द्विजः. — After 9, D4 (suppl. fol. *sec. m.*) S (G2 om. from line 32 onward) ins. a passage of 61 lines given in App. I (No. 46).

10 Ś1 missing. G2 om. 10–13. — [ab]) Ñ1. 2 V1 B5 मतम् (for बलम्). S (G2 om.) इत्युक्त्वा सर्वदमनं कण्वः शिष्यानथाब्रवीत्. — [c]) Ñ1. 2 V1 B Da D2 आशु (for शीघ्रं). — [d]) K1 T1 G1 °मिहाश्र°. Ñ2 V1 B Da Dn D1 °तो गृहात्; D5 °तो वनात्. T G3–6 M सपुत्रामाश्रमादितः. — [e]) Ñ3 Dn S (G2 om.) भर्तुः प्रा(M6–8 प्र)पयतागारं (T2 G1. 3–6 °भ्याशं). — [f]) Cf. 1. 15. 3[d] and v. l. K नास्या वासोश्रमे क्षमः (K1 मा स्म वास इह क्षमाः); Ñ3 D5 °संयुतां; Dn M (except M3) °पूजितं.

11 Ś1 missing. G2 om. 11 (cf. v. l. 10). — [a]) Ko. 3. 4 मे; M6–8 वै (for हि). — [b]) K1 शोभते; K2 युज्य°; D5 शस्य°. — [c]) B4 G1 °चारित्र्य°; M °धर्मघ्नं. — [d]) Ñ3 तस्माद्व्रजत. — After 11, D4 (suppl. fol. *sec. m.*) S (except G2) ins. a passage of 28 lines given in App. I (No. 47).

12 Ś1 missing. G2 om. 12 (cf. v. l. 10). — [a]) K4 D1 T2 G3–6 च ते; D5 ततः; T1 G1 M शिष्याः (for सर्वे). — [b]) K1 Ñ1 Dn D1. 4 T2 G3–6 °घ्नंत महौजसः; B3 D2 T1 G1 M °घ्नमिं°. — [d]) Ñ3 सहपुत्रां गजाह्वयं; S (G2 om.) दुःषंतस्य पुरं प्रति.

13 Ś1 missing. G2 om. 13 (cf. v. l. 10). — [a]) Ñ3

C. 1. 80.1
B. 1. 74. 14
K. 1. 96. 50

आजगाम ततः शुभ्रा दुःषन्तविदिताद्वनात् ॥ १३
अभिसृत्य च राजानं विदिता सा प्रवेशिता ।
सह तेनैव पुत्रेण तरुणादित्यवर्चसा ॥ १४
पूजयित्वा यथान्यायमब्रवीत्तं शकुन्तला ।
अयं पुत्रस्त्वया राजन्यौवराज्येऽभिषिच्यताम् ॥ १५
त्वया ह्ययं सुतो राजन्मय्युत्पन्नः सुरोपमः ।
यथासमयमेतस्मिन्वर्तस्व पुरुषोत्तम ॥ १६
यथा समागमे पूर्वं कृतः स समयस्त्वया ।
तं स्मरस्व महाभाग कण्वाश्रमपदं प्रति ॥ १७
सोऽथ श्रुत्वैव तद्वाक्यं तस्या राजा स्मरन्नपि ।
अब्रवीन्न स्मरामीति कस्य त्वं दुष्टतापसि ॥ १८
धर्मकामार्थसंबन्धं न स्मरामि त्वया सह ।
गच्छ वा तिष्ठ वा कामं यद्वापीच्छसि तत्कुरु ॥ १९
सैवमुक्ता वरारोहा व्रीडितेव मनस्विनी ।
विसंज्ञेव च दुःखेन तस्थौ स्थाणुरिवाचला ॥ २०
संरम्भामर्षताम्राक्षी स्फुरमाणोष्ठसंपुटा ।

°गर्भं तं. S (G2 om.) °त्वा चामरप्रख्यं. — a) Ñ3 तदा; B3 वनात्. K (except K1) Ñ V1 Dn D1.4.5 सुभ्रूः; B1.4 Da शुद्धा; D2 साध्वी. S (G2 om.) आजग्मुश्च पुरं रम्यं. — a) Ñ V1 Dn D1.5 दुःषंतं. K1 °निहिताद्. S (G2 om.) दुःषंताध्युषितं व°. — After 13, D4 (suppl. fol. *sec. m.*) S (G2 om. lines 1–14) ins. a passage of 99 lines given in App. I (No. 48); there being an additional colophon after line 64.

14 Ś1 missing. — a) K D5 उपसृ°. K G1 तु (for च). — b) K1 विवृता; S वेदिता. Ñ1.2 V1 B D (except D5) च प्रवे°; G2 प्रतिवे°. — c) S तेन कुमारेण. — d) Ñ1.2 V1 B D (except D5) बालार्कसमतेजसा. — After 14, K4 Dn D1.2.4 ins.:

632* निवेदयित्वा ते सर्वे आश्रमं पुनरागताः ।

D4 (suppl. fol. *sec. m.*) cont.: S ins. after 14:

633* सिंहासनस्थं राजानं महेन्द्रसदृशद्युतिम् ।
शकुन्तला नतशिराः परं हर्षमवाप्य च ।

15 Ś1 missing. — b) K1 सा; Ñ1.2 V1 B D (except D5) च (for तं). — After 15ab, D4 (suppl. fol. *sec. m.*) S ins.:

634* अभिवादय राजानं पितरं ते दृढव्रतम् ।
एवमुक्त्वा सुतं तत्र लज्जानतमुखी स्थिता ।
स्तम्भमालिङ्ग्य राजानं प्रसीदस्वेत्युवाच सा ।
शाकुन्तलोऽपि राजानमभिवाद्य कृताञ्जलिः ।
हर्षेणोत्फुल्लनयनो राजानं चान्ववैक्षत । [5]
दुःषन्तो धर्मबुद्ध्या तु चिन्तयन्नेव सोऽब्रवीत् ।
किमागमनकार्यं ते ब्रूहि त्वं वरवर्णिनि ।
करिष्यामि न संदेहः सपुत्राया विशेषतः ।
शकुन्तला ।
प्रसीदस्व महाराज वक्ष्यामि पुरुषोत्तम ।

— S transp. 15cd and 16ab. — c) S तस्मात्पुत्र°.

16 Ś1 missing. Ñ1 om. 16ab. For S cf. v. l. 15. — a) K2 तव; K4 त्वत्तो (for त्वया). K3 ह्येष. B4.5 त्वदीयोयं. S एष (G1 अयं) पुत्रो हि ते राजन्. — b) Ko °पम; K1 B4.5 °त्तमः; Ñ3 D5 S परंतप (or °पः). — c) D2 यथा स समये त°; T G यथोक्तमाश्रमे (T1 G1 यथावत्समये) त°; M °था त्वं (M3.5 च) समये त°. — d) Ñ1.2 V1 B1.3.6 Da D2 °वेश्वर; T1 G1 M5 °वर्षभ.

17 Ś1 missing. — a) T2 G (except G1) मया (for यथा). Dn D1.4 मत्संगमे; G1 समागते. — b) Ñ1.2 V1 Dn D1.4 यः कृतः स°. Ñ1.2 B5 Dn तथा (for त्वया). — c) K3 B3 D5 तत्स्म°; T2 G (except G1) तत्त्वं स्मर. K (except K3) D5 महाराज; B3.6 T2 G3–6 °बाहो. — After 17, D4 (suppl. fol. *sec. m.*) S ins.:

635* वैशंपायनः ।
तस्योपभोगसक्तस्य स्त्रीषु चान्यासु भारत ।
शकुन्तला सपुत्रा च मनस्यन्तरधीयत ।

G1.2.4.5 cont.:

636* स धारयन्मनस्येनां सपुत्रां सस्मितां तदा ।
तदोपगूह्य मनसा चिरं सुखमवाप सः ।

18 Ś1 missing. — a) Ko.2.3 D1 सोऽश्रु°. T1 M3.5 तु; T2 G3–6 अपि; G1.2 च; M6–8 अथ (for एव). — b) T श्रुत्वा (for तस्या). D1 T1 G1.2 राजन्. M6–8 न सस्मार स्म°. — a) S त्वया भद्रे समागमं. — After 18, D4 (suppl. fol. *sec. m.*) S ins.:

637* मैथुनं च वृथा नाहं गच्छेयमिति मे मतिः ।
नाभिजानामि कल्याणि त्वया सह समागमम् ।

19 Ś1 missing. For D4, cf. v. l. 6. — a) K1 S धर्मार्थकामसं°. — c) T1 शीघ्रं (for कामं).

20 Ś1 resumes. Before 20, S ins. वैशं°. — a) Ś1 K1 एवमुक्त्वा; K2–4 Ñ V1 Da Dn G1.2 M3.7 °मुक्त्वा; T2 एवमु°. T2 तदा तेन (for वरा°). — b) Ś1 K1.3 Dn D1.4 तपस्वि°. — c) Ñ V1 B D G1 निः(D5 अ)सं°. — d) Ñ V1 B D स्थूणेव निश्चला; S विगतचेतना.

कटाक्षैर्निर्दहन्तीव तिर्यग्राजानमैक्षत ॥ २१
आकारं गूहमाना च मन्युनाभिसमीरिता ।
तपसा संभृतं तेजो धारयामास वै तदा ॥ २२
सा मुहूर्तमिव ध्यात्वा दुःखामर्षसमन्विता ।
भर्तारमभिसंप्रेक्ष्य क्रुद्धा वचनमब्रवीत् ॥ २३
जानन्नपि महाराज कस्मादेवं प्रभाषसे ।
न जानामीति निःसङ्गं यथान्यः प्राकृतस्तथा ॥ २४
अत्र ते हृदयं वेद सत्यस्यैवानृतस्य च ।
कल्याण* बत साक्षी त्वं मात्मानमवमन्यथाः ॥ २५
योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥ २६
एकोऽहमस्मीति च मन्यसे त्वं
न हृच्छयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्मणः पापकस्य
यस्यान्तिके त्वं वृजिनं करोषि ॥ २७
मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च स्वश्चैवान्तरपूरुषः ॥ २८
आदित्यचन्द्रावनिलानलौ च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये
धर्मश्च जानाति नरस्य वृत्तम् ॥ २९
यमो वैवस्वतस्तस्य निर्यातयति दुष्कृतम् ।
हृदि स्थितः कर्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति ॥ ३०
न तु तुष्यति यस्यैष पुरुषस्य दुरात्मनः ।

C. 1. 3019
B. 1. 74. 32
K. 1. 98. 13

---

21 b) Ñ V1 B D °माणौष्ठ°. — c) S निर्दहंती(G2.3 °हन्नि)व नेत्राभ्यां.

22 a) K1 सा (for च). G3 आकारेण समा°. — b) Ś1 K1 अपि; Ñ V1 B D T2 G2.4.5 च (D5 अति) (for अभि-). B (except B1) D2 T2 G2.4.5 समीरितं.

23 c) Ś1 K1.2 D5 °रं समभिप्रेक्ष्य. — d) K3.4 Ñ V1 B3.4.6 Da D2 राजानम°. S यथान्यायं वचोब्र°.

24 Before 24, D4 (marg.) G1 M ins. शकुं°. — a) Ñ3 जानन्नाम. — b) Ñ3 किं नु देव. — c) K1.4 Ñ V1 B1m.5 D (except Da2 D5) M6-8 निःशंकं (M6-8 °शंकः); K3 T2 G नः (K3 नौ) संगं. — d) G3 यथा त्वं. Ñ1.2 V1 B D (except D5) °कृतो जनः.

25 a) S यस्य ते. — b) Ñ1.2 V1 B वा; Cd च (as in text). — cd) Ś1 K D1 °णं भव (Ko.2-4 तव; D1 वद) साक्षी त्व(Ko.2-4 साक्षीद)मात्मानं माव°; Ñ V1 B Dn D2.4 °णं वद साक्ष्येण मा°; B3m Da °णं बत साक्षी चेन्मा°; D5 °णं वद साक्षित्वमात्मानं माव°; T G °णं बत साक्षीणा(T1 °त)मात्मानमवमन्यसे; M °णं साक्षिणं चैव मा(M3.5 कस्मादा)त्मानमवमन्यसे. ❀ Dev.: सत्यस्य चानृतस्य च मध्ये यत् कल्याणं तत्तु त्वमेव वेद [।] बत विस्मये । साक्षी पक्षपाती [।] चेतनं (? read आत्मानं) मावमन्यथाः [।] ❀ — Cf. Manu 8. 84.

26 T2 om. 26-27. — a) M6-8 अन्यथा. — b) = 32b. T1 °था सत्सु भाषते. — c) D5 किं त्वया. — d) N (except D4) चौरेण. Ñ2 आत्मापघातिनः; D5 °त्माग्रहा°. — Cf. Manu 4. 255.

27 T2 om. 27 (cf. v. l. 26). — b) Ś1 कविं (for मुनिं). — c) G3 °ता कारणं. Ko.2 पातकस्य. — d) K2.4 Ñ V1 D (except D2) S (T2 om.) तस्यांतिके (G3 °तरे). — S ins. after 27 (T2, which om. 26-27, ins. after 25):

638* धर्म एव हि साधूनां सर्वेषां हितकारणम् ।
नित्यं मिथ्याविहीनानां न च दुःखावहो भवेत् ।

With 27 cf. Manu 8. 91.

28 a) K (except K1) पातकं. — b) K3 B3.5.6 D2 G3.6 M transp. न and कश्चिद्वेत्ति. — c) Ś1 देवाश्चैवं च; K1 चैव तं देवाः. S देवाश्चैनं विदंत्येव (T1 G1 प्रपश्यंति; M6-8 विदंत्यन्ये). — d) Ko.4 तथैवा°; K3 स चैवा°; Ñ V1 D (except Da) T1 G1 यश्चैवा°. T2 G2-6 M भूतानि च (T2 °तांश्चैव; G3 M6-8 °ताश्चापि; M3.5 °यांसोपि) तथापरे. — Cf. Manu 8. 85.

29 a) Ko.1 M5 °वनलानिलौ च; K2.3 B5 D5 T2 G °वनिलोनलश्च. — b) D2 मनश्च; G6 दिशश्च. — d) Ko.2.3 B4.5 धर्मो हि. B3 marg. वृत्तिं. — Cf. Manu 8. 86.

30 a) G3 °स्वतो राजा. — b) = 31d. Ś1 K D5 (? Cd) न (Ko वि-) यातं°; Ñ1 निर्यातं°. ❀ Dev.: न यावयति (sic)। न फलवत्करोति ।❀ — G5 (hapl.) om. 30c-31a. — Cf. Manu 8. 92ab.

31 G5 om. 31 (cf. v. l. 30). — a) Ko.3 M5-8 न च तुं°; T G1-3.6 M3 न तुष्यति च. Ś1 K2 B1 D2.5 G3 यस्यैव. — b) M5 दुष्कृतस्य तुं°. — c) G6 °पकं नूनं. — d) = 30b. Ś1 Ko.1 Ñ3 B1m.5 वियातं°; K2 धिया नं°;

C. 1. 3019
B. 1. 74. 32
K. 1. 98. 18

तं यमः पापकर्माणं निर्यातयति दुष्कृतम् ॥ ३१
अवमन्यात्मनात्मानमन्यथा प्रतिपद्यते ।
देवा न तस्य श्रेयांसो यस्यात्मापि न कारणम् ॥ ३२
स्वयं प्राप्तेति मामेवं मावमंस्थाः पतिव्रताम् ।
अर्घ्यार्हां नार्चयसि मां स्वयं भार्यामुपस्थिताम् ॥ ३३
किमर्थं मां प्राकृतवदुपप्रेक्षसि संसदि ।
न खल्वहमिदं शून्ये रौमि किं न शृणोषि मे ॥ ३४
यदि मे याचमानाया वचनं न करिष्यसि ।
दुःषन्त शतधा मूर्धा ततस्तेऽद्य फलिष्यति ॥ ३५
भार्यां पतिः संप्रविश्य स यस्माज्जायते पुनः ।
जायाया इति जायात्वं पुराणाः कवयो विदुः ॥ ३६
यदागमवतः पुंसस्तदपत्यं प्रजायते ।
तत्तारयति संतत्या पूर्वप्रेतान्पितामहान् ॥ ३७
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ ३८
सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ ३९
अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा ।
भार्या मूलं त्रिवर्गस्य भार्या मित्रं मरिष्यतः ॥ ४०
भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः ।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः ॥ ४१
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥ ४२
कान्तारेष्वपि विश्रामो नरस्याध्वनिकस्य वै ।

K4 (? Cd) विघात°; G4 तिर्यङ्ग°. ❀Dev.: विशेषेण घातयति । यातना करोति ।❀

32 a) K3 °मन्य महात्मानं; Ñ1.2 V1 B D M3 योवम°; Ñ3 °मन्यान्यथात्मा°; T G (except G2) M5–8 °मत्यात्म°. — b) = 26b. G3 °था यः करिष्यति. — c) Ñ1.2 V1 B Da Dn D2.4 न तस्य देवा श्रे°; D1 नास्य देवा न श्रे°. — d) T1 °त्मा न हि का°; G6 सोस्य नात्मापि का°.

33 a) S °ति मैवं (M3.6–8 चैवं) मां (T मा). — b) G M3.5 अवमं°. — c) Ko.2 Ñ V1 B D G5 अर्चार्हां; G3 पूजा°.

34 a) K2 °र्थं त्वं. — b) K4 D2 G3 उपेक्षसि च (K4 ह); D4 त्वमुपेक्ष्यसि. Cd mentions उपेक्षसि. — c) Ś1 T1 G1.6 M शून्यं; T2 G2.4.5 राजन्. K1 न खल्विदमहा (read °हं) रौमि. — d) K1 शून्ये किं. S करोमि न (M6–8 न करोमि) शृ°.

35 c) Ś1 K1 शतशो. S °धा त्वद्य. — In Ś1, the portion from 35d–46 is lost on the missing upper half of a fol. (53). — d) Ñ1 हनिष्यति; Ñ2 V1 Dn D1.4 स्फुटि°; D5 पति°. S मूर्धा ते विफलि(G3 तेपि भवि)ष्यति.

36 Ś1 missing (cf. v. l. 35). — a) T2 G (except G3.6) जायां. T1 पतिः स्वां प्र°. — b) S स तस्यां जा°. — c) Ñ1.2 V1 B D (except D2.5) तद्धि (for इति). — d) Ñ1.2 V1 B D (except D5) पौरा°. S यदस्यां (T1 यद्य°; G2.5 यत्त्व°; G6 यस्त°; M6–8 यत्त°) जायते पुनः (T1 G1.3 M6.7 सुतः; G6 ततः). — Cf. Manu 9. 8.

37 Ś1 missing (cf. v. l. 35). — a) Ko.2.4 Da1 D5 G6 सदा°. — b) K (except K4) Da1 D5 G6 य(K1 स)दप°. — c) B4 उक्ता°; S (except G3.6 M3.5) संता° (T1 यत्ता°).

38 = (var.) Manu 9. 138. — Ś1 missing (cf. v. l. 35). — a) K2.3 Ñ3 S पूर्वमेव स्वयंभुवा (M5 पूर्वैरपि महर्षिभिः). — After 38, K4 S Nilp ins.:

639* पुत्रेण लोकाञ्जयति पुत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पुत्रेण मोदन्ते प्रपितामहाः ।

[Nilp पौत्रेण (for पुत्रेण both times), जयते, and पौत्रस्य (for पुत्रस्य).]

39 Ś1 missing (cf. v. l. 35). — b) T2 G2.4.5 प्रजायते. — d) T G3 या पतिप्रिया; G1.6 M यातिथिप्रिया.

40 Ś1 missing (cf. v. l. 35). — a) K1 शरीरस्य. — After 40a, K3 ins.:

640* शरीरं प्रोच्यते बुधैः ।
भार्या श्रेष्ठतमा लोके.

— b) T2 G2.4.5 °तमा. — d) K2 Ñ V1 B D (except D5) मूलं (for मित्रं). K1 मुमूर्षतः; Ñ1.2 V1 B D2 तु संततेः; Ñ3 Da Dn D1.4 तरि°. S यः सभार्यः (T1 G2 यस्य भार्या) स बंधुमान् (G3 चोत्तमः) (G1 partly broken & corrupt).

41 Ś1 missing (cf. v. l. 35). — a) G3 पतिभक्तिमती या तु. — b) K1 सततं; G3 सा भार्या. — d) B4 सुखा(m क्रिया)न्वि°; S (except G1 M6) श्रियावृताः.

42 Ś1 missing (cf. v. l. 35). — a) Ko.4 G1.6

यः सदारः स विश्वास्यस्तस्मादाराः परा गतिः ॥ ४३
संसरन्तमपि प्रेतं विषमेष्वेकपातिनम् ।
भार्यैवान्वेति भर्तारं सततं या पतिव्रता ॥ ४४
प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते ।
पूर्वं मृतं च भर्तारं पश्चात्साध्व्यनुगच्छति ॥ ४५
एतत्सात्कारणाद्राजन्पाणिग्रहणमिष्यते ।
यदाप्नोति पतिर्भार्यामिह लोके परत्र च ॥ ४६
आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः ।
तस्माद्भार्यां नरः पश्येन्मातृवत्पुत्रमातरम् ॥ ४७
भार्यायां जनितं पुत्रमादर्शे स्वमिवाननम् ।
ह्लादते जनिता प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत् ॥ ४८
दह्यमाना मनोदुःखैर्व्याधिभिश्चातुरा नराः ।
ह्लादन्ते स्वेषु दारेषु घर्मार्ताः सलिलेष्विव ॥ ४९
सुसंरब्धोऽपि रामाणां न ब्रूयादप्रियं बुधः ।
रतिं प्रीतिं च धर्मं च तास्वायत्तमवेक्ष्य च ॥ ५०
आत्मनो जन्मनः क्षेत्रं पुण्यं रामाः सनातनम् ।

C. 1. 3039
B. 1. 74. 52
K. 1. 98. 42

M6-8 सहायाः; Ñ1 °हायः; T1 G3 M3 °भार्याः; M5 साहाय्याः.

43 Ś1 missing (cf. v. l. 35). — a) K2 G3.6 M6-8 °ष्वथ. Ko.4 विश्वासो. — b) Ñ V1 B D T1 G1.3.6 M जनस्या°. — c) G3 यस्य दाराः; M5 यः सभार्यः. K2 D2 यस्माद्दारेषु विश्वासः. — d) G6 सदा गतिः.

44 Ś1 missing (cf. v. l. 35). — a) B4.5 संस्मरं°; D2 संसेवं°. K1.4 D2 T G2.4.5 M6-8 °भिप्रेतं. — b) Ko.2.4 °ष्वेकपातितं; D5 G1 °ष्वेव पातिनं; G2.5 °ष्वेव पातितं. — c) K4 G3 भार्या चान्वेति; D2 °वाभ्येति. — K3 (hapl.) om. 44c-45c. — d) G3.6 वै (for या).

45 Ś1 missing (cf. v. l. 35). K3 om. 45abc (cf. v. l. 44). — Ñ1.2 V1 (hapl.) om. 45b-46c. — c) S पूर्वप्रेतं तु. — d) T1 साभ्यनु°; T2 G1.6 M6-8 सा ह्यनु° G2.4.5 M3.5 साप्यनु°; G3 सा ह्युप°.

46 Ś1 missing (cf. v. l. 35). Ñ1.2 V1 om. 46abc (cf. v. l. 45). — d) S अस्मिन् (for इह). — After 46, S ins.:

641* पोषणार्थं शरीरस्य पाथेयं स्वर्गतस्य वै ।

47 Ś1 resumes. — a) D5 आत्मनात्मैव; T G2.4-6 M6.7 आत्मात्मना च; G1 M3.8 आत्मनात्मा च; G3 आत्मना चात्मा. — b) B4.5 सुत इ°. K3 इत्यभिधीयते. — M6-8 om. 47cd. — c) T G M3.5 °र्यां पतिः. — S ins. after 47 (M6-8, after 47ab):

642* अन्तरात्मैव सर्वस्य पुत्रो नामोच्यते सदा ।
गती रूपं च चेष्टा च आवर्ता लक्षणानि च ।
पितॄणां यानि दृश्यन्ते पुत्राणां सन्ति तानि च ।
तेषां शीलगुणाचाराः संपर्काच्च शुभाशुभात् ।
(cf. 669*).

48 a) G6 भार्यानुनीतं तं पुत्रं. — b) Ñ V1 B D (except D5) °शैंष्विव चान°. — c) T2 G6 M transp. ह्लाद° and जनि°. D2 मनुजः (for जनि°). Ñ1 जायते जनितं प्रे°; T2 G1-5 जनिता मोदते प्रे°. — After 48, S (G6 om. lines 6-7) ins.:

643* पतिव्रतारूपधराः परबीजस्य संग्रहात् ।
कुलं विनाश्य भर्तॄणां नरकं यान्ति दारुणम् ।
परेण जनिताः पुत्राः स्वभार्यायां यथेष्टतः ।
मम पुत्रा इति मतास्ते पुत्रा अपि शत्रवः ।
द्विषन्ति प्रतिकुर्वन्ति न ते वचनकारिणः । [5]
द्वेष्टि तांश्च पिता चापि स्वबीजे न तथा नृप ।
न द्वेष्टि पितरं पुत्रो जनितारमथापि वा ।
न द्वेष्टि जनिता पुत्रं तस्मादात्मा सुतो भवेत् ।

49 a) G2.4.5 °माना जना. — b) S °भिस्तुमुलैर्. Ñ1 D2 S जनाः (T1 G4 जनैः; M6-8 अपि). — c) Ñ1 T2 मोदंते. T1 G1.3.6 M ते स्व(G3 तेन्य)दारेषु तुष्यंति. — d) For M6-8 see below. — After 49, S ins.:

644* विप्रवासकृशा दीना नरा मलिनवाससः ।
तेऽपि स्वदारांस्तुष्यन्ति दरिद्रा धनलाभवत् ।

[M6-8 (hapl.) om. 49cd as also line 1 and the first half of line 2 of 644*. — (L. 2) For first half cf. v. l. 49c.]

50 a) Ko.4 पुमान्क्रुद्धोपि; T1 G3.6 M अप्रियोक्तोपि (M5.6 हि); T2 G1.2.4.5 सुसंक्रुद्धो°. K2 T2 G2.4.5 दाराणां; Ñ3 स्त्रां रामां; T1 G1.3.6 M नारी°. — b) Ñ V1 B D न कुर्या°. K4 T1 G1.3.6 M वचः; Ñ V1 B D (except D5) नरः (for बुधः). — c) G2.4.5 M7.8 रतिः प्रीतिश्च (M7.8 °तिः स्व-) धर्मं(M7.8 °र्मो)श्च. M5 धर्माश्च; M6 धर्माश्च. — d) T2 G1.2.4.5 तदायत्तम्; M3.5 तास्वायत्तान्. K1.2.4 D5 ह; Ñ V1 B (except B5) Da Dn D1.2.4 हि; M6-8 तु (for च). — After 50, S ins.:

645* आत्मनोऽर्धमिति श्रौतं सा रक्षति धनं प्रजा ।
शरीरं लोकयात्रां वै धर्मं स्वर्गमृषीन्पितॄन् ।

51 b) T G3-6 M पुण्याः. T1 दाराः; G3 लोकाः (for रामाः). G1.2 पुण्यदाराः. S (except T1) °तनाः. — d) Ś1 K1 रामा ऋते; D1 °इते; G3 कामाद्दते. M6-8

C. 1. 3089
B. 1. 74. 52
K. 1. 98. 43

ऋषीणामपि का शक्तिः स्रष्टुं रामामृते प्रजाः ॥ ५१
परिपत्य यदा सूनुर्धरणीरेणुगुण्ठितः ।
पितुराश्लिष्यतेऽज्ञानि किमिवास्त्यधिकं ततः ॥ ५२
स त्वं स्वयमनुप्राप्तं साभिलाषमिमं सुतम् ।
प्रेक्षमाणं च काक्षेण किमर्थमवमन्यसे ॥ ५३
अण्डानि बिभ्रति स्वानि न भिन्दन्ति पिपीलिकाः ।
न भरेथाः कथं नु त्वं धर्मज्ञः सन्स्वमात्मजम् ॥ ५४
न वाससां न रामाणां नापां स्पर्शस्तथा सुखः ।
शिशोरालिङ्ग्यमानस्य स्पर्शः सूनोर्यथा सुखः ॥ ५५
ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ।
गुरुर्गरीयसां श्रेष्ठः पुत्रः स्पर्शवतां वरः ॥ ५६
स्पृशतु त्वां समाश्लिष्य पुत्रोऽयं प्रियदर्शनः ।
पुत्रस्पर्शात्सुखतरः स्पर्शो लोके न विद्यते ॥ ५७
त्रिषु वर्षेषु पूर्णेषु प्रजाताहमरिंदम ।
इमं कुमारं राजेन्द्र तव शोकप्रणाशनम् ॥ ५८
आहर्ता वाजिमेधस्य शतसंख्यस्य पौरव ।
इति वागन्तरिक्षे मां सूतकेऽभ्यवदत्पुरा ॥ ५९
ननु नामाङ्कमारोप्य स्नेहाद्गामान्तरं गताः ।
मूर्ध्नि पुत्रानुपाघ्राय प्रतिनन्दन्ति मानवाः ॥ ६०
वेदेष्वपि वदन्तीमं मन्त्रवादं द्विजातयः ।

स्रष्टुकामादृते. Ñ V1 Dn D5 प्रजां. — After 51, Da1 ins. a passage of 15 lines given in App. I (No. 49); while S ins.:

646* देवानामपि का शक्तिः कर्तुं संभवमात्मनः ।
पण्डितस्यापि लोकेषु स्त्रीषु सृष्टिः प्रतिष्ठिता ।
ऋषिभ्यो ऋषयः केचिच्चण्डालीष्वपि जज्ञिरे ।

After the above, G1 ins. the last line of 659*.

52 [a]) Ko परिवर्त्य; Ñ V1 Da Dn D1.4 प्रतिपद्य; D5 प्रणि°; S °सृत्य. G3 यदा रेणुर्. — [b]) Ko.4 °पांशुगुं°; S °रेणुकुं° (G3 °ष्ववकुं°). — [c]) S पितुरालिंगते (G3 पितृभ्यो लिह्यते). — [d]) K2 किमिहा°. Ñ1.2 V1 B D (except D5) किमस्त्यभ्य°; T G °वाभ्य° (T1 G2 °वाप्य°; G3 °हाभ्य°). M किं ततोस्त्यधिकं सुखं.

53 [a]) S त्वं सूनुम्. Ñ V1 B D (except D5) °मभि(D2 °पि)घ्रा°. — [b]) K1 °षं सुतं त्विमं; S °षं मनस्विनं. — [c]) A few MSS. प्रेक्ष्य°. K3 च कात्स्न्र्येन; K4 Ñ V1 B D T2 G1.2.4.5 कटाक्षेण; T1 कांक्षमाणं; G3 M च कांक्षेण; G6 च कांक्ष्येनं.

54 [a]) Ś1 K1 अंडजा; G3 अंगानि. Ś1 K1 B1m.4.5 बिभ्रतः. — [b]) Ś1 K1 विद्यंते; S त्यजंति. — After 54[ab], T1 G1.3.6 M ins. (for the first time) line 2 of 648*. — M5 om. 54[cd]. — [c]) Ś1 K1 नाम; K3 त्वं तं; T1 G1 राजन् (for नु त्वं). — [d]) K1 धर्मिष्ठः. D4 °ज्ञ त्वं स्व°; T G4.5 मज्जातं स्वय(T1 स्वं त)मा°; G1.2 मम जातं स्व°; G3 अज्ञातः स्वयमा°; G6 अज्ञातं स्वं स्व°; M3 अजानन्निव चात्म°; M6-8 अज्ञानात्स्वमिवात्म°. — After 54, S ins.:

647* ममाण्डानीति वर्धन्ते कोकिलाण्डानि वायसाः ।
किं पुनस्त्वं न मन्येथाः सर्वज्ञः पुत्रमीदृशम् ।
मलयाच्चन्दनं जातमतिशीतं वदन्ति वै ।
शिशोरालिङ्गनं तस्माच्चन्दनादधिकं भवेत् ।

55 [a]) T2 G2.5 रत्नानां (for रामा°). — [b]) T2 G2.4.5 अंगस्प°. Ñ2.3 V1 B D T G M3 तथाविधः (G6 तथापि च). — [c]) M6-8 शिशूनालिं° (sic). — [d]) G1 स्पर्शे सूनौ; M5 पितुः स्पर्शे. Some MSS. -सुखं.

56 In S the sequence of 56-57 is: 57[cd], 57[ab], 56. — [b])=1. 1. 202[b]. B Da °ष्टश्रुतु°.

57 For S cf. v. l. 56. — [a]) G2 स्पर्शं कृत्वा. S समालिंग्य. — After 57[ab], Da1 ins. a passage of 6 lines given in App. I (No. 50). — K2 om. 57[c]-58[a]. — [c]) K3 °शांतु परमः; K4 T G1.4.5 M3.5 °शांत्प्रियतर. — [d]) Ñ3 °शों भुवि.

58 K2 om. 58 (cf. v. l. 57). — [b]) Ko.1.4 Da1 D2 प्रसूताह°; K3 (by corr.) S प्रजातोय°. S (except G3) °दमः. — After 58[ab], S (except G6) ins.:

648* अद्यायं मन्नियोगात्तु तवाह्वानं प्रतीक्षते ।
[M अहं मन्ये मन्नियोगात्त्वाह्वानं प्रतिष्ठते.]

— [c]) Ko इमं पुत्रं तु. S कुमारो राजशार्दूल. — Ś1 Ñ1.2 V1 B D (except D5) °विनाशनं; S °शनः.

59 [b]) S पौरवः (G5 भूपते). — After 59[ab], S ins.:

649* राजसूयादिकानन्यान्क्रतूनमितदक्षिणान् ।

— [c]) S इति गौरंत°. — [d]) M सूत(M3.5 °ति)कालेवदत्.

60 [a]) T G1.3.6 ततो; G2.5 हंत; G4 अतो; M तथा (for ननु). B4.6 S स्वमंकमा°. Ñ3 बाहुना स्वांकमा°. — After 60[a], G3 ins.:

650* मूर्ध्न्युपाघ्राय पुत्रकम् ।
एवं हि पुत्रेणान्येऽपि.

— [b]) Ś1 K1 ग्रामाद्गा°. — [c]) Ś1 K D5 पुत्रमुपा°.

61 [a]) A few MSS. देवेष्व°. K1 वदंत्येवं. — [b]) K1

जातकर्मणि पुत्राणां तवापि विदितं तथा ॥ ६१
अङ्गादङ्गात्संभवसि हृदयादभिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ ६२
पोषो हि त्वदधीनो मे संतानमपि चाक्षयम् ।
तस्मात्त्वं जीव मे वत्स सुसुखी शरदां शतम् ॥ ६३
त्वदङ्गेभ्यः प्रसूतोऽयं पुरुषात्पुरुषोऽपरः ।
सरसीवामलेऽऽत्मानं द्वितीयं पश्य मे सुतम् ॥ ६४
यथा ह्याहवनीयोऽग्निर्गार्हपत्यात्प्रणीयते ।
तथा त्वत्तः प्रसूतोऽयं त्वमेकः सन्द्विधा कृतः ॥६५

मृगापकृष्टेन हि ते मृगयां परिधावता ।
अहमासादिता राजन्कुमारी पितुराश्रमे ॥ ६६
उर्वशी पूर्वचित्तिश्च सहजन्या च मेनका ।
विश्वाची च घृताची च षडेवाप्सरसां वराः ॥ ६७
तासां मां मेनका नाम ब्रह्मयोनिर्वराप्सराः ।
दिवः संप्राप्य जगतीं विश्वामित्रादजीजनत् ॥ ६८
सा मां हिमवतः पृष्ठे सुषुवे मेनकाप्सराः ।
अवकीर्य च मां याता परात्मजमिवासती ॥ ६९
किं नु कर्माशुभं पूर्वं कृतवत्यस्मि जन्मनि ।

C. 1. 3058
B. 1. 74. 71
K. 1. 98. 81

M5 मंत्रवादे; Ñ2 V1 B1.5 Da Dn D1.4 °ग्रामं; B3.4.6 (m as in text) D2 °जातं. — c) Ś1 K Ñ3 D5 °कर्मसु. — d) Ś1 K1 B4–6 यथा; D2 तव; S ध्रुवं.

62 b) Ko Ñ V1 B3 D (except D1.2) S °यादधिजा°. — d) Ś1 K1 त्वं जीव; Ñ1.2 V1 B Da2 D5 संजी°. Ś1 K2.3 B1 Da1 Dn2 शरदां. — After 62, S ins.:

651* उपजिघ्रन्ति पितरो मन्त्रेणानेन मूर्धनि ।

63 Ś1 K1 Da1 (hapl.) om. 63. — a) Ko लोको हि; K2.4 B4.5 पोष्यो हि; Ñ1.2 V1 योसौ हि; Ñ3 पौत्रादि; Dn D1.4 जीवितं; D2 जीवो हि; D5 योगो हि; T1 एषो हि; G1.2 M पोषणं; G4.5 पोषितं. B Da2 D2 T1 °धीनोयं; Dn D1.4 G1.2.4.5 M °धीनं मे; T2 G6 °धीनोसौ. — b) Ñ1.2 V1 B Da2 D2 संतानोपि (Ñ1.2 V1 हि) तवाक्षयः. — c) Ko.2.4 B3.5 D2 जीवसे. Ko Ñ1.2 V1 B Da2 Dn D1.2.4 T2 पुत्र (for वत्स). — d) K2.3 D2 T1 G1.3.6 M7 स सुखी; T2 स जीव; G2 सुवेश; G4.5 सुखीव. Ko.3.4 T2 G5 शरदः. — After 63, S ins.:

652* एको भूत्वा द्विधा भूत इति वादः प्रदृश्यते ।
[T1 M3.6–8 प्रशस्यते; M5 °वर्तते.]

64 In Ś1, the portion from प्रसूतोऽयं up to तयोरपत्यं (in 75) is lost on the missing upper half of a fol. (53). — a) G4.5 प्रभूतो°. — b) K1 पुरुषः पुरुषापरः; D2 M5 त्वमेकः सन्द्विधा कृतः (=65d). — D2 reads 64cd after 65. G1 om. 64cd. — c) G3 सलिले चाम°. B6 °लं पद्मं. — d) Ñ V1 B5.6 Dn D1.4.5 वै; S (G1 om.) ते (for मे). — T G3–6 M6–8 ins. after 64: G1, after 64ab:

653* सरसीवामले सोमं प्रेक्षात्मानं त्वमात्मनि ।

65 Ś1 missing (cf. v. l. 64). — a) S (except T2 G3) च (for हि). — M5 om. 65cd. — c) S (M5 om.) एवं (for तथा). — d) T2 G2.4.5 त्वमेवासि द्वि°. Ko.4 °धा स्थितः. — After 65, D2 reads 64cd.

66 Ś1 missing (cf. v. l. 64). — a) Ñ V1 B D (except D5) मृगावकृ°. Dn D1.4 M3 पुरा; T G M5–8 हि (G3 च) वै. — d) G3 कौमारे.

67 Ś1 missing (cf. v. l. 64). — a) K2.3 Ñ1.3 B5 D2 विप्रचि°. — b) Ñ1 सजघन्या; G2.4.5 प्रजघन्या. K अथ (for च). — c) Ñ1 विश्वाची चैव रम्या च. — d) Ko.4 Da1 G1 षडेता; K2.3 M6–8 °डेते; V1 खर्जरा(!). K (except K1) °प्सरसो.

68 Ś1 missing (cf. v. l. 64). K1 D2 (hapl.) om. 68a–69b. — a) Ñ3 एतासां मे°. Ko.4 Da1 या; K2 D5 मे; K3 तु; Ñ1.2 V1 Dn D1 M6–8 सा; T1 च; T2 G M3.5 वै (for मां). K2 D5 °का माता. — b) G3 °वैरादिव. A few MSS. °प्सरा. — c) G3 संप्राप्य जननी मे सा. — After 68, S ins.:

654* श्रीमानृषिर्धर्मपरो वैश्वानर इवापरः ।
ब्रह्मयोनिः कुशो नाम विश्वामित्रपितामहः ।
कुशस्य पुत्रो बलवान्कुशनाभश्च धार्मिकः ।
गाधिस्तस्य सुतो राजा विश्वामित्रस्तु गाधिजः ।
एवंविधः पिता राजन्माता मे मेनकाप्सराः ।

69 Ś1 missing (cf. v. l. 64). K1 D2 om. 69ab (cf. v. l. 68). — a) Ñ1.2 V1 B (B3 marg.) Da Dn D1.4 प्रख्ये. — b) M3.5 °का शुभा. A few MSS. °प्सरा. — c) S (except G2) परित्यज्य; Cd अ[व]कीर्य (as in text). K D5 ध्वस्ता (Ko.3 D5 ध्वस्तां) (for याता). — d) G1.2.4.5 जननी वासवं प्रति. — After 69, S (T2 G3–6 M6–8 om. line 6) ins. a passage of 21 lines given in App. I (No. 51).

70 Ś1 missing (cf. v. l. 64). — a) B (except

C. 1. 3058
B. 1. 74. 71
K. 1. 68. 81

यदहं बान्धवैस्त्यक्ता बाल्ये संप्रति च त्वया ॥ ७०
कामं त्वया परित्यक्ता गमिष्याम्यहमाश्रमम् ।
इमं तु बालं संत्यक्तुं नार्हस्यात्मजमात्मना ॥ ७१

दुःषन्त उवाच ।

न पुत्रमभिजानामि त्वयि जातं शकुन्तले ।
असत्यवचना नार्यः कस्ते श्रद्धास्यते वचः ॥ ७२
मेनका निरनुक्रोशा बन्धकी जननी तव ।
यया हिमवतः पृष्ठे निर्माल्येव प्रवेरिता ॥ ७३
स चापि निरनुक्रोशः क्षत्रयोनिः पिता तव ।
विश्वामित्रो ब्राह्मणत्वे लुब्धः कामपरायणः ॥ ७४
मेनकाप्सरसां श्रेष्ठा महर्षीणां च ते पिता ।
तयोरपत्यं कस्मात्त्वं पुंश्चलीवाभिधास्यसि ॥ ७५
अश्रद्धेयमिदं वाक्यं कथयन्ती न लज्जसे ।
विशेषतो मत्सकाशे दुष्टतापसि गम्यताम् ॥ ७६
क्व महर्षिः सदैवोग्रः साप्सरा क्व च मेनका ।
क्व च त्वमेवं कृपणा तापसीवेषधारिणी ॥ ७७
अतिकायश्च पुत्रस्ते बालोऽपि बलवानयम् ।
कथमल्पेन कालेन शालस्कन्ध इवोद्गतः ॥ ७८
सुनिकृष्टा च योनिस्ते पुंश्चली प्रतिभासि मे ।
यदृच्छया कामरागाज्जाता मेनकया ह्यसि ॥ ७९
सर्वमेतत्परोक्षं मे यत्त्वं वदसि तापसि ।
नाहं त्वामभिजानामि यथेष्टं गम्यतां त्वया ॥ ८०

इति श्रीमहाभारते आदिपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

B1) पूर्वे. — [b]) K (except K1) Ñ2.3 V1 B1.3m D (except D5) T2 G1.2.4.5 °त्यन्यज°. T1 G3.6 जातिषु; M पार्थिव (for जन्म°). — [c]) K2 बंधुभिस्त्य°. — [d]) D2 वने सं°. G3.6 यत्त्वया. — After 70, D2 ins.:

655* संगता राजशार्दूल पूर्वकर्मावसादिनी ।

71 Ś1 missing (cf. v. l. 64). — [b]) K2.4 °त्ये यमसादनं; Ñ1.2 V1 B D (except D5) °त्यामि स्वमा°; S (except G2) °त्याम्यन्यमा°. — [c]) Ko.1 transp. तु and बालं. — [d]) B5 Da1 S °स्यात्मान°. K2.3 Ñ V1 B3.4 Dn G4.5 °त्मनः. — After 71, Ko D2 ins. an additional colophon, the adhy. no. in Ko being 69.

72 Ś1 missing (cf. v. l. 64). K1 S om. उवाच (G3 om. the ref.). — [a]) Ko °वचनेनार्यो; K1.2 B1 (m as in text) °नेनार्ये; K4 °नानार्यो. Cd mentions अनार्ये (=वक्रे), which is one of the many readings which suggest that Dev. had before him the Kās'mīrī (or North-western) version. — After 72, S reads 76-80[ab] (cf. v. l. 80).

73 Ś1 missing (cf. v. l. 64). M5 om. 73-74. — [b]) T1 पण्यस्त्री; T2 G वर्धकी (G3 °ते); Cd as in text. T2 G4.5 °नी कथं. — [c]) B3m प्रस्थे; G1 पादे. K B1.3.6 D2.5 ययासि हिमवत्पृष्ठे. — [d]) T2 G2.4.5 विसर्जिता; G6 निराकृता; M3 प्रवासिता; M8 प्रवेशिता. Ñ V1 B D निर्माल्यमिव चोज्झिता (D5 °ल्येव प्रवारिता); T1 G1.3 °ल्यवदुपेक्षिता.

74 Ś1 missing (cf. v. l. 64). M5 om. 74 (cf. v. l. 73). — ☞ In V1 the portion from 74[b] up to 1. 92. 13 is lost on the missing fol. 117-143; the MS. is *wholly* ignored up to the end of the lacuna. — [c]) D2 °त्रो ब्राह्मणो वै; S (M5 om.) °त्रोथ (M6-8 °पि) ब्रह्मत्वे (G6 °त्रो ब्रह्मखेलः). — [d]) Ñ2 B D (except D5) कामवशं गतः; G6 शम°. — After 74, G2 ins.:

656* सुषाव सुरनारी मां विश्वामित्राद्यथेष्टतः ।
अहो जानामि ते जन्म कुत्सितं कुलटे जनैः ।

75 Ś1 missing up to 75[c] (cf. v. l. 64). — [b]) T2 G1.2.4.5 °र्षिश्चापि ते. Ñ B1.6 D (except D5) transp. च ते and पिता. B4.5 °णां पितोच्यते. — [d]) Ś1 resumes. Ś1 K °लीव विधा (Ko °वत्प्रधा)वसि; Ñ B D °लीव प्रभाषसे (D5 भविष्यसि); T2 °वाभिधास्यसे; G1.2.4.5 °वाभिभाषसे. — After 75, S ins.:

657* जातिश्चापि निकृष्टा ते कुलीनेति विजल्पसे ।
जनयित्वा त्वमुत्सृष्टा कोकिलेव परैर्भृता ।
अरिष्टैरिव दुर्बुद्धिः कण्वो वर्धयिता पिता ।
अश्रद्धेयमिदं वाक्यं यत्त्वं जल्पसि तापसि ।
ब्रुवन्ती राजसांनिध्ये गम्यतां यत्र चेच्छसि । [5]
सुवर्णमणिमुक्तानि वस्त्राण्याभरणानि च ।
यदिहेच्छसि भोगार्थं तापसि प्रतिगृह्यताम् ।

With lines 4-5 cf. 76.

76 For S cf. v. l. 72. — [a]) G3 एवंविधानि कृत्यानि. — D2 (? hapl.) om. 76[c]-79[b].

77 D2 om. 77 (cf. v. l. 76). For S cf. v. l. 72. — [a]) Ś1 K1 B Da D5 T1 G6 स चैवोग्रः; Ñ Dn D1.4 G3

६९

शकुन्तलोवाच ।
राजन्सर्षपमात्राणि परच्छिद्राणि पश्यसि ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यसि ॥ १
मेनका त्रिदशेष्वेव त्रिदशाश्चानु मेनकाम् ।
ममैवोद्रिच्यते जन्म दुःषन्त तव जन्मतः ॥ २
क्षितावटसि राजंस्त्वमन्तरिक्षे चराम्यहम् ।
आवयोरन्तरं पश्य मेरुसर्षपयोरिव ॥ ३
महेन्द्रस्य कुबेरस्य यमस्य वरुणस्य च ।
भवनान्यनुसंयामि प्रभावं पश्य मे नृप ॥ ४
सत्यश्चापि प्रवादोऽयं यं प्रवक्ष्यामि तेऽनघ ।
निदर्शनार्थं न द्वेषात्तच्छ्रुत्वा क्षन्तुमर्हसि ॥ ५
विरूपो यावदादर्शे नात्मनः पश्यते मुखम् ।
मन्यते तावदात्मानमन्येभ्यो रूपवत्तरम् ॥ ६
यदा तु मुखमादर्शे विकृतं सोऽभिवीक्षते ।

C. 1. 3075
B. 1. 74. 88
K. 1. 99. 9

स चैवाप्सराः. — [b]) S क्वाप्सरा सा च (T2 G4.5 चैव). Some MSS. °प्सराः.

78 D2 om. 78 (cf. v. l. 76). For S cf. v. l. 72. — [a]) Ñ1.2 B Da Dn D1.4 transp. पुत्रः and ते. — [b]) Ñ B (except B5) Da Dn D4.5 बालोति-. — [d]) K1 S साल°; Ñ B Da Dn D1.4 °स्तंभ.

79 D2 om. 79[ab] (cf. v. l. 76). For S cf. v. l. 72. — [a]) Ñ1.2 B Da Dn D1.4 transp. योनिः and ते. — [b]) Cf. 75 and v. l. Ś1 K1.2 D5 °लीव विधावसि; Ñ1.2 B Da Dn D1.4 G2 °लीव प्रभाषसे.

80 For S cf. v. l. 72. — [a]) S एव (for एतत्). — After 80[ab], S ins.:

658* सर्वा वामाः स्त्रियो लोके सर्वाः कामपरायणाः ।
सर्वाः स्त्रियः परवशाः सर्वाः क्रोधसमाकुलाः ।
असत्योक्ताः स्त्रियः सर्वा न कण्वं वक्तुमर्हसि ।

— [c]) S त्वां द्रष्टुमिच्छामि (T1 °च्छेयं). — [d]) S इति (M6-8 हृतः) (for त्वया).

Colophon om. in B D (but found in Cd, as also in Arj.'s comm., though Da erroneously omits it). V1 missing. — *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* T1 संभव. Ś1 K Ñ T2 G1.3-5 M8.5.7 Cd Arj. (comm.) (om. sub-parvan name) mention only शाकुंतल. — *Adhy. no.* (figures, words or both): Ko 70; T1 87; T2 37; G M 38. — *Śloka no.:* Ñ3 Dn 81; Da1 91.

69

☞ This adhy. is missing in V1 D3 (cf. v. l. 1. 62. 2; 68. 74); the MSS. are *wholly* ignored here.

1 Ś1 K1 S om. उवाच. — [b]) Ś1 पररंध्राणि. G6 मरुध्राणि न प°. — G1 om. 1[cd]. — [c]) S (G1 om.) हस्ति(T1 G6 मेरु)मा°.

2 [a]) Ñ3 त्रिदशांश्चापि. — [b]) Ñ °शाश्चापि. — [c]) Ś1 K1 ममैवं दृश्य°; Ko.4 B1m °वोत्कृष्य°; K2 °वोदिश्य°; Da corrupt; T1 °व दिव्य°; G1 °वो दिव्य°; G2 °व मुच्य°; M6-8 °वोदीच्य°. Cd mentions तत्कृष्यते (? read उत्कृष्यते). — [d]) Ko जातु न; K8 Ñ B6 Dn D1.5 M6-8 जन्मनः.

3 [a]) S क्षितौ चरसि. Ñ1.2 B D (except D5) राजेंद्र.

4 [c]) Ko.2 भुवनानि. K (except K1) °गच्छामि. — [d]) B4m शृणु (for पश्य). — After 4, S ins.:

659* पुरा नरवरः पुत्र उर्वश्यां जनितस्त्वदा ।
आयुर्नाम महाराज तव पूर्वपितामहः ।
महर्षयश्च बहवः क्षत्रियाश्च परंतप ।
अप्सरस्सु मृगीणां च मातृदोषो न विद्यते ।

[(L. 1) M °वरः ख्यातः. — (L. 3) T G3-6 °तपाः. — (L. 4) G1.2 M3.5 अप्सरासु. M6-8 मृगीष्वेव.]

5 S reads 5 after 8 (G1, om. 5[ab] and 8, reads 5[cd] after 7). — K3 G1 om. 5[ab]. — [a]) Ś1 सत्यं चापि प्र°; T G (G1 om.) सत्यं च (T1 सम्यग्वै; T2 सम्यग्वा) विप्र°. — [b]) T G (G1 om.) संप्र-; M तव (for यं प्र-). Ñ3 (om. यं) प्रवक्ष्यामि च. Ko.4 T2 G2.4 ते नृप; M चानघ. — [c]) G3 तत्त्वेन; M3 नो द्वेषात्; M5-8 लोकेश. — [d]) Ñ B3.4.6 Dn श्रुत्वा तं; B1 Da श्रुत्वा त्वं; B5 D1.2.4 श्रुत्वा तत् (by transp.). — After 5, S ins.:

660* पांसुपातेन हृष्यन्ति कुञ्जरा मदशालिनः ।

which is followed by (the first occurrence of) 11[cd]; then follow 15–16; G3, however, reads 11[cd] only here, om. 15–16 altogether.

6 [b]) T1 G1.3.6 M वीक्ष(M6 °क्ष्य)ते (for पश्य°). T2 G2.4.5 वीक्षते नात्मनो मु°. — [c]) G3 रूपम् (for तावद्). — [d]) Ñ B1.4 D2 रूपव(B1 °मु)त्तमं.

C. 1. 8075
B. 1. 74.88
K. 1. 99. 9

तदेतरं विजानाति आत्मानं नेतरं जनम् ॥ ७
अतीव रूपसंपन्नो न किंचिदवमन्यते ।
अतीव जल्पन्दुर्वाचो भवतीह विहेठकः ॥ ८
मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव सूकरः ॥ ९
प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाम्भसः ॥ १०
अन्यान्परिवदन्साधुर्यथा हि परितप्यते ।
तथा परिवदन्नन्यांस्तुष्टो भवति दुर्जनः ॥ ११
अभिवाद्य यथा वृद्धान्सन्तो गच्छन्ति निर्वृतिम् ।
एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥ १२
सुखं जीवन्त्यदोषज्ञा मूर्खा दोषानुदर्शिनः ।
यत्र वाच्याः परैः सन्तः परानाहुस्तथाविधान् ॥ १३
अतो हास्यतरं लोके किंचिदन्यन्न विद्यते ।

---

7 [a]) Ñ1.2 Da1 Dn स्व-; D1 च (for तु). — [b]) K4 विकृतिं; T G विरूपं (T2 G4.5 °पः). Ś1 Ko.3.4 B1 Da D2 G2 सोभिवीक्ष्यते; T1 G3 अभिवीं°; G1 अभिलं°. — [c]) K4 तदंतरं; Ñ B3 D (except Da) तदांतरं; B3m तदाधमं. K3 तदा विरूपमात्मानं; S तदा ह्रीमांस्तु (M विरूपं) जानीयात्. Cd mentions इतरं (=अधरं). — [d]) Ko.2.4 B Da D5 सोत्मानं; K3 जानीते; D2 शोभनं. Dn D1.4.5 चेतरं. M3 (*inf. lin.*).6-8 आत्मानं न च गर्जते (M3 °ति). — After 7, G1 reads 5[cd] (cf. v. l. 5).

8 G1 om. 8. — [b]) K1 Ñ B (except B1) D (except Da Dn8) कंचिद्. — [c]) T1 गर्वदुर्वारो. D2 दुर्बुद्धिः. — [d]) Ś1 K1 भवतीति. Ś1 सहेतकः (*sup. lin.* as in text); Ko.2 विवेचकः (K2 °कचः); K4 विदेह°; Ñ2 D1 विहेतु°; B1m.3 (m as in text).4m.6m Cd विकत्थनः; D4 विनिंद°; D5 विहंतु°; T1 विवाचं°; G3.6 M विभेद° (M3 *inf. lin.* विपोटकः); Da (erroneously) Arjp Devp as in text. The true Arj. reading is विकत्थनः, which is also interpolated in Da2, irrelevantly, in the text. T2 भवंतीह विरूपकाः; G2.5 वदसीव विभागशः (G5 *sup. lin.* निंदकस्तु [वि]पोटकः); G4 भवंति हि विभेदकाः. — After 8, S read 5 (for G1 cf. v. l. 5).

9 D4 om. 9; G3 om. 9–11[ab]. Ko transp. 9[ab] and 9[cd]. — [a]) M नीचो हि. Ś1 K1-3 तु; Ko G3 [s]पि; G1.4 [s]भि- (for हि). — D5 (? hapl.) om. from जल्पतां up to प्राज्ञस्तु (in 10[a]). — [b]) Ñ3 वाचं; T1 वाक्यं; G6 तेषां. Ñ3 T1 G6 °शुभं. — Ś1 K1 (hapl.) om. 9[c]–10[b]. — [c]) G1 M (except M5) अशुभां वाचम्. — After 9[c], the sequence of stanzas in D1 is 10[d], 11[ab], 10[abc], 9[d], 11[cd] etc. — [d]) Some MSS. शूकरः.

10 Ś1 K1 om. 10[ab]; G3 om. 10 (cf. v. l. 9). — For sequence of D1 cf. v. l. 9. — [a]) Ko साधुस्तु; D4 अमूर्खो. — [c]) K3 सशुभं वाक्य°. — [d]) K4 S (except T1; G3 om.) °वांभसि. — After 10, S (except G3) ins.:

661* आत्मनो दुष्टभावत्वाज्जानन्नीचोऽप्रसन्नधीः ।
परेषामपि जानाति स्वकर्मसदृशान्गुणान् ।
दह्यमानास्तु तीव्रेण नीचाः परयशोऽग्निना ।
अशक्तास्तां गतिं गन्तुं ततो निन्दां प्रकुर्वते ।

[(L. 1) T1 G6 M7 °भावत्वं. T2 G4.5 जातु; G1.2 M3.5 ज्ञानं; G6 ज्ञानी (for जानन्). — (L. 2) G6 परमप्यभि-. T1 °शं गुणैः; G6 स्वधर्मसदृशं गुणैः. — (L. 3) T1 M6-8 सु- (for तु). — (L. 4) T1 तत्पदं; T2 G1.2.4.5 तद्गतिं.]

11 For G3 (which om. 11[ab]) and for D1 cf. v. l. 9. Cf. v. l. 5 also. — [c]) Ñ3 अन्यं. — [d]) B D2 T G3-6 हृष्टो; G2 धृष्टो. — S ins. after the repetition (G3, after the only occurrence) of 11[cd] (G2.4.5 M7 om. line 2):

662* अपवादरता मूर्खा भवन्तीह विशेषतः ।
नापवादरताः सन्तो भवन्ति स्म विशेषतः ।

[(L. 1) T1 परिवाद°; G6 अपास्य दूरतो.]

12 [a]) G6 °द्य च वृद्धान्हि. — [b]) S साधुर्गच्छति नि°. — [c]) M तथा स°. Ś1 G5 आक्रुध्य; K1.3 आक्रम्य. — For 12[d], M (except M3) repeats 11[d].

13 [a]) Ś1 K1 स्वयं (for सुखं). T2 G2.4.5 जल्पंति. G1 अधर्मज्ञा. — [c]) Ś1 तत्र; K1 तत्र; T G ये तु (G2 हेतु- G3 ये नु); M तथा (for यत्र). — In Ś1, 13[d]–22[b] are lost on the broken upper half of a fol. (54).

14 Ś1 missing (cf. v. l. 13). — [a]) K1 B1.3 अहो; T1 G2 ततो. — [c]) T2 G2.4 यदि; G1 M यत्तु (for यत्र). K1.3.4 Ñ B1.3 D (except D2) दुर्जनम्. K2.4 Da D1.5 T2 G2.5 आहुः. — [d]) D5 दुर्जनाः. S (by transp.) सज्जनं (M3.5 सुज°) दुर्जनः (G2.3 °नाः). B1.5 D2 सज्जनः. K D5 जनं (for स्वयम्). — After 14, S ins.:

663* दारुणाल्लोकसंक्लेशाद्दुःखमाप्नोत्यसंशयम् ।

[T1 M3.6-8 दारुणान्. M3.6-8 यातनासंस्थान् (M3

यत्र दुर्जन इत्याह दुर्जनः सज्जनं स्वयम् ॥ १४
सत्यधर्मच्युतात्पुंसः क्रुद्धादाशीविषादिव ।
अनास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः ॥ १५
स्वयमुत्पाद्य वै पुत्रं सदृशं योऽवमन्यते ।
तस्य देवाः श्रियं घ्नन्ति न च लोकानुपाश्नुते ॥ १६
कुलवंशप्रतिष्ठां हि पितरः पुत्रमब्रुवन् ।
उत्तमं सर्वधर्माणां तस्मात्पुत्रं न संत्यजेत् ॥ १७
स्वपत्नीप्रभवान्पञ्च लब्धान्क्रीतान्विवर्धितान् ।
कृतानन्यासु चोत्पन्नान्पुत्रान्वै मनुरब्रवीत् ॥ १८
धर्मकीर्त्यावहा नृणां मनसः प्रीतिवर्धनाः ।
त्रायन्ते नरकाज्जाताः पुत्रा धर्मप्लवाः पितॄन् ॥ १९
स त्वं नृपतिशार्दूल न पुत्रं त्यक्तुमर्हसि ।
आत्मानं सत्यधर्मौ च पालयानो महीपते ।
नरेन्द्रसिंह कपटं न वोढुं त्वमिहार्हसि ॥ २०
वरं कूपशताद्वापी वरं वापीशतात्क्रतुः ।
वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरम् ॥ २१
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ २२
सर्ववेदाधिगमनं सर्वतीर्थावगाहनम् ।
सत्यं च वदतो राजन्समं वा स्यान्न वा समम् ॥२३

C. 1. 8096
B. 1. 74. 104
K. 1. 99. 82

°स्थात्मजान्). M3 क्लेशान्; M6-8 दुःखान्. T2 G3-5 M8 असंशयः.]

15 Ś1 missing (cf. v. l. 13). — G3 om. 15–16. — For sequence of S cf. v. l. 5. — c) G2.4 सुनास्तिकः; Cd as in text. D5 T G1.6 M नास्तिकोप्युद्विजत्येव (D5 °जेदेनं; M3.5 °जेदेव).

16 Ś1 missing; G3 om. 16 (cf. v. l. 13, 15). — For sequence of S cf. v. l. 5. — a) G1.2.5 transp. वै and पुत्रं. — b) K2 Ñ B6 D (except Da D2) न (for स्व-). — c) T1 G1.2.4.5 हंति. — d) S (G3 om.) तत्रै(M °यै)नं कलिराविशेत्. — After 16, S (except G3) ins.:

664* अभव्येऽप्यनृतेऽशुद्धे नास्तिके पापकर्मणि ।
दुराचारे कलिर्भूयान्न कलिर्धर्मचारिषु ।

[(L. 2) T1 G6 ह्याशु; M5 तिष्ठेत् (for भूयात्).]

17 Ś1 missing (cf. v. l. 13). — ab) G3 °प्रतिष्ठाभिः कितवः. Da2 (? hapl.) om. 17c–18d. Ñ B5 repeat 17cd after 19. — d) M transp. तस्मात् and पुत्रं. T1 G1–5 न तु त्य°; T2 तु न त्य°. G6 मनसः प्रीतिवर्धनं (cf. 19b).

18 Contrast Manu 9. 158 ff. Ś1 missing (cf. v. l. 13). Da2 om. 18 (cf. v. l. 17); M6-8 om. 18–19. — a) K0 °संभवान्. D2 यस्य; T G3–5 M3.5 लब्धान्; G1.2.6 लब्ध्वा (for पञ्च). — b) M3 कृतान्धर्मान् (for लब्धान्क्रीतान्). T1 G3.6 M5 क्रीतान्सर्वं(G3 सुतान्दर्पं)विवर्जितान्; G1.2.4.5 क्रीतान्समयवर्धि(G2.5 °र्जि)तान्. — c) Ñ क्षत्रान्; D5 वृतान्; G3 क्रीतान्. D2 कन्यासु चो°; T G1.4.6 M3.5 अन्यैरथो°; G3 अपि तथो°. — After 18, S (except M6-8) ins.:

665* तत्र षड्बन्धुदायादाः षडदायादबान्धवाः ।

[=(var.) Manu 9. 158cd. — G1 M3.5 अत्र; Manu तेषां.]

19 Ś1 missing; M6-8 om. 19 (cf. v. l. 13, 18). — a) K (except K2) Da1 धर्मकीर्तिवहा (K1 °हान्); B5 S (M6-8 om.) धर्मकृत्य(B5 °त्या-; G6 धर्माकृति)वहा (G3 °वहान्; G5 °प्रदा). — b) For 19b, G3 subst. 17d (v. l. तु for सं-). B3.4 D2 मनःसं-. B5 D4 °वर्धनान्. K1 Da1 मनःप्रीतिविवर्धनान् (Da1 °र्धिताः); B6 मनःसंप्रीतिवर्धनान्. — c) T1 G (except G3) त्रायंति. — d) B5.6 G3 धर्मपराः. — After 19, Ñ3 B5 repeat 17cd.

20 Ś1 missing (cf. v. l. 13). — a) D2 सत्यं; M तस्मात्. — b) K (except K1) Ñ1.2 B4 D (except Da D2) transp. न and पुत्रं. — After 20ab, S ins.:

666* तस्मात्पुत्रं च सत्यं च पालयस्व महीपते ।
उभयं पालयन्ह्येतन्नानृतं वक्तुमर्हसि ।

[(L. 1) M3.5 ततः; M6-8 धर्मं (for तस्मात्). G3 धर्मं (for सत्यं). M6-8 पालयन्स्वर्गमाप्नुहि. — (L. 2) M (except M5) रोदसी (for उभयं). G3 क्षेत्रं; M नित्यं (for ह्येतत्).]

— K3 om. 20cdef. — c) D1 आत्मनः. K1 T G (except G3.6) °धर्मेण (T1 °र्मैं च). — d) Ñ1 D5 °य त्वं; S °येथा. Ñ2 B Da Dn D1.2.4 पालयन्पृथिवीपते. — f) G (except G3.6) M नेह कर्तुं (G2 वक्तुं) त्वमर्हसि.

21 Ś1 missing (cf. v. l. 13). — b) K3 सरः (for क्रतुः). — After 21ab, K3 ins.:

667* वरं सरशताद्यज्ञः वरं यज्ञात्सुपुत्रकः ।

22 Ś1 resumes with तुलया (22b). — c) G1 M6-8 च (for हि). — d) Ñ1 °मेवातिरिच्यते.

C. 1. 3097
B. 1. 74. 105
K. 1. 99. 88

नास्ति सत्यात्परो धर्मो न सत्याद्विद्यते परम् ।
न हि तीव्रतरं किंचिदनृतादिह विद्यते ॥ २४
राजन्सत्यं परं ब्रह्म सत्यं च समयः परः ।
मा त्याक्षीः समयं राजन्सत्यं संगतमस्तु ते ॥ २५
अनृते चेत्प्रसङ्गस्ते श्रद्दधासि न चेत्स्वयम् ।
आत्मनो हन्त गच्छामि त्वादृशे नास्ति संगतम्॥२६
ऋतेऽपि त्वयि दुःषन्त शैलराजावतंसकाम् ।
चतुरन्तामिमामुर्वीं पुत्रो मे पालयिष्यति ॥ २७

वैशंपायन उवाच ।

एतावदुक्त्वा वचनं प्रातिष्ठत शकुन्तला ।

---

23 ^{ab}) =(var.) line 3 of 21*. T$_2$ G (except G$_6$) °वेदांत(G$_3$ °दाभि)ग°. — ^{cd}) Ñ B D M$_3$ वचनं; G$_3$ ब्रुवतो (for वद्°). K$_1$ transp. वा and स्यात्. M विशिष्यते (for न वा स°) T$_2$ G$_{2.4.5}$ सत्यस्यैव तु राजेंद्र कलां नार्हति (T$_2$ °तु) षोडशीं (the latter half is an oft-repeated tag).

24 ^{a}) Ñ$_2$ B D (except D$_5$) T$_2$ G (except G$_{3.6}$) सत्यसमो (D$_{1.2}$ सत्यपरो). — ^{b}) B$_3$ धर्मात् (for सत्यात्). D$_5$ om. from च्यते up to सं (in 25^{d}). M धनं (for परम्). — ^{c}) M$_{6-8}$ तीक्ष्णतरं. S पापं. — After 24, M$_3$ reads line 3 of 668* (cf. v. l. 25).

25 D$_5$ om. up to सं (cf. v. l. 24). — ^{a}) G$_{1.2}$ सत्यात्; G$_4$ सत्य-. T$_2$ G (except G$_{3.6}$) परो धर्मः. — ^{b}) T$_2$ G (except G$_{3.6}$) M$_3$ सत्यात्. Ko.$_{3.4}$ Ñ$_3$ B (except B$_3$) D$_2$ T$_2$ G (except G$_{2.6}$) परं; K$_2$ कृतः. — ^{d}) Ś$_1$ K$_1$ G$_2$ सत्ये. T$_1$ संगरं; T$_2$ G$_{1.2}$ संगमं. G$_{3.5.6}$ सत्यसंगतं(G$_3$ °रं; °G$_6$ °मं). — S ins. after 25: D$_4$, after 26:

668* यः पापं न विजानाति कर्म कृत्वा नराधिप ।
न हि तादृक्परं पापमनृतादिह विद्यते ।
यस्य ते हृदयं वेद सत्यस्यैवानृतस्य च ।
कल्याणं साक्षिणं तस्मात्कर्तुमर्हसि धर्मतः ।
यो न कामान्न च क्रोधान्न मोहादभिवर्तते । [5]
अमित्रं वापि मित्रं वा स वै उत्तमपूरुषः ।

[(L. 2) G$_4$ तस्मात् (for तादृक्). — (L. 3) =(var.) 1. 68. 25^{ab} (v. l. अत्र for यस्य). M$_3$ reads it after 24. — (L. 4) Cf. 1. 68. 25^{c}. T$_1$ G$_{1.2}$ °णसा°; T$_2$ G$_{4-6}$ °णावेक्षणं. — (L. 5) T$_2$ G$_3$ लोभात्; G$_{1.2.4-6}$ द्रोहात् (for मोहात्). G$_{1.2}$ अनिवर्तने; G$_3$ M$_3$ अतिव°. — (L. 6) G$_3$ °त्रं वा सुमि°. T$_2$ स तु वै पुरुषोत्तमः; M$_5$ स एवोत्तम°.] — After 25, D$_4$ (om. last line) ins. 669* (cf. v. l. 26).

26 Cd cites the entire st. (v. l. श्रद्दधामि and हन्त(sic)मिच्छामि). — ^{a}) T$_2$ G$_{2.4.5}$ अनृतः. M$_3$ चेत्प्रसक्तस्त्वं. — ^{b}) T$_2$ G M न श्रद्दधसि. Ś$_1$ K$_1$ चेत्सुतं; Ko.$_{3.4}$ चैव तत् (K$_4$ तु); M च स्वयं. T$_1$ पुत्रं न श्रद्दधासि चेत्. — ^{c}) K$_3$ Ñ B$_{4.6}$ Dn D$_{1.2.4}$ G$_6$ M आत्मना. Ñ$_3$ B$_{5.6m}$ [s]हं तु. Ko.$_3$ [s]हं तु जानामि; B$_4$ D$_5$ T G$_6$ हन्तु(D$_5$ [s]हं त; G$_6$ हत)मिच्छामि. K$_4$ आत्मनाहं न जानामि; G$_{1.2.4.5}$ आश्रमं गन्तुमिच्छामि. — ^{d}) Ś$_1$ K$_1$ त्वदृते; B$_5$ T G$_{1.6}$ तादृशे. G$_{1.3.5}$ M नास्तु (G$_5$ °स्ति) संगमः. — S ins. after 26: D$_4$ (om. last line) after 25:

669* पुत्रत्वे शङ्कमानस्य बुद्धिर्ज्ञापकदीपिनी ।
गतिः स्वरः स्मृतिः सत्त्वं शीलं विद्या च विक्रमः ।
धृष्णुप्रकृतिभावौ च आवर्ता रोमराजयः ।
समा यस्य यदि स्युस्ते तस्य पुत्रो न संशयः ।
सादृश्येनोद्धृतं बिम्बं तव देहाद्विशांपते । [5]
तातेति भाषमाणं वै मा स्म राजन्वृथा कृथाः ।
ऋतेऽपि गर्दभक्षीरात्पयः पास्यति मे सुतः ।

[(L. 1) D$_4$ T$_1$ G$_{1.2}$ त्वं बुध्या निश्चयं कुरु. — (L. 2) T$_2$ G$_{3-6}$ M$_{6-8}$ शीलविज्ञानविक्रमाः (T$_2$ G$_6$ °मं; M$_{6-8}$ °मैः). — (L. 3) Cf. 642*. D$_4$ धृतिं°; G$_{3-5}$ दृष्टप्रकृति-बाधा. — (L. 4) T$_1$ G$_{1.2}$ M$_{3.5}$ यदा (for यदि). — (L. 6) M$_{6-8}$ त्वं (for स्म). — (L. 7) Cited (as a *pāṭha*) by Nīl. T$_1$ G$_{1.2}$ M$_{3.5}$ Nīl. (comm.) गर्दभी°.] — After 26, D$_4$ ins. 668* (cf. v. l. 25).

27 ^{a}) Cd cites ऋतेपि (as in text). K$_{1.2}$ ऋ(K$_2$ कृ)ते त्वयि च (K$_2$ *sup. lin.* मृते पितरि); Ñ$_{1.2}$ B$_1$ Dn D$_{1.4}$ त्वामृ(B$_1$ त्वद्)तेपि हि. T G$_{1.6}$ त्वां तु; G$_{2.4.5}$ त्वां च; G$_3$ च त्वां; M (except M$_3$) त्वां हि (for त्वयि). — ^{b}) D$_3$ °तंसिकां; D$_5$ °राजवतीमिमां. — ^{c}) Ñ$_1$ पृथ्वीं; M$_5$ भूमीं. — After 27, D$_4$ (marg.) S repeat line 4 of 624*, and cont.:

13 M (except M5) om. 13 (cf. v. l. 11). — [c]) Ko.4 Ñ B1.5 Dn D2.4.5 °धर्मेषु. T1 G1.2.4.5 M5 पशुधर्मेष्व(G1 °र्मे स्व-; M5 °र्मस)धर्मेषु; T2 G6 छद्म(G6 छिद्र)धर्मस्वरूपेषु; G3 °धर्मस्वधर्मस्थो. — [d]) K2 Ñ1 D5 प्रसवि°. T G व्याधे(G3 व्राल्ये)षु जनयि(T1 च जनि)ष्यसि; M5 मृगेषु प्रजनिष्यसे. — After 13, M5 reads 19.

14 Śi K1.3 D5 S om. उवाच (M6-8 om. the ref.). D2 lacuna for the ref. — [a]) S (mostly) तुर्वशुं. — [b]) B4 Da D4 सुमहातपाः (for सुतमा°). — [c]) Śi K (K1 by corr.) G1.3 द्रुह्यं.

15 Before 15, Si Ñ1.2 B D (except D5; D2 lacuna) ins. ययातिरु°; T G (except G1.3) M3.5 ययातिः. — [a]) Śi K G3 द्रुह्य (K1 द्रुहि). — [b]) K (except K2) रूपवर्ण(Ko बलवृत्त-; K3 बलरूप)विनाश(K1 °शि)नीं; B1 °शनीं; S पाप्मानं जरया सह (cf. 4[d], 9[d], 16[d], 26[d]). — After 15[ab], S repeats 8[cd], om. 15[cd]. — [c]) B5 °स्वेषु. — B5 (hapl.) om. from स्वं up to the end of 16[b].

16 Cf. 4, 9 and 26. — [ab]) B5 om. 16[ab] (cf. v. l. 15). Śi Ñ3 °हस्ते ते; D5 °हस्तां ते. K B3 Da Dn D1 पुनर्; Ñ2 B1.4.6 D2.4 तव (for प्रति-). — [cd]) S (except T1 G1.3) om. 16[cd]. T1 G3 वै (for सहं). Ko.3.4 स्वं वहिष्यामि भूयः; K2 Ñ3 D5 स्वं चैव (Ñ3 दत्वा स्वं; D5 स्वं वयः) प्रतिपत्स्यामि; Ñ1 B3-6 D2 स्वं चावाप्स्यामि भूयः; G1 स्वयं चैव प्रवत्स्यामि.

☞ For st. 17-23, S subst. a passage which, besides containing some additional stanzas, differs from the text in so far that it om. 19 (transposed

द्रुह्युरुवाच ।
न गजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम् ।
वाग्भङ्गश्चास्य भवति तज्जरां नाभिकामये ॥ १७

ययातिरुवाच ।
यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्माद्द्रुह्यो प्रियः कामो न ते संपत्स्यते क्वचित् ॥१८
उडुपप्लवसंतारो यत्र नित्यं भविष्यति ।
अराजा भोजशब्दं त्वं तत्रावाप्स्यसि सान्वयः ॥ १९
अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
एकं वर्षसहस्रं तु चरेयं यौवनेन ते ॥ २०

अनुरुवाच ।
जीर्णः शिशुवदादत्तेऽकालेऽन्नमशुचिर्यथा ।
न जुहोति च कालेऽग्निं तां जरां नाभिकामये ॥२१

ययातिरुवाच ।
यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
जरादोषस्त्वयोक्तोऽयं तस्मात्त्वं प्रतिपत्स्यसे ॥ २२
प्रजाश्च यौवनप्राप्ता विनशिष्यन्त्यनो तव ।
अग्निप्रस्कन्दनपरस्त्वं चाप्येवं भविष्यसि ॥ २३

C. 1. 3491
B. 1. 84. 26
K. 1. 76. 26

---

in some S MSS. to some other part of the dialogue; cf. v. l. 19) and interchanges the rôles of Druhyu and Anu, assigning the words of Druhyu to Anu and *vice versa*. The text of the Southern passage (with its variants) is given separately, under v. l. 23 (*q. v.*). D4 includes some stray stanzas of the Southern passage inserted at various points of its own text; they have been ignored here.

17 Śi K1 द्रुह्युः; Ko.2-4 द्रुह्य उ°. — [a]) K (except K2) transp. गजं and रथं. — [c]) Śi Ñ1.3 B1.4.6 D (except D5) वाक्संग(D2 वाग्बंध)श्चास्य (B1m °पि); K2 वाक्सादश्चा°; B3 वाक्संकुंठास्य; B5 वाक्संयमश्च. — [d]) Ñ1.2 D तां जरां. Ñ3 तज्जराया न कामये.

18 For S cf. v. l. 23. Śi K1 om. उवाच. With 18 cf. 7, 11 and 22. — [a]) Ko.4 यस्त्वं मे; K1 यर्मेहं (sic); B5 यत्त्वं मद्. — After 18, B (except B4) D (except D2.5) ins.:

829* यत्राश्वरथमुख्यानामश्वानां स्याद्गतं न च ।
हस्तिनां पीठकानां च गर्दभानां तथैव च ।
बस्तानां च गवां चैव शिबिकायास्तथैव च ।

19 T1 G1.2.4.5 Ms.6-8 read 19, T2 G6 19[cd] (only), after 828*; G3 om. it, and M5 reads it after 13. — [a]) Śi Ko.1 नोडुप°; Ks.4 B5 D2 °संचारो; Ñ3 औडुप°; B3 °संभारो. K2 D5 नोडुपप्लवसंचारो; S यत्रोडुप्लवसंतारः. ❀ Dev.: उडुपं तृणकाष्ठादिघटितं । सन्तरणसाधनं [1] तेन प्लवो गमनं न संतारः पारप्राप्तिर्यत्र न तत्र (1) भविष्यसीत्यन्वयः [1] ❀ — [b]) S तत्र (for यत्र). — [c]) M न (for अ-). Dn अराजभाज°. D2 भोगहीनस् (for भोज°). Ks.4 Ñ1.2 B5 °शब्दत्वं. Śi Ko Dn तं; S तु (for त्वं). — [d]) K2.4 Ñ3 Dn तत्र प्राप्स्य°; D2.5 तत्र वत्स्य°.

20 For S cf. v. l. 23. With 20 cf. 3 and 8. Before 20, Ko.2 Ñ B (except B4) D (except D5) ins. ययातिरु°. — [c]) Śi K1 Ñ1.2 एवं (for एकं).

21 For S cf. v. l. 23. Śi K1 om. उवाच. — [d]) K (except K2) तज्जरां.

22 For S cf. v. l. 23. With 22 cf. 7, 11 and 18. Śi K1 om. उवाच. — [a]) Śi यदि मे; K1 यन्मे त्वं. — [c]) K2.4 D2 °दोषास्. K1 त्वयोक्ते यः; K2 B2 °योक्ता ये; K4 °योक्तोहं; Dn D1.4 त्वया प्रोक्तः. — [d]) Ñ2 B4 Da1 त्वां; B1.6 Da2 तां; D2 तान् (for त्वं). Ko.4 Ñ2 Da1 B5.6 °पत्स्यते; K2 °पद्यसे; B1 °पत्स्यसि.

23 In Śi the portion of the text from 23 up to 1. 80. 2 is lost on the missing upper half of a fol. — [a]) Ko Ñ3 B D2 प्रजा च; K3 प्रजा स; K4 राजा च. K3.4 D2 यौवनं. D2 प्राप्य. — [b]) Ko.3.4 B D2 विनशिष्य° (B4 विनंक्ष्यति ह्यनो).

☞ For 17-23, S subst.:

830* द्रुह्युः ।
(cf. 21[ab]) जीर्णः शिशुवदादत्तेऽकालेऽन्नमशुचिर्यथा ।
(21[c]) न जुहोति च कालेऽग्निं न बुध्यति च कालतः ।
(21[d]) न च कृत्यं करोत्येष तां जरां नाभिकामये ।
ययातिः ।
(22[ab]) यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
(22[cd]) जरादोषस्त्वयोक्तोऽयं तस्मात्त्वं नाभिपद्यसे । [5]
(23[ab]) प्रजाश्च यौवनं प्राप्ता विनशिष्यन्त्यतस्तव ।
(23[cd]) अग्निप्रस्कन्दनपरस्त्वं चाप्येवं भविष्यसि ।
(20[ab]) अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
(20[cd]) एकं वर्षसहस्रं वै चरेयं तव रूपधृक् ।
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् । [10]
दत्त्वा च प्रतिपत्स्ये वै पाप्मानं जरया सह ।

C. 1. 84.92
B. 1. 84. 27
K. 1. 78. 28

पूरो त्वं मे प्रियः पुत्रस्त्वं वरीयान्भविष्यसि ।
जरा वली च मे तात पलितानि च पर्यगुः ।
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ॥ २४
पूरो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
कंचित्कालं चरेयं वै विषयान्वयसा तव ॥ २५
पूर्णे वर्षसहस्रे तु प्रतिदास्यामि यौवनम् ।
स्वं चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥ २६

वैशंपायन उवाच ।

एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा ।
यथात्थ मां महाराज तत्करिष्यामि ते वचः ॥ २७
प्रतिपत्स्यामि ते राजन्पाप्मानं जरया सह ।
गृहाण यौवनं मत्तश्चर कामान्यथेप्सितान् ॥ २८
जरयाहं प्रतिच्छन्नो वयोरूपधरस्तव ।
यौवनं भवते दत्त्वा चरिष्यामि यथात्थ माम् ॥ २९

ययातिरुवाच ।

पूरो प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते ।
सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥ ३०

इति श्रीमहाभारते आदिपर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

अनुः ।

(17^{ab}) न हस्तिनं नरो नार्श्वं जीर्णो भुङ्क्ते न पीठकम् ।
(17^{cd}) वाग्दुर्भगास्य भवति तां जरां नैव कामये ।

ययातिः ।

(18^{ab}) यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि ।

(829*) हस्त्यश्वरथयुग्यानामध्वा न स्यात्कदाचन । [15]
हस्तिनां पीठकानां वा गर्दभानां तथैव च ।
उष्ट्राणां च गवां चैव शिबिकायास्तथैव च ।
यद्वान्यद्वाहनं किंचिद्देवो हन्यात्कचित्कचित् ।
अराजा तव जातश्च भविष्यति च दुर्मते ।

वैशंपायनः ।

प्रत्याख्यातश्चतुर्भिश्च शप्त्वा तान्यचदिच्छया । [20]
पूरोः सकाशमगमज्ज्ञात्वा पूरुमलङ्घिनम् ।

[(L. 1) G1.2.4.5 शुचिवद्. — (L. 4) T1 G1 त्वं (for स्वं). G3 (hapl.) om. lines 5–14. — (L. 5) G2 repeats this line after line 14. G1.2 (*sup. lin.* as in text) °क्तो मे; M5 त्वयोक्तोहं. M3.5 तं; M6–8 न (for त्वं). T1 M3.5 त्वं (T1 तु) प्रपद्यसे; G1 M6–8 प्रतिपत्स्यसे (for नाभि°). — (L. 6) M प्राप्य. — After line 7, G4.5 read 19 for the first time. In G1 the sequence from 7–20 is: 7, 15–19, 831*, 8–14, then a repetition of (the three lines) 15, 18 and 19, and finally 20. — T2 G2 ins. after line 7: G1.4.5, after the first occurrence of line 19:

831* एवं ब्रुवन्तं शप्त्वाथ ययातिः सुतमात्मनः ।
शर्मिष्ठायाः सुतं चानुमिदं वचनमब्रवीत् ।

On the other hand, T1 ins. after line 7:

832* अनुं पुत्रमथाहूय राजा वचनमब्रवीत् ।

— (L. 8) M अनुद्रुह्यो प्रपद्यस्व. — (L. 9) G1 यौवनेन त्वदीयेन चरे°. — (L. 12) T1 रथं चाश्वं. M न हस्तिरथनागाश्च. — (L. 14) T1 अनो मे त्वं. — After line 14, G2 repeats line 5. — (L. 15) T2 G4–8 °रथमुख्यानां — (L. 16) T1 G1.3 यानानां (for हस्ति°). — (L. 17) M6–8 °कानां त°.]

24 Ś1 missing (cf. v. l. 23). K1 (hapl.) om. 24. Before 24, Ñ B Da2 Dn ins. ययातिरु°; S (except G3) ययातिः; D2 has lacuna. — [a]) K4 T2 G2.4–6 मे त्वं (by transp.). Ñ3 वरः (for प्रियः). K2 त्वं मे प्रियतरः पुत्रः; T1 G1.3 पूरो प्रियस्त्वं पुत्राणां. — [b]) D5 T1 वरीयांस्त्वं (by transp.); T2 G M त्वं गरी(G5 कनी)यान् (G1.3 गरीयान्वै). — 24^{cd}=(var.) 2^{ab}. — [c]) Ñ2 B4 जरावलीढं. Ñ B D (except D5) मां (for मे). G3 तातस्य (for मे तात). — G3 om. 24^{c}–25^{b}.

25 Ś1 missing; G3 om. 25^{ab} (cf. v. l. 23, 24). With 25 cf. 3, 8 and 20. — [a]) B4 तस्मात् (for पूरो). M6–8 मे प्र- (for प्रति-). K4 (hapl.) om. 25^{cd} and 26; D2 om. 25^{cd}. — [c]) S यथाकामं (G1.4–6 °कालं; G3 यौवनेन). — [a]) G3 विषयांस्तव पुत्रक.

26 Ś1 missing; K4 om. 26 (cf. v. l. 23, 25). With 26 cf. 4, 9 and 16. — [a]) K1 Ñ3 B4 Da ते (for तु). — [b]) Ñ2 B5 D2 तव; B3.6 Dn D1.4.5 पुनः (for प्रति-). G6 प्रतिपत्स्यामि. — K2 om. 26^{cd}. — [c]) D2 स्वं चावाप्स्यामि भूयोहं.

27 Ś1 missing (cf. v. l. 23). K1.3 D5 S om. उवाच; D2 lacuna for the ref. Before 27^{cd}, D4 marg. ins. पूरुरुवाच. — [c]) T2 G (except G2) यदात्थ. M3.5 त्वं (for मां). — After 27, S ins.:

833* गुरोर्वै वचनं पुण्यं स्वर्ग्यमायुष्करं नृणाम् ।
गुरुप्रसादात्त्रैलोक्यमन्वशासच्छतक्रतुः ।
गुरोरनुमतं प्राप्य सर्वान्कामानवाप्नुयात् ।



पूरी श्रीतोडरिम ने वदम श्रीनथुरे दर्शनम् ने ।
सप्तमायतमुद्रा ने प्रजा राज्ये भविष्यति ॥

१. ७८. ३०

८०

वैशंपायन उवाच ।
पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
प्रीतियुक्तो नृपश्रेष्ठश्चचार विषयान्प्रियान् ॥ १
यथाकामं यथोत्साहं यथाकालं यथासुखम् ।
धर्माविरुद्धान्राजेन्द्रो यथार्हति स एव हि ॥ २
देवानतर्पयद्यज्ञैः श्राद्धैस्तद्वत्पितॄनपि ।
दीनाननुग्रहैरिष्टैः कामैश्च द्विजसत्तमान् ॥ ३
अतिथीनन्नपानैश्च विशश्च परिपालनैः ।
आनृशंस्येन शूद्रांश्च दस्यून्संनिग्रहेण च ॥ ४
धर्मेण च प्रजाः सर्वा यथावदनुरञ्जयन् ।
ययातिः पालयामास साक्षादिन्द्र इवापरः ॥ ५
स राजा सिंहविक्रान्तो युवा विषयगोचरः ।
अविरोधेन धर्मस्य चचार सुखमुत्तमम् ॥ ६
स संप्राप्य शुभान्कामांस्तृप्तः खिन्नश्च पार्थिवः । C. 1. 3506 B. 1. 85. 7 K. 1. 79. 7

28 Śi missing (cf. v. l. 23). — After 28^{ab}, S ins.:
834* यावदिच्छसि वा जीवं तावत्तां धारयाम्यहम् ।
[T2 M °सि तावच्च; G3 °सि राजेंद्र. T2 M धारयिष्यामि ते जरां.]
— d) Ko. 3. 4 चर राजन्यथेप्सितं.

29 Śi missing (cf. v. l. 23). — a) Ms. 5 सं- (for अहं). — c) G3 M6-8 भवतो. — d) B4 यथेच्छया; T2 G1. 4. 6 यदात्थ मां.

30 Śi missing (cf. v. l. 23). K1 S om. उवाच; D2 lacuna for the ref. — a) Ñ3 B4 Da D5 T1 G1. 3 M6-8 ते पुत्र; T2 G2. 4-6 Ms. 5 भद्रं ते. — b) B4 वरं चैव; D5 प्रीतस्त्वैव; G3 प्रीतिं चेमां; Ms. 5 °श्राहं. B1. 6 ददानि. B3. 5. 6 वै (for ते). — After 30, K1 ins.:
835* धर्मे चार्थे च कामे च ख्यातिं लोके गमिष्यति ।; while Ko. 3. 4 D ins.:
836* एवमुक्त्वा ययातिस्तु काव्यं स्मृत्वा महातपाः ।
संक्रामयामास जरां तदा पूरौ महात्मनि ।
= (var.) Matsyap. 34. 1.

Colophon om. in B5. Śi missing (cf. v. l. 23). — *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* Ñ1. 2 T1 संभव; to it Ñ1. 2 add ययात्युपाख्यान. Ko-2. 4 Ñ3 B (B5 om.) D T2 G4 Ms. 5 (om. the sub-parvan name) mention only यायात. — *Adhy. name:* Ko. 4 जरासंक्रमणं; K3 पूरोर्जरासंक्रमणं; T2 G4 Ms. 5 पूरुयौवनप्रदानं. — *Adhy. no.* (figures, words or both): B5 Da1 78; D4m 82; T1 69; T2 19; G M 20. — *S'loka no.:* Da1 35; Dn 34. — *Aggregate s'loka no.:* Dn2 3471.

80

☞ This adhy. is missing in V1 (cf. v. l. 1. 68. 74); the MS. is *wholly* ignored here.

1 In Śi, 1-3 are missing (cf. v. l. 1. 79. 23). S om. उवाच. — ab) Ñ3 °वेनाथ रूपेण वयसा नहु°. — After 1^{ab}, K4 D4 (marg.) S ins.:
837* रूपयौवनसंपन्नः कुमार इव सोऽभवत् ।
[K4 कौमारं प्रत्यपद्यत; D4 M6-8 °रः समपद्यत.]
— c) Ko. 1. 4 T1 नृपश्रेष्ठ; B5 Dn3 D5 नर°. — d) G3 °यान्बहून्.

2 Śi missing (cf. v. l. 1). — 2^{ab} = (var.) 9^{ab}. — a) B4 Da M यथाकालं (for °कामं). — b) Ko B4 Da M (except M3) यथाकामं (for °कालं). G1 (before corr.) अरिंदम. — c) Ko. 3. 4 Ñ1. 2 B (except B1) D (except Da) T G (except G3) °विरुद्धं. Some MSS. राजेंद्र. — d) Ñ1. 2 Da तु; Ñ3 B4 D5 ह (for हि). T G यथा भवति सोन्वभूत् (G1. 3 यथार्हं सोन्वसेवत); M बुभुजे विषयान्प्रियान्.

3 Śi resumes (cf. v. l. 1. 79. 23). — b) Ñ3 चान्नैः; T1 श्राद्धे. M3. 5 तावत्. G1. 3 श्राद्धैः संतर्पयन्पितॄन्. — c) S दीनांधकृपणान्वृद्धान् (T1 G3 M °न्विप्रान्). Cd cites अनुग्रह. — d) Śi होमैश्च. S अनाथांश्चाभ्य (T1 G3 °श्राप्य-; G1 °श्रापि; G2 °थानभ्य-; M °थानप्य) पूजयत्.

4 a) M °र्थीश्चान्न°. — b) B5 विषयान्परि°. K2 °पालनात्. — c) B5 भूतांश्च. — d) D5 M3. 5 दस्यूनां नि°. K2 संग्रहणेन; D3 T G (except G4) M6-8 निग्रहणेन; Cd as in text.

5 a) B वै (for च). S स्वधर्मेण प्र°. — c) G3 पालया-

. 8506
1. 85. 7
. 1. 79. 7

कालं वर्षसहस्रान्तं सस्मार मनुजाधिपः ॥ ७
परिसंख्याय कालज्ञः कलाः काष्ठाश्च वीर्यवान् ।
पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह ॥ ८
यथाकामं यथोत्साहं यथाकालमरिंदम ।
सेविता विषयाः पुत्र यौवनेन मया तव ॥ ९
पूरो प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनम् ।
राज्यं चैव गृहाणेदं त्वं हि मे प्रियकृत्सुतः ॥ १०
प्रतिपेदे जरां राजा ययातिर्नाहुषस्तदा ।
यौवनं प्रतिपेदे च पूरुः स्वं पुनरात्मनः ॥ ११
अभिषेक्तुकामं नृपतिं पूरुं पुत्रं कनीयसम् ।
ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥ १२
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो ।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यसि ॥ १३
यदुर्ज्येष्ठस्तव सुतो जातस्तमनु तुर्वसुः ।
शर्मिष्ठायाः सुतो द्रुह्युस्ततोऽनुः पूरुरेव च ॥ १४
कथं ज्येष्ठानतिक्रम्य कनीयान्राज्यमर्हति ।

मास सर्वांश्च. — [a]) Ś1 K1 °दिंदुरिवा°(!). G3 °वामरान्.

7 [a]) G3 स संतप्यं. S सुखान् (for शुभान्). — [c]) T2 G (except G1.3) °सहस्रं तत्.

8 After 8[ab], Dn D1.4 ins.:

838* यौवनं प्राप्य राजर्षिः सहस्रपरिवत्सरान् ।
विश्वाच्या सहितो रेमे व्यभ्राजन्नन्दने वने ।
अलकायां स कालं तु मेरुश्रृङ्गे तथोत्तरे ।
यदा स पश्यते कालं धर्मात्मा तं महीपतिः ।

9 Before 9, D4 (marg.) ins. ययातिरुवाच; S (except T2 G2.4.5) ययातिः. — 9[ab]=(var.) 2[ab]. — [a]) B1.5.6 D2 S (except T2 G1.6) यथाकालं (for °कामं). — [b]) B1.5.6 D2 T1 G3–5 M यथाकाम° (M6–8 यथासुख°). — [c]) M6–8 °याः सम्यग्. — After 9, D4 (marg.) T G ins.:

839* तेजसा तव सत्पुत्र पूर्णं यौवनमुत्तमम् ।

Ko.4 (om. line 6) Dn D2 (om. line 6) ins. after 9: D4 (marg.; om. line 8), after 839*:

840* न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ।
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
एकस्यापि न पर्याप्तं तस्मात्तृष्णां परित्यजेत् ।
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः । [5]
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ।
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते ।
तस्मादेनामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह । [10]

[Cf. 693* (v. l. 1. 70. 44). — The source of this is the Viṣṇup. (4. 10. 9–15), where the entire passage (with the exception of line 6) recurs with but slight variation. — (L. 1–2) = lines 6–7 of 693*, and Manu 2. 94.]

10 T1 M3.5 om. 10[ab]. — [a]) D2 प्रीतोस्मि तव भद्रं ते. — [b]) B (except B4) D2 त्वं (for इदं). — [c]) K4 Da Dn D1.4 M3.5 चेदं; B D2.5 T G च मे (G1 च त्वं) (for चैव). Da Dn D1.4 त्वं (for इदं). — After 10[c], T G ins.:

841* यावदिच्छसि यौवनम् ।
तावदीर्घायुषं भुङ्क्ष्व;

while M ins.:

842* मया दत्तं तु सान्वयम् ।
यावदिच्छसि तावच्च यौवनेन समन्वितम् ।
भुङ्क्ष्व राज्यं सुदीर्घायुः.

— [d]) K2 पुनः (for सुतः).

11 Before 11, all MSS. ins. वैशं° उ° (K1.2 D2 S om. उ°). — [a]) D5 राजन्. — [b]) S °तिर्नहुषात्मजः. — [c]) K2 स्वं प्रपेदे च; G1.3 प्रतिसंपेदे. M6–8 स (for च). — [d]) K2 स पूरुः; D2.5 पूरुश्च; G1.2.4 °स्त्वं; G3 °स्तं. S पुनरात्मवान्.

12 [a]) Hypermetric! Ś1 K1 D5 तु नृपं; Ko.2 Ñ1.2 नृपं (sic); K3.4 च नृपं (for नृपतिं). — [c]) T G °स्वाः पौराः.

13 [a]) M6–8 °स्य दौहित्रं. — [b]) K1 सुतं विभो; M3.5 प्रियं सुतं. — [c]) Ko ज्येष्ठं सुतम्. B (except B4) D2 यदुं व्यतिक्रम्य. — [d]) B (except B4) D2 पूरो राज्यं (b transp.). Ko.3.4 Ñ2 B Dn D1.2.4 प्रयच्छसि.

14 [a]) Da यदुः श्रेष्ठः. — [b]) Ś1 B3 T1 M3.5 °स्तदनु; Ko.3.4 राजंस्तमनु; G3 °स्तव तु. Some MSS. तुर्वशुः. — [c]) G4.5 ततो (for सुतो). Some MSS. द्रुह्यः. — [d]) T G अनुर्द्रुह्यु(G6 अनुः पूरु)श्च पार्थिव (T2 G6 °वः); M अनुर्द्रुह्युरनंतरः (sic).

15 [a]) Ko B1 D5 ज्येष्ठमति°. — [b]) S (except T1 G3) यवीयान्. — [c]) Ko एवं (for एतत्). G2.5 °यान्नास; G4 °यामोघ. — [d]) Ś1 धर्मस्तमनु°; K3.4 धर्मं समनु°; E

एतत्संबोधयामस्त्वां धर्मं त्वमनुपालय ॥ १५

ययातिरुवाच ।

ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वन्तु मे वचः ।
ज्येष्ठं प्रति यथा राज्यं न देयं मे कथंचन ॥ १६
मम ज्येष्ठेन यदुना नियोगो नानुपालितः ।
प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः ॥ १७
मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः ।
स पुत्रः पुत्रवद्यश्च वर्तते पितृमातृषु ॥ १८
यदुनाहमवज्ञातस्तथा तुर्वसुनापि च ।
द्रुह्युना चानुना चैव मय्यवज्ञा कृता भृशम् ॥ १९
पूरुणा मे कृतं वाक्यं मानितश्च विशेषतः ।
कनीयान्मम दायादो जरा येन धृता मम ।
मम कामः स च कृतः पूरुणा पुत्ररूपिणा ॥ २०
शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयम् ।
पुत्रो यस्त्वानुवर्तेत स राजा पृथिवीपतिः ।
भवतोऽनुनयाम्येवं पूरू राज्येऽभिषिच्यताम् ॥ २१

प्रकृतय ऊचुः ।

यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा ।
सर्वमर्हति कल्याणं कनीयानपि स प्रभो ॥ २२
अर्हः पूरुरिदं राज्यं यः सुतः प्रियकृत्तव ।

C. 1. 3530
B. 1. 85. 31
K. 1. 79. 37

स्वधर्ममनु°; B5 धर्मं स्वमनु°; Da Dn D1.4 धर्मं त्वं प्रति° (Da2 D4 परि°); D5 धर्ममेवानु°; G2.4.5 त्वं धर्ममनु°. M अनुचिंतय. — After 15, K2 ins.:

843* धर्मं चोल्लङ्घयन्नाजा प्रजानां दुःखमावहेत् ।

16 Ś1 K1 S om. उवाच. — [a]) D2 द्विजातिप्र°. — [b]) M3 मद्वचः. — T2 om. 16[c]–18[b].

17 T2 om. 17 (cf. v. l. 16). — [d]) G3 स ह; M6–8 न तु.

18 T2 om. 18[ab] (cf. v. l. 16). — [a]) G1 वचकृद्धि; G2 वचनाद्धि (for वचनकृत्). — [b]) K2 हितकर्मा च. T1 G हितस्य (T1 G2.4.6 °श्च) विभवस्य च. — [c]) K4 Ñ2 B (except B1) D2 तु (for च). — After 18, T1 G1.3 ins.:

844* अपुत्री तु नरः स्वर्गाद्दुःखं नरकमाविशेत् ।

D2 (marg.) T1 (om. line 1).2 G2.3 (om. line 1).4–6 M ins. after 18: G1, after 844* above:

845* पुदिति नरकस्याख्या दुःखं हि नरकं विदुः ।
पुतस्त्राणात्ततः पुत्रमिहेच्छन्ति परत्र च ।
आत्मनः सदृशः पुत्रः पितृदेवर्षिपूजने ।
यो बहूनां गुणतरः स पुत्रो ज्येष्ठ उच्यते ।
ज्येष्ठांशहारो गुणकृदिह लोके परत्र च । [5]
श्रेयान्पुत्रगुणोपेतः स पुत्रो नेतरो वृथा ।
वदन्ति धर्मं धर्मज्ञाः पितॄणां पुत्रकारणात् ।

[(L. 1) T2 G4–6 पुदित्या नर°; M पूतीति नर°. — (L. 2) D2 G1.2 पितुस्त्रा°; G3 अतस्त्रा°; G5 पुंदस्त्रा°; M पूतित्रा°. — (L. 4) D4 भवेदेकः; G3 गुणकरः. — After line 4, G1.3 ins.:

846* मूकोऽन्धबधिरः श्वित्री स्वधर्मं नानुतिष्ठति ।
चोरः किल्बिषकः पुत्रो जेष्ठो न ज्येष्ठ उच्यते ।

— (L. 5) T2 G4–6 ज्येष्ठांशभाक्स. — (L. 6) T2 G2.4–6 पुत्रो गुणो°.]

19 [b]) A few MSS. तुर्वसुना. S पुनः (for अपि च). — [c]) Ś1 K द्रुह्येन (K2.3 °ण); Da M6–8 द्रुह्युणा. G3 om. the first च. — [d]) B भृशं कृता (by transp.); D2 भृशं तथा. — After 19, K3 reads 21[ab] (for the first time), followed by 848* (cf. v. l. 21), repeating 21[ab] in its proper place.

20 [a]) B D (except D5) G3 तु (B1 च) (for मे). In Ś1, the portion of the text from 20[b] up to the end of this adhy. is lost on the missing upper half of a fol. (62). — [b]) K1.2 B (except B5) Da Dn D1.4 मानितं च; D5 °तं मे. — [d]) Ñ1.2 D (except D2.5) G3 transp. जरा and धृता. — After 20[cd], G3–5 ins.:

847* वेदोक्तं संभवं मह्यमनेन हृदयोद्भवम् ।
तस्य जातमिदं कृत्स्नमात्मा पुत्र इति श्रुतिः ।

— T2 G3 M om. 20[c]–21[a]. — [e]) B D2 स च कामो मम (by transp.). — [f]) K0.4 हितकांक्षिणा; Ñ2 B5 D (except D2.5) मित्ररूपिणा.

21 Ś1 missing. T2 G3 M om. 21[abcd] (cf. v. l. 20). For K3 cf. v. l. 19. — [a]) D5 ममापि (for शुक्रेण). — [c]) K1 Dn1 G1–3.5 यस्त्वनु°. — T1 G (except G3) ins. after 21[cd]: K3, after the first occurence of 21[ab] (cf. v. l. 19):

848* यो वानुवर्ती पुत्राणां स पुत्रो दायभाग्भवेत् ।
[K3 योनुवर्ती पितॄणां स पुत्रो दायादभाग्भवेत् .]

— [e]) G4 भवतो ह्यनुयाम्येवं; G5 °तो ह्यनुनया°. M एष (for एवं).

22 Ś1 missing (cf. v. l. 20). K3 प्रजाः; T2 G

C. 1. 3530
B. 1. 85. 31
K. 1. 79. 37
. 3506
1. 85. 7
. 1. 79. 7

वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरम् ॥ २३
वैशंपायन उवाच ।
पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्तदा ।
अभ्यषिञ्चत्ततः पूरुं राज्ये स्वे सुतमात्मजम् ॥ २४
दत्त्वा च पूरवे राज्यं वनवासाय दीक्षितः ।
पुरात्स निर्ययौ राजा ब्राह्मणैस्तापसैः सह ॥ २५
यदोस्तु यादवा जातास्तुर्वसोर्यवनाः सुताः ।
द्रुह्योरपि सुता भोजा अनोस्तु म्लेच्छजातयः ॥ २६
पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव ।
इदं वर्षसहस्राय राज्यं कारयितुं वशी ॥ २७

इति श्रीमहाभारते आदिपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥

८१

वैशंपायन उवाच ।
एवं स नाहुषो राजा ययातिः पुत्रमीप्सितम् ।
राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः ॥ १
उषित्वा च वने वासं ब्राह्मणैः सह संश्रितः ।

(except G1.3) पौराः (for प्रकृ°). K1 S om. ऊचुः. — [a]) K3 पुत्रो यो; T2 G स पुत्रो. T1 G1 M गुणसंयुक्तो; T2 G2-6 गुणयुक्तो हि. — [b]) S हितकृत्संततं गुरोः (M पितुः). — [c]) K G2 सं (? read सन्) प्रभो; B6 Dn D1.4 सत्तमः; G1 यः प्रभो. — After 22, S ins.:

849* वेदधर्मार्थशास्त्रेषु मुनिभिः कथितं पुरा ।

[T1 वेदे धर्मेथवा शास्त्रे; G3 वेदे धर्मार्थशास्त्रे च; M वेदे धर्मे (M3.5 धर्मे वेदे) चार्थशास्त्रे.]

23 Ś1 missing (cf. v. l. 20). — [b]) Ko.1.3.4 B4.6 D2.5 यः प्रियः; K2 M यः पुत्रः; T1 स्वसुतः. — [c]) M5 वरदानाच. — [d]) Ko D2 कर्तुमुत्तरं.

24 Ś1 missing (cf. v. l. 20). S om. उवाच. — [a]) K1.4 Dn3 D5 T1 G2 अभिषि°. T G तथा; M तदा. — [d]) K2 Ñ1 B D (except D2.5) °मात्मनः. S ययातिर्द्विजपूर्वकं. Cf. line 2 of 850*. — After 24, D4 (marg.) S ins.:

850* यदुं च तुर्वसुं चोभौ द्रुह्युं चैव सहानुजम् ।
अन्तेषु स विनिक्षिप्य नाहुषः स्वात्मजान्सुतान् ।

[(L. 1) D4 M6-8 तुर्वसुं चैव. — (L. 2) T2 G6 अथ; G1 असौ (for स). G1.3 ययातिः (for नाहुषः).]

25 Ś1 missing (cf. v. l. 20). — [a]) Ko.3.4 स दत्त्वा; T1 G3 दत्त्वा तु. — [b]) D5 °वासं ततो गतः. — [c]) G1.3 पुरात्तु. S तस्मात् (for राजा). — [d]) B D2 तापसैर्वृतः. — After 25, Ko.4 D1.4 (marg.) ins.:

851* देवयान्या च सहितः शर्मिष्ठया च भारत ।
अकरोत्स वने राजा सभार्यस्तप उत्तमम् ।

26 Ś1 missing (cf. v. l. 20). — [a]) K2 B5 राजन्; G1.3 पुत्राः (for जाताः). Ñ3 यदोः सुतास्तु यदवः; B1.4.6 यदोर्जातास्तु (B1 °श्च) यदवः; T G2.4-6 M यदोर्जाता यादवास्तु (M3.5 °श्च). — [b]) K4 Ñ B D °नाः स्मृताः. — [c]) K द्रुह्यस्य तु (K4 च). Ñ1 B3 Da द्रुह्योस्तु तनया भोजा; B1.4-6 Dn D1.4 द्रुह्योः सुतास्तु (B1.4-6 °श्च)वै भो°.

27 Ś1 missing (cf. v. l. 20). — [c]) Ñ1.2 B3 Dn D1.4 °सहस्राणि. — [d]) T1 कारय नः प्रभो; T2 G कारयिता प्रभो; M3.5 कलियुगेभवत्. D2 बली; M6-8 प्रभो (for वशी).

Colophon. — *Major parvan:* T2 G1.3-6 M संभव° (for आदि°). — *Sub-parvan:* Ñ1.2 Da2 T1 संभव; to it Ñ1.2 add ययात्युपाख्यान. D2 G4 M (om. sub-parvan name) mention only यायात. Ś1 Ko-3 Ñ3 B Da D1.4.5 indicate the end of the Yayāti episode by यायातं समाप्तं; Ñ1.2 Dn G1.4 by पूर्वयायातं समाप्तं. — *Adhy. name:* G1 ययातेर्वनवासः. — *Adhy. no.* (figures, words or both): Ś1 K1 illegible; B5 79; Da1 D4m 83; Dn3 84; T1 70; T2 20; G M 21. — *S'loka no.:* Ñ3 Da1 28; Dn 35; M3 33. — *Aggregate s'loka no.:* Dn2 3506.

81

☞ This adhy. is missing in V1 (cf. v. l. 1. 68. 74); the MS. is *wholly* ignored here.

1 K1.3 D2.5 S om. उवाच. — [b]) G1.3 पुरुम् (for पुत्रम्). — [c]) = 10°.

2 [a]) K3.4 T2 G2.4.6 तु; M3.5 स (for च). — [b]) Ko.3.4 तापसैः. Ko D5 सह संसितः; K2 सह संस्तुतः; K3 D1.4 सह शंसितः; B Dn D2 संशित(Dn D2 शंसित)व्रतः (B1-4 D2 °तैः); Da सह संगतैः (Da2 °तः). — [c]) D5

फलमूलाशनो दान्तो यथा स्वर्गमितो गतः ॥ २
स गतः सुरवासं तं निवसन्मुदितः सुखम् ।
कालस्य नातिमहतः पुनः शक्रेण पातितः ॥ ३
निपतन्प्रच्युतः स्वर्गादप्राप्तो मेदिनीतलम् ।
स्थित आसीदन्तरिक्षे स तदेति श्रुतं मया ॥ ४
तत एव पुनश्चापि गतः स्वर्गमिति श्रुतिः ।
राज्ञा वसुमता सार्धमष्टकेन च वीर्यवान् ।
प्रतर्दनेन शिबिना समेत्य किल संसदि ॥ ५

जनमेजय उवाच ।

कर्मणा केन स दिवं पुनः प्राप्तो महीपतिः ।
सर्वमेतदशेषेण श्रोतुमिच्छामि तत्त्वतः ।
कथ्यमानं त्वया विप्र विप्रर्षिगणसंनिधौ ॥ ६
देवराजसमो ह्यासीद्ययातिः पृथिवीपतिः ।
वर्धनः कुरुवंशस्य विभावसुसमद्युतिः ॥ ७
तस्य विस्तीर्णयशसः सत्यकीर्तेर्महात्मनः ।
चरितं श्रोतुमिच्छामि दिवि चेह च सर्वशः ॥ ८

वैशंपायन उवाच ।

हन्त ते कथयिष्यामि ययातेरुत्तरां कथाम् ।
दिवि चेह च पुण्यार्थां सर्वपापप्रणाशिनीम् ॥ ९
ययातिर्नाहुषो राजा पूरुं पुत्रं कनीयसम् ।
राज्येऽभिषिच्य मुदितः प्रवव्राज वनं तदा ॥ १०
अन्तेषु स विनिक्षिप्य पुत्रान्यदुपुरोगमान् ।
फलमूलाशनो राजा वने संन्यवसच्चिरम् ॥ ११
संशितात्मा जितक्रोधस्तर्पयन्पितृदेवताः ।
अग्नींश्च विधिवज्जुह्वन्वानप्रस्थविधानतः ॥ १२
अतिथीन्पूजयामास वन्येन हविषा विभुः ।
शिलोञ्छवृत्तिमास्थाय शेषान्नकृतभोजनः ॥ १३
पूर्णं वर्षसहस्रं स एवंवृत्तिरभून्नृपः ।

C. 1. 8548
B. 1. 86. 15
K. 1. 80. 16

राजा; S भूत्वा (for दान्तो). — [a]) Ñ3 यदा; B1 (m as in text) D5 तदा; Dn S ततः (for यथा).

3 [a]) K3 स गत्वा; D2 संगतः. Ñ1 B3 Da Dn D1.4 स्वर्निवासं; Ñ3 स्वर्गं; D2 सुख°. K2 B3 Da तु (for तं). Ñ2 स्वर्निवासित्वं; S स्वर्गं(T1 G1 M स्वं नि)वासार्थं. — [b]) Ñ1.2 B (except B5) D (except D2) सुखी. S (except T1 G1.3) सुखमुत्तमं (for मुदितः सु°). — [c]) Ko.3.4 Ñ1.2 D (except D2) S कालेन नाति(K3 Dn1m चाति)महता. — After 3, D4 (marg.; om. lines 2-3) S ins.:

852* साधुभिः संगतिं लब्ध्वा पुनः स्वर्गमुपेयिवान् ।
जनमेजयः ।
स्वर्गतश्च पुनर्ब्रह्मन्निवसन्देववेश्मनि ।
कालेन नातिमहता शक्रेण च्यावितः कथम् ।

With the last line cf. 3[cd] and v. l.

4 [a]) Ko.3.4 D5 विवशः; K1 नियतं; Ñ3 S (except M6-8) निवसन्. D5 पतितः (for प्रच्यु°). — [b]) G3 संप्राप्तो. — [c]) A few MSS. °रीक्षे. T1 G3 स्थितोंतरिक्षे दौहित्रैः. — [d]) Ñ3 G3 तथेति.

5 [ab]) T2 G2.4.6 एवं. K2 transp. पुनः and गतः. Ñ1.2 B3 Dn D5 T2 G श्रुतं (G2.4 °तः). — [cd]) S तदा सार्धं वसुमता श्रीमता चाष्टकेन च. — Ś1 om. 5[ef].

6 Da1 जन्मे°. Ś1 K1 om. उवाच. S om. जनमे° उ° (cf. 852*). — [ab]) S कारणेन दिवं केन संप्राप्तो द्विजसत्तम. — Ś1 K1 om. 6[c]-7[a]. — 6[ef]=1. 62. 2[cd]. — [f]) Ko.3.4 Da1 M6-8 देवर्षि°.

7 Ś1 K1 om. 7 (cf. v. l. 6). — [a]) S (except T1 G1.3) राजा देवसमो. — [c]) Ñ1 B D2 M6-8 सोमवंश°. — [d]) T1 G1.3 °समप्रभः.

9 Ś1 K1.3 D5 S om. उवाच. — [a])=1. 53. 35[a]. — [b]) B3.5.6 Dn D1.4 (m as in text) °रुत्तमां. — [c]) T1 G1.3 नि(T1 अ)खिलेन (for दिवि चेह). Ś1 K1 पुण्यां तां; Da °ण्यां. — [d]) Ś1 K1 °मोचिनीं; Ñ1.3 B1.3.4 D2 °मोच°; a few MSS. °णाश°.

10 [b]) T2 G (except G1.3) transp. पूरुं and पुत्रं. — [c])=1°. Ś1 K1 ततो (for राज्ये). — [d]) Ś1 पुनराजा (sic) and गतः (*sup. lin.* प्रव° and तदा as in text).

11 [a]) Ś1 K3 Ñ B1.4.5 Dn D4 G3 M3.5 अंत्येषु; B3 Da अन्येषु; D5 म्लेच्छेषु; Cd as in text. Ś1 K1.3.4 B5.6 च; T2 G (except G1.3) अथ (for स). D1. 2अमात्येषु वि°. — [b]) S पुत्रान्वै पूरुपूर्वजान्. — [d]) K1-3 B1 Dn2.ns D4 T G5.6 M6-8 स न्य°.

12 [a]) K3.4 Ñ1.2 B3.4 Dn D1.4.5 शंसितात्मा; Ñ3 संश्रि°; T2 G (except G3) संयता°. — [c]) T G (except G3.4) अग्निं च. K1 हुत्वा; K3 B (except B3) Da1 जुहुद्.

13 [a]) B1.4 D2 अतिथिं. Ś1 K Ñ3 Da D5 पूजयन्नित्यं. — [b]) S द्विजान् (for विभुः). — [c]) T1 G1.3 आसाद्य; T2 G4-6 °दाय; G2 °नाय. — [d]) M6-8 शेषान्ने.

14 [a]) K1 G1 पूर्णे. Ś1 K0-3 सहस्रं वर्षाणाम्; K4 D5

C. 1. 3548
B. 1. 86. 15
K. 1. 80. 16

अब्भक्षः शरदस्त्रिंशदासीन्नियतवाङ्मनाः ॥ १४
ततश्च वायुभक्षोऽभूत्संवत्सरमतन्द्रितः ।
पञ्चाग्निमध्ये च तपस्तेपे संवत्सरं नृपः ॥ १५
एकपादस्थितश्चासीत्षण्मासाननिलाशनः ।
पुण्यकीर्तिस्ततः स्वर्गं जगामावृत्य रोदसी ॥ १६

इति श्रीमहाभारते आदिपर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

वैशंपायन उवाच ।
स्वर्गतः स तु राजेन्द्रो निवसन्देवसद्मनि ।
पूजितस्त्रिदशैः साध्यैर्मरुद्भिर्वसुभिस्तथा ॥ १
देवलोकाद्ब्रह्मलोकं संचरन्पुण्यकृद्वशी ।
अवसत्पृथिवीपालो दीर्घकालमिति श्रुतिः ॥ २
स कदाचिन्नृपश्रेष्ठो ययातिः शक्रमागमत् ।
कथान्ते तत्र शक्रेण पृष्टः स पृथिवीपतिः ॥ ३
शक्र उवाच ।
यदा स पूरुस्तव रूपेण राज-
ञ्जरां गृहीत्वा प्रचचार भूमौ ।

T G वर्षसहस्राणाम्. Ñ Dn च; Da तु (for स). — ^{c}) K$_2$ T$_1$ G$_1$ M$_5$ अभक्षः. T$_2$ G$_6$ शरदां; G$_{2-5}$ च ततस्. — ^{d}) Da नियतसंयमः; D$_5$ °मानसः.

15 ^{c}) S (except T$_2$ G$_6$) पुनः (for तपः). Ñ$_{1.2}$ B D (except Da D$_5$) तथा (B$_5$ ततः) पंचाग्निमध्ये च (D$_2$ तु). — ^{d}) K$_3$ D$_5$ नृप; Ñ$_3$ T$_2$ G$_{3.6}$ पुनः; G$_1$ ततः; G$_{2.4.5}$ तपः; M मुनिः (for नृपः). Ñ$_{1.2}$ B Dn D$_{1.2.4}$ तपस्तेपे स वत्सरं.

16 ^{a}) Ś$_1$ K$_1$ Ñ B$_3$ Dn$_2$ D$_{4.5}$ G$_3$ °पादः. T$_2$ G$_{2.4.6}$ °श्रापि. — ^{b}) T$_1$ G$_{1.3}$ षण्मासं च. T$_2$ G$_{4-6}$ अभवत्तदा; M नियतव्रतः. — After 16^{ab}, D$_4$ (marg.) S ins.:

853* एवमेव तथाब्दानां पर्यायेण गतं तदा ।

— ^{c}) S महायोगी (for पुण्य°). T$_2$ G गतः. Dn स्वर्गे. — ^{d}) D$_2$ व्याप्य; G$_6$ प्रेत्य; Cd आवृत्य (as in text). K (except K$_1$) रोदसीं; Cd as in text.

Colophon. — *Major parvan:* T$_2$ G M संभव° (for आदि°). — *Sub-parvan:* Ñ$_{1.2}$ T$_1$ संभव; to it Ñ$_{1.2}$ add उत्तरयायात. Ś$_1$ Ko$_{-2}$ Ñ$_3$ B Da Dn D$_{1.4.5}$ T$_2$ G$_4$ M$_{8.5}$ (om. the sub-parvan name) mention only उत्तरयायात. — *Adhy. name:* K$_3$ ययातिस्वर्गगमनं; K$_4$ ययातितपश्चर्या; T$_2$ G$_4$ तपश्चर्या. — *Adhy. no.* (figures, words or both): Ś$_1$ 96; Ko 83; B$_5$ 80; Da$_1$ D$_4$ m 84; Dn$_3$ 85; D$_5$ 81; T$_1$ 71; T$_2$ 21; G M 22. — *S'loka no.:* Ñ$_3$ M$_3$ 19; Da$_1$ Dn 17. — *Aggregate s'loka no.:* Dn$_2$ 3523.

82

☞ This adhy. is missing in V$_1$ (cf. v. l. 1. 68. 74); the MS. is *wholly* ignored here.

1 Ś$_1$ K$_{1.3}$ D$_5$ S om. उवाच. — ^{a}) Ko$_{.3.4}$ Ñ$_3$ तु स (by transp.); T$_1$ चाथ; G$_{1.3}$ स च. D$_5$ राजर्षिः. — ^{b}) Ko$_{.2}$ B$_{1m}$ Da न्यवसद्. Ñ$_1$ B$_{3.4.6}$ D (except Da D$_5$) S °वेश्मनि; Ñ$_3$ °संनिधौ. — ^{c}) Ñ$_1$ सर्वैर्; B$_5$ साधैं (for साध्यैर्). — ^{d}) Ś$_1$ K$_1$ B$_4$ G$_{1.3}$ M$_{3.5}$ तदा; B$_5$ सदा.

2 ^{a}) Dn D$_{1.4}$ देवलोकं. T$_1$ G$_{2.4.5}$ पुण्य-; T$_2$ पुनर् (for ब्रह्म-). — ^{b}) Ko संसरत्; K$_3$ शशंस; K$_4$ संस्मरन्. Ś$_1$ K$_1$ बली (for वशी). — After 2^{ab}, T G (except G$_3$) ins.:

854* पूजितस्त्रिदशैः साध्यैर्ययातिरतिधार्मिकः ।

— ^{a}) Da स्मृतिः; D$_5$ श्रुतं; T G$_{4-6}$ श्रुतः.

3 ^{a}) Ś$_1$ transp. स and कदाचित्. — ^{b}) Ś$_1$ K$_1$ °मासदत्; G$_6$ °मागतः. — After 3^{ab}, M$_{6-8}$ ins.:

855* कथयित्वा कथास्तात शक्रेण सह पौरवः ।

— In Ś$_1$, 3^{cd}–4^{ab} (up to गृहीत्वा) is lost on a broken upper portion of a fol. (63). — ^{d}) Dn D$_{1.4.5}$ transp. पृष्टः and स.

4 K$_1$ om. उवाच. S (T$_2$ om.) इंद्रः (for शक्र उ°). — ^{a}) T$_1$ G$_5$ यथा. Ko G$_{1.2.5}$ om. स. — ^{b}) Ko च; K$_4$ अथ; S वि- (for प्र-). — K$_1$ om. 4^c–5^c. — ^{c}) Ñ$_{1.3}$ B (except B$_5$) D (except Da D$_5$) तदा च राज्यं.

तदा राज्यं संप्रदायैव तस्मै
त्वया किमुक्तः कथयेह सत्यम् ॥ ४

ययातिरुवाच ।

गङ्गायमुनयोर्मध्ये कृत्स्नोऽयं विषयस्तव ।
मध्ये पृथिव्यास्त्वं राजा भ्रातरोऽन्त्याधिपास्तव ॥५
अक्रोधनः क्रोधनेभ्यो विशिष्ट-
स्तथा तितिक्षुरतितिक्षोर्विशिष्टः ।
अमानुषेभ्यो मानुषाश्च प्रधाना
विद्वांस्तथैवाविदुषः प्रधानः ॥ ६
आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः ।
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ ७
नारुंतुदः स्यान्न नृशंसवादी
न हीनतः परमभ्याददीत ।
ययास्य वाचा पर उद्विजेत
न तां वदेदुशतीं पापलोक्याम् ॥ ८
अरुंतुदं पुरुषं रूक्षवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यान् ।
विद्यादलक्ष्मीकतमं जनानां
मुखे निबद्धां निर्ऋतिं वहन्तम् ॥ ९
सद्भिः पुरस्तादभिपूजितः स्या-
त्सद्भिस्तथा पृष्ठतो रक्षितः स्यात् ।
सदासतामतिवादांस्तितिक्षे-
त्सतां वृत्तं चाददीतार्यवृत्तः ॥ १०

C. 1. 3560
B. 1. 87. 10
K. 1. 81. 18

— [d]) Ko D1 किमुक्तं. Ñ3 कथयस्व राजन्.

5 K1 om. 5^{abc} (cf. v. l. 4). — Ś1 S om. उवाच. — G2 om. 5^{cd}. — [d]) Ś1 illegible; Ko.2 D5 °रोंतेधि°; K1 आततो (sic) नाधिप°; K4 D2 °रोंते नृ°; S (G2 om.) °रोंताधि°. — D4 (marg.; om. lines 14–15) S ins. after 5 (G2, after 5^{ab}):

856* न च कुर्यान्नरो दैन्यं शाठ्यं क्रोधं तथैव च ।
जैह्म्यं च मत्सरं वैरं सर्वत्रैतन्न कारयेत् ।
मातरं पितरं चैव विद्वांसं च तपोधनम् ।
क्षमावन्तं च देवेन्द्र नावमन्येत बुद्धिमान् ।
शक्तस्तु क्षमते नित्यमशक्तः क्रोशते नरः । [5]
दुर्जनः सज्जनं द्वेष्टि दुर्बलो बलवत्तरम् ।
रूपवन्तमरूपी च धनवन्तं च निर्धनः ।
अकर्मी कर्मिणं द्वेष्टि धार्मिकं चाप्यधार्मिकः ।
निर्गुणो गुणवन्तं च शक्रैतत्कलिलक्षणम् ।
विपरीतं च देवेन्द्र एतेषु कृतलक्षणम् । [10]
ब्राह्मणो वाथ राजा वा वैश्यो वा शूद्र एव वा ।
प्रशस्तेषु प्रशस्तारः प्रशस्यन्ते यशस्विनः ।
तस्मात्प्रशस्ते देवेन्द्र नरः सक्तमना भवेत् ।
अलोकज्ञा ह्यप्रशस्ता भ्रातरस्ते ह्यबुद्धयः ।
अन्ताधिपतयः सर्वे ह्यभवन्मम शासनात् । [15]

इन्द्रः ।

त्वं हि वै धर्मदो राजन्कथयसे धर्ममुत्तमम् ।
कथयस्व पुनर्मेऽद्य लोकवृत्तान्तमुत्तमम् ।

[(L. 1, 3) D4 नृपो (for नरो) and ज्येष्ठं (for चैव). — (L. 4) T1 G1–3 राजेंद्र (for देवें°). — (L. 6) T2 G4–6 M सुजनं (for सज्ज°). — (L. 7) D4 तपस्विनं चातपस्वी; M रूपस्विनमरूपस्वी. — (L. 8) D4 T2 G1.3.6 च न (for चाप्य-). — (L. 10) T G राजेंद्र. — (L. 12) T G3–6 प्रसक्ताश्चेत् (for प्रशस्तारः). D4 प्रशस्तृभिः; M6–8 प्रशस्तिभिः (for यश°). — (L. 13) G1–3 राजेंद्र.]

6 [b]) K4 वरिष्ठः (for विशि°). — [c]) T2 G4.5 अमानुषा मानुषेभ्यः प्र°. — [d]) K3 विशिष्टः; K4 [S] वशिष्टः; D2 पुराणः; G3 M5 प्रधानाः.

7 [a]) Ś1 नाक्रुश्ये; K1 नाक्रचे (for नाक्रो°). — [d]) D2 सुकृतिं. G3 चैव.

8 Cf. Manu 2. 161 (s'loka!). — [b]) K3 °दधीत. G3 न हिंसकः परमर्मादवीतः (sic). — [c]) G1–3 पुनरुद्विजेत. — [d]) Ś1 K1 D2 Arjp Nilp °दुषतीं; Ñ2.3 B Dn D1 °दुष°; Da D4.5 °दुश°; Cd as in text. Ñ1 न तां वदेद्दोषवतीमधर्म्यां.

9 [a]) After °तुदं, Ñ1 B D2 ins. वै. K (except K2) Ñ2.3 D (except D2.4.5) T G3.4 M (except M3) परुषं. B3 °षस्य तीक्ष्णं. Ko.3.4 Ñ2 B1m.3 Da Dn D1.4 तीक्ष्णवाचं; Ñ1 B4.5 D2 तु तीक्ष्णं; B1 (orig.) सुतीक्ष्णं. — [b]) Ś1 K1 G (except G1.3) मनुष्यं. — [c]) K2 नराणां (for जना°). S क्षिप्रं ह्यलक्ष्मीर्भजते मनुष्यं (T2 G2.4–6 नरं तं). — [d]) Ko S निकृतिं; Cd as in text. Ś1 महांतम्; M6–8 वदंतं.

10 [a]) K1 B D5 अति-; Ñ1 B3 G6 अथ; Da1 G5 अपि (for अभि-). — [b]) S (except G3) सदा (for तथा). T2 G (except G1.3) transp. पृष्ठ° and रक्षि°. — [d]) T2 G1.3 आर्यवृत्तिः.

11 Cf. v. l. 1. 74. 12. — [b]) Ś1 K1 वैराचितः.

C. 1. 3561
B. 1. 87. 11
K. 1. 81. 19
. 850
1. 85.
. 1. 79.

वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य वा मर्मसु ये पतन्ति
तान्पण्डितो नावसृजेत्परेषु ॥ ११

न हीदृशं संवननं त्रिषु लोकेषु विद्यते ।
यथा मैत्री च भूतेषु दानं च मधुरा च वाक् ॥ १२
तस्मात्सान्त्वं सदा वाच्यं न वाच्यं परुषं क्वचित् ।
पूज्यान्संपूजयेद्दद्यान्न च याचेत्कदाचन ॥ १३

इति श्रीमहाभारते आदिपर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

इन्द्र उवाच ।
सर्वाणि कर्माणि समाप्य राज-
न्गृहान्परित्यज्य वनं गतोऽसि ।
तत्त्वां पृच्छामि नहुषस्य पुत्र
केनासि तुल्यस्तपसा ययाते ॥ १

ययातिरुवाच ।
नाहं देवमनुष्येषु न गन्धर्वमहर्षिषु ।
आत्मनस्तपसा तुल्यं कंचित्पश्यामि वासव ॥ २
इन्द्र उवाच ।
यदावमंस्थाः सदृशः श्रेयसश्च

— [c]) K (except K1) Ñ B D M ना (Da1 नुर्; Da2 D5 as in text) (for वा). K (except K1) Ñ B D (except Da D5) M ते (for ये). — [d]) G3 तान्वंदितो. K4 परेभ्यः.

12 [a]) Ñ1.3 नास्तीदृशं; T1 G1.3.6 नैताद्दं; T2 G2.4.5 न ताद्दं. Ñ1 संचरणं; B Da °वद्; D5 °वच्; T2 सुवचनं; G2.3 °हन्; Cd as in text. — [c]) Ś1 यया; K1 दद्यां; Ñ1.2 B D G दया (Dn1 G2 यदा; G3 यथा as in text). Ko transp. मैत्री and च. K3 लोकेषु.

13 [a]) M3.5 प्रियं; Cd सांत्वं (as in text). — [b]) T1 G1 नो (for न). — [c]) G2.4.5 °पूज्य यो (for °पूजयेद्). B3 T1 G1.3.6 M6-8 नित्यं; D2 देवान्; D5 वंद्यात्; M3.5 चापि (for दद्यात्). — [d]) Ś1 Ko.1.3 Ñ3 D5 याचेत्तु न; K2 याचेत न; K4 न याचेत्तु; S न याचेच्च. K4 कथंचन.

Colophon om. in B4-6. — *Major parvan:* T2 G1.3-6 M संभव° (for आदि°). — *Sub-parvan:* Ñ1.2 T1 संभव; to it Ñ1.2 add उत्तरयायात. Ś1 K1-4 Ñ3 B1.3 Da Dn D1.4.5 T2 G1-4 M3.5 (om. the sub-parvan name) mention only उत्तरयायात (B3 यायात). — *Adhy. name:* Ko.3.4 ययातिवाक्यं; M इंद्रययातिसंवादः. — *Adhy. no.* (figures, words or both): Ko 84; Da1 D4 m 85; Dn3 86; T1 72; T2 22; G M 23. — *S'loka no.:* Ñ3 Dn 13; Da1 14; M3 22. — *Aggregate s'loka no.:* Dn2 3536.

83

☞ This adhy. is missing in V1 (cf. v. l. 1. 68. 74); the MS. is *wholly* ignored here.

1 Ś1 K1 शक्रः; S इंद्रः (cf. v. l. 3). — [a]) K2 B D2 कार्याणि (for कर्मा°). — [b]) Ñ1.2 D (except D2) M5 गृहं. — [c]) S तं (T1 G1 ततस्; G3 तेन) त्वां.

2 Ś1 K1 S om. उवाच. — [b]) Ñ B5.6 Dn D1.4.5 गंधर्वेषु मह°. — [d]) B (except B1) अन्यं; D2 नान्यं; a few MSS. किंचित्.

3 Ś1 K1 शक्रः; S इंद्रः (cf. v. l. 1). — [a]) Cf. 5[d]. B (except B3) M (except M3) यदव°; G3 यथाव°. T1 G2 M सदृशाच्छ्रेय°; T2 G1.3-6 सदृशान् श्रे°. Cd cites सदृशः (as in text). — [b]) K1 कनी°; B3 Dn D1 अल्पी°; T2 G2 वरी°; Cd पापीयसः (as in text). B1 °भाव; D2 °भावं; T2 °भावान्; M3 चाभ्युदित°; M5 °भावात्. M6-8 चाप्युदितप्रभाव. T1 G1.4-6 वरी(T1 पापी)यसश्चापि (G1 °सं चैव) निजप्रभावात्. — [c]) Ś1 K ह्यंत°; Ñ B5 Da Dn D1.4 त्वंत°; D5 क्षीण°; S (except T1 G1.3) चांत° (for अन्त°). T1 तदेह; G1 तथेह; G2 च एते; G3 तवेह; G4-6 च ये ते (for तवेमे). — [d]) Ñ1.2 T2 G (except G2) पतितोस्यद्य (G3 °सीह).

4 Ś1 K1 S om. उवाच. — [b]) T G (except G3) गतो and लोकः. Ko.3.4 D2.5 G4-6 यदि मे (by transp.). — [c]) Ñ1 D (except D2.5) इच्छाम्यहं सु°. — [d]) T1

पापीयसश्चाविदितप्रभावः ।
तस्माल्लोका अन्तवन्तस्तवेमे
क्षीणे पुण्ये पतितास्स्यद्य राजन् ॥ ३

ययातिरुवाच ।

सुरर्षिगन्धर्वनरावमाना-
त्क्षयं गता मे यदि शक्र लोकाः ।
इच्छेयं वै सुरलोकाद्विहीनः
सतां मध्ये पतितुं देवराज ॥ ४

इन्द्र उवाच ।

सतां सकाशे पतितासि राजं-
श्च्युतः प्रतिष्ठां यत्र लब्धासि भूयः ।
एवं विदित्वा तु पुनर्ययाते
न तेऽवमान्याः सदृशः श्रेयसश्च ॥ ५

वैशंपायन उवाच ।

ततः प्रहायामरराजजुष्टा-
न्पुण्याँल्लोकान्पतमानं ययातिम् ।
संप्रेक्ष्य राजर्षिवरोऽष्टकस्त-
मुवाच सद्धर्मविधानगोप्ता ॥ ६

कस्त्वं युवा वासवतुल्यरूपः
स्वतेजसा दीप्यमानो यथाग्निः ।
पतस्युदीर्णाम्बुधरान्धकारा-
त्खात्खेचराणां प्रवरो यथार्कः ॥ ७

दृष्ट्वा च त्वां सूर्यपथात्पतन्तं
वैश्वानरार्कद्युतिमप्रमेयम् ।
किं नु स्विदेतत्पततीति सर्वे
वितर्कयन्तः परिमोहिताः स्मः ॥ ८

दृष्ट्वा च त्वां विष्ठितं देवमार्गे
शक्रार्कविष्णुप्रतिमप्रभावम् ।
अभ्युद्गतास्त्वां वयमद्य सर्वे
तत्त्वं पाते तव जिज्ञासमानाः ॥ ९

न चापि त्वां धृष्णुमः प्रष्टुमग्रे
न च त्वमस्मान्पृच्छसि ये वयं स्मः ।
तत्त्वां पृच्छामः स्पृहणीयरूपं
कस्य त्वं वा किंनिमित्तं त्वमागाः ॥ १०

C. 1. 3573
B. 1. 88. 10
K. 1. 82. 10

लोके; T2 G2.4–6 समीपे; G1.3 M सकाशे (for मध्ये); cf. 5a.

5 Ś1 K1 शक्रः; Ñ2 देवराज उ°; S इंद्रः (cf. v. l. 3). — a) T2 G6 समीपे (for सकाशे). T2 G पतितोसि. — b) Ś1 यदि (for यत्र). B3m G (except G1.3) लब्धोसि. — c) B1 Dn D1.4 एतद्वि°. Ñ B D च (for तु). S नाहुष मा स्म सर्वान् (for तु पुनर्यं°). — d) Cf. 3a. Ñ1 Da Dn D1.4 त्वं मावमंस्थाः; T1 G1.3.6 वाचावमंस्थाः; T2 G1.5 तथावमंस्थाः; G2 एवावमंस्थाः; M अवमंस्थाः (for न तेऽव°). S सदृशान् श्रेय° (cf. v. l. 3a).

6 Ś1 K1 D2 S om. उवाच. — a) T2 G2.4–6 प्रभूता°; G1 प्रभावो° (for प्रहाया°). Ś1 °गुसान्; K3 Dn2.n3 T2 G (except G1) °जुष्टात्. — b) B4.5 Dn1.n3 S (except M3.5) °ल्लोकात्पत°. — c) T2 G (except G1.3) °र्षिरथाष्ट°. K2 अथ (for तम्). — d) K2 तं धर्म°; Cd सद्धर्म° (as in text).

7 Before 7, all MSS. except Ś1 K1 ins. अष्टक उ° (S om. उ°). — a) K2 T1 तपसि; Ñ3 तमसि; G3 पतन् (for पतसि). Ko °धरप्रकाश. — d) Ko खे खेचरा°.

8 a) Ñ3 सूर्यपथः. — c) Ko.2 B5 इह; G1 च; M5 हि (for इति). — G3 om. from पततीति up to °यन्तः (in d). — d) G3 °मोहितोस्मि. K2 B3.5.6 Dn1 D2.4 G1.4–6 M3.5 स्म.

9 a) K (except K1) D (except Da) T Cd धि(T1 दि)ष्ठितं; Ñ1.2 विशिष्टं; B4 G2 °स्थितं. — b) B D2 शक्राग्नि°. — c) Ś1 K D5 प्रत्युद्गताः; Ñ3 अभ्युद्यताः. Ko स्मो (for त्वां). Ś1 K1–3 वयमेव. — d) Ñ3 यथातथ्ये; G3 तत्संहितुं (for तत्त्वं पाते). K4 Ñ1.2 B (B3 marg.) Da D2 प्रपा(B3 orig.6 °या)ते; Dn D1.4 च पाते; D5 ययाते (for पाते). B4 तु विजि°.

10 a) A few MSS. त्वा (for त्वां). Ś1 K2–4 Cd धृष्ण(Ś1 K3 °ष्णु)वः; D2 भूष्णवः. — b) T2 om. 10b. K2 न चापि त्वं पृ°. T1 G पृच्छसे (G1 °ते). K2.4 B1.3.5 Da Dn1.n3 D2 G (except G1) स्म; M6–8 च. M3.5 न त्वां पृच्छाम स्पृहणीयरूप (cf. c). — c) D2 तस्मात्त्वां; D4 S (except T2 G3) ते त्वां. Ś1 K1 Dn पृच्छामि. Ko.2 Ñ3 B1 Dn D1.5 °रूप; S (except T2) कमनीयरूप (T1 G1.3 °पं). — d) G1 om. वा. T1 G2 कस्त्वं भवान्; T2 G4–6 कस्यासि त्वं; G3 कस्त्वं भर्ता; M6–8 कस्य त्वं वै. Ś1 K4 D2 T2 G2.4.5 M त्विहागाः; K1 इहागाः; G3 च्युतोसि;

C. 1. 8574
. 850
1. 85.
. 1. 79.

भयं तु ते व्येतु विषादमोहौ
त्यजाशु देवेन्द्रसमानरूप ।
त्वां वर्तमानं हि सतां सकाशे
नालं प्रसोढुं बलहापि शक्रः ॥ ११
सन्तः प्रतिष्ठा हि सुखच्युतानां
सतां सदैवामरराजकल्प ।
ते संगताः स्थावरजङ्गमेशाः
प्रतिष्ठितस्त्वं सदृशेषु सत्सु ॥ १२
प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः ।
प्रभुः सूर्यः प्रकाशित्वे सतां चाभ्यागतः प्रभुः ॥ १३

इति श्रीमहाभारते आदिपर्वणि त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

ययातिरुवाच ।
अहं ययातिर्नहुषस्य पुत्रः
पूरोः पिता सर्वभूतावमानात् ।
प्रभ्रंशितः सुरसिद्धर्षिलोका-
त्परिच्युतः प्रपताम्यल्पपुण्यः ॥ १
अहं हि पूर्वो वयसा भवञ्ज-
स्तेनाभिवादं भवतां न प्रयुञ्जे ।
यो विद्यया तपसा जन्मना वा
वृद्धः स पूज्यो भवति द्विजानाम् ॥ २
अष्टक उवाच ।
अवादीश्चेद्वयसा यः स वृद्ध
इति राजन्नाभ्यवदः कथंचित् ।
यो वै विद्वान्वयसा *सन्स वृद्धः
स एव पूज्यो भवति द्विजानाम् ॥ ३

G₈ त्विहागतः.

11 [a]) K (except K₄) Ñ₃ B D₂.₅ T₁ G₃ M च (for तु). G₃ M ज्यैतु. — [b]) K₂ त्यजस्व. Ñ B₁.₅ D₃ D₄ चैवेंद्रं°; B₂.₄.₆ D₈ D₁.₅ चैवेंद्रसमप्रभाव. — [c]) K₀.₃.₄ विसोढुं. T₁ G₁.₃ वृत्र(G₁ बल)हा चापि शक्रः; T₂ G₂.₄–₆ बलवृत्रहंता.

12 [a]) S (except T₁ G₃) सुखाच्युतानां. — [b]) D₂ G₂.₄.₅ सदेवामर°; G₃ सकाशेमर°. — [c]) T G ये (G₂ सु-) (for ते). — [d]) Ś₁ प्रतिष्ठितास्ते; K₁ °ष्ठितं ते. T₂ प्राप-यिष्यंति त्वां सद्द°. G₂ तेषु प्रतीतश्च सतां च मान्यं.

13 [b]) T₂ G₂.₄.₅ विभुः. — [c]) T₁ G₁–₃ सूर्यः प्रभुः (by transp.). K₂ (*sup. lin.*).₃.₄ T₂ G₁.₅ प्रकाशत्वे; D₅ °शे च; T₁ G₃ प्रताप°. — [d]) S सता(T₁ स त्व)मभ्या°. Ś₁ K₁ °गतो गुरुः. Ñ₃ B₃ D₈ सतां साधुः सदा गतिः.

Colophon. — *Major parvan:* T₂ G M संभव° (for आदि°). — *Sub-parvan:* Ñ₁.₂ T₁ संभव; to it Ñ₁.₂ add उत्तरयायात. Ś₁ K₀–₃ Ñ₃ B D M (om. the sub-parvan name) mention only उत्तरयायात. *Adhy. name:* K₀.₃.₄ M₃.₅ ययातिपतनं. — *Adhy. no.* (figures, words or both): K₀ 85; B₅ 81; D₈₁ D₄ m 86; D₈ 87; T₁ 73; T₂ 23; G M 24. — *S'loka no.:* Ñ₃ D₈₁ D₈ M₃ 13. — *Aggregate s'loka no.:* D₈₂ 3549.

84

☞ This adhy. is missing in V₁ (cf. v. l. 1. 68. 74); the MS. is *wholly* ignored here.

1 K₁ om. ययातिरु°. S om. उवाच. — [c]) D₅ प्रवासितः. D₃ S सुरर्षिसिद्धलो° (by transp.). — [d]) S तत(G₈ इत)श्च्युतः. K₄ पतितास्म्यल्प°. G₁ (by corr.) °पुण्यात्.

2 [a]) M वयसाभिवंद्यः. — [b]) B₄ तेनाति°; D₂ तन्नोभि°; M °भिवाद्यं. Ś₁ K₁ D₂ om. न. Ñ₃ B₃.₄ om. प्र-. — [c]) B₃.₄.₆ च (for वा). — [d]) M (except M₃) °तीह द्वि° (cf. v. l. 3).

3 S₁ K₁ (hapl.) om. 3. T₁ om. 3–4. B₅ reads 3 in marg., after 10[b]. As पाठांतर, D₁ *repeats* 3 (with v. l.). — S om. उवाच. — [a]) S अविद्वांश्चेद्. K₂ Dn D₁ (first time).₄ त्वं (for चेद्). K₀.₃.₄ Ñ₁.₂ Dn D₁ (first time).₂.₄ यः प्र-; K₂ D₃ G₁ संप्र-; Ñ₃ [S] सौ प्र-; D₈ (second time) यः स्म; T₂ G₃ न स्म; G₂ सुप्र-; M स स्म

ययातिरुवाच ।
प्रतिकूलं कर्मणां पापमाहु-
स्तद्वर्ततेऽप्रवणे पापलोक्यम् ।
सन्तोऽसतां नानुवर्तन्ति चैत-
द्यथा आत्मैषामनुकूलवादी ॥ ४
अभूद्धनं मे विपुलं महद्वै
विचेष्टमानो नाधिगन्ता तदस्मि ।
एवं प्रधार्यात्महिते निविष्टो
यो वर्तते स विजानाति जीवन् ॥ ५
नानाभावा बहवो जीवलोके
दैवाधीना नष्टचेष्टाधिकाराः ।
तत्तत्प्राप्य न विहन्येत धीरो
दिष्टं बलीय इति मत्वात्मबुद्ध्या ॥ ६
सुखं हि जन्तुर्यदि वापि दुःखं
दैवाधीनं विन्दति नात्मशक्त्या ।
तस्मादिष्टं बलवन्मन्यमानो
न संज्वरेन्नापि हृष्येत्कदाचित् ॥ ७
दुःखे न तप्येन्न सुखेन हृष्ये-
त्समेन वर्तेत सदैव धीरः ।
दिष्टं बलीय इति मन्यमानो

C. 1. 3585
B. 1. 89. 9
K. 1. 88. 9

(for यः स). — [b]) K2-4 Ñ1.2 B1 Dn D1 (both times).2.4 स वै; Ñ3 B1.3 इति वै; T2 G4-6 इतीह; G1.3 M इतीव; G2 इत्येव (for इति). K (K1 om.) Dn D1 (first time).2.4 °ऽभ्यधिकः; Ñ1 राजन्तस्य वदेत्; Ñ3 °ऽभ्यवादः; S (T1 om.) °ऽभिवाद्यः. Ñ1.3 Da कथंचन; Dn1.n3 कथं वै; Dn2 कथ्यते च. — [c]) Ñ1 वृद्धो (for विद्वान्). K (K1 om.) D2 तपसा (for वय°). Ko.2 स प्र-; K3.4 संप्र-; Ñ1 यः स; Ñ2 B Da D1 (second time) G न स्म; Ñ3 यश्च; D2 च प्र-; T2 साधु; M स स्म (for *सन्स्म). Dn D1 (first time).4.5 यो विद्यया तपसा संप्रवृद्धः. — [d]) Ñ1 सदा च पू°; T2 G4-6 M3.5 स वै पू°. T2 G4.5 M भवतीह द्वि° (cf. v. l. 2).

4 T1 om. 4 (cf. v. l. 3). Ś1 K1 om. ययातिरु°. S om. उवाच. — [b]) S (T1 om.) तद्वर्तने (M3.5 °ते) प्रापणे. Ś1 प्रवरे; K1 प्रक(*sup. lin.* व)र; Cd अप्रवणे (as in text). Ko M6-8 °लौक्ये; K2.4 G3 °लौक्यं; B1.3 Da Cd °लोके. — [c]) T2 G M5 तस्मात् (G3 एतत्) संतो (for सन्तोऽसतां). G2 नाति°. B3.4.6 वै तद्; G1.3 चैव; Cd चैतद् (as in text). — [d]) Ś1 K2-4 यथा चात्मैषां; K1 D5 यथात्मैषां. Ñ B D (for D5 see above) यथा चैषामनुकूलास्तथासन् (Ñ3 °कूलवादी; B1 Da °कूलस्तथात्मा); S (T1 om.) यदात्मैषा (T2 G3 यथा चैषा) मप्यनुकूलवादी (G3 °वानपि). ❀ Dev. (corrupt): संतो नानुवर्तंति चैतद्यथा । तथा एथा (sic) एषां सतामात्मा स्वभावोऽनुकूलवादीत्युपलक्षणं । अनुकूलवादी वा । ❀ — Arj. mentions various readings and gives diff. explanations; but the MSS. are corrupt and partly unintelligible.

5 Before 5, T2 G ins. अष्टकः. — [a]) Ñ2 B3 m.4 बलं; Cd धनं (as in text). Ś1 महन्मे; Ñ B3-6 Dn D1.4 गतं तत्; B1 Da2 महद्गतं; Da1 महाद्भुतं; D2 महत्तद् (for महद्वै). — [b]) Ś1 K om. न. — G5 om. 5[cd]. — [c]) M धनं (for एवं). Ko.3.4 विचार्य; G3 प्रदाय. — [d]) Ñ3 न वि°; S (G5 om.) नाव° (for स वि°). Ś1 K1.3 G1 M5 जीवं; Ñ B Da D1 T2 G2.4 जीवः; Dn D4.5 धीरः; Arjp as in text. — Dn S ins. after 5 (G5, om. lines 1-2, ins. after 5[ab]):

857* महाधनो यो यजते सुयज्ञै-
र्यः सर्वविद्यासु विनीतबुद्धिः ।
वेदानधीत्य तपसा योज्य देहं
दिवं समायात्पुरुषो वीतमोहः ।
न जातु हृष्येन्महता धनेन
वेदानधीयीत नाहंकृतः स्यात् ॥

[(L. 1) T2 G2.4.6 स्म; M स (for सु-). — (L. 2) T2 G1.2.4.6 दिवं यायात्; M दिवमायात्. — (L. 3) Dn °यीतानहं°.]

6 D5 om. 6. — [b]) A few MSS. देवा°. T1 °धीना दृष्टवेदाधिकारः; M7 °धीनामेष चे°. — [c]) K2 तांस्तान्प्राप्य.

7 [a]) Ś1 Ko.1.4 D5 तु; K2 च (for हि). Ko मर्त्यो (for जन्तुर्). — [b]) Ñ1.2 दैवातीतं; D5 °धीनो. B D (except D5) विंदते. K1 °युक्त्या; G1 °बुध्या. — [c]) Ko.3 तस्मादैवं. — [d]) S (except G1.3 M3.5) अति (for अपि). B1 Dn D1.4 कथंचित्; T1 G1.3 सदैव; G2 तदैव.

8 S reads 8 (with v. l.) after 11; but in M3.5 the whole st. recurs here, while T G read here only 8[ab] (repeating it after 11). — Ś1 K1 D1.2.5 (? hapl.) om. 8. Da transp. 8 and 9. — [a]) K2.4 Ñ1.2 B Da Dn D4 दुःखैर्न. Da G5.6 (both latter first time) तप्येत; T2 G (both second time) M6.8 खिद्येन्न; M3.5

C. 1. 3585
B. 1. 89. 9
K. 1. 83. 9

न संज्वरेन्नापि हृष्येत्कदाचित् ॥ ८
भये न मुह्याम्यष्टकाहं कदाचि-
त्संतापो मे मानसो नास्ति कश्चित् ।
धाता यथा मां विदधाति लोके
ध्रुवं तथाहं भवितेति मत्वा ॥ ९
संस्वेदजा अण्डजा उद्भिदाश्च
सरीसृपाः कृमयोऽथाप्सु मत्स्याः ।
तथाश्मानस्तृणकाष्ठं च सर्वं
दिष्टक्षये स्वां प्रकृतिं भजन्ते ॥ १०
अनित्यतां सुखदुःखस्य बुद्ध्वा
कस्मात्संतापमष्टकाहं भजेयम् ।
किं कुर्यां वै किं च कृत्वा न तप्ये
तस्मात्संतापं वर्जयाम्यप्रमत्तः ॥ ११

अष्टक उवाच ।

ये ये लोकाः पार्थिवेन्द्र प्रधाना-
स्त्वया भुक्ता यं च कालं यथा च ।
तन्मे राजन्ब्रूहि सर्वं यथाव-
त्क्षेत्रज्ञवद्भाषसे त्वं हि धर्मान् ॥ १२

ययातिरुवाच ।

राजाहमासमिह सार्वभौम-
स्ततो लोकान्महतो *अजयं वै ।
तत्रावसं वर्षसहस्रमात्रं
ततो लोकं परमस्म्यभ्युपेतः ॥ १३
ततः पुरीं पुरुहूतस्य रम्यां

(both second time) हृष्येत. K2.4 सुखे च हृ°; Ñ1. 2 B Dn D4 सुखैः प्रहृ°; Da सुखैर्न हृ°. S (T G Ms. 5 all first time as in text) माद्येत् (for हृष्येत्). — [b]) G4. 5 (both first time) सहैव. — D4 om. 8[cd]. — [c]) Cf. 7[c]. Ko दैवं (for दिष्टं). S (Ms. 5 first time entire line as in text) °लीयः (M second time ins. इति) समवेक्ष्य (Ms. 5 second time °त्य) बुध्या. — [a])=7[d]. G4–6 न सज्जते. S (Ms. 5 first time as in text) चातिभृशं मनुष्यः. Dn कथंचित्. — After 8[cd] (which these MSS. read after the *repetition* of 8[ab]), T G ins.:

858* दृष्टो हि मे परतश्चापि लोकः
प्राप्ता भोगाः सर्वतो नास्ति निष्ठा ।

[T1 दिष्ट्यापि मे; G1. 2 दिष्ट्या मेयं. G5. 6 परमं चापि.]

9 Before 9, T G ins. ययातिः. Da transp. 8 and 9. — [b]) G5 वै (for मे). Śi K1. 2 Ñ D2. 5 G (except G3. 4) M6–8 मनसो. Ñ3 D5 किंचित्. — [c]) B4 यथा यथा; G1–3 यथा धाता (by transp.). A few MSS. मा (for मां). Dn D4 विदधीत. G3 विधाता ददाति (for विदधाति लोके).

10 [a]) Before अण्ड°, Śi Ko. 1. 3 M ins. हि; K4 D2 च. Before उद्भि°, Śi K (except K2) Ñ1. 2 D (except Da D2) ins. च. T2 G4–6 transp. अण्ड° and उद्भि°. MSS. indiscriminately उद्भिज°, उद्भिद°, उद्भिजा° and उद्भिदा°. — [b]) G2 जरायुजा (for सरी°). G4–6 कूर्म(G4 *sup. lin.* कूप)यो. Ñ3 ये वसंति (for ऽथाप्सु म°). — [c]) Śi यथाश्म°; B1 अथा°. T G °काष्ठाश्च. Śi Da2 S सर्वे. — [a]) Ko कर्मक्षये; G1 दिन°; G3 विषं यथा. K1 Ñ1. 2 Dn D1. 4. 5 भजंति.

11 [a]) S मत्वा (for बुध्वा). — [b]) S बुध्वा कस्मादष्टक संतपेयं. — [c]) Ñ2 B3. 6 M (except M5) कार्यं (for कुर्यां). Śi K D5 कुर्वन् (for कृत्वा). — [d]) Śi K1 वर्जयत्यप्र°; Ko. 3. 4 °यंतीह संतः. — For the transposition and repetition in S cf. v. l. 8. — After 11, N (except Ñ3) ins.:

859* वैशंपायन उवाच ।
एवं ब्रुवाणं नृपतिं ययाति-
मथाष्टकः पुनरेवान्वपृच्छत् ।

Ko. 3. 4 Ñ1. 2 Dn D1. 2. 4. 5 cont.:

860* मातामहं सर्वगुणोपपन्नं
तत्र स्थितं स्वर्गलोके यथावत् ।

12 Śi K1. 2 Ñ1. 2 B Da om. अष्टक उ° (cf. 859*). S om. उवाच. — [b]) G6 स्वयं (for त्वया). T1 G2. 3 यच्च (for यं च). Śi तथा च; Ñ1. 2 B4 Dn D1. 4 S यथावत्. — [c]) Śi K1 D (except D2. 5) T1 G1. 2 M8 तान्मे. Śi K1 D (except D2. 5) सर्वान् (for सर्वं). T2 G4–6 transp. राजन् and सर्वं. — [d]) Ñ1. 2 S धर्मं (G1–3 सर्वं).

13 Śi K1 S om. उवाच. — [a]) K2 पुरा (for राजा). — [b]) Śi K1 महतो याजयं वै (Śi च); Ko Ñ3 °तोऽजयं वै; K3 °तोऽहं जयन्वै; K4 D5 m °तोहं जयं वै; Ñ1. 2 B D °तश्चाजयं वै; S °तोहं (T1 G5 M7 °तोयं) जयेयं. K2 ततोहं लोकान्महतोऽजयं वै. — 13[cd]=(var.) 14[cd] and 15[cd]. — [c]) Ñ3 तत्राभवं. — [a])=14[a] and 15[a]. Śi K1 लोकमपरं चा(K1 वा)भ्युः; Ko. 4 D2 लोकानपरानभ्युः.

14 Śi K1. 2 G3 (hapl.) om. 14–15; K4 D1 (hapl.)

सहस्रद्वारां शतयोजनायताम् ।
अध्यावसं वर्षसहस्रमात्रं
ततो लोकं परमस्म्यभ्युपेतः ॥ १४
ततो दिव्यमजरं प्राप्य लोकं
प्रजापतेर्लोकपतेर्दुरापम् ।
तत्रावसं वर्षसहस्रमात्रं
ततो लोकं परमस्म्यभ्युपेतः ॥ १५
देवस्य देवस्य निवेशने च
विजित्य लोकानवसं यथेष्टम् ।
संपूज्यमानस्त्रिदशैः समस्तै-
स्तुल्यप्रभावद्युतिरीश्वराणाम् ॥ १६
तथावसं नन्दने कामरूपी
संवत्सराणामयुतं शतानाम् ।
सहाप्सरोभिर्विहरन्पुण्यगन्धा-
न्पश्यन्नगान्पुष्पितांश्चारुरूपान् ॥ १७
तत्रस्थं मां देवसुखेषु सक्तं
कालेऽतीते महति ततोऽतिमात्रम् ।
दूतो देवानामब्रवीदुग्ररूपो
ध्वंसेत्युच्चैस्त्रिः प्लुतेन स्वरेण ॥ १८
एतावन्मे विदितं राजसिंह
ततो भ्रष्टोऽहं नन्दनात्क्षीणपुण्यः ।
वाचोऽश्रौषं चान्तरिक्षे सुराणा-
मनुक्रोशाच्छोचतां मानवेन्द्र ॥ १९
अहो कष्टं क्षीणपुण्यो ययातिः
पतत्यसौ पुण्यकृत्पुण्यकीर्तिः ।
तानब्रुवं पतमानस्ततोऽहं
सतां मध्ये निपतेयं कथं नु ॥ २०
तैराख्याता भवतां यज्ञभूमिः
समीक्ष्य चैनां त्वरितमुपागतोऽस्मि ।
हविर्गन्धं देशिकं यज्ञभूमे-
र्धूमापाङ्गं प्रतिगृह्य प्रतीतः ॥ २१

C. 1. 3599
B. 1. 89. 23
K. 1. 83. 23

इति श्रीमहाभारते आदिपर्वणि चतुरशीतितमोऽध्यायः ॥ ८४ ॥

---

om. 14. — [a]) M पुण्यां (for रम्यां). — [b]) D5 शतद्वारां. Ko.3 Ñ3 G4–6 °योजनां तां; G2 °नांतरां. — T2 G5 om. 14^{cd}, which = (var.) 13^{cd} and 15^{cd}.

15 Ś1 K1.2 G3 om. 15 (of. v. l. 14). — [a]) Ko.4 °मपरं; Ñ3 °ममरं. Ko चाहं (for लोकं). — [b]) K3 दुर्विगाह्यं; G (G3 om.) M6–8 लोकमन्यैर्; M3.5 दिव्यमन्यैर् (for लोकपतेर्). Ñ3 दुरासदं. — T2 om. 15^{cd}, which = (var.) 13^{cd} and 14^{cd}.

16 [a]) Dn स देवदेवस्य; D1.4 देवाधिदेवस्य. — [b]) B4 विचित्य; D (except D2.5) °ह्लत्य. Ñ3 लोकान्निवसं. Ś1 K1 विशिष्टं (K1 °ष्टान्). — [c]) S (except T1 G1–3) समेतैः. — [d]) G3 °प्रभावस्तुतिर्. Ñ3 °श्वरः सन्.

17 [a]) Ko तत्रावसं; Ñ3 अथो°; D5 G1 अथा°. — [c]) Ś1 K1 °गंधी; K2 °गंधीन्. — [d]) Ś1 K1 °तांश्चाभिरू°; S °ताम्रान् सुरूपान् (G3 सुपार्श्वान्; G5.6 स्वरू°; M6–8 सुरम्यान्).

18 [a]) Dn D1.4 तत्र स्थितं मां. Ko.3.4 °सुखे प्र; B5 दिव्यसुखें; D5 °मुख्येषु; G2 °संघेषु. — [c]) T1 G1.3 °नां ब्रह्मविदुग्र°. — [d]) K4 अंशेत्यु°. G3 श्रुतो वै स्व°.

19 [b]) D2 T1 G2.3 om. अहं. Ñ3 गगनात्. — [d]) Ñ B D (except Da) सानुक्रोशाः (Ñ1 B5 °शं; B3m D5 °शात्); G5 आक्रोशतां. Ko.2 Ñ2 B (except B5) D (except D2) G3 M मां (Da M6–8 मा) नरेंद्र.

20 [a]) G1 (by corr.) हतो (for अहो). — [b]) G3 पुण्यवत् (for °कृत्). Ko पुण्यकीर्तिर्महात्मा. T2 पुण्यमूर्तिः (for °कीर्तिः). — [c]) M अब्रवं. S (except T1 G1.3 M3) तथाहं. — [d]) Ko.4 कथंचित्.

21 [a]) Ś1 °ख्यातं; K1 G2.4–6 °तां; T1 G3 M3.5 °तो; G1 °नं. Ś1 K1 T1 G M3.5 °भूमिं. — [b]) Ś1 K1 Ñ B4 Dn D1 °क्ष्य चेमां; Ko.2–4 °क्ष्येमां; D5 G (except G1.3) °क्ष्यैनां. T1 G2.3 °तमिहागतो°. — [c]) Ś1 K1 B3 Da2 Dn D1 Cd दैशिकं; K2 Da1 देश°; K3.4 D5 दर्शितं. Ko हविर्गंधैर्दर्शिता यज्ञभूमिः. — [d]) D1 प्रतिपूज्य; S प्रतिगृह्णन्. Ko प्रयातः.

1 Ś1 K1 D5 S om. उवाच. — [b]) K2.3 Ñ Da D5 वंशधरान् (cf. 4[a]). — [c]) Ś1 यत्वीराः; Ko.3.4 Ñ1.2 B4 Dn D1.5 °द्वीर्यान्; K1 °द्वीरा. K (except K1) D5 यादृशांश्चैव; Ñ1.2 Dn D1 °शांश्चापि. B4 Da चापि (for चैव). — [d]) K2.3 Ñ1.2 B4 Dn D5 यावतो. K (except K1) Ñ1.2 Dn D1.5 °क्रमान्. — For 1–3, S (which displaces the earlier portion of the genealogy) subst.:

870* पुत्रं ययातेः प्रब्रूहि पूरुं धर्मभृतां वरम् ।
आनुपूर्व्येण ये चान्ये पूरोर्वंशविवर्धनाः ।
विस्तरेण पुनर्ब्रूहि दौःषन्तेर्जनमेजयात् ।
संबभूव यथा राजा भरतो द्विजसत्तम ।

2 For S cf. v. l. 1 and 4. — [a]) K1 श्रीविहीनो; Ñ3 वीर्य°; B5 °हीना. — [b]) K Ñ1.2 B3.6 जना°; B5 जनाधिपाः. — [c]) B5 विरहिताश्चापि. — [d]) B1.3.6 D2.4 श्रुत°; B5 श्रुतपूर्वाः. Ko Ñ2 B D (except D5) कथं°.

3 For S cf. v. l. 1 and 4. — [a]) Ñ1 B3–6 D2.4 प्रथितकीर्तीनां; B1 D1 °वीर्याणां.

4 Ś1 K1 S om. उवाच. — [a])=1. 53. 35 etc. K4 अहं (for हन्त). — [b]) K1 यथा (for यन्मां). Ś1 यदि त्वं श्रोतुमिच्छसि. — [c]) Ś1 B1 D4 वंशकरान् (cf. 1[b]). B3.6 पुत्रान्. — For 4, S subst. (cf. v. l. 1):

871* पूरुर्नृपतिशार्दूलो यथैवास्य पिता नृपः ।
धर्मनित्यः स्थितो राज्ये शक्रवीर्यपराक्रमः ।

[(L. 1) T2 G3.4.6 पूरुं; G1.2 पुनर् (for पूरुर्). G1–3 पितेवास्य यथा नृपः.]

C 1. 8696
B 1. 94. 6
K 1. 88. 5

मनस्युरभवत्तस्माच्छूरः श्येनीसुतः प्रभुः ।
पृथिव्याश्चतुरन्ताया गोप्ता राजीवलोचनः ॥ ६
सुभ्रूः संहननो वाग्मी सौवीरीतनयास्त्रयः ।
मनस्योरभवन्पुत्राः शूराः सर्वे महारथाः ॥ ७
रौद्राश्वस्य महेष्वासा दशाप्सरसि सूनवः ।
यज्वानो जज्ञिरे शूराः प्रजावन्तो बहुश्रुताः ।
सर्वे सर्वास्त्रविद्वांसः सर्वे धर्मपरायणाः ॥ ८
ऋचेपुरथ कक्षेपुः कृकणेपुश्च वीर्यवान् ।
स्थण्डिलेपुर्वनेपुश्च स्थलेपुश्च महारथः ॥ ९
तेजेपुर्बलवान्धीमान्सत्येपुश्चेन्द्रविक्रमः ।
धर्मेपुः संनतेपुश्च दशमो देवविक्रमः ।
अनाधृष्टिसुतास्तात राजसूयाश्वमेधिनः ॥ १०

— After 4, K4 B3.5 D (except Da; D5 marg.) ins.:

872* भूरिद्रविणविक्रान्तान्सर्वलक्षणपूजितान् ।

5 [a]) Ko.2.4 °रौ(K2 °रो)श्वाश्वास्; K3 °रौध्याश्वास्. S प्रवीरः (M6-8 first time °यैः) शतरुच्यौ (T1 °ध्यौश्; T2 G4(*sup. lin.*).6 °द्यौश्; G4.5 °ध्रौ; M3 °ज्या) च. — [b]) S महाबलाः. — [c]) Ś1 B4 D2.4 पौष्यां°; Ko प्राक्ष्यां°; K1 पौल्यां°; S पौष्यां°. — [d]) Ñ1.3 वंशभृत्; S °भाक् (G3 °वान्). B4 D (except D2.4.5) प्रवीरो वंशकृत्ततः.

6 [a]) K2 T G4-6 M (except M7) नमस्युर्; G1.2 मनु°; G3 नभ° (cf. v. l. 7°). D5 मनस्योरभवन्पुत्राः (=7°). — [b]) Ko.4 Ñ B D (except D5) शूरसेनी-; S शूरः शैब्यां (G3 °वो; M8 °ब्याः). S (except M8) ततः (for प्रभुः). — With 6[cd] cf. 1. 62. 3[cd]. — [c]) K4 पृथिव्यां चतुरंतायां; D5 °व्याः सागरांताया:; S °व्यां सागरांतायां. — [d]) B1.3 m.5.6 D2.4 S राजा राजी°.

7 [ab]) K4 शंभुः; B5 शत्रु-; Dn D1 शक्तः; D2 सिंहः; G2 सुहृत(for सुभ्रूः). T2 सुभ्रुश्चाभयदो वा°. Da T1 G1.2.4-6 M6.8 सौवीर°. G3 संभ्रमः संवनो वाग्मी सौवीरः (sic) तन°; M3.5 सुभ्रुश्चाभयदो राजा वाग्मी सौवीरजा(M5 °का)स्त्रयः. — [c]) T1 G1.4-6 M6-8 नमस्योर् (G4 *sup. lin.* °न्योर्); G3 नभ°; M3.5 नमन्योर् (cf. v. l. 6[a]). — [d]) Ñ2 °वैं महाबलाः (cf. v. l. 5[b]). — After 7, N ins.:

873* अन्वग्भानुप्रभृतयो मिश्रकेश्यां मनस्विनः ।

[Ko.3.4 D5 अश्वभा°; K2 आसन्भा°; Dn1 D1 अन्वाग्भा°; D2 म(m अ)न्वग्भा°; D4 अनग्भा°. Ñ3 B (except B4) D2.5 यशस्विनः.]

— On the other hand, after 7, S ins.:

874* सुन्वन्तं वसुनाभं च गर्भरम्यौ यशस्विनौ ।
शूरानभयदान्राजा जनयामास वीर्यवान् ।
यवीयान्सुन्वतः पुत्रो रथंतर्यामजायत ।
शूरश्च दृढधन्वा च वपुष्मान्स नृपोत्तमः ।
रुद्राश्वं पृषदश्वं च रथाश्वं च गयं मनुम् । [5]
यवीयाञ्जनयामास गन्धर्व्यां भीमविक्रमान् ।

[(L. 1) T1 G6 M8.5 गर्गरम्यौ. — (L. 2) T1 G1-3 M शूरानुभयतो राजा (G3 °तः सुभ्रूः). — (L. 4) G1.2 M °ष्मांश्च; G3 वसुमांश्च. T M8 शूरं च दृढधन्वानं वपुष्मंतं नृपोत्तमं. — (L. 5) G4-6 M6-8 रथदश्वं (for रथाश्वं च). — (L. 6) G3 गांधार्यां; G6 गंधवान्.]

8 [a]) Ko.2.4 D5 रौद्राश्व°; S रुद्राश्व° (cf. v. l. 5). Ñ3 महोत्साहाः; S महाबाहो (T2 G4-6 M8 °हो:). — [b]) S (except G3) पुत्राः (for शूराः). — [d]) D5 M3.5 मनस्विनः; T G M6-8 यशस्विनः (for बहु°). — G2.3 M6-8 om. 8[ef]. — [e]) Ś1 Ko.4 शास्त्रास्त्रं°; K3 T G (G2.3 om.) °विदुषः. M3.5 सर्वास्त्रविदुषः सर्वे. — [f]) G4-6 सत्यपरा°.

9 The Purāṇas (like the vulgate) spell the ten names in 9-10 with यु (for पु): ऋचेयु, कक्षेयु etc. — [a]) Ko चिरेयुर्; K1 रचेपुर्; K2 सचेयुर्; K3 Ñ2.3 B Da2 Dn D5 ऋचेयुर्; K4 D1.2.4 रु(D2 रि)चेयुर्; Ñ1 ऋतेयुर्; Da1 रचेयुर्; G4-6 ऋतेपुर्. K2.4 कुक्षेयुः; K3 Ñ B D G3 °युः; T1 G1 कु°. — [b]) Ko.2.4 D5 कृपणेयुश्च; K1.3 Ñ B Da Dn D1.2.4 कृक(K1 °का)णेयुं°; T G2-6 M कृपणेपु°. G1 कृपणे प्रमुखान्सुतान्. — [c]) K (except K1) Ñ B D G3 स्थंडिलेयुर्वनेयुश्च; T2 G4-6 °लेपुर्जलेपुश्च. — [d]) Ko.2.4 Ñ3 B3.4.6 Da D1.2.4.5 G3 स्थलेयुश्च; K3 मूलेयुं°; Ñ1.2 B1.5 Dn जलेयुं°; T1 G1 M6-8 जले°. Ś1 K1.4 B4 महारथाः; Ñ1.2 B1.3.5.6 D (except D5) T1 °यशाः; T2 G M6-8 °बलः; M3.5 °बलाः.

10 [a]) Ko.3.4 Ñ B Dn1.ns D2.4 G3 तेजेयुर्; K1 °जपुर्; K2 °जेषुर्; Da Dn2 D1 °जोयुर्; D5 जजेयुर्; T1 स्वतेजो; G1 तेज°; G2.5.6 M3.5.8 तेजो°. — [b]) N (except Ś1) सत्येयुः (K1 मत्यपुः); S रथेपुः (G3 °युः): only Ś1 as in text! B4.5 चंड°; G3 चारु° (for चेन्द्र°). — [c]) N G3 धर्मेयुः (Ś1 K1 धर्मपुः). Ko.3 संतनेयुश्च; K2.4 Ñ B Da Dn D1.2.4 G3 °युश्च; D5 T G1.2.4-6 M संतते°. — [d]) K4 G2 भीमविक्रमः. — After 10[cd], N ins.:

875* अनाधृष्टिरभूत्तेषां विद्वानर्चेपुरेकराट्* ।
ऋचेपुरथ विक्रान्तो देवानामिव वासवः ।

मतिनारस्ततो राजा विद्वांश्चर्चेपुतोऽभवत् ।
मतिनारसुता राजंश्चत्वारोऽमितविक्रमाः ।
तंसुर्महानतिरथो द्रुह्युश्चाप्रतिमद्युतिः ॥ ११
तेषां तंसुर्महावीर्यः पौरवं वंशमुद्वहन् ।
आजहार यशो दीप्तं जिगाय च वसुंधराम् ॥ १२
इलिनं तु सुतं तंसुर्जनयामास वीर्यवान् ।
सोऽपि कृत्स्नामिमां भूमिं विजिग्ये जयतां वरः ॥ १३
रथंतर्यां सुतान्पञ्च पञ्चभूतोपमांस्ततः ।
इलिनो जनयामास दुःषन्तप्रभृतीन्नृप ॥ १४
दुःषन्तं शूरमीमौ च प्रपूर्वं वसुमेव च ।
तेषां ज्येष्ठोऽभवद्राजा दुःषन्तो जनमेजय ॥ १५
दुःषन्ताद्भरतो जज्ञे विद्वाञ्शाकुन्तलो नृपः ।
तस्माद्भरतवंशस्य विप्रतस्थे महद्यशः ॥ १६
भरतस्तिसृषु स्त्रीषु नव पुत्रानजीजनत् ।

C. 1. 3710
B. 1. 94. 20
K. 1. 101. 8

[(L. 1) Śi K (except Ko) Ñ2 B4 अनावृष्टिर्. Śi K1 विद्वानर्षेपुरेक°; Ko विद्वान्सर्वेषु चैक°; K2.4 Ñ2 D2.5 विद्वानर्चे(K4 °र्थं; D2 °र्च्या)युरेक°; K3 Ñ1 B3.4 Da ऋचेयुस्त्वथ (K3 °युः पुनर्) एक° (with hiatus!); Ñ3 विद्वान्वर्चेयुरेक°; B1.5.6 D4 विद्वानृचेयुरेक°; Dn D1 विद्वान्भुवि तथैक°. With the posterior half of line 1 cf. 11b. — (L. 2) Śi ऋशेपुर्; Ko रिवेयुर्; K1 दशेपुर्; K2.4 Ñ B D ऋ(B3 वि)चेयुर्; K3 ऋचेयोर्. D2 इति (for अथ).]

— a) Śi K (except Ko) Ñ2 B4 D5 अनावृष्टि-; Da °धृष्टेः; S अनाधृष्याः. N सुतस्त्वा(Ko.3 B3.5 °श्वा)सीत्. — f) N °मेधभाक् (Dn D1 °कृत्).

11 a) S अंतिनार°. N मति(D4 अंति)नार इति ख्यातो. — b) Cf. the posterior half of line 1 of 875*. N राजा परमधार्मिकः; T G विद्वांश्चर्तेपुतो° (T1 °चैंसुतो°; G2 °चैंपुको°; G3 °त्सेयुको°). — S om. 11cd (cf. 876*). — c) Ko.3.4 °सुताश्चासन्; D1 °सुता राज्ञः. — d) K3 देवविक्रमाः. — e/f) Śi K1 उत्सर्; Ko.2.3 D5 तत्सुर् (for तंसुर्). Śi K द्रुह्यश्चा°. S त्रसुं (T1 G2 M3.5 °सु-; M6 °स्सर्) मोघं प्रतिरथं द्रुमं चाप्रतिमं युधि. — After 11, S ins.:

876* एतान्वै सुषुवे साध्वी अन्तिनाराद्यशस्विनी ।

[Cf. 11cd. — G2.4-6 ह्यंतिनाराद्. T1 G1.3 सरस्वती (for यशः).]

12 a) Śi K1 उत्सुर्; Ko.3.4 Ñ3 D5 तत्सुर्; K2 तंसुर्; D4 त्रंसुर्; S त्रस्नुर् (G1.6m त्रस्तुर्).

13 ab) K3 Ñ B D (except D1.2) ईलिनं (Ñ3 इडि°). Śi Ko D5 च (for तु). Śi K1 उत्सुर्; Ko.2-4 D5 तत्सुर्; D2 जग्मुर् (or जग्युर्); D4 त्रंसुर् (cf. v. l. 12). S इलिलं सुषुवे (T1 वै ततस्) त्रस्नो(G6 °स्तो)र्यमुना वै तप(G3 M यश)स्विनी. — c) K3 उर्वीं (for भूमिं).

14 a) Śi रथंतरं; K1 °तरी. Ñ3 ततः; D4 सुतं; S ऋषीन् (T1 G3 ऋषिं) (for सुतान्). — b) Ñ3 °पमा नृपाः; S °पमांस्तथा. — c) K3 Ñ1.2 B D (except D1.2) ईलिनो; Ñ3 °डिनो; S °लिलो. — d) Śi K1 B1.3.6 दुष्वंत-; Ko.2-4 Da °ष्कं°; B4 Dn D1.2.4.5 G2 M3.5 °ष्मं°. The variations of दुःषन्त will be ignored hereafter (cf. v. l. 1. 62. 3; 63. 14, 15; 65. 4 etc.). Da -प्रभृतिर्; S -प्रमुखान्. K3 B4 Da नृपः; Ñ3 S सुतान्.

15 Ko (? hapl.) om. 15abc. — a) K2 भीमसेनौ (*sup. lin.* शूरौ) च; G3 M अनघं शूरं. Ñ3 दुष्मंतमथ मुष्मंतं(!). — b) Ñ2 B Dn D1.2.4 प्रवसुं; Ñ3 °भूतं; Da °वृषुं; G1 °पूतिं; G3 °पूरं (for प्रपूर्वं). D5 त्रसुतर्वसुमेव च; G3 प्रश्रयं रथपंचमं; M प्रशूरं चाथ पंचमं. — c) Śi Dn D5 श्रेष्ठो; K1 पूर्वो (for ज्येष्ठो). S महाराजा (G3 °भागो; G6 M6-8 °राज). K2 तेषां ज्येष्ठतमो राजा. — d) S दुर्जयो युधि (for जन°).

16 For 16ab, D4 (marg.) S subst.:

877* दुःषन्ताल्लक्ष्मणायां तु जज्ञे वै जनमेजयः ।
शकुन्तलायां भरतो दौःषन्तिरभवत्सुतः ।
[(L. 1) M6-8 °ल्लक्षणायां.]

☞ After 16, S ins. an (additional) colophon. *Adhy. no.:* T1 79; T2 G M3.5 (both MSS. both times). 6-8 (all three second time) 30; M6-8 (all three first time) 10. — After the colophon, S (which transp. the Yayāti and Śakuntalā episodes) reads the Śak. episode, interpolating the rest of the present adhy. (with some additions and v. l. noted below) between 1. 69. 48 and 49.

[*N. B.* In the long note appended to 1. 62. 2 (p. 282) above, the number of the present stanza (16) has been erroneously printed as 19: therefore in lines 2 and 6 from bottom of the left column of the foot-notes and in line 6 from top of the right column, *for* 19 *read* 16.]

C. 1. 87¹0
B. 1. 94. 20
K. 1. 101. 8

नाभ्यनन्दत तान्राजा नानुरूपा ममेत्युत ॥ १७
ततो महद्भिः क्रतुभिरीजानो भरतस्तदा ।
लेभे पुत्रं भरद्वाजाद्भुमन्युं नाम भारत ॥ १८
ततः पुत्रिणमात्मानं ज्ञात्वा पौरवनन्दनः ।
भुमन्युं भरतश्रेष्ठ यौवराज्येऽभ्यषेचयत् ॥ १९
ततस्तस्य महीन्द्रस्य वितथः पुत्रकोऽभवत् ।
ततः स वितथो नाम भुमन्योरभवत्सुतः ॥ २०
सुहोत्रश्च सुहोता च सुहविः सुयजुस्तथा ।
पुष्करिण्यामृचीकस्य भुमन्योरभवन्सुताः ॥ २१
तेषां ज्येष्ठः सुहोत्रस्तु राज्यमाप महीक्षिताम् ।
राजसूयाश्वमेधाद्यैः सोऽयजद्बहुभिः सवैः ॥ २२
सुहोत्रः पृथिवीं सर्वां बुभुजे सागराम्बराम् ।
पूर्णां हस्तिगवाश्वस्य बहुरत्नसमाकुलाम् ॥ २३
ममज्जेव मही तस्य भूरिभारावपीडिता ।
हस्त्यश्वरथसंपूर्णा मनुष्यकलिला भृशम् ॥ २४
सुहोत्रे राजनि तदा धर्मतः शासति प्रजाः ।

---

17 Before 17, S (which reads this st. before 1. 69. 49) ins.:

878* सोऽश्वमेधशतैरीजे यमुनामनु तीरगः ।
त्रिंशता च सरस्वत्यां गङ्गामनु चतुःशतैः ।
दौःषन्तिर्भरतो यज्ञैरीजे शाकुन्तलो नृपः ।

and thereafter *repeats* 16^{cd}, linking up in this manner with the foregoing portion of this adhy., which is separated in S from the remaining portion of the adhy. by the insertion of the entire Śak. episode. The *repetition* of 16^{cd} is strongly suggestive of the fact that the Southern arrangement (with its transposition of the Śak. and Yayāti episodes and the division of this adhy. into two parts separated by the Śak. episode) is *secondary*, the result of diaskeuasis, aiming at a better, logical and chronological sequence. — ^{ab}) S भरतस्य वरस्त्रीषु पुत्राः संजज्ञिरे पृथक्. — ^{c}) = 1. 78. 16^{c}. S °नंदत्तदा (T1 G3 M3 °तो) राजा. — ^{d}) S तान् (for उत). — After 17, N (except K1) ins.:

879* ततस्तान्मातरः क्रुद्धाः पुत्रान्निर्न्युर्यमक्षयम् ।

thereafter reading 20^{ab} (with v. l.).

18 K1 om. 18^{a}–31^{a}. — ^{b}) B5 ईजेसौ (for ईजानो). G (except G3. 6) बहुभिस्तदा. — ^{c}) Ko. 4 D2 सुमन्युं; G2 धमन्यां. Śi M6–8 नाम नामतः. D5 भुमन्योरभवन्सुताः. — After 18, D1 (marg.) S ins.:

880* धर्मे प्रणिहितात्मानं मत्वा तं पुरुषोत्तमम् ।

19 K1 om. 19 (cf. v. l. 18). — ^{b}) Śi मत्वा. S मत्वा स कुरुपुंगवः. — ^{c}) Ko. 4 D2 सुमन्युं. Śi B5 D5 °श्रेष्ठं; K2 Da1 D1. 2 °श्रेष्ठो; K3 S भरतः प्रीतो. — ^{d}) T1 G6 M7 °राज्येभिषे°. — For a corrigendum cf. v. l. 16.

20 K1 om. 20 (cf. v. l. 18). N (K1 om.) reads 20^{ab} after 17. — ^{a}) Śi1 T G3 M3 महेंद्रस्य; K (K1 om.) Ñ B D नरेंद्रस्य. — ^{b}) M5–8 तनयो (for पुत्रको). Śi1 K (K1 om.) Ñ2 B D वितथं पुत्रजन्म तत्; Ñ1. 3 T1 G6 °थं पुत्रतोभवत्; G3 पुत्रोभूद्वितथोपि च; M3 वितथे पुत्रजन्मनि. — ^{c}) G3 स तस्य वि°. N (K1 om.) ततो दिविरथो नाम. — ^{d}) S (except M5–8) °भवत्तदा. — Cf. Pargiter, *Ancient Ind. Hist. Trad.* p. 162 f., and Kirfel, *Das Purāṇa Pañcalakṣaṇa*, p. 541 f.

21 K1 om. 21 (cf. v. l. 18). Śi1 (? hapl.) om. 21. — ^{a}) S सुहोत्रसुतहोतारौ. — ^{b}) T1 G1. 6 M5–8 तथा गर्भे (G6 गर्हे-; M5 गर्गे) तरावुभौ; T2 तथा भरतपुंगवौ; G2. 4. 5 M3 तथा गर्गनरा (M3 °गया) वुभौ; G3 तथा गर्भगतावुभौ. — ^{c}) Ñ B4 Dn1. n2 D5 ऋचीकश्च; T1 उचथ्या च; T2 G1. 3. 6 उचथ्यां वै; G2. 4. 5 M उचथ्यायां. — ^{d}) Ko. 4 D2. 4 सुमन्योर्. — After 21, Ko. 3. 4 D1. 4. 5 S ins.:

881* चत्वारो भारते वंशे सुहोत्रस्तत्र वंशभाक् ।

22 K1 om. 22 (cf. v. l. 18). — ^{a}) B5. 6 च; S अथ (for तु). — ^{b}) S राज्यं प्राप्य. Śi1 महीभृतां; B3. 5. 6 T1 M3 °क्षितः. — ^{c}) B4 °श्वमेधाभ्यां. — ^{d}) Śi1 Ko. 3. 5 अयजद्; Dn स यजद्; S ईजे च (G1 सु-). Ko. 3. 4 B4. 5 m Da D2. 5 S बहुभिर्मखैः (G3 बहुदक्षिणैः).

23 K1 om. 23 (cf. v. l. 18). — ^{a}) K (K1 om.) Ñ B4 D (except D2. 4) कृत्स्नां; S चेमां. — After 23^{ab}, S reads 25^{abcd}. — ^{c}) S पूर्णा. Ñ1. 2 B4 Dn °गजाश्वैश्च; D2. 5 T2 G1. 4 M °गवाश्वैश्च; T1 G2. 5. 6 °गवां चैव; G3 °गवाश्वाद्यैः. — ^{d}) S बभौ रत्नसमाकुला.

24 K1 G1 om. 24 (cf. v. l. 18). — ^{a}) K3 न्यमज्जत; Ñ2. 3 ममज्जे च; Da °ज्ज च. S (G1 om.) सा ममज्जे (M6–8 °ज्जै)व (T1 समग्नेव; G3 बभंजेव) पृथिवी. — ^{c}) Ko. 3. 4 °संकीर्णा. — ^{d}) K3 °बहुला; B3 °कपिला; D4 °कलिता. B (except B4) शुभा.

चैत्ययूपाङ्किता चासीद्भूमिः शतसहस्रशः ।
प्रवृद्धजनसस्या च सहदेवा व्यरोचत ॥ २५
ऐक्ष्वाकी जनयामास सुहोत्रात्पृथिवीपतेः ।
अजमीढं सुमीढं च पुरुमीढं च भारत ॥ २६
अजमीढो वरस्तेषां तस्मिन्वंशः प्रतिष्ठितः ।
षट् पुत्रान्सोऽप्यजनयत्तिसृषु स्त्रीषु भारत ॥ २७
ऋक्षं धूमिन्यथो नीली दुःषन्तपरमेष्ठिनौ ।
केशिन्यजनयज्जह्नुमुभौ च जनरूपिणौ ॥ २८

तथेमे सर्वपाञ्चाला दुःषन्तपरमेष्ठिनोः ।
अन्वयाः कुशिका राजञ्जह्नोरमिततेजसः ॥ २९
जनरूपिणयोर्ज्येष्ठमृक्षमाहुर्जनाधिपम् ।
ऋक्षात्संवरणो जज्ञे राजन्वंशकरस्तव ॥ ३०
आर्क्षे संवरणे राजन्प्रशासति वसुंधराम् ।
संक्षयः सुमहानासीत्प्रजानामिति शुश्रुमः ॥ ३१
व्यशीर्यत ततो राष्ट्रं क्षयैर्नानाविधैस्तथा ।
क्षुन्मृत्युभ्यामनावृष्ट्या व्याधिभिश्च समाहतम् । C. 1. 3726 B. 1. 94. 86 K. 1. 101. 24

25 K1 om. 25 (cf. v. l. 18). S reads 25^{abcd} after 23. — ^{ab}) Ko. 3. 4 B1. 3. 5 D2 (by corr.). 4 °ति प्रजाः. S सुहोत्रे तु महीपाले महीं धर्मेण शासति. — ^{c}) Ś1 दिव्य°; B1. 3m D4 Arj. (comm.) चिति°; Da (erroneously) Arjp B1m चैत्य° (as in text). S भूमिः (for चासीत्). — ^{d}) S बभूवाथ सह°. — ^{e}) S समृद्धसस्यसंपन्ना. — ^{f}) Ś1 Ñ1 स(Ñ1 म)हदेव; Ko. 3. 4 Ñ2. 3 B D सर्वदैव; K2 M8-8 सह देव्या. K3 Dn1. ns D1 व्यरोचयत्; D5 °राजत.

26 K1 om. 26 (cf. v. l. 18). G1 om. 26^{ab}. — ^{a}) S (G1 om.) ऐक्ष्वाक्यां (G3 देवत्यां or देवायां). — ^{b}) A few MSS. °पते. S (G1 om.) सुहोत्रस्त्रीन्सुताञ्नृपः (T1 G3. 5. 6 M3 °न्नृप; T2 transp. सुतान् and नृपः). — Ś1 reads 26^{cd} in marg. — ^{cd}) Ś1 अजपीडं. B3. 4 च(B4 श्च) मीढं च; S सदामीढं (for सुमीढं च). Ñ3 पुरुमीढं सजीमीढं (for सुमीढं च पुरु°). — After 26, T2 G (except G3) ins.:

882* अजमीढस्तु राजेन्द्र धर्मनित्यो यशस्सु च ।
[G3 अपि (for तु) and धर्मराजो यथैव च.]

27 K1 om. 27 (cf. v. l. 18). — ^{b}) Ko. 3. 4 यस्मिन्; S (except M5) अ°. S (except T1 G6 M3) वंशे. — After 27^{ab}, T1 G2. 4. 5 ins.:

883* ऐक्ष्वाक्यां जनयद्राज्ञामजमीढो यशस्विनः ।

— ^{c}) G3. 6 M षट् सुतान्. T2 G4. 5 भरतश्रेष्ठः; G1. 2 जनयामास (for सोऽप्य°). — ^{d}) G4 स्त्रीषु तिसृषु (by transp.); G5 त्रिभिस्तिसृषु.

28 K1 om. 28 (cf. v. l. 18). Ko om. 28^{ab}. — ^{a}) B3. 6 Da1 भूमिनी. S ऋक्षं च धूमि(T1 G1. 2 °म)नी नीली (T2 G2. 3 नीलं; G1 °लं च). — ^{c}) G1 केशिन्यां °; G2. 4. 5 केशिन्यजीजन°. — ^{d}) K2 Ñ3 B D (except D1) सुतौ (for उभौ). K2 ध्वजिन°; B1 Da च जल°; Dn D1. 4. 5 व्रजन°; S च जनरूषणौ. — S ins. after 28: Ko. 3. 4, after 29^{ab}:

884* विदुः संवरणं शूरमृक्षाद्राथंतरीसुतम् ।
[T2 G2. 4. 5 वीरम् (for शूरम्). Ko. 3 माया-; K3 m. 4 मामी- (for ऋक्षाद्). Ko. 3. 4 राष्ट्रं(K3 °ष्ट्रं; K4 °ष्ट्यं)तरीसुतं.]

29 K1 om. 29 (cf. v. l. 18). — ^{a}) T G (except G1. 6) तथैव. — ^{b}) T2 G2. 4. 5 °मेष्ठिजाः. — After 29^{ab}, Ko. 3. 4 ins. 884*. — ^{c}) K (K1 om.) अन्वयात्. Ñ3 काशिकाः; S कौशि°. S सर्वे (for राजन्). — ^{d}) Ñ1. 3 B3. 5. 6 D2. 4. 5 S जह्नोरपि महात्मनः (G6 °बलौ; M °बलाः).

30 K1 om. 30 (cf. v. l. 18). — ^{a}) Cf. v. l. 28^{a}. K2 ध्वजिन°; B (except B4) जल°; Da Dn व्रजन°; D1. 4 व्रज°; S °रूषणयोर्. Ś1 जनरूपिणोस्तुक्षज्येष्ठं (sic). — ^{b}) K2 महीपतिं; K4 Ñ3 B4 Da S नरा°; B1. 3. 5. 6 D2. 4 नरेश्वरं (for जना°). — ^{d}) Ñ1 B4 Da G3. 6 वंशधरस्. Ś1 K (K1 om.) Ñ2 B4 D (except D2. 4) सुतः (for तव).

31 K1 om. up to प्रशासति (cf. v. l. 18). — ^{a}) S राज्यं (G3 °ज्ये) (for राजन्). — ^{b}) S °ति महात्मनि (T1 °नः). — ^{d}) T1 सुमहानिति. K1 Ñ3 M3 शुश्रुम; B D नः श्रुतं (B3 नः श्रुतिः; D5 विश्रुतः). T2 G (except G3. 6) कालेनाभिप्रचोदितः.

32 ^{a}) T1 तथा; M3 तदा. D1. 5 G3. 6 M3 राज्यं. T2 G1. 2. 4. 5 व्यकी(G4 °शी)र्यदखिलं राष्ट्रं. — ^{b}) K3 Ñ B1. 3. 6 Dn D1 तदा. T1 दुर्भिक्षैरर्थितं तदा; T2 दुर्भिक्षकदनं तदा; G1. 2. 4. 5 दुर्भिक्षैरभि(G1. 5 °पि)पीडितं; G3. 6 M दुर्भिक्षेणार्दि(G6 °र्थि)तं तदा (G6 M3 °था). — ^{c}) Ñ1. 2 क्षुत्तृष्णाभ्या°; G1 मृत्युक्षुद्रा°; G2 क्षुद्रवृत्या°. — ^{d}) S °श्च महाबलैः. — G1. 2. 4 ins. after 32^{cd}: T1, after 33^{ab}:

885* अन्वकीर्यन्त भरताः सपत्नैश्च महाबलैः ।

— ^{b}) K2 D5 T2 G1. 2. 4. 5 अभ्ययुर्. A few MSS.

C. 1. 3727
B. 1. 94. 37
K. 1. 101. 25

अभ्यघ्नन्भारतांश्चैव सपत्नानां बलानि च ॥ ३२
चालयन्वसुधां चैव बलेन चतुरङ्गिणा ।
अभ्ययात्तं च पाञ्चाल्यो विजित्य तरसा महीम् ।
अक्षौहिणीभिर्दशभिः स एनं समरेऽजयत् ॥ ३३
ततः सदारः सामात्यः सपुत्रः ससुहृज्जनः ।
राजा संवरणस्तस्मात्पलायत महाभयात् ॥ ३४
सिन्धोर्नदस्य महतो निकुञ्जे न्यवसत्तदा ।
नदीविषयपर्यन्ते पर्वतस्य समीपतः ।
तत्रावसन्बहून्कालान्भारता दुर्गमाश्रिताः ॥ ३५
तेषां निवसतां तत्र सहस्रं परिवत्सरान् ।
अथाभ्यगच्छद्भरतान्वसिष्ठो भगवानृषिः ॥ ३६
तमागतं प्रयत्नेन प्रत्युद्गम्याभिवाद्य च ।
अर्घ्यमभ्याहरंस्तस्मै ते सर्वे भारतास्तदा ।
निवेद्य सर्वमृषये सत्कारेण सुवर्चसे ॥ ३७
तं समामष्टमीमुष्टं राजा वव्रे स्वयं तदा ।
पुरोहितो भवान्नोऽस्तु राज्याय प्रयतामहे ।
ओमित्येवं वसिष्ठोऽपि भारतान्प्रत्यपद्यत ॥ ३८
अथाभ्यषिञ्चत्साम्राज्ये सर्वक्षत्रस्य पौरवम् ।
विषाणभूतं सर्वस्यां पृथिव्यामिति नः श्रुतम् ॥ ३९
भरताध्युषितं पूर्वं सोऽध्यतिष्ठत्पुरोत्तमम् ।
पुनर्बलिभृतश्चैव चक्रे सर्वमहीक्षितः ॥ ४०
ततः स पृथिवीं प्राप्य पुनरीजे महाबलः ।

भरतां°. T1 G3.6 M6-8 अभ्यापतन् (M6-8 °तद्) भारताश्च; M3.5 अभ्यागमन् (M5 °मद्) भारताश्च.

33 ab) Ś1 वसुधाप्येषा; Ko.3.4 Ñ D (except D2.5) °धां चेमां; K1 °धासेनां. S चालयंतो धृतिं भीमां (G1 °मं; M6-8 °मा) जनयंतो भृशं भयं (G1.3 by transp. भयं भृशं). — After 33ab, T1 ins. 885*. — cd) D5 अभ्ययामास. S अभ्ययुस्तांश्च (G3.6 M °स्तं च) पांचाला विवृण्वं(G1-3.6 °मृद्गं)तो बलैर्महीं. — e) S (except M3) अक्षोहिणी°. — f) Ś1 सवनां; K1 सर्वं च. Ñ3 संवरणं रणेजयत्; S तदा (T1 °था) तं तरसा(G1 रिपवो)जयन् (G2.5 M6-8 °जयत्).

34 b) K2 °राष्ट्रः; S (except M6-8) °सूनुः (for °पुत्रः). T1 ससुहृद्गणः. — c) Ś1 K Ñ1.3 D5 ननाश सुमहा(D5 °हद्)भयात्; B5 अपायान्महतो भ°; M पलायनपरोभवत्. — After 34, S ins.:

886* ते प्रतीचीं पराभूताः प्रपन्ना भारता दिशम् ।

[G3 परित्यज्य; G6 पराजित्य; M जिता भीताः (for परा°). M प्रयाता (for °पन्ना).]

35 b) K4 निवसन् तदा; D5 वसतस्तदा. S गुहायां न्यविशंस्तदा. — c) S शिवे (G3 बिले) विषय°. — d) K2 पर्वते च सुदुर्गमे; T1 °तस्याविदूरतः. — e) K2 बहुकालं; S प्रतिच्छन्नाः. — f) B1.4.6 D4.5 भरता. Da °मास्थिताः. S भारतास्ते भयाच्चिरं (M3.6-8 ते भयार्तास्तदा चिरं).

36 a) S तत्र तेषां निवसतां. — b) S (except T1 M6-8) सहस्रपरिवत्सरं. — c) K1 भगवान् (for भर°). S अगच्छद्भगवांस्तत्र. — d) K1 भरतानृषिः; S भा(T1 G6 भ)रतान्प्रति.

37 a) T1 समागतं. Ko.3.4 अभिप्रेक्ष्य (for प्रय°). G3 तं दृष्ट्वा सुमहात्मानं. — b) S अभ्यु(G5 प्रत्यु)त्थाय (for प्रत्युद्गम्य). T2 G1 च पौरवाः (for अभिवाद्य च). — c) Ś1 अभ्यागमंस्तस्मै; D5 °हरन् तं वै; S अस्या(G2 °र्घ्या)नयन् प्रीता (G1.3 प्रीत्या; G6 *sup. lin.* सर्वे). — d) Ñ3 B1.3.4 D2.4.5 भरतास्तदा. S आजमीढपुरोगमाः. — e) Dn1 G3 M3.6.8 सर्वे. T1 G3.6 मुनये; M भरताः. — f) Ñ3 D3 D1 °वर्चसः. S सत्कृत्यैन(G3 नयेन स)मुपासत.

38 a) Ś1 ते (for तं). Ś1 °मीं पुष्टां; K1 °मीपुत्रं. K4 तं स वै तपसा युक्तं; Ñ1.2 B D (except D3) T1 तमासने चोपविष्टं (T1 समाविष्टं); Ñ3 तं समाविष्टमुषितं; T2 G M ततः संवरणश् (G2 °णं) चेष्टं (G2 ज्येष्ठं; G3 श्रेष्ठो); Cd as in text. Arj. explains 38a and adds यथाव्याख्यातपाठोयं. — b) T G (except G3.6) वरं (for स्वयं). — c) K2 S भवानस्तु. — d) K2 B Ñ2.3 D T1 G6 प्रयते(Ñ3 °ता)महि. — e) Ñ1 तथैवेति; Ñ3 तथेत्येवं; Cd ओमि° (as in text). K (except K1) B (except B1) D2.4 तु (for अपि). S एवमस्त्विति तं विप्रो. — f) K1 Ñ3 B1.6 D3 D2.4 भरतान्; Ñ1 भगवान्. S भारतं प्रत्यभाषत.

39 a) B1.3 D5 तथा; S तम् (for अथ). — c) T2 G (except G3.6) विषाणमेकं; Cd as in text. T G (except G6) सर्वस्याः. — d) T G (except G6) पृथिव्याः. B5 अपि न. G1.2 श्रुतिः.

40 a) Ko.3.4 भारता°. K4 Ñ3 D3 सर्वं (for पूर्वं). T1 स पुरं भारत धृष्टं; T2 G स (T2 स्व-) पुरं भारतः सर्षिः (G3 भारतैर्ज्येष्ठं); M स्वपुरं भारतैर्जुष्टं. — b) S om. सः (T2 lacuna for सः). S पुरातनं (for पुरो°). — cd) Ś1 °र्मेहीभूतः; K1 °र्मेही सतः; Cd as in text. S तत

आजमीढो महायज्ञैर्बहुभिर्भूरिदक्षिणैः ॥ ४१
ततः संवरणात्सौरी सुषुवे तपती कुरुम् ।
राजत्वे तं प्रजाः सर्वा धर्मज्ञ इति चक्रिरे ॥ ४२
तस्य नाम्नाभिविख्यातं पृथिव्यां कुरुजाङ्गलम् ।
कुरुक्षेत्रं स तपसा पुण्यं चक्रे महातपाः ॥ ४३
अश्ववन्तमभिष्वन्तं तथा चित्ररथं मुनिम् ।
जनमेजयं च विख्यातं पुत्रांश्चास्यानुशुश्रुमः ।
पञ्चैतान्वाहिनी पुत्रान्व्यजायत मनस्विनी ॥ ४४
अभिष्वतः परिक्षित्तु शबलाश्वश्च वीर्यवान् ।
अभिराजो विराजश्च शल्मलश्च महाबलः ॥ ४५
उच्चैःश्रवा भद्रकारो जितारिश्चाष्टमः स्मृतः ।
एतेषामन्ववाये तु ख्यातास्ते कर्मजैर्गुणैः ॥ ४६
जनमेजयादयः सप्त तथैवान्ये महाबलाः ।
परिक्षितोऽभवन्पुत्राः सर्वे धर्मार्थकोविदाः ॥ ४७
कक्षसेनोग्रसेनौ च चित्रसेनश्च वीर्यवान् ।
इन्द्रसेनः सुषेणश्च भीमसेनश्च नामतः ॥ ४८
जनमेजयस्य तनया भुवि ख्याता महाबलाः ।
धृतराष्ट्रः प्रथमजः पाण्डुर्बाह्लीक एव च ॥ ४९

C. 1. 87-45
B. 1. 94. 56
K. 1. 101. 44

बलिभूतः (T2 G1.4.5 वशे जित्वा; G2 बलिं जित्वा; G6 बलीभूतं) पृथिव्यां सर्वपार्थिवान्.

41 S transp. 41^{ab} and 41^{cd}. — ^{a}) S भारतः (for ततः स). — ^{c}) D1.2 T1 अज°.

42 ^{b}) Ś1 K1.2 Ñ3 सुषा(Ś1 K1 °ष्वा)व त°; Ñ1.2 B4 D (except D4) G3 तपती सुषुवे. — ^{c}) Ko.3.4 D2.5 राजानं तं; Ñ1 राजन्नेतं. — ^{d}) T2 G2.4.5 महात्मानं च; G1 भवानिति च (for धर्मज्ञ इति). G3 सर्वज्ञ इति मेनिरे. — After 42, Ko.3.4 D2 S ins.:

887* महिम्ना तस्य कुरवो लेभिरे प्रत्ययं भृशम् ।
[Ko.3 D2 भुवि; K4 विभो (for भृशम्).]

43 ^{a}) B5 इति; S च (for अभि-). — ^{b}) S अभूत्तत् (M °भूच्च) (for पृथि°). Ś1 K (except K4) B5.6 G2 °जंगलं; G5 °जं कुलं. — ^{c}) Ko.3 सु-; K2.4 स्व-; S (except G3.4) च (for स). — ^{d}) B1 (m as in text) Da महाद्युतिः; T G °मनाः (G1.2 °त्मनः); M °यशाः.

44 ^{a}) Dn अविक्षितं; M6-8 अश्वमंतं. Ko.3.4 अहिष्यंतं; Ñ B4.5 Dn D1 M5 अभिष्यं° (Dn1 °क्ष्यं°); T1 अनस्वं°; T2 G1-3 M6-8 अभिश्वं°; G4.5 अनश्वं°; G6 अभीवं°; M3 अहिश्वं°. — ^{b}) T1 G3 अर्कै; T2 G2.4-6 अश्वं; G1 दत्तं; M दांतं (for तथा). N चैत्ररथं. T2 मतिं; G5 मनं. — ^{c}) Da1 जन्मेजयं. — ^{d}) Ś1 Ñ3 तस्य; S (except T2 G1) चैव (for चास्य). Ś1 K1 Ñ B Dn3 °शुश्रुम. — ^{e}) S महिषी (G6 च मही) पुत्रान्. — ^{f}) Ñ3 T2 G3 अजायत. Ñ1 तप°.

45 Ñ3 repeats 45^{ab} (with v. l.). — ^{a}) Ś1 K1 Ñ3 Dn1.n3 अविक्षितः (K1 °त्तः; Ñ3 second time अतिराजो); Ko.2-4 D1 अविक्षि(Ko °क्ष)त्तु (D1 °स्तु); B3 अभिष्टु° (m as in text); T1 G1.2.4.5 अनश्वं°; T2 अभिश्व°; G3 अभिश्वंते; G6 अभीश्व°; M अश्वव°. Ś1 K1 परिक्षितः (K1 °त्तः); B3.5 D2 T2 G1.3 M °क्षिच्च; G4-6 परीक्षित्तु. — ^{b}) Ś1 Ko Ñ3 B4.6 Dn D4.5 श(D5 स)बलाश्वस्तु. — ^{c}) Ś1 K1 अजिराजो; Ko.2-4 Ñ B3-5 Da अति°; Dn D1.4.5 आदि°. — ^{d}) Ko.3.4 सर्वकश्च; K2 Dn D1.5 श(D1 श)ल्मलि° (D5 °ल°); Ñ1 B Da शिल्पिन° (B5 °ल°); Ñ3 शिल्पसर्व-; S बलाश्व° (T1 °र्हि°).

46 ^{a}) S (except T1) चित्रश्रवा. Ñ1 D2.5 भद्रकरो; B4 Da Dn D1.4 भंगकारो (or °करो); T1 G3.6 M धर्मकारो (or °करो); T2 G1.2.4.5 धर्मरतो. — ^{b}) T1 विंदान°; T2 G1.2.4.5 भिंदान°; G3 वीराश्व°; G6 दिव्याष्टि°; M दिपान° (for जितारि°). Ś1 जितारिष्टस्तथाष्टमः. — After 46^{ab}, S (except T1 G6) ins.:

888* शबलाश्वादयः सप्त तथैवान्ये महाबलाः ।
[Cf. 47^{ab}.]

D1 om. 46^{cd}; T2 om. 46°-47°. — ^{cd}) Ko.3 °मन्वये ये तु. Da ख्यातास्तैः; D5 °स्वैः. S (T2 om.) न तेषामन्वयः ख्यातः सर्वेषां नामतो गुणैः.

47 T2 M6-8 om. 47^{ab} (cf. v. l. 46). — ^{a}) Da1 जन्मेजया°. — ^{b}) B (except B4) D (except Da) महारथाः. — ^{c}) Ś1 K1.3 Ñ B (except B3) Dn D5 S (except T1 G3) परीक्षि°. — ^{d}) Ś1 G3 सर्व-; G6 M (except M3) सप्त. B3 धर्मार्थसेविनः.

48 ^{a}) S कण्वसेनो° (G3 °ना°). Ñ1.2 B4 D (except D2.4.5) तु (for च). — M7 (? hapl.) om. 48^{bc}. — ^{b}) T1 G1.6 M (M7 om.) तथा शिशुः; T2 G2.4.5 तथा शुचिः; G3 तथा गुरुः (the latter corr. to जगुः) (for च वीर्यवान्). — ^{d}) B1 वीर्यवान्; T2 G1.3 सप्तमः (for नाम°). — After 48, B3 ins.:

889* अश्वसेनश्च बलवान्कीर्तिताः सप्त नामतः ।

49 ^{a}) Da1 जन्मेजय°. Ś1 विख्याताः. — ^{b}) Ś1 सुता

C. 1. 3745
B. 1. 94. 56
K. 1. 101. 44

निषधश्च महातेजास्तथा जाम्बूनदो बली ।
कुण्डोदरः पदातिश्च वसातिश्चाष्टमः स्मृतः ।
सर्वे धर्मार्थकुशलाः सर्वे भूतहिते रताः ॥ ५०
धृतराष्ट्रोऽथ राजासीत्तस्य पुत्रोऽथ कुण्डिकः ।
हस्ती वितर्कः क्राथश्च कुण्डलश्चापि पञ्चमः ।
हविःश्रवास्तथेन्द्राभः सुमन्युश्चापराजितः ॥ ५१

* * *

प्रतीपस्य त्रयः पुत्रा जज्ञिरे भरतर्षभ ।
देवापिः शंतनुश्चैव बाह्लीकश्च महारथः ॥ ५२
देवापिस्तु प्रवव्राज तेषां धर्मपरीप्सया ।
शंतनुश्च महीं लेभे बाह्लीकश्च महारथः ॥ ५३
भरतस्यान्वये जाताः सत्त्ववन्तो महारथाः ।
देवर्षिकल्पा नृपते बहवो राजसत्तमाः ॥ ५४
एवंविधाश्चाप्यपरे देवकल्पा महारथाः ।
जाता मनोरन्ववाये ऐलवंशविवर्धनाः ॥ ५५

इति श्रीमहाभारते आदिपर्वणि एकोननवतितमोऽध्यायः ॥ ८९ ॥

भुवि; S तथा चाष्टौ (G1–5 तथैवाष्टौ) (for भुवि ख्याता). D4 महात्मनः. — c) D4 प्रथमतः; S च धर्मात्मा. — d) S तथोभौ पांडुबाह्लिकौ.

50 a) G2 ऋषयश्च (for निषध°). — c) T2 G1.2.4.5 प(G1.2.4m व)नोदकोपदानौ च. — d) Ko.4 जितारिः (for वसातिः). B4 D5 G3 सुतः (for स्मृतः). — f) K4 Ñ Bs.4 D (except D2.4) G6 M (except M3) सर्वभूत°. — After 50, B1 repeats 49^{cd}.

51 B5 reads 51^{abcd} in marg. — a) B1.3.5 D2 T G2.4.5 तु; G1 च; M अधि- (for अथ). S राजाभूत्. — b) Ñ1.3 शौ(Ñ3 सौ)डिकः; Ñ2 B1.4.5 Da D4 कुंडिनः (B5 °लः); T2 G1.2.4.5 शुद्ध°; G3.6 M शुंडि° (cf. a). — c) Ś1 K (except K2) Ñ3 D5 हस्तो. K2.4 क्रोधश्च. S हस्ती विकत्थनः (T1 °तर्दनः; T2 °कर्थनः; G1 वितद्यः; G2 °कर्दनः) क्रोधः (M क्राथः). — d) B3.4.6 Dn D1 कुंडिनः; D5 कुंडिलः; M °पः (cf. b). D2.5 अथ (for अपि). B1.5 कुंड(B5 °डि)लाश्चोथ पं°; T2 G4.5 कुंडश्चापि च पं°; G3 कुंडलाश्चश्च पं°. — M (which om. 51^{ef}) ins. after 51^{cd}: T G, after 891* below:

890* भीमसेनान्महेष्वासः प्रतीपः समपद्यत ।
[T2 G2 भीमसेनो महे°.]

— M om. 51^{ef}. — e) Ñ1 परिश्रवाः; Ñ2.3 B1.3m बहि°. Ś1 तथा भद्रः; K1 तथा नाभः. T G पर्यश्रवस (G1.2 °वः स; G3.6 °वसम्) इंद्राभः (G3.6 °भं). — f) Ñ1 B Dn D5 सुमन्यु°. T G शरात(T1 °व)श्वाजितो (G3.6 शरावं वाजिनं) युधि. — After 51, Ko.3.4 D4 T G ins.:

891* अतिराजश्च नहुषस्तथा शक्रपुरंजयौ ।
ततो धर्मभृतां श्रेष्ठः पर्यश्रवस उच्यते ।
ऋषिं पुण्यकृतां श्रेष्ठं तमेव परमं विदुः ।

which in T G is followed by 890*.

[(L. 1) Ko.3.4 अतिराजो(K3 °श्रवा)ति नामाहुः; D4 अतिरात्रिः सुरात्रिश्च; T G2.4.5 अभि(T1 °ति)राजा च नं°; G3.6 अधि(G3 °ति)राजात्मजानाहुः. Ko.3.4 D4 तथा शुक्रपुरंजयौ. — (L. 2) Ko.3.4 D4 तथा धर्म°. D4 वीर्यश्रवस; T1 सत्य°. — (L. 3) Ko.3.4 D4 तमेवाप्रतिमं भुवि (D4 विदुः).]

— Lastly, N ins. after 51 (Ko.3.4 D4, after 891*):

892* धार्तराष्ट्रसुतानाहुस्त्रीनेतान्प्रथितान्भुवि ।
प्रतीपं धर्मनेत्रं च सुनेत्रं चैव भारत ।
प्रतीपः प्रथितस्तेषां बभूवाप्रतिमो भुवि ।

[(L. 1) K1 B5 Da D5 धृतराष्ट्र°; Dn °सुतानां तु; Ñ1.2 B4 धृतराष्ट्रसुतानां तु; Nilp as above. B4 Da भुवि विश्रुतान् (for प्रथिता°). — (L. 2) Ñ1.2 B4 D (except D2.4) चापि (for चैव). — (L. 3) Ś1 K1.2 प्रथितः प्रतिप°. D4 बभूवामितविक्रमः.]

☞ At the place indicated by asterisks in the constituted text, there appears to have been a palpable lacuna in the original which was filled up, independently, in different ways in the two recensions.

52 a) Ś1 K1.2.4 Da1 D5 प्रतिपस्य. — c) Ñ B D (except D2) G1–3 शांतनुः. — d) Ś1 K1.2 Da1 Dn1 G3.4 बाह्लि°. S महायशाः. — After 52, G1 reads 54^{ab}.

53 K2.4 D1 (hapl.) om. 53. — a) Ko Ñ2 Dn च (for तु). Ñ1 देवापिस्तत्र वव्राज. — b) Ñ2 B D (D1 om.) T1 G3.6 °हितेप्सया; T2 G1.2.4.5 °मभीप्सया; M °परायणः. — c) Ñ B Da2 Dn शांतनुः. B1.6 D2 M3.5 तु (for च). — d)=52d. Ś1 K1 Da1 Dn1 G1–4 बाह्लि°. D5 T1 महाबलः; T2 G (except G3.6) °यशाः.

54 G1 reads 54^{ab} after 52. — a) G6 राजन् (for जाताः). T2 G1 भरतस्यान्ववायास्ते; G2.4.5 °न्वयास्त्वेते

९०

जनमेजय उवाच ।
श्रुतस्त्वत्तो मया विप्र पूर्वेषां संभवो महान् ।
उदाराश्चापि वंशेऽस्मिन्राजानो मे परिश्रुताः ॥ १
किंतु लब्ध्वर्थसंयुक्तं प्रियाख्यानं न मामति । C. 1. 3755 B. 1. 95. 2

M6-8 °स्य कुले जाताः. — [b]) T2 G (except G3. 6) देवकल्पा (for सत्त्व°). Ś1 K1. 2 Ñ B4 Da Dn D1 नराधिपाः; K4 D5 G3 महाबलाः. — [c]) S बभूवुर्ब्रह्मकल्पाश्च.

55 [a]) M6-8 om. च. T2 G (except G3. 6) एवंविधा (T2 °रूपा) महाभागा. — [b]) K2 T1 M3. 5 महाबलाः (T1 *sup. lin.* °स्थाः). T2 G2. 4. 5 देवरूपाः प्रहारिणः. — [c]) S अन्ववाये मनो राजन् (T2 G1. 4. 5 M6-8 महाराज). — [d]) Ś1 K3 ऐड-; Ko. 4 एड-; K1 ऐज्ञ-; K2 D2 कुल-; G2 एष; G3 एवं (for ऐल-). — After 55, M6-8 ins.:

893* भरतस्य महत्कर्म प्रथितं सर्वराजसु ।
अश्वमेधसहस्रेण राजसूयशतेन च ।
इष्टवान्स महाराज दौःषन्तिर्भरतः पुरा ।
चक्रवर्तिरदीनात्मा जेता युद्धेऽजितः परैः ।

S ins. after 55 (M6-8 cont. after 893*):

894* गङ्गातीरं समागम्य दीक्षितो जनमेजय ।
अश्वमेधसहस्राणि वाजपेयशतानि च ।
पुनरीजे महायज्ञैः समाप्तवरदक्षिणैः ।
अग्निष्टोमातिरात्राणामुक्थानां सोमवत्पुनः ।
वाजपेयेष्टिसत्राणां सहस्रैश्च सुसंभृतैः । [5]
दृष्ट्वा शाकुन्तलो राजा तर्पयित्वा द्विजान्धनैः ।
पुनः सहस्रं पद्मानां कण्वाय भरतो ददौ ।
जाम्बूनदस्य शुद्धस्य कनकस्य महायशाः ।
यस्य यूपाः शतव्यामाः परिणाहेऽथ काञ्चनाः ।
सहस्रव्याममुद्बद्धाः सेन्द्रैर्देवैः समुच्छ्रिताः । [10]
स्वलंकृता भ्राजमानाः सर्वरत्नैर्मनोरमैः ।
हिरण्यं द्विरदानश्वान्महिषोष्ट्रानजाविकान् ।
दासीदासं धनं धान्यं सवत्सा गाः पयस्विनीः ।
भूमिं यूपसहस्राङ्कां कण्वाय बहुदक्षिणाम् ।
बहूनां ब्रह्मकल्पानां धनं दत्त्वा ऋतून्बहून् । [15]
ग्रामान्गृहाणि क्षेत्राणि कोटिशोऽयुतशस्तथा ।

[(L. 1) G3 M6-8 गंगाद्वारं. M6-8 समासाद्य. — After line 2, T1 G1. 2 M3. 5 ins.:

895* कृत्वा पैतामहे लोके वासं चक्रे महारथः ।

— (L. 4) M6-8 योजयत्पुनः. — (L. 7) = (var.) 1. 69. 48. — (L. 8) T1 G1. 2 M3. 5 भरतोदद्यात्. — (L. 9) T1 G1. 2 M3. 5 [s]वि-; M6-8 च (for स्थ). — (L. 10) M6-8 °ष्यामसुद्विद्धाः. — (L. 12) G3 M6-8 रथानुष्ट्रा°. — (L. 13) T2 G3-6 गाः सुशीलाः सवत्सकाः (for सवत्सा गाः प°). — (L. 14) M6-8 ददौ कण्वाय दक्षिणां (for कण्वाय बहुद°). — (L. 15) G3. 6 दक्षिणाममितां ददौ (for धनं दत्त्वा ऋ°). T2 बहवो ब्रह्मकल्पाश्च बहवो राजसत्तमाः. — (L. 16) T1 G1. 2 M3. 5 शुभ्राणि (for क्षेत्रा°).

☞ After 894*, S reads 1. 69. 49–51, ending the adhy. and the Śakuntalā episode.

Colophon om. in S (cf. v. l. 1 and 16 above). — *Sub-parvan:* Ñ1. 2 संभव. — *Adhy. name:* N पूरु (Ko. 2 om. पूरु; D5 reads कुरु; some MSS. पुरु)वंशानुकीर्तनं (Ñ3 °वंशवर्णनं). — *Adhy. no.* (figures, words or both): Ko 91; Da1 D4m 92; Dn3 93. — *S'loka no.:* Da1 65; Dn 63. — *Aggregate s'loka no.:* Dn2 3726.

90

☞ This adhy. is missing in V1 (cf. v. l. 1. 68. 74); the MS. is *wholly* ignored here. — S reads this adhy. after adhy. 56. — While there is a sufficiently close agreement between the two recensions as regards the material contents of this (genealogical) adhy., there is considerable divergence between their respective introductions and *phalas'rutis*. The difference between the introductory portions may be due to the different positions occupied by this adhy. in the body of the Ādiparvan. The Northern rambling *phalas'ruti*, which contains some repetition and bears other signs of inflation has been discarded in favour of the Southern, which is compact, consisting only of a single stanza.

1 S om. 1–5 (with जनमे° उ°). Ś1 K1 D5 om. उवाच. Da1 जन्मे° उ°. — [a]) Ś1 K D5 महान् (K4 महा-) (for मया). Ko. 3. 4 Ñ2 B1. 4 D ब्रह्मन् (D4 as in

C. 1. 8755
B. 1. 95. 2

श्रीणात्यतो भवान्भूयो विस्तरेण ब्रवीतु मे ॥ २
एतामेव कथां दिव्यामा प्रजापतितो मनोः ।
तेषामाजननं पुण्यं कस्य न प्रीतिमावहेत् ॥ ३
सद्धर्मगुणमाहात्म्यैरभिवर्धितमुत्तमम् ।
विष्टभ्य लोकांस्त्रीनेषां यशः स्फीतमवस्थितम् ॥ ४
गुणप्रभाववीर्यौजःसत्त्वोत्साहवतामहम् ।
न तृप्यामि कथां शृण्वन्नमृतास्वादसंमिताम् ॥ ५

वैशंपायन उवाच ।

शृणु राजन्पुरा सम्यङ् मया द्वैपायनाच्छ्रुतम् ।
श्रोच्यमानमिदं कृत्स्नं स्ववंशजननं शुभम् ॥ ६
दक्षस्यादितिः । अदितेर्विवस्वान् । विवस्वतो मनुः । मनोरिला । इलायाः पुरूरवाः । पुरूरवस आयुः । आयुषो नहुषः । नहुषस्य ययातिः ॥ ७ ॥
ययातेर्द्वे भार्ये बभूवतुः । उशनसो दुहिता देवयानी वृषपर्वणश्च दुहिता शर्मिष्ठा नाम । अत्रानुवंशो भवति ॥ ८ ॥

यदुं च तुर्वसुं चैव देवयानी व्यजायत ।
द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ९

तत्र यदोर्यादवाः । पूरोः पौरवाः ॥ १० ॥

पूरोर्भार्या कौसल्या नाम । तस्यामस्य जज्ञे जनमेजयो नाम । यस्त्रीनश्वमेधानाजहार । विश्वजिता चेष्ट्वा वनं प्रविवेश ॥ ११ ॥

---

text; D_5 पुण्यः) (for विप्र). — [b]) $Ś_1$ $Ñ_2$ D_5 सर्वेषां. $Ś_1$ K D_5 मया (for महान्). — [d]) $Ś_1$ K_1 मे बहुश्रुताः; $K_{0.3.4}$ बहवः स्मृ°.

2 S om. 2 (cf. v. l. 1). — [b]) $K_{2.4}$ $Ñ_{2.3}$ $D_{2.5}$ न मामिति; $Ñ_1$ महीपते; D_{n3} न मामपि. — [c]) $Ś_1$ K_1 महान् (for भवान्). K_3 ब्रह्मन् (for भूयो).

3 S om. 3 (cf. v. l. 1). — [a]) $Ś_1$ K_1 D_5 हृद्याम्; $Ñ_3$ पुण्याम्; B_1 (m as in text). $_{3.5.6}$ D_4 चित्राम् (for दिव्याम्). — [b]) $Ś_1$ D_2 (before corr.) मुनेः; K_1 $Ñ_3$ D_1 मुने. — [c]) D_5 °षां संजननं. — [d]) $Ñ_3$ नो (for न). $Ś_1$ श्रीतिमाहरेत्; K_1 °हामरेत् (sic).

4 S om. 4 (cf. v. l. 1). — [a]) $Ñ_{1.2}$ सधर्म°. — [c]) $Ñ_1$ विवृत्य लोकान्. K_2 $Ñ_3$ त्रीन्येषां; $Ñ_2$ B $D_{2.4.5}$ त्रीनेतान्. — [d]) K_1 B_1 $D_{2.4}$ °मिव स्थितं.

5 S om. 5 (cf. v. l. 1). — [b]) $Ñ_3$ °वतां सतां. — [d]) $K_{0.2.4}$ D_2 अमृत(D_2 °ता)स्वादु°; K_3 अमृतस्वाद°; $Ñ_{1.3}$ $B_{4.6}$ Da D_4 °संनिभां; D_5 °स्वादुसंनिभां.

6 $Ś_1$ $K_{1.3}$ $D_{2.5}$ S om. उवाच. — For S see below also. — [a]) $K_{0.2.4}$ Da मया; K_3 $Ñ_3$ यथा (for पुरा). — [b]) K (except K_1) $Ñ_3$ B_4 Da D_5 पुरा (for मया). — K_4 om. 6^{cd}. — [c]) $Ś_1$ त्विदं; $B_{4.6}$ Dn मया (for इदं). — [d]) $Ś_1$ $K_{1.2}$ $Ñ_{1.3}$ Da तद्वंश°; $K_{0.3}$ D_5 त्वद्वंश°. K_3 स्मृतं (for शुभम्). D_2 (before corr.) °जनने शुभे. — For 6, S subst.:

896* पूरोर्वंशमहं धन्यं राज्ञाममिततेजसाम् ।
प्रवक्ष्यामि पितॄणां ते तेषां नामानि मे शृणु ।
[(L. 1) $G_{1.2}$ °वंशं महद्धन्यं; G_5 °महं दिव्यं.]

7 $Ñ_{1.2}$ B Dn $D_{1.2.4}$ दक्षादितिः. G subst. for दक्षस्यादितिः: T1 ins. before it:

897* अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य (!) अव्ययः ।
तस्मान्मरीचिः संजज्ञे दक्षश्चैव प्रजापतिः ।
मरीचेः कश्यपः पुत्रो दक्षस्य दुहितादितिः ।

[After line 2, $G_{1.2.5}$ ins.:

898* अङ्गुष्ठाद्दक्षमसृजच्चक्षुभ्यां च मरीचिनम् ।
— (L. 3) G_3 दुहितापतिः.]

— T G अदित्यां (G1 ins. कश्यपः) कश्यपाद् (G2 ins. जज्ञे) विवस्वान्. — Ko विवस्वतो यमः । यमात् मार्तंडः । मार्तंडात् मनुः. — $Ś_1$ K मनोरिडा (K_1 सनोरिद्रा). — $Ś_1$ K इडायाः; $G_{3.6}$ M_5 इलायां. — $Ś_1$ Ko $Ñ_{1.2}$ B D G1 नहुषाद्ययातिः.

8 $Ś_1$ om. च. $G_{1.3}$ °पर्व- (for °पर्वणश्च). — After नाम, $G_{1.3}$ ins. च. Ko B_5 D_5 S तत्र (T2 ततो) (for अत्र). Da °वंशं (for °वंशः). After °वंशः, Da Dn D_1 T G1 ins. श्लोकः. After भवति, D_2 ins. श्लोकश्चायं.

9 [a]) $K_{0.2.4}$ तुर्वसं; K_1 °श्चं; S (except T1 $G_{1.4}$) °शुं. T1 $G_{1.3.6}$ $M_{8.5}$ चोभौ (for चैव). — [b]) $Ś_1$ K_1 °यान्यामजा°; $Ñ_3$ °यान्या व्यजा°. — [c]) $Ś_1$ K G_3 द्रुह्यं.

10 $Ñ_1$ T1 यत्र (for तत्र). B_5 om. पूरोः पौ°. After पूरोः, $K_{1.3.4}$ $B_{1.6}$ Da $D_{2.4}$ ins. च.

11 After पूरोः, N (except $Ś_1$) ins. तु (Ko.1 च). N (except K_1 Ñ B_4 $D_{4.5}$) कौशल्या. G बभूव (for नाम). After नाम, M (except M_5) ins. बभूव. — B_5 D_2 om. अस्य. D_5 अपत्यं (for अस्य). Here and below G_3 (mostly) संजज्ञे (for जज्ञे). S om. (the second)

जनमेजयः खल्वनन्तां नामोपयेमे माधवीम् । तस्यामस्य जज्ञे प्राचिन्वान् । यः प्राचीं दिशं जिगाय यावत्सूर्योदयात् । ततस्तस्य प्राचिन्वत्वम् ॥ १२ ॥

प्राचिन्वान्खल्वश्मकीमुपयेमे । तस्यामस्य जज्ञे संयातिः ॥ १३ ॥

संयातिः खलु दृषद्वतो दुहितरं वराङ्गीं नामोपयेमे । तस्यामस्य जज्ञे अहंपातिः ॥ १४ ॥

अहंपातिस्तु खलु कृतवीर्यदुहितरमुपयेमे भानुमतीं नाम । तस्यामस्य जज्ञे सार्वभौमः ॥ १५ ॥

सार्वभौमः खलु जित्वाजहार कैकेयीं सुनन्दां नाम । तस्यामस्य जज्ञे जयत्सेनः ॥ १६ ॥

जयत्सेनः खलु वैदर्भीमुपयेमे सुषुवां नाम । C. 1. 3770 B. 1. 95. 17 K. 1. 63. 16

नाम. — M3 om. from यक्ष्वीनश्च° up to end of 11. D2 S स (for यस्). K2 T2 G1. 5. 6 M (M3 om.) त्रीन्मेधान्; T1 त्रिसत्रं; G2. 4 त्रीन्हयमेधान्; G3 सत्रं; Cd यक्ष्वीनश्चमेधान् (as in text). After चेष्ट्वा, M6-8 ins. सर्वस्वं प्रदाय. Ś1 K3 Ñ1. 2 B D (except Da D5) M6-8 om. प्र- (of प्रविवेश). After °विवेश, T2 G2. 4. 5 M (except M3) ins. जनमेजयः.

12 Da1 जन्मे°. After °जयः, S ins. तु. G (except G1. 6) om. खलु. D5 अनाङ्गीं; T2 G2. 4-6 सुनंदां; G1 अरजां (for अनन्तां). Ś1 K1 पावनीं; Ñ B1m. 3. 6 G1 मागधीं; D5 मागधः (for माध°). — Ś1 K1 (hapl.) om. from प्राचिन्वान् up to जज्ञे in 14. K3 (? hapl.) om. from प्राचिन्वान् up to प्राचिन्वत्वं. Ko. 2. 4 G1. 2 प्राचीन्वान्; G3 प्राचेताः. — Ko. 2 G1. 3 M3 om. यः. T1 G2. 4. 5 यावत्; T2 M5-8 तावत् (for यः). Ko. 2. 4 ins. वि- before जिगाय. K2 सूर्योदयं; M6-8 °दयः; Cd सूर्योदयात् (as in text). — After °दयात्, B (except B1) Da D2. 4 ins. इति. — Ko. 4 Da G3 तत्तस्य; T G1. 2. 4. 5 तस्य; G6 तावत्तस्य; M तदस्य (for तत°). Ko. 2. 4 Da T1 G1. 2 प्राचीन्वत्वं; Ñ3 परीत्वं; B1. 3 D5 G6 प्राचीनत्वं; G3 प्राचीत्वं.

13 Ś1 K1 om. 13 (cf. v. l. 12). Ko. 2 Da T1 G1. 2. 6 प्राचीन्वान्; G5 प्रचि°. — After प्राचिन्वान्, S ins. तु. B4 अश्वरीं; T2 °गीं; G आश्मकीं (G3 अश्मरीं) (for अश्मकीम्). After अश्मकीं, K2 D2 ins. कैकेयीं; M3. 5 नाम. After °येमे, Ñ1. 2 B4 Dn D1. 5 ins. यादवीं; G1. 2 वपुष्टमां नाम; G3 यावां नाम; G6 सुषावां नाम. — G3 (hapl.) om. from तस्याम° up to भानुमतीं नाम (in 15). K2. 3 सर्यातिः; B1. 4 संपा° (B1m as in text); D5 T G1. 4-6 शर्या°; G2 M6-8 शर्या°; M3. 5 शंया°.

14 Ś1 K1 om. up to जज्ञे (cf. v. l. 12). G3 om. 14 (cf. v. l. 13). MSS. indiscriminately (as above) सर्यातिः, संपा° etc. After संयातिः, S (except G3) ins. तु. G2. 4, 5 om. खलु. Ko. 4 D5 दनोर्; K2. 3 D2 रुशद्वतो; T G1. 4-6 त्रिशंकोर्; G2 त्रिंशत्कोटि-; M3. 5 रुशंतु-; M6-8 रुशनसस्तु (for दृष°). Ko चार्वंगीं; K4 वरांगनां (for वरा°). K2. 4 T1 om. नाम. — Ś1 अहस्पतिः; K (except K1) Da D1. 2. 4 अहंयातिर्नाम; Ñ1. 2 B1m. 4. 6 Dn D5 अहंयातिः; Ñ3 B3. 5 G1 अहंपातिर्नाम; T1 संपातिर्नामा (for अहं°).

15 G3 om. up to भानुमतीं नाम (cf. v. l. 13). D1 (? hapl.) om. up to जज्ञे. — Ś1 अहस्पतिः; K (except K1) Ñ1. 2 B1m. 4. 5 D (D1 om.) अहंयातिः. Ñ1. 2 B (except B3) D (except D4) om. तु. M6-8 °वीर्यस्य दुहि°. T2 G2. 4-6 भानुमतीं नामोपयेमे (by transp.). — T2 G5 om. अस्य. D5 (hapl.) om. सार्व°. After °भौमः, B3. 5 ins. नाम.

16 K3 om. 16. M7 (hapl.) om. up to जज्ञे. — After °भौमः, D5 ins. च; S तु. T1 om. खलु. B3. 5. 6 D4 किल (for खलु). After खलु, G2. 4. 5 ins. भूमिं. G3 (hapl.) om. from जित्वा up to खलु (in 17). Ś1 transp. जहार and कैकेयीं. M (M7 om.) °हृत्य (for °जहार). T G (except G5) M3 सुंदरां (G1 M3 °रीं); M5. 6. 8 वसुंधरां. D4 om. नाम. After नाम, Ś1 Ko. 1. 4 M (M7 om.) ins. उपयेमे; K2 Ñ B D तामु (K2 तां चो)पयेमे. — G6 (hapl.) om. from जयत्सेनः up to मर्यादां नाम (in 18). — After °त्सेनः, N (except K1 Ñ3 B1 D5) ins. नाम.

17 G3 om. जय° खलु; G6 om. 17 (cf. v. l. 16). — After °त्सेनः, S (except G3. 6) ins. तु. T1 om. खलु. G3 (hapl.) om. from सुषुवां up to नाम in 18. Ko. 4 D5 सुपर्वां; Ñ1. 2 B1. 4 Da2 Dn D1 °श्रवां; B5. 6 °स्वरां; Da1 वामां (sic); T1 °षुपूं; T2 G4 °षवां; M °षुपां (for सुषु°). — Ko. 4 B1. 4. 6 Da D1. 2. 5 T1 अर्वा°; Ñ1. 3 सुरा°; B3 Dn D4 अवा° (for अरा°).

18 G3. 6 om. up to नाम (cf. v. l. 16, 17). MSS. indiscriminately (as above) अर्वाचीनः, सुरा° or अवा°. B3. 5. 6 Da D2. 4 om. अपि. B1 खलु; D5 च खलु; S (G3. 6 om.) तु खलु (for अपि). M3 वैदेहीम् (for वैदर्भीम्). Ś1

C. 1. 3770
B. 1. 95. 17
K. 1. 63. 16

तस्यामस्य जज्ञे अराचीनः ॥ १७ ॥

अराचीनोऽपि वैदर्भीमेवापरामुपयेमे मर्यादां नाम । तस्यामस्य जज्ञे महाभौमः ॥ १८ ॥

महाभौमः खलु प्रासेनजितीमुपयेमे सुयज्ञां नाम । तस्यामस्य जज्ञे अयुतनायी । यः पुरुषमेधानामयुतमानयत् । तदस्यायुतनायित्वम् ॥ १९ ॥

अयुतनायी खलु पृथुश्रवसो दुहितरमुपयेमे भासां नाम । तस्यामस्य जज्ञे अक्रोधनः ॥ २० ॥

अक्रोधनः खलु कालिङ्गीं करण्डुं नामोपयेमे । तस्यामस्य जज्ञे देवातिथिः ॥ २१ ॥

देवातिथिः खलु वैदेहीमुपयेमे मर्यादां नाम । तस्यामस्य जज्ञे ऋचः ॥ २२ ॥

ऋचः खल्वाङ्गेयीमुपयेमे सुदेवां नाम तस्यां पुत्रमजनयदृक्षम् ॥ २३ ॥

ऋक्षः खलु तक्षकदुहितरमुपयेमे ज्वालां नाम । तस्यां पुत्रं मतिनारं नामोत्पादयामास ॥ २४ ॥

Dn3 om. एव. S (except G3.6) om. एवापराम्. Ñ1.2 B4 Dn1.n2 D1 transp. एव and अपराम्. — Ś1 K1 (hapl.) om. from मर्यादां up to उपयेमे in 19. — After नाम, Ko.2.4 B5.6 (both marg.) D (except D5) ins.:

899* तस्यामस्य जज्ञे अरिहः । अरिहः खल्वाङ्गीमुपयेमे ।

K3 (hapl.) om. from तस्यामस्य up to सुयज्ञां नाम (in 19). G3 महासेनः (for °भौमः).

19 Ś1 K1 om. up to °मुपयेमे; K3 om. up to नाम (cf. v. l. 18). — G3 महासेनः (for °भौमः). After °भौमः (resp. its v. l.), D5 ins. च; S (except G1) तु. T1 G6 om. खलु. Ko.2.4 Da1 प्रासेनजीतिम्; Ñ °जितिम्; D5 S प्र(T G1.2 M7.8 प्रा)सेनजिदुहितरम्. — D5 (hapl.) om. from उपयेमे up to दुहितरम् (in 20). Ko यज्ञियां; D2 सहजन्यां; T2 यमलां; M6–8 सुमज्ञां (for सुय°). T1 यमलां नामोपयेमे; M3 संज्ञां नामोपयेमे (for उपयेमे—नाम). — K1 (hapl.) om. from तस्यामस्य up to अक्रोधनः (in 20). K4 D2 अयुतयाजी; Da1 T2 G (except G3) अयुतानायी. — T G4–6 पुरुषमेधे पुरुषाणां; G1–3 पुरुषमेधे; M पुरुषाणाम् (for °मेधानाम्). वशं is ins. in M after (in M5 before) अयुतं. Ś1 K (K1 om.) Ñ1.3 आजहार (for आनयत्). After °नयत्, T G1.2 M ins. राज्ञां; G3 यज्ञानां. — Ñ1.2 B Dn D1.4 तेनास्य; D2 T1 G4.5 तस्य; T2 G1–3.6 M तत्तस्य (for तदस्य). T2 (before corr.) G4–6 अयुतानायित्वं.

20 K1 om. 20; D5 om. up to दुहितरम् (cf. v. l. 19). — Da1 G4–6 अयुतानायी; D2 °याजी. S (except G3 M7) तु खलु (T1 तु only) (for खलु). Ś1 भाषां; Ñ2 B1.3.4 Dn D1.2.4 कामां; B5 भीमां; B6 मेकारां; M6–8 मर्यादां (for भासां). Ko.2 T भा(K2 हा)सां नामोपयेमे (by transp.). — Ś1 (hapl.) om. from तस्यां up to ज्वालां नाम (in 24). — T2 अतस्तस्याम्; G6 अस्यां (for तस्याम्). — After °धनः, K4 (irrelevantly) ins. वार्षिकसत्रमाजहार (cf. 25).

21 Ś1 om. 21 (cf. v. l. 20). Ñ1.2 Dn स (for अक्रो°). After °धनः, D5 ins. च; S ins. तु. K1 om. खलु. B6 कालिंदीं; G3 कालिंदींगीं (sic); G5 कक्षीवान्नाम लिंगीं(!). D2.5 om. करण्डुं. Ko.3.4 Ñ Da करेणुं; K2 करकंदं; B4.5 Dn D1 करंभां; T G1 कंडूं; M कंधूं (for करण्डुं). K1 (corrupt) धनुः देवदत्तः देवदत्तां (for अक्रोधनः—करण्डुं). K1 D5 om. नाम. — After °येमे, D5 (irrelevantly) ins. रुरुकद्रू नाम.

22 Ś1 om. 22 (cf. v. l. 20). — B5 स (for देवा°). After °तिथिः, S ins. तु. D5 T G3 M5 om. खलु. Ko. वैदर्भीमेवापराम् (K4 om. एव); K2 देवकीम्; K3 B5 D4 T G2 M6–8 वैदर्भीं (for वैदेहीम्). D2 transp. वैदे° and उप°. D1 M6–8 om. मर्यादां नाम. K2 ज्वालां नाम; B3 वामां (om. नाम). — Ñ3 T मर्यादां (Ñ3 om. मर्यादां) नामोपयेमे (by transp.). — G5 om. तस्याम्. Ñ3 B5 T1 om. ऋचः. Ko चिरः; K2–4 B4 रिचः; Ñ1.2 Dn D1 [s]रिहो नाम (D1 नामतः); B1 [s]रिहः; B3 विंधः; D5 क्षतिः (for ऋचः).

23 Ś1 om. 23 (cf. v. l. 20). For ऋचः, MSS. चिरः etc. (as in v. l. 22). After ऋचः (resp. its v. l.), B3 ins. स; S (except T1) ins. तु. T1 G1 om. खलु. K1.3.4 D2 आंगीं (for आङ्गेयीम्). Ko.3 Ñ B1.5 D2 देवां; K1 मार्यादां; K2 मर्यादामेव; K4 देवामेव (for सुदेवां). — Ñ B4 D (except D4) अजीजनत् (for अजनयत्). S (with some slight variations) वामदेव्यामङ्गराजकन्यायामृक्षं पुत्रमजीजनत् (for आङ्गेयी°—°दृक्षम्). B (except B4) D4 तस्यामस्य जज्ञे ऋक्षः (for तस्यां—°दृक्षम्).

24 Ś1 om. up to नाम (cf. v. l. 20). — After ऋक्षः, D5 ins. च; S तु. T1 om. खलु. G (except G2.6) तक्षदु° (for तक्षकदु°). S reads उपयेमे after नाम. T1 पललां; T2 ज्वललां; G1 वललमतिं; G2 ज्वलंतीं; G3

मतिनारः खलु सरस्वत्यां द्वादशवार्षिकं सत्रमाजहार ॥ २५ ॥ निवृत्ते च सत्रे सरस्वत्यभिगम्य तं भर्तारं वरयामास । तस्यां पुत्रमजनयत्तंसुं नाम ॥ २६ ॥ अत्रानुवंशो भवति ॥ २७ ॥

तंसुं सरस्वती पुत्रं मतिनारादजीजनत् ।
इलिनं जनयामास कालिन्द्यां तंसुरात्मजम् ॥२८
इलिनस्तु रथंतर्यां दुःषन्ताद्यान्पञ्च पुत्रानजनयत् ॥ २९ ॥

दुःषन्तः खलु विश्वामित्रदुहितरं शकुन्तलां नामोपयेमे । तस्यामस्य जज्ञे भरतः । तत्र श्लोकौ भवतः ॥ ३० ॥

माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ।
भरस्व पुत्रं दुःषन्त मावमंस्थाः शकुन्तलाम् ॥३१
रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला॥३२

ततोऽस्य भरतत्वम् ॥ ३३ ॥

भरतः खलु काशेयीमुपयेमे सार्वसेनीं सुनन्दां नाम । तस्यामस्य जज्ञे भुमन्युः ॥ ३४ ॥

C. 1. 87. 5
B. 1. 95. 32
K. 1. 63. 34

जलवतीं; G4. 5 ललां; G6 ज्वलतां; M3 ज्वलितां; M5-8 ज्वलनां (for ज्वालां). — Before तस्यां, B3. 6 Da ins. स. Ko. 3. 4 पुत्रम् (K4 om. पुत्रम्) उत्पादयामास मतिनारं नाम (by transp.). T G1 अस्य जज्ञे अंतिनारः; G2. 4. 5 M6-8 अंतिनारमुत्पादयामास; G3. 6 अंतिनारमजीजनत्; M3. 5 अंतिनारमुत्पादयत् (for पुत्रं—°मास).

25 Ś1 पतिनारः; K2 अतिं; D5 S (except T2) अंतिं. After °नारः, S ins. तु. Ñ3 T1 G3. 6 om. खलु. After °स्वत्यां, N ins. गुणसमुदितं (Dn D1 °समन्वितं). Ñ B D (except D5) आहरत् (for आज°).

26 Ko. 3. 4 Ñ B D (D5 marg.) समासे; T1 G1. 3. 6 M3. 5 तमुदवसाने निं; T2 G2. 4. 5 M6-8 तमुदवसाने (for निवृत्ते). D2. 5 S om. च. D5 S om. सत्रे. B5 S om. तं. — K3. 4 B5. 6 Da D4 M5 स तस्यां; D2 तस्यां स (for तस्यां). K3. 4 उत्पादयामास; Ñ2 B4 Da Dn D1 अजीजनत्; D5 S जनयामास (for अजनयत्). K D5 त्रसुं (Ko त्रंसुं); S त्रस्नुं (for तंसुं). D5 om. नाम.

27 K4 D2 भवति श्लोकः; Ñ1. 2 Da Dn D1. 4 श्लोको भ° (for भवति).

28 a) K D2. 5 त्रसुं; S त्रस्नुः (G3 तस्मिन्). G4. 5 M पुत्रः. — b) Ś1 पतिनारात्; S अंतिं. G2. 4. 5 M अजायत. — c) K3 Ñ B Da2 Dn D4 ईलिनं; S इलिलं. — d) N (except Ś1 B6) कालिंग्यां (K1 °लिन्यां). K Ñ3 D2 त्रसुः; D5 त्रंसुः; S त्रस्नुः (cf. v. l. 1. 89. 11, 12). T1 आत्मवान्.

29 K3 Ñ B Da2 Dn D4 ईलिनस्तु; S इलिलं. After तु, S (except G6) ins. खलु. G3 om. रथंतर्यां. After °तर्यां, T2 G (except G3. 6) ins.:

900* जनमेजयमुत्पादयामास । जनमेजयस्तु खलु लक्ष्मणां नाम भागीरथीमुपयेमे । तस्यां.

[T2 G4. 5 कक्षीं (for लक्ष्म°). — Cf. 901*.]

Here and below MSS. indiscriminately दुष्वंत, दुष्कं°, दुष्यं° as before; cf. v. l. 1. 62. 3; 63. 14, 15 etc. K2. 4 B3 D2. 5 दुःषंतादीन्. K4 D2 om. पञ्च पुत्रान्. K2-4 Ñ1. 2 B4 Da Dn D1. 2 T G अजीजनत्; B1. 3. 6 D4 उत्पादयामास; B5 जनयामास (for अजन°). — After 29, D5 T1 G3. 6 M (except M3) ins.:

901* दुःषन्तस्तु खलु लक्ष्मणां नाम भागीरथीमुपयेमे । तस्यामस्य जज्ञे जनमेजयः ।

[Cf. 900*. D5 G6 लक्ष्मणां; T1 लक्ष्मीं (for लक्ष°).]

30 Before दुःषन्तः (resp. its v. l.), D5 G3. 6 ins. स एव; T1 स. After दुःष°, S (except T1 G6) ins. तु. D5 T1 G (except G3) om. खलु. D5 G3 शकुं नाम विश्वामित्रदु° (by transp.). B (except B4) D2. 4 उपयेमे शकुं° नाम (by transp.). After भरतः, Ko ins. नाम. — Ñ3 lacuna for तत्र श्लोकौ भवतः. K (except K1) Ñ2 B1. 3. 4 D अत्र (D5 यत्र) (for तत्र). Before श्लोकौ, Ñ1. 2 B1. 4. 5 D (except D2. 4. 5) ins. अनुवंश-; G (except G3) इमौ.

31 =(var.) 1. 69. 29. — a) Ñ B D (except D1. 2. 5) Cd transp. माता and भस्त्रा (as in 1. 69. 29). Ś1 पिता बंधुः; Cd पितुः पुत्रो (as in text). — b) S (except G3) यस्माज्जातः; Cd as in text. — c) S (except G1. 2) दौःषंतिं (spelt differently). — For 31d, S subst. 32d.

32 =1. 69. 30. — M5 (? hapl.) om. 32. — a) Cd as in text. S (M5 om.) पुत्रं नयति. — b) Ñ3 महौजसं; S यमक्षयं; Cd as in text. — c) K1 त्वमस्य धाता; B5 त्वं च धातास्य. — For 32d, D5 repeats 31d. — After शकुन्तला, Ś1 Ko Da ins. इति.

33 G1. 3 एतद् (for ततः). Ñ3 om. अस्य भर°. K2 तस्य राजपुत्रस्य (for अस्य).

34 After भरतः, D5 T ins. च; G M तु. G4-6 om.

C. 1. 3786
B. 1. 95. 33
K. 1. 63. 35

भुमन्युः खलु दाशार्हीमुपयेमे जयां नाम । तस्यामस्य जज्ञे सुहोत्रः ॥ ३५ ॥

सुहोत्रः खल्विक्ष्वाकुकन्यामुपयेमे सुवर्णां नाम । तस्यामस्य जज्ञे हस्ती । य इदं हास्तिनपुरं मापयामास । एतदस्य हास्तिनपुरत्वम् ॥ ३६ ॥

हस्ती खलु त्रैगर्तीमुपयेमे यशोधरां नाम । तस्यामस्य जज्ञे विकुण्ठनः ॥ ३७ ॥

विकुण्ठनः खलु दाशार्हीमुपयेमे सुदेवां नाम । तस्यामस्य जज्ञे अजमीढः ॥ ३८ ॥

अजमीढस्य चतुर्विंशं पुत्रशतं बभूव कैकेय्यां नागायां गान्धार्यां विमलायामृक्षायां चेति । पृथक्पृथग्वंशकरा नृपतयः । तत्र वंशकरः संवरणः ॥ ३९

संवरणः खलु वैवस्वतीं तपतीं नामोपयेमे । तस्यामस्य जज्ञे कुरुः ॥ ४० ॥

कुरुः खलु दाशार्हीमुपयेमे शुभाङ्गीं नाम । तस्यामस्य जज्ञे विडूरथः ॥ ४१ ॥

खलु. G3 om. काशेयीम्. Ś1 K1 D2 कैकेयीं; K4 D4 T2 (by corr.) कौशेयीं; D5 कौकेयीं; G1 कौशेनीयवैदेहीं (for काशेयीम्). K4 T सार्वसेनीमुपयेमे (by transp.). — Ś1 (hapl.) om. from तस्यामस्य up to सुवर्णां नाम (in 36); K4 om. from तस्यामस्य up to जयां नाम (in 35). M6–8 अस्याम् (for तस्याम्). Ko (hapl.) om. from भुमन्युः up to जज्ञे in 35. K1 भुव°; D2 भ्रुम°; T हुम° (for भुमन्युः).

35 Ś1 om. 35; Ko om. up to जज्ञे; K4 om. up to नाम (cf. v. l. 34). — After भुमन्युः, D5 ins. च; S तु. T1 वासेयी; T2 G1.4.5 दाशेयीम् (for दाशार्हीम्). Ñ B1.4 Da Dn D1 विजयां; B3.6 D4 सुदेवां; B5 देवां; S सुप(G2–5 M6–8 °च)र्णां (for जयां). — K1 (hapl.) om. from तस्यामस्य up to सुवर्णां नाम (in 36).

36 Ś1 K1 om. up to नाम (cf. v. l. 34, 35). — After सुहोत्रः, S ins. तु. S ऐक्ष्वाकीम् (G2 दार्ष्टवतीम्) (for इक्ष्वाकुकन्याम्). K2.4 सुपर्णां; Ñ1 सुदेवां; S जयंतीं (G3 जयां) (for सुवर्णां). D5 T1 G3 हस्तिः. — S पुरं (for हास्तिन°). Ś1 समापयामास; Ko.3.4 T G2.3 निर्माप°; K2 G6 आवस°; Ñ1.2 B4.5 Dn D1.2.4 स्थाप°; D5 कार°; Cd as in text. — D5 तस्य; S तस्माद् (M3 as in text; G3 यतो) (for एतदस्य). S (except M3) हस्तिन°.

37 After हस्ती, D5 ins. च; T2 G5 M तु. Ś1 (hapl.) om. from यशो° up to °येमे in 38. B1 (m as in text).6 D2 यशोधनां; B4 Da G2.4.5 यशोदां; G3 °वनां. — Ko.3 D2.5 विकुंचनः; K1 विक्रश्चः; K2 °कुंभः; K4 °कुंचः; Da S °कुंजनः (G3 °रः) (for विकु°). After विकु° (resp. its v. l.), K (except Ko) Ñ1.2 B4 D (except D2.4.5) ins. नाम.

38 Ś1 om. up to °मुपयेमे (cf. v. l. 37). For विकुण्ठनः, MSS. विकुंचनः etc. (cf. v. l. 37). After विकु° (resp. its v. l.), D2.5 ins. च; S तु (G4 corrupt). T G6 M (except M3) om. खलु. G4.5 om. from दाशार्हीम् up to जज्ञे. K4 देवसुतां; T G1.3 M सुनंदां (for सुदे°). G6 विंदां नामोपयेमे (for उप°—नाम). — After °मीढः, Ñ1.2 B4 D (except D2.4.5) ins. नाम.

39 After °मीढस्य, T2 G4.5 ins. तु. K1 S चतुर्विंशति; D2 °शतिः; D5 °शत्. B D G3 (? hapl.) om. नागायां. B1.3.5.6 transp. कैकेय्यां and गान्धार्यां. B1.4 Dn D1.4 विशाला°; D2 विमना°; T2 बला° (for विमलायाम्). Ś1 K2 D5 सूक्ष्मा°; K4 ऋक्षकां; G3 ईक्षा°; G4.5 वृक्षा° (for ऋक्षायां). K1 सूक्ष्मायां विमलायां (for विमलायामृक्षायां). B4 om. चेति; S om. च (M5 om. चेति). Da1 D5 T G4–6 M5 om. one पृथक्-. M3.6–8 ते (for the first पृथक्-). Ñ1.2 B4 D (except D2.4.5) -वंशधराः; S -वंशकर्तारः (for वंश°). G1–3 om. नृप°. — अजमीढादृक्षायां is ins. in T G1.3 after तत्र; in G2.4–6 (which om. तत्र), at the beginning of the final sentence. T G4.5 संवरणो जज्ञे वंशकरः; G1 वंशकारणः संवरणिः; G2.6 वंशकरः संवरणो जज्ञे (for वंश° संव°).

40 Ś1 K3 Ñ3 D2 (? hapl.) om. संव°. — After °रणः, D5 ins. च; S तु. Ś1 सरस्वतीं (for वैव°). G3.5.6 M5 तपतीं. G3 om. नाम. — Ś1 K3 Ñ B Da1 D5 (? hapl.) om. from तस्यामस्य up to संप्रियां नाम (in 42). G1 (hapl.) om. from तस्यामस्य up to मागधीमुपयेमे (in 43). Ko.4 Da2 (? hapl.) om. कुरुः. Before कुरुः, D2 ins. सुभगो नाम. After कुरुः, K1.2 D4 ins. नाम. After नाम, K2 cont.: कुरुर्यस्तपसा कुरुक्षेत्रं पुण्यं चक्रे.

41 Ś1 K3 Ñ B Da1 D5 G1 om. 41 (cf. v. l. 40). Ko.4 Da2 D2.4 (hapl.) om. from कुरुः खलु up to संप्रियां नाम (in 42). K1 om. from कुरुः खलु up to मागधीमुपयेमे (in 43). — After कुरुः, S (except G1) ins. तु. T1 G2.3.6 om. खलु. D1 (hapl.) om. from दाशार्हीम् up to अरुग्वान्खलु (in 43). K2 वाहिनीं नामोपयेमे (for दाशार्हीमुप°). G4.5 om. उपयेमे शुभाङ्गीं. G2 om. शुभाङ्गीं

विदूरथस्तु मागधीमुपयेमे संप्रियां नाम। तस्यामस्य जज्ञे अरुग्वान्नाम ॥ ४२ ॥

अरुग्वान्खलु मागधीमुपयेमे अमृतां नाम। तस्यामस्य जज्ञे परिक्षित् ॥ ४३ ॥

परिक्षित्खलु बाहुदामुपयेमे सुयशां नाम। तस्यामस्य जज्ञे भीमसेनः ॥ ४४ ॥

12 ᵃ) T2 G1.2.4.5 M वयमेवम्. Ñ2 नियच्छंतः; B D (except D5) T1 अनिच्छंतः. G3.6 ते वयं सर्वमेवेदं. — ᵇ) G2.3.6 त्यक्त्वा ह्याशु (G2 सर्वे त्यक्त्वा) पुरोत्तमं. — ᵉ) G2.3.6 दारानादाय ग°. — ᵈ) Ñ2 V1 B D (except

उवाच परमप्रीतो धर्मराजो युधिष्ठिरः ॥ १३
पिता मान्यो गुरुः श्रेष्ठो यदाह पृथिवीपतिः ।
अशङ्कमानैस्तत्कार्यमस्माभिरिति नो व्रतम् ॥ १४
भवन्तः सुहृदोऽस्माकमस्मान्कृत्वा प्रदक्षिणम् ।
आशीर्भिरभिनन्द्यास्मान्निवर्तध्वं यथागृहम् ॥ १५
यदा तु कार्यमस्माकं भवद्भिरुपपत्स्यते ।
तदा करिष्यथ मम प्रियाणि च हितानि च ॥ १६
ते तथेति प्रतिज्ञाय कृत्वा चैतान्प्रदक्षिणम् ।
आशीर्भिरभिनन्द्यैनाञ्जग्मुर्नगरमेव हि ॥ १७
पौरेषु तु निवृत्तेषु विदुरः सर्वधर्मवित् ।
बोधयन्पाण्डवश्रेष्ठमिदं वचनमब्रवीत् ।
प्राज्ञः प्राज्ञं प्रलापज्ञः सम्यग्धर्मार्थदर्शिवान् ॥ १८
विज्ञायेदं तथा कुर्यादापदं निस्तरेद्यथा ।
अलोहं निशितं शस्त्रं शरीरपरिकर्तनम् ।
यो वेत्ति न तमाघ्नन्ति प्रतिघातविदं द्विषः ॥ १९
कक्षघ्नः शिशिरघ्नश्च महाकक्षे बिलौकसः ।

C. 1. 5756
B. 1. 145. 23
K. 1. 157. 22

D5) T G3.4 गंता; Ñ3 राजा (for याति).

13 K1.3 (hapl.) om. 13. — a) Ś1 Ko.2.4 Ñ1.3 V1 D5 °वदतः पौरान्; T2 °वादनपरान्; G4 °वादिनः सर्वान्. — b) D4 दुःखितो; G3 दुःखार्तान्. D4 G2.3.6 शोक(D4 दुःख)कर्शितान्. Some N MSS. °कर्षितः. — c) Ñ2 B D (except D5) T1 उवाच मनसा ध्यात्वा. — d) Ñ3 D5 G1 धर्मपुत्रो; T2 G4.5 तत्र यान्वै.

14 e) G2.3.6 अस्माभिः (for तत्कार्यं). — a) G2.3.6 कर्तव्यमिति. B3 नो ध्रुवं.

15 a) Da चरंतः सुहृ°. — K4 (hapl.) om. 15b–16a. — b) Ś1 K1 तस्मात्कृत्वा. — c) Ñ1.3 V1 ins. च after आशीर्भिः (cf. 17). K3 अभिनंद्यैतान्. Ñ2 B D (except D5) T1 प्रतिनंद्य तथाशीर्भिर्. — K3 (hapl.) om. 15a–17e. — d) Ko.2 Ñ1 T2 G1.4 M (except M5) °गृहान्.

16 K3 om. 16; K4 om. 16a (cf. v. l. 15). — b) Ñ1 इति मन्यते; D1 G1.4 M उपपद्यते. — c) T G1.3–5 तथा. K4 G3–5 करिष्यत. Ñ2 V1 B D (except D5) T1 अस्माकं (for मम).

17 K3 om. 17abc (cf. v. l. 15). — Before 17, T2 G4 ins. वैशं°. — For 17, D5 repeats 15 (v. l. यतो गृहान्). — a) Ś1 Ko-2 तथेति च (Ko ते); Ñ1 M6-8 तत्तथेति. Ñ2 B D (for D5 see above) T1 एवमुक्तास्ततः (Ñ2 B1 °दा) पौराः. — b) Ś1 Ñ2 B D (for D5 see above) T1 चापि; K1 चाभि-; K2 Ñ1.3 M5 चैनान्; K4 चैषां; V1 चैनं. — c)=(var.) 15e. After आशीर्भिः, Ñ V1 B D (for D5 see above) T G (except G1.2) ins. च. Ko.2.4 Ñ V1 B D (for D5 see above) T G (except G3) एतान्. — d) M ययुर्नगर°.

18 a) Ś1 D4 अथ; Ko Ñ V1 B Dn D1.2.5 T1 G1 M3 वि-; Da T2 G2–5 M5–8 च (for तु). — cd) K1 आह्वयं; D5 बांधवः (for बोधयन्). Ś1 Ko-2 Ñ1.3 V1 पांडवं (Ñ1 °व-)ज्येष्ठं. G2.3.6 अनु(G2 °न्व)गच्छत्स कौंतेयं बोधयंश्चेदम-ब्रवीत्. — Before 18ef, T2 G1.2.4.5 M6-8 ins. विदुरः. — e) D2 प्राज्ञ; M राजा (M3 राज्ञा; M8 *inf. lin.* प्राज्ञा); Cd प्राज्ञः (as in text). Ś1 प्राप्य प्र°; Ko प्राज्ञफलापेक्षः; K1 पापप्र°; K2 D5 प्रज्ञाप्र°; K3.4 Ñ V1 B3.5 Dn2.n3 D2.4 (by corr.) M3.6–8 प्राज्ञप्र°; B6 च विप्र°; Dn1 T M5 Arjp प्राज्ञः प्र°; G1.4 प्रज्ञाबलः प्रज्ञः; G2.6 कुशलवृत्तश्च; G3 प्रज्ञाफलः प्रज्ञा; G5 प्राज्ञः फलेवज्ञः (for प्राज्ञं प्र°). — f) Ñ3 B5.6 Da °तत्ववित्; Ñ3 B1.3 Dn D1 प्रलापज्ञमिदं वचः; D2.4 सुप्रलापमिदं वचः; D5 सर्वधर्मा°; T1 धर्मकार्यार्थदर्शनः; T2 G1.5 °दर्शनः; G3 °दर्शितान्; G4 °दर्शितः. — After 18, B1 ins.:

1456* प्राज्ञश्च विप्रलापज्ञः सम्यग्धर्मार्थतत्त्ववित् ।;

while Dn ins.:

1457* प्राज्ञं प्राज्ञः प्रलापज्ञः प्रलापज्ञं वचोऽब्रवीत् ।(!)

— K4 Ñ V1 B Da D1.2.4 T1 ins. after 18 (B1, after 1456*): Dn, after 1457*:

1458* यो जानाति परप्रज्ञां नीतिशास्त्रानुसारिणीम् ।
[B5 °शास्त्रार्थदर्शिनीं; D2 स नरः सुखमेधते.]

With reference to some line of his text (probably, 1458*) Nīl. observes: ❀अत्रोत्तरार्धे गौडपाठ एव दृश्यते।❀

19 a) G1.4 विज्ञानं (for °ज्ञाय). Ñ2.3 V1 B1m Dn D1.5 T1 इह; B1 G1.4 तु; B3.6 Da D4 च; B5 तत्; D2 तं; M6–8 एतत् (for इदं). — b) B6 निस्तरेत सः. — c) T1 G4 निर्मितं शस्त्रं; Cd as in text. — d) K1.2 (both before corr.) Da2 °कीर्तनं; K3 D5 S °कृंतनं; Ñ1 Cd °वर्तनं. — e) V1 यो वेद. Ś1 K3 Ñ V1 B D (except D4) न तु तं (Ś1 तथा; K3 हि तं) घ्नंति. S ये विदंति (G3 पतंति; M3.5 वदंति) न तान् घ्नंति (G3.5 M5–8 हंति). — f) Ś1 K1 °घातविदो; V1 °घातकृतं; B6 D5 M6–8 °घातमिदं; M3 °घातमिमं (*inf. lin.* °विदो); Arjp प्रतिकार°. T2 G प्रतिघातविद्(G4 °धि)स्तथा (G3 °दा).

20 a) S °घ्नं शिशिर(G1 च शिरो)घ्नं च. — b) T G4.5

C. 1. 5756
B. 1. 145. 23
K. 1. 157. 22

न दहेदिति चात्मानं यो रक्षति स जीवति ॥ २०
नाचक्षुर्वेत्ति पन्थानं नाचक्षुर्विन्दते दिशः ।
नाधृतिर्भूतिमाप्नोति बुध्यस्वैवं प्रबोधितः ॥ २१
अनासैर्दत्तमादत्ते नरः शस्त्रमलोहजम् ।
श्वाविच्छरणमासाद्य प्रमुच्येत हुताशनात् ॥ २२
चरन्मार्गान्विजानाति नक्षत्रैर्विन्दते दिशः ।
आत्मना चात्मनः पञ्च पीडयन्नानुपीड्यते ॥ २३
अनुशिष्टानुगत्वा च कृत्वा चैनान्प्रदक्षिणम् ।
पाण्डवानभ्यनुज्ञाय विदुरः प्रययौ गृहान् ॥ २४
निवृत्ते विदुरे चैव भीष्मे पौरजने तथा ।
अजातशत्रुमामन्त्र्य कुन्ती वचनमब्रवीत् ॥ २५
क्षत्ता यदब्रवीद्वाक्यं जनमध्येऽब्रुवन्निव ।
त्वया च तत्तथेत्युक्तो जानीमो न च तद्वयम् ॥२६
यदि तच्छक्यमस्माभिः श्रोतुं न च सदोषवत् ।
श्रोतुमिच्छामि तत्सर्वं संवादं तव तस्य च ॥ २७

युधिष्ठिर उवाच ।

विषादग्नेश्च बोद्धव्यमिति मां विदुरोऽब्रवीत् ।
पन्थाश्च वो नाविदितः कश्चित्स्यादिति चाब्रवीत् ॥
जितेन्द्रियश्च वसुधां प्राप्स्यसीति च माब्रवीत् ।
विज्ञातमिति तत्सर्वमित्युक्तो विदुरो मया ॥ २९

वैशंपायन उवाच ।

अष्टमेऽहनि रोहिण्यां प्रयाताः फल्गुनस्य ते ।
वारणावतमासाद्य ददृशुर्नागरं जनम् ॥ ३०

इति श्रीमहाभारते आदिपर्वणि त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

M6.8 महाकक्ष; G1-3.6 M3 °कुक्षि; Da (erroneously) Arjp महाकक्षे (as in text); Arj. (?) महाकक्षं. T2 G2.4.6 M बिलौकसं; G1.5 विलोपनं. — [c]) S न सहेते(T1 °ये)ति (T2 G1.4 तासह्यं वेत्ति). T2 G4 पंथानं (cf. 21[a]).

21 [b]) T2 G2.3 °ध्रुर्वेत्ति वै. — Ś1 K1 T2 G4 (hapl.) om. 21[c]-23[b]. — [c]) Ko M5 भूमिम्; Ñ1 V1 B3 G3 बुद्धिम्; Da धृतिम् (for भूतिम्). — [d]) D1.4 T1 G3.5.6 एनं; M (except M5) एतत् (for एवं).

22 Ś1 K1 T2 G4 om. 22 (cf. v. l. 21). M ins. युधिष्ठिरः before 22[ab]; G2, before 22[ad]. — [ab]) S (T2 G4 om.) नानासैर्दत्त°, and धीरः (G3 लीनः; M5 गिरः) (for नरः). — [c]) Ko °त्सलिलम्; K2.3 B (except B1) Da (erroneously) Arjp Cd °च्छललम्; G1.3.5 °चरणम्; Arj. °च्छरणम् (as in text). — [d]) K2 प्रमुच्येत पुनःशनात् (m विमुच्येत हुताशनः); M3 *inf. lin.* मुच्यते दहनादपि.

23 Ś1 K1 T2 G4 om. 23[ab] (cf. v. l. 21). — [a]) D5 चरैर्मार्गं तु; G6 परं मार्गान्वि-. — [b]) G1.5 °त्रैश्च तथा. G6 -निशं (for दिशः). — [c]) Ś1 K1 आत्मनश्चात्मना (by transp.). — [d]) K1 नातिपी°; G2.3.6 न स पी°; M3.5 नाभिपी°; Cd as in text. — After 23, K4 Ñ V1 B D T1 ins.:

1459* एवमुक्तः प्रत्युवाच धर्मराजो युधिष्ठिरः ।
विदुरं विदुषां श्रेष्ठं ज्ञातमित्येव पाण्डवः ।

24 Before 24, Ko ins. वैशं उ°; K3.4 S (except T1), वैशं°. — [a]) Ś1 K B5 Da D5 G1 M6-8 Cd अनुशिष्य; Ñ V1 B1.3.6 Dn D1.2.4 °शिक्ष्य. Ñ V1 B D (except D5) T1 अनुगम्यैता(V1 °ना)न्. — [b]) Ñ V1 B Da Dn D1.2.4 चैव (B3 °वं); D5 G2.3.6 चैतान्; T2 G1.4.5 M पार्थान्. — After 24[ab], S (except G2.3.6) ins.:

1460* अभिवाद्य ततः कुन्तीं रुदन्पाण्डुमचिन्तयत् ।
[M3.5 °वाद्य पुनः. G1.4 दशां पांडोरचिंतयत्.]

— [c]) T2 G1.4.5 समनुज्ञाय. — [d]) Ś1 K3 D1.5 G2 गृहं. T2 G1.4.5 विदुरः संन्यवर्तत; M विदुरः प्रत्ययाद्गृहं.

25 [a]) Ñ1.2 V1 B D (except D5) T चापि (for चैव). — [b]) G3.6 °जनेपि च. — [c]) Ñ1.2 V1 B Da D1 S (except G2.3.6) °शत्रुमासाद्य. — [d]) T2 G1.4.5 कुंती वाक्यमथाब्र°.

26 Before 26, D4 marg. *sec. m.* ins. कुंत्युवाच; T2 G1.5 M6-8 कुंती. — [b]) T2 G5 रुदन्निव; Arj. explains both ब्रुवन्निव and अब्रु°, which latter is Devp. — K2 om. 26[c]-27[b]. — [c]) Ko Ñ2.3 B D T1 G3.5 स; K3 ते; Ñ1 V1 तं (for तत्). D5 °त्युक्ते; G (except G1.5) M3.5 °त्युक्तं.

27 K2 om. 27[ab] (cf. v. l. 26); G4 om. 27. — [a]) Ñ2 B1.5 Da2 Dn D2 यदीदं; B3 Da1 D1.4 T1 G2 यदिदं. — [b]) Ñ2 V1 B D (except D2.5) T1 ज्ञातुं (for श्रोतुं). B (except B6) Da T2 G1.5 M3 नैव च (B5 स-) दोष°; G3.6 न च सुदोष°. — [d]) Ko विवादं. G2.3.6 यत् (for च).

28 Ś1 K1 S om. उवाच. — [a]) Ñ1 भेतव्यम् (for बोद्धव्यम्). Ñ2 V1 B D (except D5) गृहादग्निश्च बोद्धव्यः. — [b]) Some MSS. मा (for मां). — K1 (hapl.) om.

१३४

वैशंपायन उवाच ।
ततः सर्वाः प्रकृतयो नगराद्वारणावतात् ।
सर्वमङ्गलसंयुक्ता यथाशास्त्रमतन्द्रिताः ॥ १
श्रुत्वागतान्पाण्डुपुत्रान्नानायानैः सहस्रशः ।
अभिजग्मुर्नरश्रेष्ठाञ्श्रुत्वैव परया मुदा ॥ २
ते समासाद्य कौन्तेयान्वारणावतका जनाः ।
कृत्वा जयाशिषः सर्वे परिवार्योपतस्थिरे ॥ ३
तैर्वृतः पुरुषव्याघ्रो धर्मराजो युधिष्ठिरः ।
विबभौ देवसंकाशो वज्रपाणिरिवामरैः ॥ ४
सत्कृतास्ते तु पौरैश्च पौरान्सत्कृत्य चानघाः ।
अलंकृतं जनाकीर्णं विविशुर्वारणावतम् ॥ ५
ते प्रविश्य पुरं वीरास्तूर्णं जग्मुरथो गृहान् ।
ब्राह्मणानां महीपाल रतानां स्वेषु कर्मसु ॥ ६
नगराधिकृतानां च गृहाणि रथिनां तथा ।
उपतस्थुर्नरश्रेष्ठा वैश्यशूद्रगृहानपि ॥ ७
अर्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभाः ।
जग्मुरावसथं पश्चात्पुरोचनपुरस्कृताः ॥ ८
तेभ्यो भक्ष्यान्नपानानि शयनानि शुभानि च । C. 1. 5776 B. 1. 146. 9 K. 1. 158. 9

28^{c}–29^{b}. — ^{cd}) Ko ते (for वो). K3 D5 वो न विदितः; T1 वेदितव्यस्ते; G1 विदितः कार्यः. Ś1 Ko.2.4 Ñ3 °दिति पांडव (K4 °वः; Ñ3 °वैः); Ñ2 V1 B D °दिति धर्मधीः (D1 °द्धर्मधीः पुमान्); M6–8 °दिति सोब्रवीत्. T2 G4.5 पंथाश्च विदितः शुद्धः (G4 कार्यः; G5 शुद्धिः) कश्चि°. G2.3.6 पंथाश्च विदितः कश्चित्स्याच्छुद्ध (G3 °द्धिर्) इति चा°.

29 K1 G3 om. 29^{ab} (cf. v. l. 28). — ^{b}) Ñ3 B Dn D2 T2 G2.4 M3 (*inf. lin.*).5.6.8 प्राप्स्यतीति. V1 स मे°; B D T1 च मे°; G4 ममा°. — ^{c}) G1.5 मे सर्वं. — ^{d}) K3 Ñ3 B D (except D5) T G (except G5) प्रत्युक्तो.

30 Ś1 K1–4 D2.5 S om. उवाच (M6–8 om. the ref.). — Ś1 (hapl.) om. 30 with colophon. — ^{a}) K1 दशमेहनि. — ^{b}) K Ñ V1 B D (except D1; D4 before corr.) T1 G3.4 M3.5 फाल्गुन° (K1 फल्गुण°). K1 मे; D5 च; G3 तत्; M6–8 वै (for ते).

Colophon om. in Ś1 (cf. v. l. 30). — *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* Ñ V1 B3.6 Dn D2.4 जतुगृह; B1.5 Da जातुष; T1 संभव. — *Adhy. name:* Ko.4 वारणावतयात्रायां युधिष्ठिरप्रबोधः (K4 °ष्ठिरमतिबोधनं); K2 D5 G1 वारणावत (K2 ins. here रणे) यात्रा; K3 वारणावतप्रवेशः; Ñ1.2 V1 वारणावतगमनं; M जतुगृहदाहे (M3 om. it) विदुरयुधिष्ठिरसंवादः. — *Adhy. no.* (figures, words or both): B1 142; Dn3 144; D4 147; T1 140; T2 G1.5.6 91; G2 92; G3.4 M 90. — *Śloka no.:* Dn 34; M3 33. — *Aggregate śloka no.:* Dn2 5773.

134

1 Ś1 om. the ref.; K1–3 D5 S om. उवाच. — ^{d}) T2 G4.5 वस्त्रशस्त्रैर् (for यथाशास्त्रम्). S अलंकृताः. B1m.5 Da D4 यथाशास्त्रविशारदाः.

2 ^{a}) Da D4 श्रुत्वायातान्; M3.5 अभ्यागतान्. S (except T1) पांडवेयान्. — ^{c}) T2 G °श्रेष्ठाः. — ^{d}) B1 तान्राजन्परया; T2 G1.4.5 सर्वे परमया.

3 ^{c}) K1 सर्वे प्रमुदिता दृष्टाः. — ^{d}) Ñ2 B D (except Dn3 D5) T1 परिवार्यावत°; T2 G M परिवव्रुर्युधिष्ठिरं.

4 ^{b}) Ś1 K2 धर्मपुत्रो. — ^{c}) K1 शुशुभे; M (except M5) बभौ स. K1 भ्रातृसहितो. — ^{d}) K3 °रिवापरः.

5 ^{a}) Ś1 ते च; Ñ2 B Da Dn D1.2.4 T1 चैव; T2 G M (except M5) तत्र (for ते तु). Ś1 B1.3 तु; Ñ2 B5.6 Dn D1 T1 ते (for च). D5 °स्ते तथा पौरैः. — ^{b}) K2 तांश्च (for पौरान्). Ñ1.2 V1 B3 Dn D1.4.5 T1 चानघ (Dn3 पांडवाः). — ^{c}) Ś1 K1 Da1 D5 G2.4.6 अलंकृत-.

6 ^{a}) K4 Ñ V1 B Dn D1.2.4 G3.5 पुरीं. — ^{b}) S (except T1) ययुर्. — ^{d}) G4 युक्तानां. M3 स्वेष्टकर्मसु.

7 ^{b}) K (except K2) रथिनस्. K2 (by corr.) Ñ V1 Dn1.n2 D1 G3.5.6 M6–8 तदा. — ^{c}) D4 (by corr.) G3 °श्रेष्ठ. V1 विविशुः पुरुषव्याघ्रा. — ^{d}) Ś1 Dn3 D5 T2 G5 M °गृहाण्यपि; Ñ2 B Da Dn1.n2 D1.2.4 T1 °कुलान्यपि.

8 ^{a}) K3 °रैः सर्वैः. — ^{b}) G1.3.6 कौरवा; G2 पौर°. K D5 पुरुषर्षभाः (K1 °भ); Ñ V1 B (except B1) Da Dn1.n2 D1.2.4 T1 G (except G5) °र्षभ. — ^{c}) Ñ1 °थं तस्मात्. — ^{d}) Ñ2 B Dn D2.4 T1 °पुरःसराः; Da D1 °पुरोगमाः.

C. 1. 5776
B. 1. 146. 9
K. 1. 158. 9

आसनानि च मुख्यानि प्रददौ स पुरोचनः ॥ ९
तत्र ते सत्कृतास्तेन सुमहार्हपरिच्छदाः ।
उपास्यमानाः पुरुषैरूषुः पुरनिवासिभिः ॥ १०
दशरात्रोषितानां तु तत्र तेषां पुरोचनः ।
निवेदयामास गृहं शिवाख्यमशिवं तदा ॥ ११
तत्र ते पुरुषव्याघ्रा विविशुः सपरिच्छदाः ।
पुरोचनस्य वचनात्कैलासमिव गुह्यकाः ॥ १२
तच्चगारमभिप्रेक्ष्य सर्वधर्मविशारदः ।
उवाचाग्नेयमित्येवं भीमसेनं युधिष्ठिरः ।
जिघ्रन्सोम्य वसागन्धं सर्पिर्जतुविमिश्रितम् ॥ १३
कृतं हि व्यक्तमाग्नेयमिदं वेश्म परंतप ।
शणसर्जरसं व्यक्तमानीतं गृहकर्मणि ।
मुञ्जबल्वजवंशादि द्रव्यं सर्वं घृतोक्षितम् ॥ १४
शिल्पिभिः सुकृतं ह्यासैर्विनीतैर्वेश्मकर्मणि ।
विश्वस्तं मामयं पापो दग्धुकामः पुरोचनः ॥ १५
इमां तु तां महाबुद्धिर्विदुरो दृष्टवांस्तदा ।
आपदं तेन मां पार्थ स संबोधितवान्पुरा ॥ १६
ते वयं बोधितास्तेन बुद्धवन्तोऽशिवं गृहम् ।

---

9 [a]) Ko.3 D4 M (except M5) भक्षान्न°; K2 भिक्षान्न°; Ñ2 B (except B6) [s]न्नं (Ñ2 B3 °न्न-) भक्ष्यपानानि; Dn1.n2 T1 भक्ष्याणि पानानि; D1 भक्षाणि भोज्यानि; D5 रत्नानि यानानि; G5 भक्त्यान्नपानादि. — [b]) K3 विविधानि शु°. G (except G4.5) शुभा(G3 °द्धा)नि शयनानि च. — [c]) G4 M6-8 च (for स). — After 9, D1 reads 11[cd].

10 For 10[ab], D1 reads 12[ab]. — [a]) D5 ज्ञाताः (for तेन). — [b]) T2 G1.4.5 °च्छदैः. — G2 (hapl.) om. 10[c]–12[b]. — [cd]) Ñ3 °माना: पुरतः पौरैः पुरनि°.

11 G2 om. 11 (cf. v. l. 10). — [a]) Ś1 K1.4 T2 G4.5 च (for तु). — [b]) B6 तेषां तत्र (by transp.). — D1 reads 11[cd] after 9. — [c]) Ko G1 M3 निवेशया°. — [d]) G5 अश्लाघ्यमशिवं. Ś1 Ko-2 ततः; K4 च तत्; B5 T1 G1.4 तथा.

12 G2 om. 12[ab] (cf. v. l. 10); D1 reads 12[ab] for 10[ab]. — [a]) Ś1 T2 G1.6 ततस्ते; Ko (by transp.) ते तत्र. — [b]) K3 विविशुश्चापि शंकिताः and ददृशुः सपरि°. — K2 om. 12[c]–13[b]. — [d]) T2 G5 कैलास इव.

13 K2 om. 13[ab] (cf. v. l. 12). — [a]) Ko G1.2 तदा(G2 °द)गारम्; K3.4 तत्रा°; Ñ1.3 V1 B Dn D1.2.4 T1 तच्चा°; Ñ2 Da उच्चा°; D5 तथा°. — [b]) Ś1 K1 °शाच्च°; Ñ2 B Da Dn D1.2.4 T1 °धर्मभृतां (B1.3.5 D2 °धर्मविदां) वर; D5 °कर्म°. G (except G4.5) सर्वकामो(G6 °कर्मो)पशोभितं. — [c]) K1 T2 G2-5 M6-8 एव; B5 च; G1 एतत् (for एवं). — Before 13[ef], T1 ins. युधि° उ°. — [d]) Ś1 K (except K3) Ñ1.3 V1 D5 जिघ्र (Ś1 °घ्रे) सो(Ko.2.4 D5 सौ)म्य; Ñ2 Dn1.n2 D1 जिघ्राणो(D1 °ण)स्य; Da Dn3 D2.4 जिघ्रन्सोस्य; S जिघ्रन्सम्यगू. B D2 वशा°. — [f]) G (except G4.5) सर्पिर्लोक्षा(G2 °क्षः; G3 °ज)वि°.

14 [b]) K3 वसादिभिः (for परं°). — After 14[ab], T G (except G5) ins.:

1461* मृदेषा व्यक्तमाग्नेयैर्द्रव्यैर्मिश्रस्य वेश्मनः ।

— [e]) T1 G (except G4.5) °रसोपेता. — [d]) Ko D5 योजितं; Ñ2.3 V1 Dn1.n2 D1 आनीय; T1 G (except G4.5) ह्या(G3 व्या)लिप्ता. G (except G4.5) °भित्तिषु. — D5 om. 14[ef]. — [e]) Ñ3 अनुबंधजवं°. — [f]) D1 रोच्यं; S (except T1) नूनं (for द्रव्यं). Ñ1 द्रव्यं सर्जरसोक्षितं; Ñ3 सर्वद्रव्यघृतान्वितं. — After 14, T G (except G4) ins.:

1462* शणबल्वजकार्पासवंशदारुकटान्यपि ।
आग्नेयान्यत्र क्षिप्तानि परितो वेश्मनस्तथा ।

15 [a]) Ñ3 G1 सुकृतैर्; T2 G4.6 M °भूतै(M5 °शै)र्; G2 °हृदैर्; G3 संवृतैर्; G5 °गतैर्; Cd as in text. Ñ1 व्यासैर्; V1 हृष्टैर्; Ñ3 S (except T1) आप्तैर्; D4 प्राप्तैर्; D5 ह्यादौ. — [b]) Ñ3 आनीतैर्गृह°; S (except T1) विनीतैरेव (G1-3.6 °वेश्म) निर्मितं. — [c]) Ko विश्वास्तानामयं पापो; D5 S (except T1) विश्वस्तानि(G1-3 M5 °नी)ह नः पापो. — After 15, N T1 ins.:

1463* तथा हि वर्तते मन्दः सुयोधनवशे स्थितः ।

[=21[cd]. Ś1 K1.2.4 °मते; Ko.3 Ñ1 D5 दुर्योधनमते.] Thereafter T1 reads 20[c]–21[b], repeating these lines in their proper place.

16 [a]) G3 इदं (for इमां). Ś1 तु मां; K3 नूनं; B3 Da T2 G2.4-6 M तु वै; G3 तु मे. G1 दृष्टवान्तामिमां बुद्धिं. — [b]) Ñ2 B5 Dn2 तथा; V1 D5 T2 G4.5 M पुरा; G2.3.6 किल. G1 विदुरो धर्मवित्कथं. — [c]) Ś1 K1 येन मां; Ko.2.4 यामिमां; D4 G5 M तेन मे; D5 मामिमां; T1 तु स मां; T2 तेन मा. Ñ1 पार्थेदं (for मां पार्थ). G1 इमामेवापदं पार्थ; G2.6 अतस्तेन तु मां पा°; G3 आदौ कृतं तेन पा°. — [d]) D5 तदा (for पुरा). K3 स तदाभ्युक्तवा°; Ñ3 समबोधितवा°; S सर्वे (G3.6 M3 °र्वान्) बोधितवांस्तदा (T1

आचार्यैः सुकृतं गूढैर्दुर्योधनवशानुगैः ॥ १७

भीम उवाच ।

यदिदं गृहमाग्नेयं विहितं मन्यते भवान् ।
तत्रैव साधु गच्छामो यत्र पूर्वोषिता वयम् ॥ १८

युधिष्ठिर उवाच ।

इह यत्तैर्निराकारैर्वस्तव्यमिति रोचये ।
नष्टैरिव विचिन्वद्भिर्गतिमिष्टां ध्रुवामितः ॥ १९

यदि विन्देत चाकारमस्माकं हि पुरोचनः ।
शीघ्रकारी ततो भूत्वा प्रसह्यापि दहेत नः ॥ २०

नायं विभेत्युपक्रोशादधर्माद्वा पुरोचनः ।
तथा हि वर्तते मन्दः सुयोधनमते स्थितः ॥ २१

अपि चेह प्रदग्धेषु भीष्मोऽस्मासु पितामहः ।
कोपं कुर्यात्किमर्थं वा कौरवान्कोपयेत सः ।
धर्म इत्येव कुप्येत तथान्ये कुरुपुंगवाः ॥ २२

C. 1. 5791
B. 1. 146. 25
K. 1. 158. 42

°वान्पुरा) (G1 तदाहं प्रतिबोधितः). — After 16, K3 ins.:

1464* आग्नेयं रुचिरं वेश्म कारितं दृश्यते शुभम् ।;

while G1 ins.:

1465* अस्माकं भागधेयेन विदुरेण महात्मना ।

17 After 17a, Ñ2 V1 B D (except D5) T1 ins.:

1466* नित्यमस्मद्धितैषिणा ।
पित्रा कनीयसा स्नेहात्.

— b) Ś1 K1 Ñ1.2 V1 B D G3.6 बुद्धिमं(D5 G3.6 °वं)तो; M3.5 बुध्यंतो न; M6-8 बुध्यामो न. — c) Ko D5 शिल्पिभिः; K3.4 Ñ2.3 V1 B Da Dn D1.2.4 अनार्यैः (B5 Da °सैः). G5 सुहृदं (for सुकृ°). K2 शूरैः; K3.4 B5 Da मूढैः; G5 गंधैः. — d) D1 ते न दुर्योधने वशाः. — A passage of 32 lines given in App. I (No. 84) is ins. in G1.2 after 17, in T1 G4 after 18.

18 Ś1 K1.2.4 Ñ1.2 V1 D (except D5) भीमसेनः. Ś1 K1 S om. उ°. — a) K1.3 Ñ V1 B (except B5) D (except Da1 D1) M6-8 यदीदं. — b) B1 (m as in text) G3.5 विदितं. K1 मन्यते विहितं (by transp.). — After 18ab, K3 ins.:

1467* पुरोचनमिमं दग्ध्वा गम्यते वारणावतान् ।

— c) V1 Dn तथैव. — After 18, T1 G4 ins. a passage given in App. I (No. 84); cf. v. l. 17.

19 Ś1 K1 S om. उवाच (G4.6 om. the ref.). — a) Ko.4 Ñ1 V1 D1.5 T2 G4 यत्नैर्; Cd as in text. — b) Ś1 Ko.1.4 अभि (for इति). G1 कृतोस्मासु वृकोदरः. — After 19ab, G1 ins.:

1468* इति किं त्वयमेतावान्किमतः परमापतत् ।
विचारयन्तो जाग्रन्तः प्राणिभिर्हितकाङ्क्षिभिः ।
इहैव वस्तव्यमिति मन्मनो रोचतेऽनुज ।

— c) K4 Ñ2 B Dn D1.2.4 T1 अप्रमत्तैर्; Ñ1 नष्टैरभिः; V1 सुसैरभि-; D5 T2 G4-6 M तुष्टैरिव; G1 इष्टैरिह; G2.3 दुष्टैरिव; Cd as in text. — d) S गतिमन्यां. K1 दिवां गति (sic); K3 D1 T2 G2.4.5 M ब्रवीमि वः (G5 *sup. lin.* नः); K4 T1 G3 ध्रुवामिव; B1 D5 ध्रुवामिति; B5 पुरादितः; G1 सुखप्रदां; G6 ध्रुवा मतिः. — After 19, G1 ins.:

1469* इतः परं ते किं कुर्युर्जिज्ञासद्भिरभीतवत् ।

20 a) D5 विंदति; T1 विद्येत. G (except G5) आकारं (G3 कारणं) यदि जानीयाद्. — b) Ś1 K1 तु; K2 च; K3 Ñ2 V1 B D M6-8 स; T1 नु (for हि). — G6 om. 20cd. — c) Ñ2 V1 B D T1 क्षिप्रकारी. — d) K3 दहेत्स नः; T2 G (G6 om.) दहेत्तु नः; M3.5 दहेत सः. K2 प्रसह्य विदहेत्ततः; M6-8 प्रदह्यादपि हेतुतः.

21 a) Ś1 K1 Cd उपाक्रोशाद्; V1 अनु°. M नैव बिभ्य(M3.5 नैष बिभ्र)त्यनुक्रो°. — b) Ś1 नाधर्माद्वा; K4 G (except G2.5) अधर्माच्च; M अधर्मात्मा. — Ñ1.2 V1 om. 21cd. — c) Ś1 M5 तथापि; D5 T2 G5 स तथा; G1-4.6 तथा च. B3.5 मूढः (for मन्दः). — d) Ś1 K (except K4) Ñ3 B3 D (except Da) T1 सुयोधनवशे; T2 G M दुर्योधनमते (M5 °वशे).

22 a) Ś1 K Ñ1 V1 अपि चापीह (K3 चात्र वि-); Ñ3 अग्निना ह प्र-; B5.6 D2.4.5 अथवापीह; Dn T1 अपि चार्य प्र-; G (except G5) अपि चास्मासु. — b) K3 [s]स्माकं; G (except G5) कुरु- (for ऽस्मासु). — K2 om. 22cd. — c) Ñ1 कोपं कृत्वा; T1 G (except G5) न कुप्येत. — d) Ñ V1 B D (except D5) कोपयीत सः; T2 G5 कोपचेतसः; G1-4.6 M कोपये(G3 °य)न्न सः (G2 °न्नरः). — After 22cd, K3.4 Ñ V1 Dn D1.5 S ins.:

1470* अथवापीह दग्धेषु भीष्मोऽस्माकं पितामहः ।

[Cf. 22ab. V1 अथवा नेह. K3.4 Dn3 [s]स्मासु. S तथा (T1 मात्रा) हि (T2 G2.4.5 -पि; G1 -ग्नि-) सह दग्धेषु विदुरः सर्पि°.]

— e) V1 B D (except D5) कुप्येरन्. Ko.4 D2.4 T1 अ(T1 न)धर्मं इति कु°; T2 G1.3-6 धर्मो नेहे(G3 न ही)ति कु°; G2 द्रोणः कृपश्च बाह्लीकाः; M धर्मो नेत्येव कु°. — f) Ñ2 V1 B D (except D5) T1 ये चान्ये. — After 22, G (except G4) ins.:

C. 1. 5792
B. 1. 146. 26
K. 1. 158. 44

वयं तु यदि दाहस्य बिभ्यतः प्रद्रवेम हि ।
स्पशैर्नो घातयेत्सर्वान्राज्यलुब्धः सुयोधनः ॥ २३
अपदस्थान्पदे तिष्ठन्नपक्षान्पक्षसंस्थितः ।
हीनकोशान्महाकोशः प्रयोगैर्घातयेद्ध्रुवम् ॥ २४
तदस्माभिरिमं पापं तं च पापं सुयोधनम् ।
वञ्चयद्भिर्निवस्तव्यं छन्नवासं क्वचित्क्वचित् ॥ २५

ते वयं मृगयाशीलाश्चराम वसुधामिमाम् ।
तथा नो विदिता मार्गा भविष्यन्ति पलायताम् ॥
भौमं च बिलमद्यैव करवाम सुसंवृतम् ।
गूढोच्छ्वासान्न नस्तत्र हुताशः संप्रधक्ष्यति ॥ २७
वसतोऽत्र यथा चास्मान्न बुध्येत पुरोचनः ।
पौरो वापि जनः कश्चित्तथा कार्यमतन्द्रितैः ॥ २८

इति श्रीमहाभारते आदिपर्वणि चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

1471* उपपन्नं तु दग्धेषु कुलवंशानुकीर्तिताः ।
कुप्येरन्यदि धर्मज्ञास्तथान्ये कुरुपुंगवाः ।

[(L. 1) G3 दग्ध्वेषां; G5 दंडेषु. G1 °नुकीर्तना:. — (L. 2) G2 येतिधर्मज्ञाः. Posterior half = 22f.]

23 [a]) T2 G यदि दाहाद्वै (G3 यदिहापद्य). — [b]) K4 G1-4 M6-8 बिभ्यंतः. K (except K1) D2.4.5 S (except T1 M3.5) प्राद्रवें°. — [c]) Ś1 K1 स्पष्टं; K3 सरैर्; K4 शस्त्रैर्; Ñ2 पाशैर्; D4 शूरैर्; D5 परैर्; G2.4 स्वयं; Cd as in text. Ñ2.3 Dn D1 निर्घातयेत् (for नो घात°). Ś1 K (except K3) D5 राजा (for सर्वान्). Ñ1 ससैन्यैर्घातयेत्स°. — [d]) G3 राज्यबुद्धिः.

24 [b]) Ko.3.4 °संवृतः; K2 Ñ1.3 T2 G3-5 M °संश्रितः. — [c]) A few MSS. कोष- (for कोश-). — [d]) Ś1 स्पष्टं नो; Ko.2.3 Ñ3 स्पशैंनों (Ñ3 °नों); K1 पृष्ठेना-; K4 शतैर्नो; Ñ1 समतो; D5 सर्वैर्नो; G1 प्रयत्नाद्; M प्रायो वै (for प्रयोगैर्). G6 चानयेद्ध्रुवं.

25 [a]) Ko.3 B1.3m.6 Da इदं पापं. — [c]) K3 विवंचद्भिर्. Ko.2.4 Ñ1.2 G1 M7.8 विवस्तव्यं; T2 G3-5 हि व°. K1 (corrupt) वचशद्भिरिवस्तव्यं. — [d]) K1 छन्नं वासं; Ñ1 सन्न°; B D (except D5) T1 छन्ना°; T2 G1.4.5 जन°; G2.3.6 छन्नं वीरं (G3 °र).

26 [a]) G3.6 मृगयां (G6 °या-) वीराः. — [b]) Ko.3.4 D4.5 चरामः; Ñ3 चरंतो; T2 G5 चरेम. K3 G1.3.6 पृथिवीमिमां. — [c]) K2 यथा; G1 ततो; G3 तदा. — [d]) K4 D5 G6 पलायिनां.

27 [a]) G1 भूमौ च. — [b]) K3 T G (except G3) कारयामः; D5 M करिष्यामः. — [c]) Ñ3 B3 Dn2.n3 G4 गूढश्वासान्; T1 M गूढोच्छ्वासं; G1.3 गूढांश्वासान्; G2 गूढवास (sic); Cd as in text. G2 M ततस्तत्र. K2 गूढानस्मानतो नात्र; T2 G5 भौमं च बिलमासीनान्. — [d]) S प्र(T2 G5 M3.6-8 न)धक्ष्यति हुताशनः (M5 हुताशो न प्रध°).

28 [a]) D5 वसामो; G (except G5) द्रवतो. Ś1 K (except K3) अथ (for अत्र). — [b]) D5 न बुध्यति. — [cd]) Ñ1.2 V1 [s]पि वा (by transp.); M3 वात्र. Ko पौराश्चापि तथा कार्यं वस्तव्यं वसुसंवृतैः.

Colophon. *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* Ñ V1 B3.6 Da Dn1.n2 D2 जतुगृह; B1.5 जातुष; T1 संभव. — *Adhy. name:* Ś1 K1.2.4 D5 M5 जतुगृहदाहः; Ko युधिष्ठिरवाक्यं; Ñ1.2 V1 भीमसेनयुधिष्ठिरसंवादः; M3 युधिष्ठिरभीमसेनसंवादः. — *Adhy. no.* (figures, words or both): B1 143; Dn3 145; D4m 148; T1 141; T2 G5.6 92; G1.2 93; G3.4 M 91. — *S'loka no.:* Dn M3 30. — *Aggregate s'loka no.:* Dn2 5802.

135

1 Ś1 K1-3 D2.5 S om. उवाच. — [a]) M5 सुहृदस्य (for विदुर°). Ko.3 सखा कश्चित्. K2 (hapl.) om. 1[b]-2[a]. — [b]) D2 खनकः सुदृढः; T2 G2.4 कुशलः खन° (by transp.). Ś1 Ko.4 शुचिः; K3 तदा; Ñ2 B D T1 G5 नरः. V1 अभवत् (for क्वचित्). — [e]) Ko आगम्य (for विवि°);

2 K2 om. 2[a] (cf. v. l. 1). Before 2, M (except M3) ins. खनकः. — [a]) K3 M (except M5) प्रेषितो. K3 अहं (for अस्मि). — [b]) Ñ2 Dn °लोह्यहं. — [e]) G1 इदं; G5 हितं (for प्रियं).

3 Ś1 K1.4 M3 (hapl.) om. 3. — [a]) D4 T2 G4.5 M6-8 उक्तं. — [b]) Ko Ñ1.3 V1 B3.6 Da D2.5 M5.6-8 त्वमसि; K2 त्वमथ; B5 तु मयि. G1 भारत; M6.8 पांडव. T2 G2-6 पांडवान् (T2 G5.6 °वं; G4 श्रेयस्त्वं) म्लेच्छभाषया (cf. 6[ab]). — For 3[ab], K3 subst.: तेनाहं प्रहितस्तूर्णं यथा रक्षस्व पांडवान्. — For 3[cd], T2 G4.5 read 6[cd].

4 G3.6 om. 4[a]-6[b]. — [a]) T G5 कृष्णपक्ष-. Ś1 K1 त्रयोदश्यां. — [b]) K3 T2 G1.4.5 राज्यां. K1 असि; K4 Ñ2 B5 Dn अस्यां; D5 अत्र; T2 G1.4.5 आशु (for अस्य). G3 माद्रायां च पुरो°. — [e]) Ko.4 M तदा; G (G3.6 om.)

१३५

वैशंपायन उवाच ।
विदुरस्य सुहृत्कश्चित्खनकः कुशलः क्वचित् ।
विविक्ते पाण्डवान्राजन्निदं वचनमब्रवीत् ॥ १
प्रहितो विदुरेणास्मि खनकः कुशलो भृशम् ।
पाण्डवानां प्रियं कार्यमिति किं करवाणि वः ॥ २
प्रच्छन्नं विदुरेणोक्तः श्रेयस्त्वमिह पाण्डवान् ।
प्रतिपादय विश्वासादिति किं करवाणि वः ॥ ३
कृष्णपक्षे चतुर्दश्यां रात्रावस्य पुरोचनः ।
भवनस्य तव द्वारि प्रदास्यति हुताशनम् ॥ ४
मात्रा सह प्रदग्धव्याः पाण्डवाः पुरुषर्षभाः ।
इति व्यवसितं पार्थ धार्तराष्ट्रस्य मे श्रुतम् ॥ ५
किंचिच्च विदुरेणोक्तो म्लेच्छवाचासि पाण्डव ।
त्वया च तत्तथेत्युक्तमेतद्विश्वासकारणम् ॥ ६

उवाच तं सत्यधृतिः कुन्तीपुत्रो युधिष्ठिरः ।
अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै ॥ ७
शुचिमाप्तं प्रियं चैव सदा च दृढभक्तिकम् ।
न विद्यते कवेः किंचिदभिज्ञानप्रयोजनम् ॥ ८
यथा नः स तथा नस्त्वं निर्विशेषा वयं त्वयि ।
भवतः स्म यथा तस्य पालयास्मान्यथा कविः ॥ ९
इदं शरणमाग्नेयं मदर्थमिति मे मतिः ।
पुरोचनेन विहितं धार्तराष्ट्रस्य शासनात् ॥ १०
स पापः कोशवांश्चैव ससहायश्च दुर्मतिः ।
अस्मानपि च दुष्टात्मा नित्यकालं प्रबाधते ॥ ११
स भवान्मोक्षयत्वस्मान्यत्नेनास्माद्धुताशनात् ।
अस्माखिह हि दग्धेषु सकामः स्यात्सुयोधनः ॥ १२
समृद्धमायुधागारमिदं तस्य दुरात्मनः ।

C. 1. 5810
B. 1. 147. 13
K. 1. 159. 12

निशि (for तव).

5 $G_{3.6}$ om. 5 (cf. v. l. 4). — ^{b}) K_3 भरतर्षभाः; $D_{4.5}$ °र्षभ. — ^{c}) $\tilde{N}_2$ B D T_1 तस्य (for पार्थ). — ^{d}) K_3 $\tilde{N}_2$ B D दुर्मतेः (for मे श्रुतम्).

6 T_2 G_{3-6} om. 6^{ab} (cf. v. l. 4); G_2 om. 6. — ^{a}) K_3 तेनासि; $\tilde{N}_{1.3}$ कच्चिच; M किंचित्त्वं (M_3 प्रच्छन्नं). D_5 उक्तं. — ^{b}) $\tilde{N}_1$ V_1 B_5 °भाषासि; D_5 प्रच्छन्नं चासि; Cd as in text. K_3 छन्नं किंचिद्वचः पथि; G_1 पांडवो म्लेच्छभाषया. — T_2 $G_{4.5}$ (om. it here) read 6^{cd} for 3^{cd}; cf. v. l. 4. — ^{c}) Ko.2 $\tilde{N}_1$ तथा वित्तं (for तथें). D_5 तथेति च त्वया ज्ञातं. — ^{d}) D_{a1} इति (for एतद्). K_3 विश्वासकारकं; $\tilde{N}_1$ T_2 G_6 M आश्वासकारकं ($\tilde{N}_1$ °णं).

7 Before 7, T_2 G ins. वैशं°. — ^{a}) D_5 तथावृत्तं (for सत्य°). — After 7^{ab}, $M_{7.8}$ ins. युधिष्ठिरः. — ^{c}) G_3 अनुजानामि. — ^{d}) K_2 हि; M च (for वै).

8 ^{a}) G_1 स्निग्धप्राप्तं; $G_{3.6}$ प्रथमाप्तं. T_2 G भक्तं (for चैव). — ^{b}) $Ś_1$ प्रियभक्तिकं; Ko T_1 M °भक्तिनं; $\tilde{N}_1$ °रक्षिणं. T_2 G सदा (G_3 तथा) प्रियहितैषिण ($G_{1.2}$ °तैषिणं; G_3 °ते रत). — ^{c}) $Ś_1$ कविः कश्चिद्; K_3 कथं भीतिः; G_3 [ऽ]त्र वः किंचिद्. Cd cites कवेः (as in text). — ^{d}) Ko.2 $\tilde{N}_2$ B_3 Dn D_1 T_1 $G_{5.6}$ अविज्ञातं (G_6 °न-) प्रयो°; K_3 किमिह स्याद्यथोचितं; D_5 T_2 G_{1-4} $M_{3.5}$ अभिज्ञानं (D_5 G_4 °तं) प्रयो°.

9 ^{a}) Ko.4 स नः (by transp.); $\tilde{N}$ V_1 B D T_1 तस्य. Ko.4 त्वं च; K_2 च त्वं; T_2 G असि त्वं (G_1 आह त्वा; G_3 अपि त्वं) (for नस्त्वं). — ^{b}) K_3 निर्विशंका. K_4 G_2 त्वया; T_2 G_5 त्विति. — ^{c}) $Ś_1$ K_1 G_3 स्मः; Ko $G_{2.4}$ तु; $\tilde{N}_1$ अस्माद्; $\tilde{N}_2$ V_1 B D (except D_5) T_1 च (for स्म). T_2 $G_{2.4.5}$ य(G_5 त)थातत्वं. — ^{d}) $\tilde{N}_1$ पारयास्मान्.

10 ^{b}) D_5 G_5 श्रुतं; T_2 श्रुतिः (for मतिः). — ^{a}) G (except $G_{3.5}$) धृतराष्ट्रस्य.

11 ^{a}) $\tilde{N}$ V_1 B D_a कोषवान्; D_4 $G_{2.3.6}$ M कोपवान्. D_a चापि (for चैव). — ^{b}) Ko सहामात्यः; $\tilde{N}_1$ सुसहायः. T_1 तु; M_3 सु- (for च). — ^{c}) $\tilde{N}_3$ एव (for अपि). $\tilde{N}_2$ B D (except D_5) T_1 पापात्मा. K_3 वयं च कोशरहिताः. — ^{d}) K_3 तेनास्मान्स; B_3 नित्यमेव (m as in text); D_5 नित्यं चैव.

12 ^{a}) K_3 G_1 मोचयन्नस्माद्; T_2 G_{1-6} मोचयत्वस्माद्; G_2 मोचयित्वास्माद्; G_3 मोचयेदस्माद्. — ^{b}) K_3 जतुवेश्महुता°; S (except T_1) उत्पन्ना($M_{3.5}$ उल्बणा)द्वै हुता°. — ^{c}) Ko.4 अस्मास्वपि. K_2 T_1 वि-; K_3 नि-; T_2 G (except $G_{3.5}$) च; M_5 अरि-; M_{6-8} अभि- (for हि). — ^{d}) K_3 कृतार्थः स्यात्.

13 ^{b}) Ko $M_{3.5}$ महात्मनः. — ^{c}) $\tilde{N}$ B_3 Dn G (except $G_{4.5}$) M_5 वप्रांतं; D_5 दुष्प्राप्तं; Cd as in text. — ^{a}) K_3 $\tilde{N}_{2.3}$ V_1 B D $G_{3.6}$ M आश्रित्य (for °श्लिष्य).

C. 1. 5810
B. 1. 147. 13
K. 1. 159. 12

वप्रान्ते निष्प्रतीकारमाश्लिष्येदं कृतं महत् ॥ १३
इदं तदशुभं नूनं तस्य कर्म चिकीर्षितम् ।
प्रागेव विदुरो वेद तेनास्मानन्ववोधयत् ॥ १४
सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान्पुरा ।
पुरोचनस्याविदितानस्मांस्त्वं विप्रमोचय ॥ १५
स तथेति प्रतिश्रुत्य खनको यत्नमास्थितः ।
परिखामुत्किरन्नाम चकार सुमहद्बिलम् ॥ १६
चक्रे च वेश्मनस्तस्य मध्ये नातिमहन्मुखम् ।
कपाटयुक्तमज्ञातं समं भूम्या च भारत ॥ १७
पुरोचनभयाच्चैव व्यदधात्संवृतं मुखम् ।
स तत्र च गृहद्वारि वसत्यशुभधीः सदा ॥ १८
तत्र ते सायुधाः सर्वे वसन्ति स्म क्षपां नृप ।
दिवा चरन्ति मृगयां पाण्डवेया वनाद्वनम् ॥ १९
विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम् ।
अतुष्टास्तुष्टवद्राजन्नूषुः परमदुःखिताः ॥ २०
न चैनानन्वबुध्यन्त नरा नगरवासिनः ।
अन्यत्र विदुरामात्यात्तस्मात्खनकसत्तमात् ॥ २१

इति श्रीमहाभारते आदिपर्वणि पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

S (except T1) इह (for इदं).

14 D1 om. 14a–15b. — a-b) G5 दहनं; G6 अशुभात् (for अशुभं). K3 इदं तु भवता दिष्टमाग्नेयं हर्म्यं कारितं. — c-a) Ś1 Ko.1 येनास्मान्; K2 स चास्मान्; D5 यो नोस्मान्. K3 यामाह विदुरः पूर्वं महाबुद्धिर्हिते रतः.

15 D1 om. 15ab (cf. v. l. 14). — b) K3 M5 उक्तवान्पुरा; T2 G M3.6–8 पूर्वमुक्तवान्. — c) T2 G (except G3) अविदितं. — d) Ko.2.4 Ñ2 B6 D T1 प्रति(D5 संप्र)मोचय.

16 Before 16, S (except T1 G2) ins. वैशं°. — a) G1 तथेवेति (for स तथे°). K3 G2 M5 प्रतिज्ञाय. — b) Ś1 K1 आस्ते (for नाम). — c) Ś1 च (for सु-). B1.3 G5 सुमहाबिलं; Dn D1 च महाबिलं.

17 Da om. 17ab. — a) Ñ2 D1 बभूव; T2 G5 मध्ये च; G6 समीपे; M3 चकार (for चक्रे च). — b) T2 G5.6 M5 चक्रे (for मध्ये). Ko.2 नापि; K3.4 नाथ (for नाति-). N (Da om.) -महद्बिलं (K1 -महाबिलं); G1 -महामुखं. — c) Ś1 K1 Da G1.2 M6–8 कवाट°. — d) K (except K2) Ñ1 V1 समं भूम्याथ; Ñ2.3 Dn1.n2 D1 T1 °मं भूम्याश्च; B Da D2.4 समभूम्यथ; Dn3 D5 G1 °मं भूम्यां च.

18 a) Ś1 तत्र; V1 चापि; Dn D1.5 T1 एव (for चैव). G6 पुरोचनानयाचैव. — b) Ś1 विदधत्; Ko Ñ1 Da व्यदधत्; K1 विधदात् (sic); D1 G6 M6–8 व्यवधात्; G2 वितथात्; G3 न्यदधात्. — After 18ab, K4 marg. ins.:

1472* स वै स्वर्गादिहायातः इन्द्रस्यातिप्रियंकरः ।
पाण्डवानां हितं कर्तुमिन्द्रेण प्रेषितस्तदा ।
नित्यमृक्षणपरो दिनैर्दशभिरेव च ।
कृत्वा बिलं च सुमहत्पुनः स्वर्गमितो गतः ।
सर्वमिन्द्रे निवेद्याथ पुनः स्वर्गात्समागतः ।

— c) K1 हि (for च). Ko.3 स हि तस्य; K2.4 Ñ1.3 V1 M5 स तस्य हि; B D T1 G3 स तस्य तु (D1 स च तस्य); T3 G1.2.4–6 स तस्मिन्हि (G1.2 °न्नि-; G6 °न्न). — d) Ś1 Ko.1.4 अशुचिधीः; G1 अशुद्ध°; Cd as in text. Ś1 तथा (for सदा).

19 d) G2.4 महद्वनं; G3 वनाद्भृशं (for वना°).

20 b) Ś1 विरोचनं; K1 (as usual) प्ररोचनं. — c) K4 अहृष्टा हृष्टवद्. — d) Ñ V1 B D (except D5) T1 °विस्मिताः.

21 a) B3.5.6 D2.4 G (except G1.5) न चै(B5 वै)तान्. M तथैतान्नाव(M6 °न्व)बु°. — c) K3 विदुराद्वापि.

Colophon. *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* Ñ1.2 V1 B6 Da Dn1.n2 D1.2 जतुगृह; B1.3.5 D4 जातुष; T1 संभव. — *Adhy. name:* Ś1 K1 Ñ3 D5 M3.5 जतुगृहदाहः; Ñ1.2 V1 G3 जतुगृहवासः. — *Adhy. no.* (figures, words or both): B1 144; Dn3 146; D4m 149; T1 142; T2 G5.6 93; G1.2 94; G3.4 M 92. — *S'loka no.:* Dn M3 21 (Dn1 22). — *Aggregate s'loka no.:* Dn2 5823.

136

1 Ś1 K1.3 D2 S om. उवाच. — a) M सुविश्वस्तान् (for सुम°). — c) Ñ3 S (except T1 G3) इति (Ñ3 इव) संप्रेक्ष्य. — d) G4 हंतुं चक्रे. — After 1, D4 marg. *sec. m.* ins.:

1473* स तु संचिन्तयामास प्रहृष्टेनान्तरात्मना ।
प्राप्तकालमिदं मन्ये पाण्डवानां विनाशने ।
तदस्यान्तर्गतं भावं विज्ञाय कुरुपुंगवः ।

१३६

वैशंपायन उवाच ।
तांस्तु दृष्ट्वा सुमनसः परिसंवत्सरोषितान् ।
विश्वस्तानिव संलक्ष्य हर्षं चक्रे पुरोचनः ॥ १
पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः ।
भीमसेनार्जुनौ चैव यमौ चोवाच धर्मवित् ॥ २
अस्मानयं सुविश्वस्तान्वेत्ति पापः पुरोचनः ।
वञ्चितोऽयं नृशंसात्मा कालं मन्ये पलायने ॥ ३
आयुधागारमादीप्य दग्ध्वा चैव पुरोचनम् ।
षट् प्राणिनो निधायेह द्रवामोऽनभिलक्षिताः ॥ ४
अथ दानापदेशेन कुन्ती ब्राह्मणभोजनम् ।
चक्रे निशि महद्राजन्नाजग्मुस्तत्र योषितः ॥ ५
ता विहृत्य यथाकामं भुक्त्वा पीत्वा च भारत ।
जग्मुर्निशि गृहानेव समनुज्ञाप्य माधवीम् ॥ ६
निषादी पञ्चपुत्रा तु तस्मिन्भोज्ये यदृच्छया ।
अन्नार्थिनी समभ्यागात्सपुत्रा कालचोदिता ॥ ७
सा पीत्वा मदिरां मत्ता सपुत्रा मदविह्वला ।
सह सर्वैः सुतै राजंस्तस्मिन्नेव निवेशने ।
सुष्वाप विगतज्ञाना मृतकल्पा नराधिप ॥ ८
अथ प्रवाते तुमुले निशि सुप्ते जने विभो ।
तदुपादीपयद्भीमः शेते यत्र पुरोचनः ॥ ९

C. 1. 5828
B. 1. 148. 10
K. 1. 160. 14

चिन्तयामास मतिमान्धर्मपुत्रो युधिष्ठिरः ।

2 T_2 G_5 (hapl.) om. 2^{a}–3^{b}. — ^{a}) $\tilde{N}_2$ तुष्टे (for हृष्टे). G_1 °चनेथ संहृष्टे. — ^{b}) D_5 [s]पि (for sथ). — ^{c}) B_6 D (except $D_{4.5}$) T_1 M_5 चोभौ; $G_{3.6}$ तौ च (for चैव). — ^{d}) $\acute{S}_1$ चैव च; K_1 वैवाच (sic); $\tilde{N}_3$ V_1 $B_{1.6}$ D (except $D_{4.5}$) T_1 प्रोवाच; M चैवाह (M_3 °थ) (for चोवा°).

3 T_2 G_5 om. 3^{ab} (cf. v. l. 2). — ^{a}) K_2 सुविश्रब्धान्. — Before 3^{cd}, G_5 ins. युधिष्ठिरः. — ^{c}) T_2 G वंचकोयं. D_5 भृशं सोऽमान्. — ^{d}) G_1 कालं मेने च लंघने.

4 ^{a}) V_1 सायुधागारम्; T G (except G_3) जातुषागारम्. K_3 आश्रित्य; $\tilde{N}_1$ अप्येदं. — ^{b}) G_1 M (except M_5) चैनं (for चैव). — ^{c}) $\acute{S}_1$ K_3 D_5 $G_{1.2}$ $M_{3.5}$ विधाये($G_{1.2}$ °यै)ह; $K_{0.2.4}$ $\tilde{N}_{1.3}$ वधायेह; B_5 निधायात्र. — ^{d}) $\tilde{N}_1$ प्रयामो; $G_{4.5}$ द्रवाम. D_{n3} T_2 G [s]नुप(G_3 तूप)लक्षिताः; M नोपल°. D_5 व्रजामो नाभिलक्षिताः.

5 Before 5, T_2 G (except G_3) ins. वैशं°. — ^{a}) D_{n3} धर्मराजनिदेशेन. — ^{c}) M चक्रे च सु· (M_5 तत्र). $\acute{S}_1$ $\tilde{N}_3$ महाराजन्; K_3 तदा राजन्; $\tilde{N}_2$ V_1 B D (except D_5) T_1 G_5 M_5 महाराज ($B_{1.3}$ महाबाहो). — ^{d}) $\acute{S}_1$ K तेन यो°.

6 ^{a}) D_5 यथाकालं. — ^{b}) D_5 भुक्त्वा भोज्यं यदृच्छया; T_1 श्रुत्वा भारतसत्तम; G_1 भुक्त्वा पीत्वा तथैव च. — ^{c}) $\tilde{N}_1$ गृहानेत्य; T_2 G °ष्येव. — ^{d}) Ko Arj. (comm.) यादवीं; Da (erroneously) Arjp Cd as in text. D_{n3} समस्तास्ताश्च योषितः. — After 6, S ins. (T_1 in reverse order):

1474* पुरोचनप्रणिहिता पृथां सा किल सेवते ।
निषादी दुष्टहृदया नित्यमन्तरचारिणी ।

[(L. 1) T_1 परिसे°; G_5 खलु से°. G_3 पृथां समुपसेवते.]

7 After 7^{ab}, S (except G_3) ins.:

1475* पुराभ्यासकृतस्नेहा सखी कुन्त्याः समा सुतैः ।
आनीय मधुमूलानि फलानि विविधानि च ।

[(L. 1) T_1 समाहिता; T_2 $G_{2.4-6}$ समं सुतैः. G_1 कुंत्याश्च सह सा सुतैः.]

— ^{d}) $K_{0.2.4}$ D_5 °नोदिता. — After 7, T G ins.:

1476* पापा च पञ्चपुत्रा सा पृथायाः सखिमानिनी ।

[T_2 G_5 सख्यमानिनी. G_1 °पुत्रा च सा पृथायाः सखी मता.]

8 ^{a}) D_5 S तत्र. — ^{e}) $G_{3.6}$ सा हि सर्वैः. — ^{f}) $\tilde{N}_2$ B (except B_6) D_1 मृतकल्पेव चा($\tilde{N}_2$ सा)भवत्.

9 ^{a}) $\acute{S}_1$ वाते तु; K_4 $\tilde{N}_{1.2}$ $B_{1.3}$ प्रयाते; B_6 T_1 G_3 °भाते; D_2 °जाते (cf. v. l. 10); Cd as in text. $K_{2.3}$ तुमले; K_4 $\tilde{N}_{1.2}$ B (except B_3) दिवसे; Cd as in text. — ^{b}) $K_{0.2.4}$ B_5 D_2 S सुप्त·. $\tilde{N}_2$ V_1 B D (except D_2) तदा; T_1 तथा (for विभो). — ^{c}) T_2 $G_{2.4.5}$ अदीपयद्भीमसेनः; M तनूनपाद्भयाद्भीमः. — ^{d}) Ko यत्र शेते (by transp.). — After 9, K_4 $\tilde{N}$ V_1 B D T_1 ins.:

1477* ततो जतुगृहद्वारं दीपयामास पाण्डवः ।
समन्ततो ददौ पश्चादग्निं तत्र निवेशने ।
ज्ञात्वा तु तद्गृहं सर्वमादीप्तं पाण्डुनन्दनाः ।
सुरङ्गां (!) विविशुस्तूर्णं मात्रा सार्धमरिंदमाः ।

[(L. 3) D_{n3} दीप्तं सर्वतः (for सर्वमादीप्तं). — (L. 4) $\tilde{N}_{1.3}$ V_1 D_n सुरुंगां. — For T_1 see below.]

— On the other hand, S (G_1 om. line 1; for T_1 see

C. 1. 5831
B. 1. 148. 12
K. 1. 160. 18

ततः प्रतापः सुमहाञ्शब्दश्चैव विभावसोः ।
प्रादुरासीत्तदा तेन बुबुधे स जनव्रजः ॥ १०

पौरा ऊचुः ।

दुर्योधनप्रयुक्तेन पापेनाकृतबुद्धिना ।
गृहमात्मविनाशाय कारितं दाहितं च यत् ॥ ११
अहो धिग्धृतराष्ट्रस्य बुद्धिर्नातिसमञ्जसी ।
यः शुचीन्पाण्डवान्बालान्दाहयामास मन्त्रिणा ॥१२
दिष्ट्या त्विदानीं पापात्मा दग्धोऽयमतिदुर्मतिः ।
अनागसः सुविश्वस्तान्यो ददाह नरोत्तमान् ॥ १३

वैशंपायन उवाच ।

एवं ते विलपन्ति स्म वारणावतका जनाः ।
परिवार्य गृहं तच्च तस्थू रात्रौ समन्ततः ॥ १४
पाण्डवाश्चापि ते राजन्मात्रा सह सुदुःखिताः ।
बिलेन तेन निर्गत्य जग्मुर्गूढमलक्षिताः ॥ १५
तेन निद्रोपरोधेन साध्वसेन च पाण्डवाः ।
न शेकुः सहसा गन्तुं सह मात्रा परंतपाः ॥ १६
भीमसेनस्तु राजेन्द्र भीमवेगपराक्रमः ।
जगाम भ्रातृनादाय सर्वान्मातरमेव च ॥ १७
स्कन्धमारोप्य जननीं यमावङ्केन वीर्यवान् ।
पार्थौ गृहीत्वा पाणिभ्यां भ्रातरौ सुमहाबलौ ॥१८
तरसा पादपान्भञ्जन्महीं पद्भ्यां विदारयन् ।
स जगामाशु तेजस्वी वातरंहा वृकोदरः ॥ १९

इति श्रीमहाभारते आदिपर्वणि षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

---

below) ins. after 9:

1478* पूर्वमेव बिलं शोध्य भीमसेनो महामतिः ।
पाण्डवैः सहितां कुन्तीं प्रावेशयत तद्बिलम् ।
दृष्ट्वाग्निं सहसा भीमो निर्जगाम बिलेन सः ।

[T1 ins. lines 1–2 before 1477*, and line 3 after 1477*. — (L. 1) T1 सर्वमेव. — (L. 2) M5 °वैः सहिता कुंती प्रविष्टा च बिलं महत्. — (L. 3) After the prior half, G1 ins.:

1479* गृहे तत्परितः सुधीः ।
गृहस्थं द्रव्यसंजातं.]

10 a) T2 G प्रवाते (G1 °भाते; G3 °चक्रे); M3.5 °वातः; M7.8 °पातः. — b) Ko.2 D5 चापि (for चैव). — c) K Ñ1 D5 ततस्तेन; S (except T1) ततः सर्वो (G3 °र्वे). — d) K3 स जनोखिलः; D4 स जनः पुरः; D5 सकलो जनः; G1 नागरो जनः. — After 10, Ñ2.3 V1 B D T1 ins.:

1480* तदवेक्ष्य गृहं दीप्तमाहुः पौराः कृशाननाः ।
[Dn2.n3 D5 कृशानुना.]

11 S om. उवाच (G3 om. the ref.). — After the ref., D4 marg. *sec. m.* ins.:

1481* अहो धिक्पाण्डवाः सर्वे दह्यन्त इति चुक्रुशुः ।
चक्रुश्च परमं यत्नं नरास्तेषां प्रमोक्षणे ।
ततस्ते जातुषं वेश्म ददृशू रोमहर्षणम् ।
पाण्डवानां विनाशाय विहितं क्रूरकर्मणा ।

— d) All MSS. except Ś1 K2–4 D4.5 M च तत्. — After 11, D4 marg. *sec. m.* ins.:

1482* पुरोचनेन पापेन दुर्योधनहितेप्सया ।

12 a) Ñ3 हा हा (for अहो). — b) Ñ3 V1 Da D1 °समंजसा. — c) Ñ2 V1 B D (except D5) T1 पांडुदायादान् (for पाण्डवान्बा°). — d) K2 M शत्रुभिः; K3 Ñ1.2 V1 B D T1 शत्रुवत् (D5 मंत्रिणं); Ñ3 वह्निभिः; T2 G निर्घृणः.

13 b) Ś1 K1 D5 अपि; K2.3 Ñ1 Da1 D1 T1 इति (for अति-). T2 G M दग्ध्वा दग्धः पुरोचनः.

14 Ś1 K1 D2 S om. उवाच; Ñ2.3 B1 om. the ref. — a) K3.4 विलपंतो वै. — cd) K3 D5 transp. तच्च and तस्थुः. S (except T1) °हं सर्वे रात्रौ तस्थुः सर्मं°.

15 a) Ñ1.2 V1 B D (except D5) T G सर्वे (for राजन्). — b) Ko.2.3 Ñ1.2 V1 B D T1 G3 सह मात्रा (by transp.). K3 S (except T1) परंतपाः (cf. 16a). — c) K3 निष्क्रम्य; Ñ1 ते जग्मुः; S (except T1) महताः — d) Ñ1.2 तत्र; B3.5 ययुर् (for जग्मुर्). B D (except Da) T1 द्रुतम्; T2 G M वनम् (for गूढम्).

16 a) S (except T1 M3) ते तु. Ś1 K D5 नित्योपरो°. N3 तेभ्योपरो°; T2 G निद्राबि(G1.3.6 °नि)रो°; Cd as in text. — b) Ś1 (by corr.) K1 तु (for च). — c) Ko.2 S (except T1) त्वरितं (Ko.2 G3.6 M3 °ता). — d) Ko.2 Ñ3 D4 मात्रा सह (by transp.). Ś1 K1.4 निद्रया (Ś1 सहसा) च प्रवृद्धया; S (except T1) सह कुंत्या नराधिप (cf. v. l. 15).

17 cd) M om. 17cd. T2 G transp. भ्रातॄन् and सर्वान्.

18 G2 om. 18; G4 reads it in marg. — b) K3 (m as in text) G3 अंसेन (for अङ्के°). — d) Ñ V1 B D (except D5) T G4.5 सुमहाबलः; G1 °महद्बली. — After 18, T1 ins. 1483*, G2.4 only line 4 thereof.

19 a) V1 B (except B5) D (except D4.5) T1 उरसा. — b) B5 विचालयन्. — T1 G2.4 (the two

१३७

वैशंपायन उवाच ।
अथ रात्र्यां व्यतीतायामशेषो नागरो जनः ।
तत्राजगाम त्वरितो दिदृक्षुः पाण्डुनन्दनान् ॥ १
निर्वापयन्तो ज्वलनं ते जना ददृशुस्ततः ।
जातुषं तद्गृहं दग्धममात्यं च पुरोचनम् ॥ २
नूनं दुर्योधनेनेदं विहितं पापकर्मणा ।
पाण्डवानां विनाशाय इत्येवं चुक्रुशुर्जनाः ॥ ३
विदिते धृतराष्ट्रस्य धार्तराष्ट्रो न संशयः ।
दग्धवान्पाण्डुदायादान्न ह्येनं प्रतिषिद्धवान् ॥ ४
नूनं शांतनवो भीष्मो न धर्ममनुवर्तते ।
द्रोणश्च विदुरश्चैव कृपश्चान्ये च कौरवाः ॥ ५
ते वयं धृतराष्ट्रस्य प्रेषयामो दुरात्मनः ।
संवृत्तस्ते परः कामः पाण्डवान्दग्धवानसि ॥ ६
ततो व्यपोहमानास्ते पाण्डवार्थे हुताशनम् ।

C. 1. 5862
B. 1. 150. 7
K. 1. 162. 9

---

latter om. lines 1–3) ins. after 18: G1, after 19^{ab}:

1483* बिलेन योजनं दूरं गत्वा सिद्धपदे शुभे ।
निश्चेरुर्वटमूले ते निद्रामुद्रितलोचनाः ।
बिलान्निर्गत्य सहसा भ्रातृन्मातरमेव च ।
गङ्गातीरवनं प्राप्य वहन्प्रायात्स मारुतिः ।,

G1 thereafter *repeating* 19^{ab}. — c) Ñ1 अथ; Da G2 सु (for आशु). K2.4 जगामाशु (K4 °थ) स ते°. — d) Ś1 K4 Dn2.n3 G1 °रंहो. — After 19, G1 ins.:

1484* अव्यक्तवनमार्गः सन्भक्षन्गुल्मलतागुरून् ।

Colophon. *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* Ś1 K Ñ3 Da2 D1.5 M8.5 जतुगृह(D1 om. गृह)दाह (K3 °ह्रदीपनं); Ñ1.2 V1 Da1 Dn1.n2 T1 जतुगृह; B D2.4 जातुष. — *Adhy. name:* Ko.4 भीमसेनविक्रमः. — *Adhy. no.* (figures, words or both): B1 145; Dn3 147; D4m 150; T1 143; T2 G5.6 94; G1.2 95; G3.4 M 93. — *S'loka no.:* Dn M3 22. — *Aggregate s'loka no.:* Dn2 5843.

☞ After adhy. 136, K4 Ñ V1 B D M ins. an additional adhy. given in App. I (No. 85); T G ins. this passage (*without* the colophon) after 1. 137. 17 (*repeating* at the end 17^{cd}); but Cd (like Ś1 Ko–3) ignores the adhy. *completely*.

[The details of the colophon (om. in D5) of this *additional* adhy. are as follows. *Major parvan:* M संभव° (for आदि°). — *Sub-parvan:* Ñ1.2 V1 Dn D1.2 जतुगृह; Ñ3 Da M5–8 जतुगृहदाह; B D4 जातुष. — *Adhy. name:* Ñ1.2 V1 गंगोत्तरणं. — *Adhy. no.* (figures, words or both): B1 146; Dn3 148; D4m 151; M 94. — *S'loka no.:* Dn1.n3 M3 14. — *Aggregate s'loka no.:* Dn2 5857.]

137

1 Ś1 K1.3 D2 S (except G3) om. उवाच (G4 om. the ref.). — a) B5 राज्यामतौ°. — b) Ko.4 स सर्वो; K2 सशेषो; Ñ3 सर्वशो; S (except T1 G3) सशोको (for अशेषो).

2 a) M6–8 निर्वाण°. — b) K4 G1 तदा (for जना). K1 Ñ3 S तदा (G1 जनाः; T1 as in text).

3 Before 3, B6 ins. पौरा ऊचुः. — a) G5 एवं (for इदं). — b) K3 कारितं (for विहि°). — cd) G4 विनाशार्थं; M7 विवासाय. Ś1 K2.4 Ñ V1 B (B5 marg.) D (except D5) T1 M °शायेत्येवं ते (Ś1 च; K4 तत्) (for °शाय इत्येवं).

4 a) D2 विदितो; S (except T1) °तं. — b) M6–8 धार्तराष्ट्रैर्. — c) M6–8 पांडवान् (for दग्धवान्). K2 पांडुतनयान्; T2 G पांडवान्बालान्. Ś1 दग्धान्पांडवदायादान्. — d) B6 Da T1 एवं; D5 एते; T2 G एतत् (for एनं).

5 a) Ñ1.3 M8.5 °नवो धीमान्; Ñ2 V1 B D (except D5) T1 °नवोपीह. — b) Ś1 K [S]ध्यधर्मम् (K3 अधर्मम्). — cd) Ś1 द्रोणश्चैव कृपश्चैव. Ś1 विदुरोन्ये च कौरवाः; K3 कृपश्चान्येपि बांधवाः. — After 5, G1.2 ins.:

1485* नावेक्षन्ते हतं धर्मं धर्मज्ञा अप्यहो विधे ।
श्रुतवन्तोऽपि विद्वांसो धनवद्वशगा अहो ।
साधूननाथान्धर्मिष्ठान्सत्यव्रतपरायणान् ।
नावेक्षन्ते महान्तोऽपि दैवं तेषां परायणम् ।

6 a) T2 G धृतराष्ट्राय. — b) D5 M प्रेषयाम. T2 G दुरात्मने. — After 6^{ab}, K3 reads 9^{cd} (v. l. अग्निर्दग्धान्), repeating it in its proper place. — c) Ko.2 संभृतस्ते; G6 °तं ते. Ś1 महान्कामः; G3.6 परं कामं. K1 संप्रवृत्तो महाकामः.

7 a) G1.2 ततो व्यपोह्य°; G3 तवाप्यपोह°; Cd as in text. — b) K4 दह्यमाना हुताशने. — d) K3.4 D1

C. 1. 5862
B. 1. 150. 7
K. 1. 162. 9

निषादीं दद्दशुर्दग्धां पञ्चपुत्रामनागसम् ॥ ७
खनकेन तु तेनैव वेश्म शोधयता बिलम् ।
पांसुभिः प्रत्यपिहितं पुरुषैस्तैरलक्षितम् ॥ ८
ततस्ते प्रेषयामासुर्धृतराष्ट्रस्य नागराः ।
पाण्डवानग्निना दग्धानमात्यं च पुरोचनम् ॥ ९
श्रुत्वा तु धृतराष्ट्रस्तद्राजा सुमहदप्रियम् ।
विनाशं पाण्डुपुत्राणां विललाप सुदुःखितः ॥ १०
अद्य पाण्डुर्मृतो राजा भ्राता मम सुदुर्लभः ।
तेषु वीरेषु दग्धेषु मात्रा सह विशेषतः ॥ ११
गच्छन्तु पुरुषाः शीघ्रं नगरं वारणावतम् ।
सत्कारयन्तु तान्वीरान्कुन्तिराजसुतां च ताम् ॥१२
कारयन्तु च कुल्यानि शुभ्राणि च महान्ति च ।
ये च तत्र मृतास्तेषां सुहृदोऽर्चन्तु तानपि ॥ १३
एवंगते मया शक्यं यद्यत्कारयितुं हितम् ।
पाण्डवानां च कुन्त्याश्च तत्सर्वं क्रियतां धनैः ॥१४
एवमुक्त्वा ततश्चक्रे ज्ञातिभिः परिवारितः ।
उदकं पाण्डुपुत्राणां धृतराष्ट्रोऽम्बिकासुतः ॥ १५
चुक्रुशुः कौरवाः सर्वे भृशं शोकपरायणाः ।

अनागसां; S (except T1 G4) °सीं. — G1-4 (G3 om. line 2) ins. after 7: T1, after 8:

1486* इतः पश्यत कुन्तीयं दग्धा शेते यशस्विनी ।
पुत्रैः सहैव वार्ष्णेयी हन्त पश्यत नागराः ।

8 [a]) Ś1 Ko.1 च (for तु). — [b]) Ś1 K1 वेश्म गोपयता; Ko तदेवाच्छादितं. — [c]) Some MSS. पांशुभिः. Ś1 K1.4 G2 M5 प्रत्यभि(K1 °वि)हितं; Ñ2 V1 B D (except D4.5) T1 पिहितं तच्च (B Da तत्र; D2 तं तु); G3 प्रेक्ष्य पिहितं; Cd as in text. — [d]) Ko Ñ1.2 V1 B D T1 G3 न (for अ-). — After 8, T1 ins. 1486*; while K4 ins.:

1487* इत्येव सर्वे शोचन्तः पृथक्चैव तथाब्रुवन् ।

9 [a]) Ñ2 सं· (for ते). Ñ2 V1 B D ज्ञापया°. — [b]) B5 °राष्ट्रं च. — K3 reads 9[cd] (for the first time) after 6[ab], repeating it here. — [c]) K3 (both times) अग्निनिर्दग्धान्.

10 [a]) Ś1 K1 च (for तु). K3 Dn3 D1 °राष्ट्रस्य. B5 D5 G2 M6-8 तु; G1 अपि; G5 तं; M5 स (for तद्). — [c]) D5 निधनं; M विनाशे. T2 G पांडवेयानां (G3 पांडवानां तु). — After 10, T1 G1.2.4 ins.:

1488* अन्तर्हृष्टमनाश्चासौ बहिर्दुःखसमाकुलः ।
अन्तःशीतो बहिश्चोष्णो ग्रीष्मेऽगाधह्रदो यथा ।

11 Before 11, G1 M3 ins. धृतराष्ट्रः. — [ab]) Ñ3 भ्राता राजा (by transp.). Ñ2 V1 Dn मम भ्राता (by transp.). B3 D (except D2.4.5) महायशाः (for सुदु°). — [c]) G1.2.4.5 दग्धे° वीरे° (by transp.). — [d]) K3 सह मात्रा (by transp.). Ś1 K (except K3) D5 महात्मसु.

12 [c]) K3 Ñ1 Dn3 D4 S संस्कारयंतु. K4 तान्सर्वान्. — [d]) Ñ2 B (except B3) Da D1.2.4 कुंतिभोज°; S कुंतीं राज°. Ko Ñ3 तथा; B5 G3 तु तां; G1 अपि.

13 T2 G transp. 13[ab] and 13[cd]. — [a]) G1 कार्याणि; M दारूणि; Cd कुल्या° (as in text). — [b]) Ñ2.3 V1 B D (except D5) T1 G3 M शुभानि. K3 Ñ V1 B D T1 G3-5 बृहंति. — [d]) K1 अपि तु; Ñ3 V1 B Da Dn D1.2.5 T1 यांतु; G1 तांस्तु; G3 बंधु (for अर्चन्तु). D5 सुहृदानां च सर्वशः. — After 13, T G ins.:

1489* मम दग्धा महात्मानः कुलवंशविवर्धनाः ।

14 [b]) K4 यथा कारयितुं; G1 यद्यत्कार्यं प्रियं. G3 वरं; M5 हि तत्. — [c]) D5 कुंत्या वा. — [d]) Ś1 K1 सर्वं तत् (by transp.). M इति (for धनैः). — After 14, D4 (marg. *sec. m.*) S ins.:

1490* वैशंपायनः ।
समेतास्तु ततः सर्वे भीष्मेण सह कौरवाः ।
धृतराष्ट्रः सपुत्रश्च गङ्गामभिमुखा ययुः ।
एकवस्त्रा निरानन्दा निराभरणवेष्टनाः ।
उदकं कर्तुकामा वै पाण्डवानां महात्मनाम् ।

[T1 M om. वैशं°. — After line 1, G1.2 ins.:

1491* सपुत्रबान्धवामात्यास्त्यक्तमङ्गलवाहनाः ।
अच्छत्राश्चान्तरा राजन्गङ्गामभिमुखा ययुः ।,

the last pāda *repeating* the posterior half of line 2.]

15 [a]) S (except G3) एवं गत्वा. — [b]) K3 स्वसुतैः; G1 बंधुभिः. — [c]) T2 G °पुत्रेभ्यो. — [d]) G1 °राष्ट्रो महामनाः.

16 [a]) Ko.1.3 Ñ1.3 D5 T2 G (except G1.5) M (except M5) °शुः कुरवः; Ñ2 V1 B Da Dn D1.2.4 T1 रुरुदुः सहिताः. — After 16[ab], K4 Ñ V1 B D T1 ins.:

1492* हा युधिष्ठिर कौरव्य हा भीम इति चापरे ।
हा फाल्गुनेति चाप्यन्ये हा यमाविति चापरे ।
कुन्तीमार्ताश्च शोचन्त उदकं चक्रिरे जनाः ।
अन्ये पौरजनाश्चैवमन्वशोचन्त पाण्डवान् ।

[(L. 1) Ñ1 कौंतेय (for कौर°). — (L. 2) K4 हा धनंजय हा कुंति. D4 फल्गुनेति (by corr.). — After line 2, K4 ins.:

1493* अहो रूपं तु लावण्यमथ विद्याबलं मुहुः ।
औचित्यमथवा प्रेम किं किं शोचामहे वयम् ।

विदुरस्त्वल्पशश्चक्रे शोकं वेद परं हि सः ॥ १६
पाण्डवाश्चापि निर्गत्य नगराद्वारणावतात् ।
जवेन प्रययू राजन्दक्षिणां दिशमाश्रिताः ॥ १७
विज्ञाय निशि पन्थानं नक्षत्रैर्दक्षिणामुखाः ।
यतमाना वनं राजन्गहनं प्रतिपेदिरे ॥ १८
ततः श्रान्ताः पिपासार्ता निद्रान्धाः पाण्डुनन्दनाः ।
पुनरूचुर्महावीर्यं भीमसेनमिदं वचः ॥ १९
इतः कष्टतरं किं नु यद्वयं गहने वने ।
दिशश्च न प्रजानीमो गन्तुं चैव न शक्नुमः ॥ २०

तं च पापं न जानीमो यदि दग्धः पुरोचनः ।
कथं नु विप्रमुच्येम भयादस्मादलक्षिताः ॥ २१

पुनरस्मानुपादाय तथैव व्रज भारत ।
त्वं हि नो बलवानेको यथा सततगस्तथा ॥ २२

इत्युक्तो धर्मराजेन भीमसेनो महाबलः ।
आदाय कुन्तीं भ्रातॄंश्च जगामाशु महाबलः ॥ २३ C. 1. 5881 B. 1. 150. 26 K. 1. 161. 28

इति श्रीमहाभारते आदिपर्वणि सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

इत्येवं बहु भाषन्तो रुरुदुर्नागरा भृशम् ।]
— ^{cd}) T$_2$ G °स्त्वल्पशोकं च (G$_{2.4}$ °कश्च) चक्रे. T$_2$ G$_{2-6}$ M$_{3.5}$ वेद हि तत्परं; G$_1$ M$_{6-8}$ वेद हितं परं. — After 16, S (except G$_{1.2}$) ins. a passage given in App. I (No. 86).

17 ^{a}) K$_3$ om. च. Ś$_1$ K$_1$ निष्क्रम्य; K$_{0.2.4}$ Ñ$_{1.3}$ D$_5$ G$_{3.6}$ M$_3$ °गम्य. — After 17^{ab}, K$_4$ Ñ V$_1$ B D (except D$_5$) ins.:

1494* नदीं गङ्गामनुप्राप्ता मातृषष्ठा महाबलाः ।
दाशानां भुजवेगेन नद्याः स्रोतोजवेन च ।
वायुना चानुकूलेन तूर्णं पारमवाप्नुवन् ।

[(L. 1) K$_4$ °मनुप्राप्य मात्रा सह परंतपाः (cf. 1. 136. 16^a). — (L. 2) B$_5$ पंचानां (m दाशानां); D$_a$ D$_1$ दासानां. K$_4$ भुजवीर्येण.]
— ^{cd}) K$_4$ T G repeat 17^{cd} (K$_4$ with v. l.). T$_2$ G वीरा (for राजन्). G$_{1.2}$ °मास्थिताः. K$_4$ (first time) त्यक्त्वा नावं ययुः पार्थाः (for °). Ñ$_{2.3}$ V$_1$ B D (except D$_5$) ततो नावं परित्यज्य प्रययुर्दक्षिणां दिशं. — After 17, T G ins. a passage given in App. I (No. 85), followed by a *repetition* of 17^{cd}; cf. the note at the end of the previous adhy.

18 ^{a}) Ś$_1$ K (except K$_4$) Ñ$_1$ D$_5$ M निदाघे; T G (except G$_{1.2}$) विहाय (for विज्ञा°). T निद्रां (for निशि). — ^{b}) K$_1$ T$_2$ G$_{3.6}$ °मुखैः. Ñ$_{2.3}$ V$_1$ B D T$_1$ नक्षत्रगणसूचितं (D$_5$ नाविंदन्दक्षिणामुखाः). — K$_2$ om. 18^c–19^b. — ^{c}) T$_2$ G$_{5.6}$ गाहमानाः; G$_3$ जानमाना. G$_{1.2}$ वनाद्वनं तदा राजन्. — ^{d}) G$_4$ गह्वरं; M$_{6-8}$ गंतुं न (for गह°).

19 K$_2$ om. 19^{ab} (cf. v. l. 18). — ^{a}) T$_2$ G$_{4.5}$ तत्र श्रांताः; G$_1$ (by transp.) श्रांतास्ततः. — ^{b}) Ñ$_{1.3}$ निद्रार्ताः; T$_2$ G$_{4.5}$ प्रस्थिताः; G$_3$ निषण्णाः; G$_6$ M निःसृताः. G$_{1.2}$ क्षुधिता भयकातराः. — ^{d}) K$_0$ D$_5$ °सेनमरिंदमं.

20 ^{a}) K$_{0.4}$ D$_2$ T$_2$ G$_{4-6}$ अतः; Ñ$_1$ D$_5$ इदं (for इतः). K$_{2.3}$ Ñ V$_1$ D$_{a1}$ D$_n$ D$_1$ G$_{1.2}$ किं तु; K$_4$ किंचिद्; D$_5$ वीर. — ^{c}) B D T$_1$ विजानीमो. Ś$_1$ K$_1$ दिशश्चैव न जा°; G$_3$ देशान्वयं प्रजा°. — ^{d}) G$_{1.2}$ चैते (for चैव).

21 ^{b}) Ś$_1$ K$_1$ यदि दग्धं प्ररोचनं; G$_{1.2}$ दग्धो (G$_2$ दंडो) वा न पुरो°. — ^{c}) Ś$_1$ न; K$_{1-3}$ Ñ$_2$ V$_1$ B (except B$_5$) D (except D$_{a2}$) T$_1$ M$_7$ तु; K$_4$ Ñ$_1$ च (for नु). Ś$_1$ प्रतिमुच्येम; K$_4$ विप्रमुच्येत्स. — ^{d}) Ñ$_{1.3}$ वयम् (for भयाद्).

22 ^{a}) T$_2$ G शीघ्रम् (G$_3$ श्रांतान्) (for पुनर्). — ^{b}) G$_{1.2}$ त्वरावान् (for तथै°). — ^{d}) G$_3$ अस्मात्रातुमिहार्हसि.

23 ^{ab}) K$_3$ °क्तो भीमसेनस्तु धर्मराजेन सङ्गलः. — ^{c}) Ś$_1$ K$_{1.2.4}$ पृष्ठमारोप्य बलवान्. — ^{d}) B$_3$ महाजवः; G$_{1.2}$ स पावनिः. K$_1$ जगाम भरतर्षभ; K$_3$ D$_5$ M$_5$ जगाम सु(M$_{3.5}$ स)महा°.

Colophon. *Major parvan:* T$_2$ G M संभव° (for आदि°). — *Sub-parvan:* Ś$_1$ K$_{0-2.4}$ Ñ$_3$ D$_a$ D$_5$ M$_5$ जतुगृहदाह; Ñ$_{1.2}$ V$_1$ B$_5$ D$_{n1.n2}$ D$_{1.2}$ T$_1$ जतुगृह (T$_1$ *int. lin.* संभव); B$_{1.5}$ जातुष. — *Adhy. name:* K$_{0.4}$ वनप्रवेशः; K$_3$ पांडवपलायनं; Ñ$_{1.2}$ V$_1$ पांडववनप्रवेशः; M$_{6-8}$ वनगमनं. — *Adhy. no.* (figures, words or both): B$_1$ 147; D$_{n3}$ 149; D$_{4m}$ 152; T$_1$ 146; T$_2$ G$_{5.6}$ M 96; G$_{1.2}$ 97; G$_{3.4}$ 95. — *Śloka no.:* D$_n$ 26; M$_3$ 7. — *Aggregate śloka no.:* D$_{n2}$ 5883.

138

1 Ś$_1$ K$_{1.3}$ D$_{2.5}$ S om. उवाच. The sequence of 1–2 in K$_4$ is: 1^{cd}, 2^{cd}, 1^{ab}, 2^{ab}. — ^{a}) Ś$_1$ K तस्य विक्रमतस्तूर्णम्; Ñ$_2$ V$_1$ B D G$_3$ तेन विक्रममाणेन (D$_5$

१३८

G. 1. 5882
B. 1. 151. 1
K. 1. 163. 1

वैशंपायन उवाच ।
तेन विक्रमता तूर्णमूरुवेगसमीरितम् ।
प्रववावनिलो राजञ्शुचिशुक्रागमे यथा ॥ १
स मृद्नन्पुष्पितांश्चैव फलितांश्च वनस्पतीन् ।
आरुजन्दारुगुल्मांश्च पथस्तस्य समीपजान् ॥ २
तथा वृक्षान्भञ्जमानो जगामामितविक्रमः ।
तस्य वेगेन पाण्डूनां मूर्च्छेव समजायत ॥ ३
असकृच्चापि संतीर्य दूरपारं भुजप्लवैः ।
पथि प्रच्छन्नमासेदुर्घार्तराष्ट्रभयात्तदा ॥ ४
कृच्छ्रेण मातरं त्वेकां सुकुमारीं यशस्विनीम् ।
अवहत्तत्र पृष्ठेन रोधःसु विषमेषु च ॥ ५
आगमंस्ते वनोद्देशमल्पमूलफलोदकम् ।
क्रूरपक्षिमृगं घोरं सायाह्ने भरतर्षभाः ॥ ६
घोरा समभवत्संध्या दारुणा मृगपक्षिणः ।

तस्यातिक्रमतस्तूर्णम्). — [b]) Ko. 2–4 Ñ1 D5 T2 G4–6 M °समीरितः. Ś1 K1 उरु(K1 मद)वेगसमन्वितः. — After 1[ab], K4 Ñ2. 3 V1 B D (except D5) T1 ins.:

1495* वनं सवृक्षविटपं व्याधूर्णितमिवाभवत् ।

— [c]) D2 मारुतो (for अनिलो). Ñ2. 3 V1 B Da Dn D1. 4 T1 जंघावातो ववौ चास्य. — [d]) G1–3 M6. 8 शुचिः. Ś1 K1 D5 Cd °शुक्रागमे; Ko. 3 °शक्रा°. — After 1, K4 Ñ2. 3 V1 B D (except D5) T1 ins.:

1496* आवर्जितलतावृक्षं मार्गं चक्रे महाबलः ।

2 For K4 cf. v. l. 1 also. — [a]) K4 Ñ1 समृद्ध-; Ñ2 B1 m. 3. 5 D2. 4. 5 समृद्धा(B5 m °द्वा)न्; B1. 6 स मृदून्. Ko D5 वृक्षान् (for चैव). — [b]) T2 G (except G3) फलिनश्च. Ko D5 समंततः (for वन°). — [c]) K3 अभंजन् (for आरुजन्). Ś1 नव-; Ko. 3. 4 याति; K1 घन-; K2 एव; D5 अथ (for दारु-). T2 G4. 5 °गुल्मं च. Ñ3 V1 B Da Dn D1. 2. 4 T1 अवरुज्य (Ñ3 B1. 5. 6 Da D1. 2 °ह्य) ययौ गुल्मान्. — [d]) G3 पार्थः; M5 फलः (for पथः). Ko D5 T2 G M3 समीपगान्. — After 2, Ñ2. 3 V1 B D (except D5; D2 om. line 2) T1 ins.:

1497* स रोषित इव क्रुद्धो वने भञ्जन्महाद्रुमान् ।
त्रिःप्रस्रुतमदः शुष्मी षष्टिवर्षो मतङ्गराट् ।

[(L. 2) B5 यथा त्रिप्रस्रुतमदः (for the prior half.).]

3 [ab]) G1. 2 वृक्षांस्तथा (by transp.); G3 तदा वृक्षान्. Ñ2. 3 V1 B D (except D5) T1 गच्छतस्तस्य वेगेन तार्क्ष्य-मारुतरंहसः. — After 3[ab], G1. 2. 4 ins.:

1498* तस्य कक्षद्वयोद्भूतपवनध्वनिरुत्थितः ।
गुम्भिताशेषदिग्भागः शुश्रुवेऽतिभयंकरः ।

— [c]) T2 G M पंचानां (for पाण्डू°). Ñ2. 3 V1 B D (except D5) T1 भीमस्य पांडुपुत्राणां. — [d]) D5 मूर्छा च.

राक्षसाय च तत्सर्वं प्रापयिष्यति भोजनम् ।
मोक्षयिष्यति चात्मानमिति मे निश्चिता मतिः॥१५
समागताश्च वीरेण दृष्टपूर्वाश्च राक्षसाः ।
बलवन्तो महाकाया निहताश्चाप्यनेकशः ॥ १६
न त्विदं केषुचिद्ब्रह्मन्व्याहर्तव्यं कथंचन ।
विद्यार्थिनो हि मे पुत्रान्विप्रकुर्युः कुतूहलात् ॥ १७
गुरुणा चाननुज्ञातो ग्राहयेद्यं सुतो मम ।
न स कुर्यात्तया कार्यं विद्ययेति सतां मतम् ॥ १८

वैशंपायन उवाच ।

एवमुक्तस्तु पृथया स विप्रो भार्यया सह ।
हृष्टः संपूजयामास तद्वाक्यममृतोपमम् ॥ १९
ततः कुन्ती च विप्रश्च सहितावनिलात्मजम् ।
तमब्रूतां कुरुष्वेति स तथेत्यब्रवीच्च तौ ॥ २०

इति श्रीमहाभारते आदिपर्वणि एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

— [c]) Ko D5 हि (for च). — [d]) Ñ3 महत् (for मतम्). Ñ1.2 V1 B D (except D5) नृशंसो गर्हितो बुधैः.

11 [a]) Ñ3 transp. कुर्यान् and न. Ko B5 अ-; S (except G3) च (for न). M3.5 पापकं; M6-8 पापकृत् (for निंदितं). — [b]) Ko G4 transp. न and नृशंसं. V1 B1 Dn D1.5 T G कथंचन. Ñ3 न च कर्ता कदा°. — [c]) Ś1 Ko-2 T1 पूर्वे. — [d]) S प्राहुर्धर्मविदो जनाः.

12 [a]) Ñ3 M (except M5) श्रेयस्तु; T G श्रेयसे. S (except G1.2) सह दारेण. — [b]) D2 °शोयं. M विनश्येयमहं स्वयं. — [c]) G3 अनुमन्ये. K1.2 Ñ2.3 V1 B D M (except M3) कदाचन.

13 K1 S om. उवाच; Ś1 om. the ref. — [b]) D2 मम; G4 पूज्या (for रक्ष्या). Ś1 G6 स्थिता; K1 स्थितः; T G3-5 स्थितिः; G1.2 ध्रुवं; M6-8 स्मृताः.

14 [b]) G3 ममापत्यवि°. — [c]) Ko D5 मंत्रसंसिद्धः. — [d]) Ñ1 T G तपस्वी. Ko मम पुत्रो महाबल.

15 [a]) Ñ3 स; D4 तु (for च). — [b]) G1 transp. प्राप° and भोज°. — [c]) S मोचयि°.

16 [a]) T2 G1(before corr.).3-5 वीर्येण.

17 [a]) G1 स्वयेदं. Ś1 K1.2 कस्यचिद्; G3 केन°. — [b]) Ś1 K1 नाहंतव्यं (sic). G1.2 कदाचन.

18 [a]) K4 D1 चाप्यनु°; Da Dn3 M6-8 चाप्यनु°; T1 हमनु°; G1 वाननु°. — [b]) Ñ1.2 B1m.3.6 Dn1 D5 यत्; Dn3 D2 यः (for यं). — [c]) Ś1 K4 Ñ V1 B3.6 Da1 Dn D1.2 तथा; K1 तदा; B5 यथा; D4 तु यत् (for तथा). T G न कुर्यात्तस्य तत्कार्यं. — [d]) D2 विज्ञायेति. T G इत्युवाच गुरुर्हितं.

19 K1 om. 19-20. Ñ1.2 V1 B Da Dn D1.4 T1 om. वैशं° उ°; Ś1 K2-4 D2.5 T2 G M om. उवाच. — [a]) G1.2 स (for तु). — [b]) G1.2 पुत्रः (for विप्रो). S transp. भार्यया and सह.

20 K1 om. 20 (cf. v. l. 19). — [a]) Ś1 transp. कुंती and विप्रः. — [c]) Ko.3.4 तदाब्रू°; M तदब्रू°. — [d]) S प्रतिजज्ञे तथेति सः (G1.2 तथा हि सः; G3 °थेति च).

Colophon om. in K1. — *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* Ś1 Ko.2.3 Ñ V1 B D T2 बकवध (B1.3 एकचक्रायां बक°). — *Adhy. name:* K4 ब्राह्मणसमाश्वासनं; Ñ1.2 V1 भीमबकवधांगीकारः. — *Adhy. no.* (figures, words or both): B1 157; Dn3 160; D4m 163; T1 158; T2 G5 M 108; G1.2(*sup. lin.*).6 109; G2-4 107. — *S'loka no.:* Dn 20; M3 21. — *Aggregate s'loka no.:* Dn2 6235.

१५०

वैशंपायन उवाच ।

करिष्य इति भीमेन प्रतिज्ञाते तु भारत ।
आजग्मुस्ते ततः सर्वे भैक्षमादाय पाण्डवाः ॥ १
आकारेणैव तं ज्ञात्वा पाण्डुपुत्रो युधिष्ठिरः ।
रहः समुपविश्यैकस्ततः पप्रच्छ मातरम् ॥ २
किं चिकीर्षत्ययं कर्म भीमो भीमपराक्रमः ।
भवत्यनुमते कच्चिदयं कर्तुमिहेच्छति ॥ ३

कुन्त्युवाच ।

ममैव वचनादेष करिष्यति परंतपः ।
ब्राह्मणार्थे महत्कृत्यं मोक्षाय नगरस्य च ॥ ४

युधिष्ठिर उवाच ।

किमिदं साहसं तीक्ष्णं भवत्या दुष्कृतं कृतम् ।
परित्यागं हि पुत्रस्य न प्रशंसन्ति साधवः ॥ ५
कथं परसुतस्यार्थे स्वसुतं त्यक्तुमिच्छसि ।
लोकवृत्तिविरुद्धं वै पुत्रत्यागात्कृतं त्वया ॥ ६
यस्य बाहू समाश्रित्य सुखं सर्वे स्वपामहे ।
राज्यं चापहृतं क्षुद्रैराजिहीर्षामहे पुनः ॥ ७
यस्य दुर्योधनो वीर्यं चिन्तयन्नमितौजसः ।
न शेते वसतीः सर्वा दुःखाच्छकुनिना सह ॥ ८
यस्य वीरस्य वीर्येण मुक्ता जतुगृहाद्वयम् ।

C. 1. 6249
B. 1. 162. 9
K. 1. 176. 12

150

1 Śi K (except Ko) Ds S om. उवाच. — a) B1.3 Ds S करिष्यामीति (G6 प्रतिज्ञाते तु; cf. 1b). — b) Ñ1.2 V1 B D (except Ds) अथ (for तु). G6 करिष्यामीति भा°. — c) T G °श्मुः सहिताः सर्वे. — d) Many MSS. भैक्ष्य°. — After 1, D2 (om. lines 3–4) S ins.:

1635* भीमसेनं ततो दृष्ट्वा आपूर्णवदनं तदा ।
बुबोध धर्मराजस्तु हृषितं भीममच्युतम् ।
हर्षितुं कारणं यत्तन्मनसा चिन्तयन्गुरुः ।
स समीक्ष्य तदा राजञ्श्रोतुकामो युधां पतिः ।

[(L. 1) Ds ह्यापूर्ण°; T1 G3 संपूर्ण°. — (L. 2) Ds G1–3 M6–8 हर्षितं. Ds वीरमुत्तमं; G4 भीममुद्धतं. — (L. 3) T1 G3 हर्षितं; T2 भाषितं; G1.2 तोषस्य; G5 भाषितुं; G6 हृषितुं. T1 °साबोधयद्गुरुः; G4 M3.5 °सांचिंतयद्गुरुः. M6–8 °यन्प्रभुः. — (L. 4) T1 स सम्यक्तु; M प्रसमी°. M6–8 राजा. G1.2 योद्धुकामं; M6–8 ज्ञातुकामो. T1 पृथां; T2 G6 विशां (for युधां).]

2 a) Śi Ko.1 B3 m M5 तज् (for तं). — b) Ko.2.3 कुंती° (for पाण्डु°). — c) G3 एतत् (for एकस्). Śi K1 रहस्यनुप्रविश्यै°; T1 G1 रहस्यमुपवि°. — d) Śi1 तत्र; T1 सुतः; G5 परि- (for ततः). M5 ततोपृच्छत्स मा°.

3 Before 3, Śi T1 ins. युधिष्ठिरः; K3 Ñ1.2 V1 B D (except D5) युधिष्ठिर उ°. — a) K1.3 D5 T1 G1–3 M भवत्यानु°. T1 G1–3 M किंचिद्; Cd as in text. — c) Śi K D5 तदयं (Śi K1 अयं वा; D5 स्वयं वा) कर्तुमुद्यतः; Ñ V1 B Da Dn D1.2.4 M स्वयं (Ñ1.3 B3 M अयं) वा कर्तुमिच्छति.

4 Śi K1 S om. उवाच. — a) G3 एष (for एव). Ko G (except G4.5) M (except M3) एव; Ñ1 एतत् (for एष). — b) Śi K1 Ñ3 T1 परंतप. — c) K4 G5 °णार्थं. Ko.3.4 महत्कर्म; Ñ1 परं कृ°; D5 महाकृ°. — d) Śi Ko.1 मोक्षाय भरतर्षभ; G1.2 मोचयन्नगरं च यत्. — After 4, G1.2.4 ins.:

1636* बकाय कल्पितं पुत्र महान्तं बलिमुत्तमम् ।
भीमो भुनक्ति संपुष्टमप्येकाहं तपःसुत ।

[(L. 2) G1 भुनक्तु. G3 संपुष्टिम्. G2 °हं तु तर्पयत्.]

5 Śi K1–3 S om. उवाच. — a) G4 इदं तु (for किमिदं). Ñ1 तीव्रं (for तीक्ष्णं). — b) Ñ3 V1 B D (except D1.5) M3 दुष्करं.

6 b) Śi G1.2 स्वपुत्रं; K3 त्वं सु°. Ko °कुमर्हसि. — c) Śi °वृद्धि°; Ko.3m Ñ3 D5 °वृत्त°; K3 °वृद्ध°; Ñ1.2 V1 B Da Dn D1.2.4 °वेद°; T2 G3–6 °विरुद्धश्; G1 लोके वृद्धिविरुद्धश्; G2 °वृत्तिषु रुद्धश्. Śi T1 वा; Ñ1.2 V1 B D (except D5) हि; T2 G M च (for वै). — d) K2 D2 T G °त्यागः. T G कृतस् (G3 त्वया). M3 transp. कृतं and त्वया. B5 मया; G3 कृतः (for त्वया).

7 a) Ñ3 बाहुं. — b) T2 G5 वयं (for सुखं). Ñ1.2 V1 B D शयामहे; G3 वसा°. — d) K (except K1) उज्जिहीर्षा°; D2 तज्जिहीर्षा°; D5 जेतुं हर्षा°. K4 M5 वयं (for पुनः).

C. 1. 6249
B. 1. 162. 9
K. 1. 176. 12

अन्येभ्यश्चैव पापेभ्यो निहतश्च पुरोचनः ॥ ९
यस्य वीर्यं समाश्रित्य वसुपूर्णां वसुंधराम् ।
इमां मन्यामहे प्राप्तां निहत्य धृतराष्ट्रजान् ॥ १०
तस्य व्यवसितस्त्यागो बुद्धिमास्थाय कां त्वया ।
कच्चिन्न दुःखैर्बुद्धिस्ते विप्लुता गतचेतसः ॥ ११

कुन्त्युवाच ।

युधिष्ठिर न संतापः कार्यः प्रति वृकोदरम् ।
न चायं बुद्धिदौर्बल्याद्व्यवसायः कृतो मया ॥ १२
इह विप्रस्य भवने वयं पुत्र सुखोषिताः ।
तस्य प्रतिक्रिया तात मयेयं प्रसमीक्षिता ।
एतावानेव पुरुषः कृतं यस्मिन्न नश्यति ॥ १३
दृष्ट्वा भीमस्य विक्रान्तं तदा जतुगृहे महत् ।
हिडिम्बस्य वधाच्चैव विश्वासो मे वृकोदरे ॥ १४
बाह्वोर्बलं हि भीमस्य नागायुतसमं महत् ।
येन यूयं गजप्रख्या निर्व्यूढा वारणावतात् ॥ १५
वृकोदरबलो *नान्यो न भूतो न भविष्यति ।
योऽभ्युदीयाद्युधि श्रेष्ठमपि वज्रधरं स्वयम् ॥ १६
जातमात्रः पुरा चैष ममाङ्कात्पतितो गिरौ ।

---

8 D2 om. 8ab. — c) Ñ1.2 V1 B D (except D5) रजनीः (for वसतीः). — d) K4 दुष्टः (for दुःखाच्).

9 a) G2 सूर्यवीर्यस्य. — b) G3 भयात् (for वयम्). — c) G1 M अमात्यश्चापि पापात्मा. — d) B5 D5 M स (for च). Ś1 K1 प्ररोचनः (cf. v. l. 1. 132. 2).

10 a) K0 वीर्यमनुश्रिं°; K2.4 Ñ3 G1-3 °र्यमुपाश्रिं°; T2 G4.5 बाहुसुपा°; G6 बाहू समा°; M विक्रममासाद्य. — After 10ab, G1.2 ins.:

1637* भोक्तुमिच्छामहे मातः निःसपत्ना महामनः ।

[G2 राज्यं (for मातः) and महात्मनः (for महाम°).]

— c) G1.2 इमानन्यानुपप्राप्तान्. — After 10, G1.2 ins.:

1638* कर्णं दुःशासनं चैव शकुनिं चापि सौबलम् ।

11 b) G3 तां तव (for कां त्वया). — c) K0.1 G1 कश्चित्; K2 G2 किंचित्; K4 B1m D2 कथं; Dn1 क्वचित्. K3 Ñ3 V1 B1.5 D3 Dn1.n2 D1.5 M3.5 नु; B1m D2 T1 तु (for न). Ñ1 तु (for ते). B3 कथं नु दुःखैर्दुर्बुद्धिस्; G3 कच्चिद्दुःखेन बु°. — d) Ś1 K0 Ñ V1 B1.5 D (except D3) M3.5 विलुप्ता; B3 ते लुप्ता. Ś1 K T1 G3 M3 °चेतना; G2 °सा; M5 °सं.

12 G1 om. 12. Ś1 K1 S om. उवाच. — a) M3 transp. युधि° and न. — b) Ś1 Ñ2 V1 B D (except D5) त्वया कार्यो वृकोदरे (Ś1 °र्यः परंतप). — d) Ś1 वृतो (for कृतो). — After 12, T G (except G1) M3 ins.:

1639* न च शोकेन बुद्धिर्मे विप्लुता गतचेतना ।

[Cf. 11cd. G3 जानीतार्थं वृकोदरे (for the posterior half).]

13 G3 om. 13. — a) D5 विपत्तौ विप्रभवने. — After 13ab, N (except Ñ2.3 D3) ins.:

1640* अज्ञाता धार्तराष्ट्राणां सत्कृता वीतमन्यवः ।

— b) M5 अस्य (for तस्य). K4 V1 B D (except D5) M7 पार्थ; T1 तत्र (for तात). — d) T G (G6 om.) मयैषा (T1 °ता). T2 G1.4.5 °मीक्ष्यते; G2 °क्ष्यता. — M om. 13ef. — e) G3 एतावतैव पुरुषैः (sic). — f) T2 G (G6 om.) कृते. Ś1 K1 B3 यस्य (for यस्मिन्). Ñ D31 G3 पश्यति (for नश्य°). — After 13, T G (except G6) ins.:

1641* ब्राह्मणार्थे महान्धर्मो जानतीत्थं वृकोदरे ।

[T1 जानान्यर्थं; G1.2 जानामीत्थं; G3 जानीतार्थं; G4 जानातीत्थं. G1 वृकोदर.]

— On the other hand, Ñ2 V1 B (except B1) D ins. after 13:

1642* यावच्च कुर्यादन्योऽस्य कुर्याद्द्विगुणं ततः ।

14 T1 om. 14. — a) T2 G1.2.5 वीर्यं°; G3.4.6 M वीर° (for भीम°). D1 तं दृष्ट्वा भीमवि°. — b) M5 वने; M6-8 वयं (for महत्). — Ś1 K1 (hapl.) om. 14c-15b. — c) K4 हैडंब°. Ñ1 वधे. Ñ V1 Dn D5 M3 चैवं. — d) G6 विश्वासोयं.

15 Ś1 K1 om. 15ab (cf. v. l. 14). — a) Ñ3 बाहोर्. K (K1 om.) D2.5 बलं and भीमस्य. B6 Da D4 तु (for हि). — b) Da M (except M3) °युतबलं. Ñ3 मतं (for महत्). — c) Ś1 K1 Da M5 तेन; T2 ते च. K4 G1.2 जगत् (for गज-). — d) Ś1 °ढा गजसाह्वयात्. Nilp निगूढा.

16 a) M च (for न). Ś1 K Ñ3 D5 °बले(Ś1 K1 बलान्)नान्यो; Ñ1.2 V1 B Da Dn D1.4 वृकोदरेण सदृशो (B3 orig. सहितो); D2 भीमसेनबलेनान्यो; T G वृकोदराद्बली ह्यन्यो (G2.6 हन्यो sic). — b) Ñ3 S जातो (G3 जातु) (for भूतो). Ñ3 T2 G3.4.6 M3 न जनिष्यति; G1.2 M6-8 न जनिष्यते; M5 जनयिष्यति. Ñ1.2 V1 B D (except D2.5) बलेनान्यो न विद्यते. — c) Ś1 K1 °भ्युपेयाद्; Ñ V1 B (except B5) D1.2 यो व्यतीयाद्; T2 G4.5 यो हि युध्याद्; G1 योभियुध्यद्; G3 °भ्युपायाद्; M6-8 यो ह्युदीयाद्. — d) Ñ3 V1 B6 Dn D1 चक्रधरं स्वं°; B1 D5 T1 G (except

शरीरगौरवात्तस्य शिला गात्रैर्विचूर्णिता ॥ १७
तदहं प्रज्ञया स्मृत्वा बलं भीमस्य पाण्डव ।
प्रतिकारं च विप्रस्य ततः कृतवती मतिम् ॥ १८
नेदं लोभान्न चाज्ञानान्न च मोहाद्विनिश्चितम् ।
बुद्धिपूर्वं तु धर्मस्य व्यवसायः कृतो मया ॥ १९
अर्थौ द्वावपि निष्पन्नौ युधिष्ठिर भविष्यतः ।
प्रतीकारश्च वासस्य धर्मश्च चरितो महान् ॥ २०
यो ब्राह्मणस्य साहाय्यं कुर्यादर्थेषु कर्हिचित् ।
क्षत्रियः स शुभाँल्लोकान्प्राप्नुयादिति मे श्रुतम् ॥२१
क्षत्रियः क्षत्रियस्यैव कुर्वाणो वधमोक्षणम् ।
विपुलां कीर्तिमाप्नोति लोकेऽस्मिंश्च परत्र च ॥ २२
वैश्यस्यैव तु साहाय्यं कुर्वाणः क्षत्रियो युधि ।
स सर्वेष्वपि लोकेषु प्रजा रञ्जयते ध्रुवम् ॥ २३
शूद्रं तु मोक्षयन्राजा शरणार्थिनमागतम् ।
प्राप्नोतीह कुले जन्म सद्रव्ये राजसत्कृते ॥ २४
एवं स भगवान्व्यासः पुरा कौरवनन्दन ।
प्रोवाच सुतरां प्राज्ञस्तस्मादेतच्चिकीर्षितम् ॥ २५

युधिष्ठिर उवाच ।

उपपन्नमिदं मातस्त्वया यद्बुद्धिपूर्वकम् ।
आर्तस्य ब्राह्मणस्यैवमनुक्रोशादिदं कृतम् ।
ध्रुवमेष्यति भीमोऽयं निहत्य पुरुषादकम् ॥ २६
यथा त्विदं न विन्देयुर्नरा नगरवासिनः ।
तथायं ब्राह्मणो वाच्यः परिग्राह्यश्च यत्नतः ॥ २७ C. 1. 6269 B. 1. 163. 3 K. 1. 177. 3

इति श्रीमहाभारते आदिपर्वणि पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

G4.5) M5 °धरः स्वयं.

17 a) Ko.1 Ñ3 B1.5 D (except D1.5) T2 G3 चैव; K3 त्वेष; G1 °प्येष; G2.4 ह्येष. — b) K1.2 Ñ V1 B D G3 M3.6-8 अस्य; T1 G1.2.6 M5 यस्य. — c)=1. 114. 13b. Da T2 G6 °चूर्णिताः. G3 गात्रेण चूर्णिताः. — After 17, M3.5 ins.:

1643* तथा हि दृष्टं स्वप्नं तु मया गतनिशे महत् ।
भुक्त्वा भीमो बकं हत्वा नागरैः परिवारितः ।
हृष्टः पुनरिमं वासमायातोऽलंकृतः शुभैः ।

18 a) K3 Ñ1.2 V1 B D (except D5) ज्ञात्वा (for स्मृ°). — b) G6 पार्थिव (for पाण्ड°). — Ś1 K1 om. 18c-20b. — c) Ko.4 D4 प्रतीकारे च; K2.3 T2 G1.4-6 प्रती°; Ñ1.2 V1 B1.3.6 Dn D1.2 °कार्ये च; B5 प्रतिकारे च; D5 °काराय; G3 M3 °कार्यं च. K (K1 om.) वासस्य (for विप्र°).

19 Ś1 K1 om. 19 (cf. v. l. 18). — ab) S च (for इदं). K2 T G M3.5 transp. लोभात् and मोहात्. M3 दौर्बल्यात् (for चाज्ञा°). K4 विनिश्चयं; T G M3.5 न च भ्रमात्. — cd) K2-4 Ñ1.2 Da1 D2.5 M5 धर्मज्ञ. K2 महान् (for मया). T G M3.6-8 इदं व्यवसितं वीर बुद्धिपूर्वमिदं कृतं.

20 Ś1 K1 om. 20ab; K2 om. 20 (cf. v. l. 18). — a) S °पि (M3.6-8 °भि-) निर्वृत्तौ. — b) Da1 T1 G M6-8 प्रतिकारः (G4 प्रतीकारं). Ñ1 अथ; B5 तु; G5 -स्य (for च). Ñ1 B5 D4 विप्रस्य (for वास°). — c) K4 Ñ B5 °मश्चाच°. T1 परमो (for चरितो). D2 मया (for महान्).

21 b) Ñ1 S (except G2) केषुचित् (for कर्हि°). — T1 om. 21cd. — c) K3 transp. क्षत्रियः and स. — d) Ñ V1 B D (except D5) आप्नुं° (for प्राप्नुं°). Ñ2.3 V1 B D (except D5) मे मतिः; T2 नः श्रु°; G1 विश्रुतं; G2 न श्रुतः; G3-5 M न श्रु°; G6 निश्चितं.

22 ab) Ñ1.2 V1 B D (except D5) read क्षत्रियः after कुर्वाणः. — c) G1 लोकेषु च.

23 a) Ś1 K2 transp. एव and तु. Ko.3.4 D5 यदि; Ñ1.2 V1 B Da Dn D1.2.4 अर्थे च; Ñ3 T1 G2 चैव; T2 G4-6 एव च; G1 इह च; G3 इत्येह; M एव हि (for एव तु). — b) Ś1 विधिं; K1 मृधे; Ñ1.2 V1 B D (except D5) भुवि (for युधि). — c) Ñ3 काले° (for लोके°). K2 °वैष्वेषु लो°; T2 G4-6 °वेषु च लो°; G1 सर्वेष्वपि च लो°; M (except M3) स वै सर्वेषु लो°. — d) B1.3 D2 रंजयति.

24 a) K3 V1 B1.5.6 Dn D1 M6-8 मोचयेत्; K4 Ñ2 B3 Da D2.4 °चयन्; Ñ3 °क्षयेत्; T1 M5 °क्षयत्. D4 राजन्; S पुत्र (T1 प्राज्ञः). — b) Ñ1.3 D2 °णा(D2 °णं)गतम्. Ś1 आवृतं. S उद्विग्नं शरणार्थिनं. — c) K1 Da D4 हि; G1.2 सत् (for इह). G3 जातः (for जन्म). — d) Ś1 K1.4 V1 B Dn3 D5 T2.G3.5 M6-8 सद्रव्ये; Da °द्रव्यैः; G4 स दिव्ये. Ko °सेविते; V1 Dn D4 °पूजिते; T1 °संस्कृते.

25 a) K3 Ñ V1 B D (except D2) मां; S हि (for स). — b) N (except K1) M5 पौरव°. — c) Ko °च

C. 1. 6270
B. 1. 163. 4
K. 1. 177. 5

वैशंपायन उवाच ।
ततो रात्र्यां व्यतीतायामन्नमादाय पाण्डवः ।
भीमसेनो ययौ तत्र यत्रासौ पुरुषादकः ॥ १
आसाद्य तु वनं तस्य रक्षसः पाण्डवो बली ।
आजुहाव ततो नाम्ना तदन्नमुपयोजयन् ॥ २
ततः स राक्षसः श्रुत्वा भीमसेनस्य तद्वचः ।
आजगाम सुसंक्रुद्धो यत्र भीमो व्यवस्थितः ॥ ३
महाकायो महावेगो दारयन्निव मेदिनीम् ।
त्रिशिखां भृकुटिं कृत्वा संदश्य दशनच्छदम् ॥ ४
भुञ्जानमन्नं तं दृष्ट्वा भीमसेनं स राक्षसः ।

सुतरप्रज्ञः; K2.3 D2 °चासुतरम्°; Ñ2 V1 B1 Dn D4 °चासुकरम्°; Ñ3 °चासुतराम्°; B2.5.6 Da Cd चाशुतरम्°; G2 °च स सुतां व्यासः. — [d]) G2 प्राज्ञ (for तस्माद्). Ś1 चैतच्; K1 एतं; Ñ2 V1 B D एवं (B3m Da आशु) (for एतच्). — Ñ2 V1 B D (except D5) end the adhy., and read the colophon, after 25, transposing st. 26–27 to the beginning of the foll. adhy.

26 Ś1 K1.3 S om. उवाच. — [cd]) Ñ2 V1 B D (except D5) एतद् (for एवम्). M कृतं नित्यं च विप्रेषु सानुक्रोशवती भव. — [ef]) S ध्रुवमेष (G3.4.6 M5.7 °व) महाबाहुर्विजित्य पुरुं°. — After 26, N ins.:

1644* सर्वथा ब्राह्मणस्यार्थे यदनुक्रोशवत्यसि ।

D2.3 cont.:

1645* मन्वादिमुनिभिः प्रोक्तं वेदविद्भिर्महात्मभिः ।
गवार्थे ब्राह्मणस्यार्थे सद्यः प्राणान्परित्यजेत् ।
मुच्यते ब्रह्महत्याया गोप्तारो ब्राह्मणस्य च ।

On the hand, after 26, S ins.:

1646* आगन्ता नगरं चैव तस्मात्पापाद्विमुच्यते ।

27 [a]) M कथं (for यथा). B5 न्विमं; T1 G1 चैनं; T2 G2.4–6 चैवं; G3 चैतं; M चेदं. T G न नो (G1 नरो; G2 न ते) विद्युः. — [b]) D4 जना (for नरा). — [c]) G2 किमयं; M5 तथैव. — [d]) D5 परिगृह्येत; T G °गृह्य च; M (except M3) प्रतिग्राह्यश्च. K2 परिगृह्य पुनः पुनः. — After 27, S ins.:

1647* वैशंपायनः ।
युधिष्ठिरेण संमन्त्र्य ब्राह्मणार्थमरिंदम ।
कुन्ती प्रविश्य तान्सर्वान्सान्त्वयामास भारत ।

Colophon om. in G3; Ñ2 V1 B D (except D5) read it after st. 25, transposing st. 26–27 to the beginning of the foll. adhy. — *Major parvan:* T2 G1–5 M संभव° (for आदि°). — *Sub-parvan:* Ś1 K Ñ V1 B Da Dn D1.2.4 T2 M3.5 बकवध (B1.3 D1 एकचक्रायां बक°). — *Adhy. name:* K4 युधिष्ठिरसंवादः; Ñ1.2 V1 कुंती-युधिष्ठिरसंवादः; D5 कुंतीं प्रति युधिष्ठिरवाक्यं. — *Adhy. no.* (figures, words or both): B1 158; Dn3 161; D4m 164; T1 159; T2 G5 M 109; G1 110; G2–4 108. — *S'loka no.:* Dn 26; M3 33. — *Aggregate s'loka no.:* Dn2 6259.

151

☞ Ñ2 V1 B D (except D5) read the last two st. of the preceding adhy. (with 1644*) at the beginning of the present adhy.

1 Ś1 K D2.5 T1 om. उवाच; T2 G M om. the ref. — [a]) Ñ3 रात्र्यामतीं°. — For 1, S subst. a passage of 46 lines given in App. I (No. 92); D5 ins. lines 2–17 of this passage after 1[ab], and lines 19–46 after 1[cd].

2 M5–8 om. 2 (cf. v. l. 1). — [a]) Ś1 K2 B6 D2 भवनं; Ko T G1.6 च वनं; K3 भुवनं; G2–5 वचनं. — M3 om. 2[cd]. — [d]) K3m °भुंजयन्; V1 B1.3 (m as in text) Dn D1.2 °पादयन्; G1.2 °भोजयन्.

3 [a]) N2 V1 B5 D (except D5) क्रुद्धो (for श्रुत्वा). — [b]) N2 V1 B D (except D5) भीमस्य वचनात् (B1.3.6 D2 वचनं) तदा.

4 After 4[ab], K4 N1.2 V1 B D (except D5) ins.:

1648* लोहिताक्षः काली च लोहितश्मश्रुमूर्धजः ।
आकर्णाद्भिन्नवक्त्रश्च शङ्कुकर्णो विभीषणः ।

[(L. 1) Dn करालश्च. K4 लोहितास्यः सुहृष्टश्च (for the prior half). — (L. 2) K4 आकर्णदारितास्यश्च; Da D4 आकर्णभिन्न°.]

— [c]) MSS. भ्रुकुटीं, भ्रुकुटिं also. K3 बध्वा (for कृत्वा).

5 [c]) M विवृत्य नेत्रे संक्रुद्धः.

6 Before 6, K3 ins. बक उ°; M (except M3) बकः. — [b]) K3 परिकल्पितं; M समुपाहृतं. T1 मदर्थः पुरुषादकः.

विवृत्य नयने क्रुद्ध इदं वचनमब्रवीत् ॥ ५
कोऽयमन्नमिदं भुङ्क्ते मदर्थमुपकल्पितम् ।
पश्यतो मम दुर्बुद्धिर्यियासुर्यमसादनम् ॥ ६
भीमसेनस्तु तच्छ्रुत्वा प्रहसन्निव भारत ।
राक्षसं तमनादृत्य भुङ्क्ते एव पराङ्मुखः ॥ ७
ततः स भैरवं कृत्वा समुद्यम्य करावुभौ ।
अभ्यद्रवद्भीमसेनं जिघांसुः पुरुषादकः ॥ ८
तथापि परिभूयैनं नेक्षमाणो वृकोदरः ।
राक्षसं भुङ्क्ते एवान्नं पाण्डवः परवीरहा ॥ ९

अमर्षेण तु संपूर्णः कुन्तीपुत्रस्य राक्षसः ।
जघान पृष्ठे पाणिभ्यामुभाभ्यां पृष्ठतः स्थितः ॥ १०
तथा बलवता भीमः पाणिभ्यां भृशमाहतः ।
नैवावलोकयामास राक्षसं भुङ्क्ते एव सः ॥ ११
ततः स भूयः संक्रुद्धो वृक्षमादाय राक्षसः ।
ताडयिष्यंस्तदा भीमं पुनरभ्यद्रवद्बली ॥ १२
ततो भीमः शनैर्भुक्त्वा तदन्नं पुरुषर्षभः ।
वार्युपस्पृश्य संहृष्टस्तस्थौ युधि महाबलः ॥ १३
क्षिप्तं क्रुद्धेन तं वृक्षं प्रतिजग्राह वीर्यवान् ।

C. 1. 6284
B. 1. 168. 18
K. 1. 177. 40

— [a]) B5 यममंदिरं.

7 Before 7, T2 G5 M6-8 ins. वैशं॰. — [a]) Ś1 K1.3 V1 Dn D1 ततः (for तु तत्). — [b]) =14[d]. — [d]) Here and below many MSS. भुक्त (for भुङ्क्ते).

8 [a]) Ñ1.2 V1 B D (except D5) रवं (for ततः). N3 सु- (for स). Ś1 K1 भैरवो. Ś1 K1 दृष्ट्वा; S कुर्वन् (G1.2 क्रोशन्). [भैरवं for भैरवं रवं (Word Haplology)?] — [c]) Ś1 अभ्याद्रवद्; K1 अभिद्रवन्; D4 °धावद्.

9 [b]) N म्रे(K1 ई)क्षमाणो. — [c]) K4 G2 भुक्तवानन्नं. — G2 subst. for 9[d] पापिनं बकमोजसा, which G1 ins. after 9[d].

10 [a]) Ś1 Ko B3 G1.2 सु- (for तु). — [b]) Ñ2 V1 B Dn D1.2.4 कुंतीपुत्रं वृकोदरं; Da G3 °पुत्रं स रा॰. — [c]) Ñ1.2 V1 B D (except D5) T G पृष्ठे; M3 पूर्वं. — [d]) G3 ततः (for स्थितः). D1 पृष्ठतो बलिनं तदा.

11 [a]) S (except M6-8) ततो. — [d]) For it G3 subst. 7[d]. — After 11, G1.2.4 ins.:

1649* भीमोदरगताः पिण्डाः सान्तरास्राः परं शतम् ।
रक्षःपाणिप्रहारेण संश्लिष्टा एकपिण्डवत् ।

12 In S, 12 is repeated (see below). — [a]) K4 D5 G2.4 संभूय; M5.5 तु भूयः. G1 ततः स भृशसंतप्तो; M6-8 ततो भूयः सुसं॰. — [b]) K4 वृक्षमुत्पाट्य; M6-8 वृक्षानादाय. — [c]) Ś1 पुनः (for तदा). — [d]) Ś1 तदा ह्याभ्याद्रवद्बली; N1 पुनरप्यपत॰.

13 S transp. 13 and 14; G3 om. 13[ab]. — [b]) Ko.4 भरतर्षभः (K4 °भ); T1 G4.6 M5 पुरुषर्षभ. — [c]) Ko संक्रुद्धः; D2 °तृप्तः; G4 °स्पृष्टः. — [d]) T G तस्थौ गिरिरिवाचलः (G1.2 °परः). — (After its transposition) G1.2.4 ins. after 13:

1650* स्थित्वा मुहूर्तं विश्रम्य वीरासनमुपाश्रितः ।
भ्रामयन्तं महावृक्षमायान्तं भीमदर्शनम् ।
दृष्ट्वोत्थायाहवे वीरः सिंहनादं व्यनादयत् ।

T1 ins. lines 1–9 of the foll. passage after 13 (after its transposition), and the rest after 14: T2 G3.5.6 M ins. the whole passage after 13 (after its transposition): G1.2.4 ins. the passage after 1650*:

1651* भुजवेगं तथा स्फोटं क्ष्वेडितं च महास्वनम् ।
कृत्वाह्वयत संक्रुद्धो भीमसेनोऽथ राक्षसम् ।
बहुकालं सुपुष्टं ते शरीरं राक्षसाधम ।
मद्बाहुबलमाश्रित्य न त्वं भूयस्त्वशिष्यसि ।
अद्य मद्बाहुनिष्पिष्टो गमिष्यसि यमक्षयम् । [5]
अद्य प्रभृति स्वप्स्यन्ति विप्रकीर्य निवासिनः ।
निरुद्विग्नाः पुरस्यास्य कण्टके सूदृते मया ।
अद्य युद्धे शरीरं ते कङ्कगोमायुवायसाः ।
मया हतस्य खादन्तु विकर्षन्तु च भूतले ।

[Here follows a colophon in T2 G (except G3).]

वैशंपायनः ।

एवमुक्त्वा सुसंक्रुद्धः पार्थो बकजिघांसया । [10]
उपधावद्बकश्चापि पार्थं पार्थिवसत्तम ।
महाकायो महावेगो दारयन्निव मेदिनीम् ।
विरूपरूपः पिङ्गाक्षो भीमसेनमभिद्रवत् ।
त्रिशिखां भृकुटिं कृत्वा दृष्ट्वा च दशनच्छदम् ।

[G4 ins. after line 2:

1651a* उवाचाशनिशब्देन ध्वनिना भीषयन्निव ।,

and after line 3:

1651b* द्विपच्चतुष्पन्मांसैश्च बहुभिश्चौदनाचलैः ।

— Details of the colophon. *Adhy. no.*: T2 G5.6 110; G1.2 111; G4 109. — Line 12=4[ab]; line 14=(var.) 4[cd].]

— After the above, S *repeats* 12 and 14.

14 S transp. 13 and 14 (repeating 14, with

C. 1. 6284
B. 1. 163. 18
K. 1. 177. 40

सव्येन पाणिना भीमः ग्रहसन्निव भारत ॥ १४
ततः स पुनरुद्यम्य वृक्षान्बहुविधान्बली ।
प्राहिणोद्भीमसेनाय तस्मै भीमश्च पाण्डवः ॥ १५
तद्वृक्षयुद्धमभवन्महीरुहविनाशनम् ।
घोररूपं महाराज बकपाण्डवयोर्महत् ॥ १६
नाम विश्राव्य तु बकः समभिद्रुत्य पाण्डवम् ।
भुजाभ्यां परिजग्राह भीमसेनं महाबलम् ॥ १७
भीमसेनोऽपि तद्रक्षः परिरभ्य महाभुजः ।
विस्फुरन्तं महावेगं विचकर्ष बलाद्बली ॥ १८
स कृष्यमाणो भीमेन कर्षमाणश्च पाण्डवम् ।
समयुज्यत तीव्रेण श्रमेण पुरुषादकः ॥ १९
तयोर्वेगेन महता पृथिवी समकम्पत ।
पादपांश्च महाकायांश्चूर्णयामासतुस्तदा ॥ २०
हीयमानं तु तद्रक्षः समीक्ष्य भरतर्षभ ।

---

partial variation, after the repetition of 12; see above). — [a]) Ś1 Ko.1.3 D5 प्रासं; T2 (first time) क्षतं; G1.2 (both first time) न्यस्तं; M6-8 (all first time) क्षिप्रं (for क्षिप्तं). — [a])=7[b]. T1 (first time) दक्षिणेन स भुंजति; G1.2 (both first time) दक्षिणेनाप्यभुंक्त ह. — (After the transp. of 13 and 14) G1.2.4 ins. after (the first occurrence of) 14:

1652* शकटान्नं ततो भुक्त्वा रक्षसः पाणिना सह ।
गृह्णन्नेव महावृक्षं निःशेषं पर्वतोपमम् ।
भीमसेनो हसन्नेव भुक्त्वा त्यक्त्वा च राक्षसम् ।
पीत्वा दधिघटान्पूर्णान्घृतकुम्भाञ्शतं शतम् ।

After (the repetition of) 14, G1.2.4 ins.:

1653* तद्रक्षःप्रहितं वृक्षं महाशाखं वनस्पतिम् ।
गृहीत्वा पाणिनैकेन सव्येनोद्यम्य चेतरम् ।
रक्षोवदनमुद्वीक्ष्य भ्रुकुटीविकटाननम् ।
दर्शयन्रक्षसे दन्तान्प्रजहासाशनिस्वनः ।

15 [a]) K1 पुरुषादस्य; T1 पुनरुद्भूत्य. — [b]) G8 नृप (for बली). — [d]) G6 तांश्चैव (for भीम°). D5 रक्षसे (for पाण्ड°). G1.2 भीमोपि बलवान्रणे. — After 15, G1.2.4 ins.:

1654* सर्वानपोहयद्वृक्षान्स्वस्य हस्तस्थशाखिना ।

16 [a]) G6 वृक्षयुद्धमभूद्भीमं. — [b]) G1.2 वृक्षयं(G1 °दं)डविना°; G3 अहो महिविना°. — [c]) T G3-6 सु(G3 अ)घोरं वै (for घोर°). K Ñ1.3 M तदा राजन्. G1.2 सुघोररूपं राजेंद्र. — [d]) T G3-6 तदा (for महत्). Ñ2 V1 B D (except D5) नरराक्षसराजयोः; Ñ3 नरराक्षसयोर्महत्.

17 [a]) Ś1 K1 वाचा वि(Ś1 व्य)द्राव्य (for नाम वि°). G1.2 स (for तु). — [b]) Ko समभिद्रुत्य. — D2 (hapl.) om. 17[c]-19[b]. — [c]) Ś1 K1 G4.5 प्रतिजग्राह. — [d]) Ñ3 T1 M महाबलः; D5 °बली.

18 D2 om. 18 (cf. v. l. 17). — [a]) M तु (for अपि). — [b]) Ñ1 S परिगृह्य; D5 °ष्वज्य. Ñ1 D1 M6-8 °भुजं. — 18[cd] is *repeated* at the end of passage No. 93 of App. I. — [c]) B1 विस्फुरच. V1 Dn D1 °बाहुं; T1 °वेगाद्. — [d]) B3 M °र्षं महाबलः. — After 18, Ko ins.:

1655* परिश्रामणविक्षेपपरिरम्भावपातनैः ।
उत्सर्पणावसर्पैस्तावन्योन्यं प्रत्यरुन्धताम् ।
उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि ।

A passage given in App. I (No. 93) is ins. in M after 18, in T G after 20.

19 D2 om. 19[ab] (cf. v. l. 17). — [a]) M वि- (for स). — [b]) M कर्षंश्च (M6 च कर्षन्) युधि पांडवं. — [c]) D5 सम(D5 °मा)युध्यत; G3 समायु°. — [d]) Ñ V1 B5.6 Dn D1.4 T1 क्रमेन (Ñ2 क्रमेण); G1.2 वेगेन. — S repeats this st. (with v. l.) at the end of passage No. 93 of App. I (cf. v. l. 18).

20 S *repeats* this st. (with v. l.) in the course of passage No. 93 of App. I. — [b]) M तत्र भूमिरकंपत. — [c]) G1.2 °मात्रान् (for °कायान्). M पादपान्वीरुधश्चैव. — [d]) Da T2 घूर्णया°. Ko.3.4 D5 G3 भृशं; M च तौ (for तदा). — After 20, T G ins. a passage given in App. I (No. 93), which is ins. in M after 18.

21 [a]) M तं भीमो (for तद्रक्षः). G1.2 हीयमानबलं रक्षः. — [b]) T2 G4-6 संलक्ष्य; M3.5 निरी°. Ko Ñ2 V1 B D (except D5) M पुरुषादकं; Ñ3 भरतर्षभः; T1 G1-3 पुरुषर्षभः. — [c]) T2 G3.4.6 निष्पीड्यमानः. M3.5 निक्षिप्य; M6-8 निकृष्य. T1 भीमो; G1.2 पद्भ्यां (for भूमौ). Ñ1.3 M पादा°; V1 B D (except D5) जानु°; T G3-6 पद्भ्यां वै; G1.2 भूमौ तु (for पाणि°). — [d]) M समाहत्य महाबलः.

22 [a]) G1.2 जानुनी भूमौ. — [b]) T1 परिपीड्य; M3 अभि°. Ñ3 बलादपि; T G3-6 महाबलः; M वृकोदरः. G1.2 दक्षिणेतरपाणिना. — [c]) Ś1 K1 प्रतिजग्राह. G1.2 संपीड्य पाणिना राजन् (see below). — [d]) M6-8 °धरं. — After 22, G1.2 ins.:

1656* जानुन्यारोप्य तत्पृष्ठं महाशब्दं ब्रभञ्ज ह ।
निक्षिप्य भूमौ पाणिभ्यां धरण्यां निष्पिपेष ह ।

23 K1 om. 23[abc]; G1.2 om. 23[ab]. — [a]) S (G1.2

निष्पिष्य भूमौ पाणिभ्यां समाजघ्ने वृकोदरः ॥ २१
ततोऽस्य जानुना पृष्ठमवपीड्य बलादिव ।
बाहुना परिजग्राह दक्षिणेन शिरोधराम् ॥ २२
सव्येन च कटीदेशे गृह्य वाससि पाण्डवः ।
तद्रक्षो द्विगुणं चक्रे नदन्तं भैरवान्रवान् ॥ २३
ततोऽस्य रुधिरं वक्त्रात्प्रादुरासीद्विशां पते ।
भज्यमानस्य भीमेन तस्य घोरस्य रक्षसः ॥ २४

इति श्रीमहाभारते आदिपर्वणि एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

१५२

वैशंपायन उवाच ।
तेन शब्देन वित्रस्तो जनस्तस्याथ रक्षसः ।
निष्पपात गृहाद्राजन्सहैव परिचारिभिः ॥ १
तान्भीतान्विगतज्ञानान्भीमः प्रहरतां वरः ।
सान्त्वयामास बलवान्समये च न्यवेशयत् ॥ २
न हिंस्या मानुषा भूयो युष्माभिरिह कर्हिचित् ।

C. 1. 6298
B. 1. 164. 4
K. 1. 178. 5

om.) तु (for च). — [b]) Ś1 रक्षसः (for पाण्ड°). T2 G4–6 M वास(G4.5 °सां)स्यादाय पांडवः. — [cd]) S (for G1.2 see below) बभंज तत् (G3 स) तदा रक्षो (for °). — K2 D4 M वि(M6–8 व्य)नदद्भैरवं रवं; Ñ2 V1 B Da Dn D1.2.5 G3 र(B D1.2 रु)वंतं (B3m G3 नदंतं) भैरवं रवं (D5 °वान्रवान्). G1.2 नदंतं भैरवरवान्विसृजंतं जलं मलं.

24 [b]) T G प्रसुस्राव वि°. — [c]) K4 भ्राम्यमाणस्य; T2 G4–6 हन्य°. — [d]) M तदा (for तस्य). — After 24, K4 reads 1657* (cf. v. l. 1. 152. 1); while T2 G5.6 M read 1. 152. 1[ab], M repeating it in its proper place. In G1.2.4, on the other hand, 24 is followed by (the first occurrence of) 1. 152. 6 (reading for 6[cd]: नगरद्वारमासाद्य पादावादाय वाक्षिपत्), which (*viz.* 1. 152. 6) M reads (also for the first time) after (the *first* occurrence of) 1. 152. 1[ab] (reading for 6[cd] नगरद्वारमासाद्य व्युत्ससर्ज महाबलः).

Colophon om. in Ko T1; G3 reads the colophon after 1658*, G4 after 1. 152. 1, and T2 G5.6 after 1. 152. 1[ab]. — *Major parvan*: T2 G M संभव° (for आदि°). — *Sub-parvan*: Ś1 K1–4 Ñ V1 B Da Dn1.n2 D1.2.4.5 T2 M5 बकवध (B1 एकचक्रायां बकवध). — *Adhy. name*: Ñ1.2 V1 बकभीमसेनयुद्धं; G1.3–6 M3.6–8 बकवधः. — *Adhy. no.* (figures, words or both): B1 159; Dn3 162; D4m 165; T2 G5.6 M 111; G1.2 112; G3 109; G4 110. — *S'loka no.*: Dn 28; M3 32. — *Aggregate s'loka no.*: Dn2 6287.

152

1 Ś1 K Da1 D2.5 S om. उवाच; Ko Ñ3 T1 om. the ref. — M reads 1[ab] after 1. 151. 24, repeating it here. — Ñ V1 B D (except D5) ins. after वैशं° उ° (resp. its v. l.): K4, after 1. 151. 24:

1657* ततः स भग्नपार्श्वाङ्गो नदित्वा भैरवं रवम् ।
शैलराजप्रतीकाशो गतासुरभवद्बकः ।

[(L. 1) K4 भग्नपृष्ठांगो. B1.3 D2 नर्दित्वा; Da नादित्वा.] — [b]) T G जनः सर्वोऽथ. Ñ3 तु (for अथ). — After 1[ab], G2 again reads 6 (cf. v. l. 1. 151. 24), while T2 G5.6 read the (transposed) colophon. — [a]) M सर्वे च (for सहैव). Ko.3.4 D5 परिचारकैः; G1.2 °वारिभिः; M3.5 °चारकाः; M6–8 °चारिणः. — After 1, G4 reads the colophon. — T G ins. after 1 (G4, after the transposed colophon):

1658* ततस्तु निहतं दृष्ट्वा राक्षसेन्द्रं महाबलम् ।
बाकाः परमसंत्रस्ता भीमं शरणमाययुः ।

[(L. 1) G1.2 तं (for तु). — (L. 2) T1 वातिकाः (sic); G1.2.4 पौराः (for बाकाः). — After the prior half of line 2, G1.2.4 ins.:

1659* बकस्य परिचारकाः ।
आरामोद्यानचैत्यस्थाः क्षुद्रदेवालयाश्रिताः ।
भीमं दृष्ट्वा शौर्यराशिं.]

After 1658*, G3 reads the colophon.

2 [a]) T2 G2 भीमान्; M3 गतान् (for भीतान्). D2 विगतान् ज्ञात्वा. — [bc]) G1.2 दृष्ट्वा च शरणागतान् । बलवान्सांत्वयित्वा तान्. — [d]) G3 सममेव (for समये च).

B. 1: 6298'
B. 1: 164. 4
K. 1. 178. 5

हिंसतां हि वधः शीघ्रमेवमेव भवेदिति ॥ ३
तस्य तद्वचनं श्रुत्वा तानि रक्षांसि भारत ।
एवमस्त्विति तं प्राहुर्जगृहुः समयं च तम् ॥ ४
ततः प्रभृति रक्षांसि तत्र सौम्यानि भारत ।
नगरे प्रत्यदृश्यन्त नरैर्नगरवासिभिः ॥ ५
ततो भीमस्तमादाय गतासुं पुरुषादकम् ।
द्वारदेशे विनिक्षिप्य जगामानुपलक्षितः ॥ ६
ततः स भीमस्तं हत्वा गत्वा ब्राह्मणवेश्म तत् ।
आचचक्षे यथावृत्तं राज्ञः सर्वमशेषतः ॥ ७
ततो नरा विनिष्क्रान्ता नगरात्कालयमेव तु ।
ददृशुर्निहतं भूमौ राक्षसं रुधिरोक्षितम् ॥ ८
तमद्रिकूटसदृशं विनिकीर्णं भयावहम् ।
एकचक्रां ततो गत्वा प्रवृत्तिं प्रददुः पुरे ॥ ९
ततः सहस्रशो राजन्नरा नगरवासिनः ।
तत्राजग्मुर्बकं द्रष्टुं सस्त्रीवृद्धकुमारकाः ॥ १०
ततस्ते विस्मिताः सर्वे कर्म दृष्ट्वातिमानुषम् ।

T1 अपि; G1.2 स (for च). D5 M समयं च न्य(D5 नि)वेदयत्.

3 a) M6-8 भूमौ (for भूयो). — b) K3 अभि-; V1 B D इति (for इह). — c) Ś1 S च (for हि). K1 गतिः शीघ्रं. — d) K2 D5 S भविष्यति (for भवे°).

4 Before 4, T2 G4-6 M6-8 ins. वैशं°. — K1 (hapl.) om. 4c-5b. — c) Da G6 संप्राहुः; G4 तं चाहुः. T1 G1-3 एवमेवास्त्विति प्राहुः (G1.2 प्रोक्त्वा). — d) G1.2 गृहीत्वा; G4.5 जजल्पुः (for जगृ°). M6-8 तत् (for तम्). G3 समयं जगृहुः (by transp.). — After 4, S ins.:

1660* सगणस्तु बकभ्राता प्राणमत्पाण्डवं तदा ।

[G1.2.4 भीमसेनं प्रणम्य च; M प्रणिपत्य च पांडवं (for the posterior half).]

— Before 1660*, G1.2.4 ins.:

1661* तत्पुरोपवनोद्यानचैत्यारामान्विसृज्य ते ।
बिभीतककपित्थार्कप्लक्षशाल्मलिकाननम् ।
प्रपेदिरे भयत्रस्ता भीमसाध्वसकातराः ।

(cf. 1659*); and after 1660* they ins.:

1662* यमुनातीरमुत्सृज्य प्रपेदे पितृकाननम् ।

5 K1 om. 5ab (cf. v. l. 4). — b) Ñ1 तानि (for तत्र). — c) K1 प्रतिद°. — d) T G यथा (G1.2 तथा) नगरवासिनः.

6 After 6ab, S (G1.2 om. lines 3-4) ins.:

1663* निष्कर्णनेत्रं निर्जिह्वं निःसंज्ञं कण्ठपीडनात् ।
कुर्वन्तं बहुधा चेष्टां स नरादमकर्षत ।
स एव राक्षसो नूनं पुनरायाति नः पुरीम् ।
सबालवृद्धाः पुरुषा इति भीताः प्रदुद्रुवुः ।

[(L. 1) T1 निष्कीर्णनेत्रं; G3 विकीर्ण°. G1.2 कर्णपीड°; G3 करपीड°. — (L. 2) T1 G1 चेष्टाः. T1 M पुरद्वारं व्यकर्षत. — After line 2, G2.4 ins.:

1664* आच्छिद्य बाहू पादौ च शिरश्च स वृकोदरः ।
द्वारेषु चतुर्षु क्षिप्त्वा पुनरागात्स मारुतिः ।

— (L. 3) T1 G4 पुरं. — (L. 4) G2 इति मत्वा.]

— d) S नगरस्य जगाम तं (G2 M ह). — After 6, N ins.:

1665* दृष्ट्वा भीमबलोद्भूतं बकं विनिहतं तदा ।
ज्ञातयोऽस्य भयोद्विग्नाः प्रतिजग्मुस्ततस्ततः ।

7 a) Ko.3.4 तु; K1 स्म (for स). Ñ3 तद्धत्वा. G2 ततो भीमो बकं हत्वा. — b) K2 °वेश्मनि; G2 °वेश्मसु. — After 7ab, D5 T G ins.:

1666* बलीवर्दौ च शकटं ब्राह्मणाय न्यवेदयत् ।

[T2 G4-6 सशकटं. G2 निवेद्य च (for न्यवेद°).]

G1.2.4 cont.:

1667* तूष्णीमन्तर्गृहं गच्छेत्यभिधाय द्विजोत्तमम् ।
मातृभ्रातृसमक्षं च गत्वा शयनमेत्य च ।

— c) S च तत्सर्वं (for यथा°). — a) Ś1 K1.3 राज्ञे; Ko.2.4 राजन्. S रात्रौ (M राज्ञे) युद्धमभूद्यथा. — After 7, G2.4 ins.:

1668* अशितोऽस्म्यद्य जननि तृप्तिर्मे दशवार्षिकी ।

8 a) G1.2 केचिन्नरा. S (except M8) विनिष्क्रम्य. — b) Some MSS. कल्यम्; Cd as in text. Ko.4 Ñ1.3 D5 तं; K3 च (for तु). — c) Ko-2 निहितं. Ś1 K1 तं तु; Ko.3.4 D5 तत्र (for भूमौ). — d) Ś1 K (except K2) D5 घोरदर्शनं (for रुधिरो°).

9 a) S °प्रतिमं. — b) Ñ2 V1 B D (except D5) T1 भयानकं. — After 9ab, K4 Ñ1.2 V1 B D ins.:

1669* दृष्ट्वा संहृष्टरोमाणो बभूवुस्तत्र नागराः ।

— c) S पुनर् (for ततो). — d) T G अदुद्रुः. Ś1 K1.2 G2.6 M5 परे (for पुरे).

10 a) D1 सहस्रशस्तदा राजन्. — b) G5 नानानगर°. — c) K2 तत्र गच्छन्; Da ततो जग्मुः; D5 T1 G1.2.6 तत्र जग्मुः. — d) G5 सस्त्रीका वृद्धबालकाः. — After 10, G2.4 ins.:

1670* ददृशुस्ते बकं सर्वे विशिरःपाणिपादकम् ।

दैवतान्यर्चयांचक्रुः सर्व एव विशां पते ॥ ११
ततः प्रगणयामासुः कस्य वारोऽद्य भोजने ।
ज्ञात्वा चागम्य तं विप्रं पप्रच्छुः सर्व एव तत् ॥१२
एवं पृष्टस्तु बहुशो रक्षमाणश्च पाण्डवान् ।
उवाच नागरान्सर्वानिदं विप्रर्षभस्तदा ॥ १३
आज्ञापितं मामशने रुदन्तं सह बन्धुभिः ।
ददर्श ब्राह्मणः कश्चिन्मन्त्रसिद्धो महाबलः ॥ १४
परिपृच्छ्य स मां पूर्वं परिक्लेशं पुरस्य च ।
अब्रवीद्ब्राह्मणश्रेष्ठ आश्वास्य प्रहसन्निव ॥ १५
प्रापयिष्याम्यहं तस्य इदमन्नं दुरात्मने ।
मन्निमित्तं भयं चापि न कार्यमिति वीर्यवान् ॥१६
स तदन्नमुपादाय गतो बकवनं प्रति ।
तेन नूनं भवेदेतत्कर्म लोकहितं कृतम् ॥ १७
ततस्ते ब्राह्मणाः सर्वे क्षत्रियाश्च सुविस्मिताः ।
वैश्याः शूद्राश्च मुदिताश्चक्रुर्ब्रह्ममहं तदा ॥ १८
ततो जानपदाः सर्वे आजग्मुर्नगरं प्रति ।
तदद्भुततमं द्रष्टुं पार्थास्तत्रैव चावसन् ॥ १९

C. 1. 6315
B. 1. 164. 21
K. 1. 178. 24

इति श्रीमहाभारते आदिपर्वणि द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥ समाप्तं बकवधपर्व ॥

निःशृङ्गवृक्षं निर्गुल्मं विनिकीर्णं गिरिं यथा ।

11 After 11^{ab}, G$_{2.4}$ ins.:

1671* विस्मयोत्फुल्लनयनास्तर्जन्यासक्तनासिकाः ।

— ^{c}) S अर्चयामासुः. — ^{d}) B$_1$ T G M$_5$ सर्वाण्येव विशां पते (G$_2$ प्रार्थनानि पुरा भयात्).

12 M$_{6-8}$ om. 12^{ab}. — ^{a}) Ko.$_3$ M$_5$ परिणयामासुः; K$_{2.4}$ Ñ$_1$ M$_3$ ते गणया°; D$_5$ चागणया°; T G परीक्षया°. — ^{b}) G$_2$ रक्षसः (for भोज°). — ^{d}) K (except K$_1$) D$_5$ T G सर्वमेव. Ñ V$_1$ B D (except D$_5$) ते (for तत्).

13 ^{a}) Ñ$_1$ सु-; Ñ$_{2.3}$ V$_1$ B D स (for तु). S पृच्छ्यमानो (M एवं पृष्टो) बहुविधं (T$_1$ -थ विविधं). — ^{b}) Ś$_1$ K तु; M स (for च). — ^{d}) M इति (for इदं). Ko.$_{3.4}$ इदं ब्राह्मणसत्तमः; T G काश्यपो नामत(T$_1$ गौतम)स्तदा.

14 Before 14, T G ins. ब्राह्मणः. — After ब्राह्मणः, G$_2$ ins.:

1672* अद्य ते राक्षसो वारः पूर्वैर्दुर्ज्ञापितो मम ।
ग्रामसाधारणेनैव सूचकेन पुरौकसः ।

— ^{a}) Ś$_1$ K$_{2.4}$ Ñ$_3$ मामशनं; Ko च मापत्यं; K$_3$ च मामार्तं; S मामनिशं. — ^{b}) G$_{1.2}$ बंधुभिः सह (by transp.); M$_{3.5}$ सह बांधवैः. — ^{d}) G$_3$ मंत्रशिक्षा-. Ñ$_2$ V$_1$ B D (except D$_5$) महामनाः.

15 ^{a}) Ś$_1$ Ko.$_1$ परिदृष्ट्वा; K$_{3.4}$ Ñ$_{1.3}$ D$_5$ °पृष्ट्वा. K$_1$ मां पूर्णं. M$_{3.5}$ परिपृष्ट्वा च सर्वं मां. — Ñ$_1$ om. 15^{a}-16^{d}. — ^{d}) N विश्वास्य प्रहस°; G$_1$ समाश्वास्य हस°.

16 Ñ$_1$ om. 16 (cf. v. l. 15). — ^{a}) K$_{2.4}$ Ñ$_3$ T$_1$ G (except G$_5$) तस्माद्. — ^{b}) Ñ$_2$ V$_1$ B D (except D$_5$) अन्नमेतद्. Ko दुरात्मनः. — ^{c}) S तन्निमित्तं. T$_1$ इदं; G$_1$ भयात् (for भयं). K (except K$_1$) चात्र (for चापि). — ^{d}) Ñ$_{1.2}$ V$_1$ B D (except D$_5$) °ति चाब्रवीत्.

18 G$_2$ transp. 18 and 19. — ^{a}) T$_1$ M (except M$_5$) तु (for ते). M (except M$_5$) चैव (for सर्वे). — ^{b}) Ko.$_4$ क्षत्रियाश्चैव वि°. — ^{c}) Ś$_1$ विदि°; K$_1$ विहि° (for मुदि°). — ^{d}) Ś$_1$ Ko.$_{2.3}$ ब्राह्म-; D$_5$ G$_3$ ब्राह्मयं. Ś$_1$ K$_1$ -महस्तदा; D$_{2.5}$ -महोत्सवं; T G M$_5$ -महत्तदा.

19 G$_2$ transp. 18 and 19; Ko transp. 19^{ab} and 19^{cd}. — ^{a}) Ś$_1$ K$_4$ B (except B$_5$) Dn$_{1.n}$ D$_{1.4}$ G$_1$ M$_{6-8}$ जनपदाः. — ^{b}) Before आजग्मुः, Ś$_1$ Ko.$_1$ ins. हि; K$_3$ अपि; T$_2$ G$_{1.5.6}$ च; G$_3$ तु (to avoid hiatus!). M$_5$ तत्पुरं (for नगरं). G$_2$ M$_{3.6.7}$ आजगाम (G$_2$ समाजग्मुः) पुरं प्रति. — ^{c}) T$_1$ G$_{1.2.4}$ M$_5$ तम् (for तद्). D$_5$ G$_3$ तदद्भुतमिमं. N M$_5$ दृष्ट्वा. — ^{d}) S चाभवन्. — After 19, K$_{2.4}$ ins. (the *phalas'ruti*):

1673* श्रुत्वा बकवधं यस्तु वाचकं पूजयेन्नरः ।
तस्य वंशेऽपि राजेन्द्र न राक्षसभयं भवेत् ।
नश्यन्ति शत्रवस्तस्य उपसर्गास्तथैव च ।
महत्पुण्यमवाप्नोति श्रुत्वा भीमपराक्रमम् ।;

while S (except T$_1$ G$_3$) ins.:

1674* वेत्रकीयगृहे सर्वे परिवार्य वृकोदरम् ।
विस्मयादभ्यगच्छन्त भीमं भीमपराक्रमम् ।
न वै न संभवेत्सर्वं ब्राह्मणेषु महात्मसु ।
इति सत्कृत्य तं पौराः परिवव्रुः समन्ततः ।
अयं त्राता हि नः सर्वान्पितेव परमार्थतः । [5]
अस्य शुश्रूषवः पादौ परिचर्य उपास्महे ।
पशुमद्धिमचाग्र्यं परं भक्तमुपाहरन् ।
तस्मिन्हते ते पुरुषा भीताः समनुबोधनाः ।

१५३

C. 1. 6316
B. 1. 165. 1
K. 1. 179. 1

जनमेजय उवाच ।
ते तथा पुरुषव्याघ्रा निहत्य बकराक्षसम् ।
अत ऊर्ध्वं ततो ब्रह्मन्किमकुर्वत पाण्डवाः ॥ १

वैशंपायन उवाच ।
तत्रैव न्यवसन्राजन्निहत्य बकराक्षसम् ।
अधीयानाः परं ब्रह्म ब्राह्मणस्य निवेशने ॥ २
ततः कतिपयाहस्य ब्राह्मणः संशितव्रतः ।
प्रतिश्रयार्थं तद्वेश्म ब्राह्मणस्याजगाम ह ॥ ३
स सम्यक्पूजयित्वा तं विद्वान्विप्रर्षभस्तदा ।
ददौ प्रतिश्रयं तस्मै सदा सर्वातिथिव्रती ॥ ४
ततस्ते पाण्डवाः सर्वे सह कुन्त्या नरर्षभाः ।
उपासांचक्रिरे विप्रं कथयानं कथास्तदा ॥ ५
कथयामास देशान्स तीर्थानि विविधानि च ।
राज्ञां च विविधाश्चर्याः पुराणि विविधानि च ॥ ६

ततः संप्राद्रवन्पार्थाः सह मात्रा परंतपाः ।
आगच्छन्नेकचक्रां ते पाण्डवाः संशितव्रताः । [10]
वैदिकाध्ययने युक्ता जटिला ब्रह्मचारिणः ।
अवसंस्ते च तत्रापि ब्राह्मणस्य निवेशने ।
मात्रा सहैकचक्रायां दीर्घकालं सहोषिताः ।

[(L. 1) M °गृहाः सर्वे. — (L. 3) T2 G1.4.5 इहैव; G2 न चैव (for न वै न). — (L. 5) G1 M3.6–8 परमार्थवित्. — (L. 6) G1.5 परिवार्य; G6 प्रतिवारम्. — (L. 7) G2.6 °न्नं वरं. — (L. 8) T2 G1.4 समबोधयन्; G2 अनुबोधनात्. — With lines 11–12 cf. 1. 153. 2. — (L. 13) G2 °कालं समाहिताः.]

Colophon. *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* Ś1 Ko–2.4 Ñ V1 B Da Dn1.n2 D1.2.4.5 T2 M5 बकवध (B1 एकचक्रायां बकवध); to it Ś1 Ko–2.4 Ñ V1 D1 M5 add समाप्त. — *Adhy. name:* Ko.4 D5 ब्राह्मणमहोत्सवः; K3 बकासुरवधः; Ñ1.2 V1 बकवधः. — *Adhy. no.* (figures, words or both): Dn3 (in figures) 163, and (in words) 160; D4m 166; T1 160; T2 G5.6 M 112; G1.2 113; G3 110; G4 111. — *S'loka no.:* Dn 21; M3 27. — *Aggregate s'loka no.:* Dn2 6308.

153

1 K1 D5 S om. उवाच. — [a]) B1 D2 तत्र (B1m as in text); S तदा; Cd तथा (as in text). — K3 T1 (hapl.) om. 1°–2[b]. — [c]) Ñ1 अतः परं. T2 G4–6 M तदा ब्रह्मन्; G1.3 नरव्याघ्राः; G2 द्विजश्रेष्ठ. — [d]) Ś1 K (K3 om.) Da D1.4 G3.6 M किमकुर्वत.

2 K3 T1 om. 2[ab] (cf. v. l. 1). Ś1 K1.2 D2.5 S om. उवाच. — [a]) T2 G तत्र ते न्य°. — [c]) T2 G नरव्याघ्रा (G3 °घ्र) (for परं ब्रह्म). Cd cites ब्रह्म (=वेदः).

3 [a]) D4 M कतिपयाहस्सु; T G कदाचित्काले तु. — [b]) Ko.2–4 Dn (erroneously) D2 Nilp शंसित°; K1 N3 संश्रित°. G1 ब्राह्मणाः संशितव्रताः; G2 ब्राह्मणस्य यतव्रतः. ❀ Nil.: शंसितव्रत इति तालव्यादिदन्त्यमध्यपाठे शंसा प्रशंसा संजाता यस्य तत् शंसितं व्रतं यस्य सः । प्रशस्यव्रत इत्यर्थः । ❀ — [c]) Ś1 K1 Ñ1 V1 °श्रयार्थे; K2.4 B D °र्थी; Ñ2 °ग्रहार्थी. — [d]) Ñ1.3 V1 Da Dn D1 ब्राह्मणस्य जगाम ह; S °स्यागमत्तदा (G1 °गमंस्तदा).

4 [a]) G3 संयमात् (for स सम्यक्). T G1.4–6 तु; G3 तान्; M3 (both) तु and तं. — D1 (hapl.) om. 4[b]–5[c]. — [b]) Ñ1.3 V1 B D विप्रं (for विद्वान्). Ś1 ब्रह्मर्षभस्. G1.2 विद्वान्ब्रह्मर्षिसत्तमान् (G2 °मः). — K2 om. 4[cd]. — [d]) S तथा (T2 G1.6 तदा). Ñ1.2 V1 B Da Dn D2 °तिथिव्रतः; D4 T1 °तिथिप्रियः; T2 G4–6 °तिथिवेशी; G1.2 M °तिथीन्प्रति.

5 D1 om. 5[abc] (cf. v. l. 4); K2 reads 5 after 9[ab]. — [b]) Ś1 K1 नरर्षभ. S कुंती च भरतर्षभ. — [d]) Ñ2 V1 B Da Dn D1.4 कथयंतं; D2 T G (except G3.4) M3.5 °यंतः. N1.2 V1 B D शुभाः; G2–4 तथा; G5 (both) तथा and तदा.

6 [a]) N (except Ñ3) च (for स). — [b]) Ñ2.3 V1 B D (except D5) सरितस्तथा (Ñ3 °दा). — Ś1 K1 Ñ1 G3 (hapl.) om. 6[cd]. — [c]) Ñ2 V1 B D (except D5) T G1.4–6 राज्ञश्च. Ñ2 V1 B D (except D5) °धाश्चर्यान्; T1 G1.4–6 °धाकारान्; G2 °धान्देशान्. — [d]) Cf. 6[b]. Ñ2 V1 B D (except D5) देशांश्चैव पुराणि च; T2 G2.4–6 M3.5 पुराणि च वनानि च.

स तत्राकथयद्विप्रः कथान्ते जनमेजय ।
पाञ्चालेष्वद्भुताकारं याज्ञसेन्याः स्वयंवरम् ॥ ७
धृष्टद्युम्नस्य चोत्पत्तिमुत्पत्तिं च शिखण्डिनः ।
अयोनिजत्वं कृष्णाया द्रुपदस्य महामखे ॥ ८
तदद्भुततमं श्रुत्वा लोके तस्य महात्मनः ।
विस्तरेणैव पप्रच्छुः कथां तां पुरुषर्षभाः ॥ ९
कथं द्रुपदपुत्रस्य धृष्टद्युम्नस्य पावकात् ।
वेदिमध्याच्च कृष्णायाः संभवः कथमद्भुतः ॥ १०
कथं द्रोणान्महेष्वासात्सर्वाण्यस्त्राण्यशिक्षत ।
कथं प्रियसखायौ तौ भिन्नौ कस्य कृतेन च ॥ ११
एवं तैश्चोदितो राजन्स विप्रः पुरुषर्षभैः ।
कथयामास तत्सर्वं द्रौपदीसंभवं तदा ॥ १२

इति श्रीमहाभारते आदिपर्वणि त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

१५४

ब्राह्मण उवाच ।
गङ्गाद्वारं प्रति महान्बभूवर्षिर्महातपाः ।
भरद्वाजो महाप्राज्ञः सततं संशितव्रतः ॥ १
सोऽभिषेक्तुं गतो गङ्गां पूर्वमेवागतां सतीम् ।
ददर्शाप्सरसं तत्र घृताचीमाप्लुतामृषिः ॥ २
तस्या वायुर्नदीतीरे वसनं व्यहरत्तदा ।

C. 1. 6330
B. 1. 166. 3
K. 1. 180. 3

---

7 [a]) Dn1. n3 तथा (for तत्र). — [c]) Ñ2. 3 V1 B5. 6 D4 पंचालेषु. — [d]) M5 °सेनीस्वयं°.

8 [a]) T1 द्रोणस्य (for चोत्पत्तिम्). — [b]) T1 चोत्पत्तिं; T2 G द्रोणस्य (for उत्पत्तिं). — [d]) K1 G3 महामते.

9 [a]) G1. 3. 6 तम् (for तद्). K1 D2 °मिमं; D4 °मिदं (for °तमं). K1 दृष्टे (for श्रुत्वा). — [b]) K2. 4 तस्य लोके (by transp.); K3 ब्राह्मणस्य. T G पांडवाः सत्यविक्रमाः (G2 °वास्ते महाबलाः). — After 9[ab], K2 reads 5. — [d]) K3 तां कथां (by transp.); K4 Ñ1. 2 V1 B D (except D5) कथां ते (or कथांते); cf. 7[b]. Ś1 K1 Ñ3 मनुजर्षभं (Ñ3 °भाः); Ko. 2-4 D5 मनुजोत्तमाः; M5 भरतर्षभाः.

10 Before 10, Ś1 Ko. 1 T2 G1. 4-6 M6-8 ins. पांडवाः; K2-4 Ñ V1 B D पांडवा ऊचुः. — [b]) T1 संभवः (for पाव°). — [cd]) A few N MSS. वेदी°. S संभवो वेदिमध्ये (M °ध्यात्) च (T1 G2 तु) कथं कृष्णा व्यजायत.

11 [a]) G2 द्रोणो. T1 G2 M5 महेष्वासः. — [b]) T1 om. 11[b]. Ś1 K D5 सर्वास्त्राण्युपशिक्षत (K1-3 °क्षितः; D5 °क्षतः); T2 G °शिक्षयत्. — After 11[ab], S ins.:

1675* धृष्टद्युम्नो महेष्वासः कथं द्रोणस्य मृत्युदः ।
[T1 om. prior half.]

— [c]) Ñ V1 B (except B1) D (except D2. 4. 5) विप्र सखायौ; T1 G2. 3 प्रियसहायौ. — [d]) K2 तु; Ñ1. 2 V1 B D (except D5) T2 वा (for च). G (except G1. 3) कृतेनच.

12 Before 12, Ś1 K1-3 D2. 5 S (except T1) ins. वैशं°; Ñ1. 2 V1 B Da Dn D1. 4 वैशं° उ°. — [a]) Ś1 K1 M5 संचोदितो; Ko D5 तैर्नो°; K3 संनो°; Ñ3 वै चो°; G1 तैः क्रोधितो. S विप्रो (for राजन्). — [b]) D1 विप्रश्च; T G राजन्स; M पांडवैः. D1 पुरुषर्षभः; G3. 5 (*inf. lin.*) °र्षभाः; M भरतर्षभ (M6. 7 °भैः). — [d]) M6-8 द्रौपद्याः सं°. Ś1 T1 तथा.

Colophon om. in T G2. 3. 5. — *Major parvan:* G1. 4. 6 M संभव° (for आदि°). — *Sub-parvan:* Ko अंगारपर्ण; Ñ1. 2 V1 B5 चैत्ररथ; to it Ko Ñ1. 2 V1 B5 add द्रौपदीसंभव. Ś1 K1. 2. 4 Ñ3 B6 Da Dn1. n2 D1. 2. 5 (all om. the sub-parvan name) mention only द्रौपदीसंभव (B6 Da D1. 2 संभव). — *Adhy. name:* Ko. 4 D5 पांडवप्रश्नः; K3 द्रौपदीसंभवकथनं. — *Adhy. no.* (figures, words or both): Dn3 164; D4m 167; G1 114; G4 112; G6 M 113. — *S'loka no.:* Dn M3 12. — *Aggregate s'loka no.:* Dn2 6320.

154

☞ Many of the foll. st. recur (often with v. l.) in adhy. 121–122 and 128.

1 Ś1 K1 S om. उवाच. — Cf. 1331*. — [a]) G4 गतो (for महान्). — [b]) T2 G4. 5 बभूव स; G3 बहुवर्ष (for बभूववर्षिर्). — [c]) A few MSS. भार°. K (except K1) D5 महातेजाः. — [d]) Ko. 2. 3 B6 Dn1. n3 D1 शंसित°; K1 D5 संश्रित°.

2 Cf. 1331*. — [a]) Ś1 K1 Dn2. n3 (both latter erroneously) G1-3 Nilp ततो (for गतो). — [b]) T1 G1 M नदीं (for सतीम्); see below for T1. — 2[cd] var.)

C. 1. 6880
B. 1. 166. 3
K. 1. 180. 3

अपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥ ३
तस्यां संसक्तमनसः कौमारब्रह्मचारिणः ।
हृष्टस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ॥ ४
ततः समभवद्द्रोणः कुमारस्तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः ॥ ५
भरद्वाजस्य तु सखा पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत्सुतः ॥ ६
स नित्यमाश्रमं गत्वा द्रोणेन सह पार्षतः ।
चिक्रीडाध्ययनं चैव चकार क्षत्रियर्षभः ॥ ७
ततस्तु पृषतेऽतीते स राजा द्रुपदोऽभवत् ।
द्रोणोऽपि रामं शुश्राव दित्सन्तं वसु सर्वशः ॥ ८
वनं तु प्रस्थितं रामं भरद्वाजसुतोऽब्रवीत् ।
आगतं वित्तकामं मां विद्धि द्रोणं द्विजर्षभ ॥ ९

राम उवाच ।

शरीरमात्रमेवाद्य मयेदमवशेषितम् ।
अस्त्राणि वा शरीरं वा ब्रह्मन्नन्यतरं वृणु ॥ १०

द्रोण उवाच ।

अस्त्राणि चैव सर्वाणि तेषां संहारमेव च ।
प्रयोगं चैव सर्वेषां दातुमर्हति मे भवान् ॥ ११

ब्राह्मण उवाच ।

तथेत्युक्त्वा ततस्तस्मै प्रददौ भृगुनन्दनः ।
प्रतिगृह्य ततो द्रोणः कृतकृत्योऽभवत्तदा ॥ १२
संप्रहृष्टमनाश्चापि रामात्परमसंमतम् ।
ब्रह्मास्त्रं समनुप्राप्य नरेष्वभ्यधिकोऽभवत् ॥ १३

---

1. 121. 3^{cd}. — ^{c}) T1 सतीं ददर्शाप्सरसं. — ^{d}) K1 निशि; G2 मुनिः (for ऋषिः).

3 3^{ab}=(var.) 1. 121. 4^{ab}. — ^{b}) K1 वसने. T2 G (except G1.3) व्याहर°. Ko.3.4 D2.5 M वासो व्य(Ms.3 ह्य)पहर°. — For 3^{cd} cf. 1334*. — ^{d}) Ñ1.2 V1 B D (except D1) तदा (for ततः).

4 Cf. 1334*. — ^{a}) Ś1 K1.2 Ñ1.3 T1 G3 M5 तस्य (for तस्यां). G3.6 संरक्त°. — ^{b}) K3 T1 G2.3 कौमारव्रत°. — After 4^{ab}, G2.4 ins.:

1676* पश्यतो योनिसंस्थानमन्यावयवसौष्ठवम् ।

— 4^{cd}=(var.) 1. 121. 4^{cd}. — ^{c}) Ñ2 V1 B D (except D5) चिर° (for हृष्ट°). T2 G1.3.6 तस्य रेतस्तु च°. — ^{d}) Ś1 Ko.1 D1 T1 G2.4.5 आददे.

5 =(var.) 1. 121. 5. — ^{c}) Ś1 T2 G4 transp. स and च. — ^{d}) G3 कृत्स्न° (for सर्व°).

6 =(var.) 1. 121. 8. — G3 (hapl.) om. 6-8. — ^{a}) Ś1 T1 G2 भार°. K1 G2 च (for तु). T2 G1.4-6 °द्वाजसखा ह्यासीत्. — ^{d}) Ś1 K1 तथा (for तदा).

7 =(var.) 1. 121. 9. — G3 om. 7 (cf. v. l. 6). — ^{b}) K4 पार्थिव; G2 पार्षदः. — ^{d}) Ś1 K1 भरतर्षभ; Ko.3 चरितव्रतः; M6.8 °र्षभ.

8 G3 om. 8 (cf. v. l. 6). — 8^{ab}=(var.) 1. 121. 10^{ab}. — ^{b}) Ko पार्थिवो (for द्रुपदो). — For 8^{cd} cf. 1. 121. 16. — ^{d}) G2 सर्वतः (for °शः).

9 =(var.) 1. 121. 17. — ^{a}) T1 तेन (for वनं). T1 G2 सं (for तु). — ^{b}) K (except Ko) D5 °द्वाजस्त तो°. K3 ^{d}) M5 transp. विद्धि and द्रोणं. Ñ V1 B D (except D5) द्विजोत्तम; G (except G2) °र्षभं; M6-8 नरर्षभ.

10 Cf. 1. 121. 20. — K1 S (but not Ś1!) om. उवाच (G2 om. the ref.). — ^{a}) Ñ3 D5 अत्र; G3 अन्यत् (for अद्य). — ^{b}) Ñ1.2 V1 B3.5.6 D3 Dn D1.2.4 मया सम°; Ñ3 ममैतम°; D5 M3.6-8 ममेदम°; T2 G (except G3) M5 ममैतद°. — D5 om. 10^{cd}. — ^{c}) Ko-2 D1 च for the first वा, and Ś1 च for both. — ^{d}) K (except K1) अन्यतमं; Ñ3 V1 Dn D1 एकतमं; B D2.4 एकतरं; T1 अत्यंतरं; M6-8 अद्य परं. K1 M6-8 शृणु.

11 Cf. 1. 121. 21. — K1 S (but not Ś1!) om. उवाच (G2 om. the ref.). — ^{a}) G2 transp. च and एव. — ^{b}) K (except K1) ससंहाराणि भार्गव. — ^{d}) A few MSS. अहंसि. Ś1 मां; Ko.3 नो; B5 वै (for मे).

12 G2 M5-8 om. ब्राह्मण उ°. K1 वैशंपायनः; K2 Ñ3 वैशं°; T1 G3 ब्राह्मणः; T2 G1-6 रामः. — ^{ab})=(var.) 1. 121. 22^{ab}. G2 ब्राह्मणः स तथेत्युक्त्वा तस्मै च प्रददौ भृगुः. — 12^{cd}=(var.) 1. 121. 23^{ab}. — ^{c}) Ñ1.3 D5 T2 G3 M3.5 तु तत्; Ñ2 V1 Dn D1 तदा; T1 G1.4.5 तु तं; G3 च तं (for ततो). D5 सर्वं (for द्रोणः). G2 द्रोणोपि प्रतिगृह्याशु.

13 M6-8 om. 13^{a}, transp. 13^{b} and 13^{c}, and om. 13^{d}! — ^{a}) Ko.3.4 संहृष्टमनसश्चापि; Ñ V1 B D M3.5 °मना द्रोणो. — ^{b}) T G सद्यो न्यवर्तत; M6-8 °संमतात्. — ^{c}) Ñ1 Dn3 (erroneously) D1 T2 G3.6 °नुज्ञाप्य (*apapāṭha* acc. to Nīl.); Ñ2 V1 Dn1.n2 °नुज्ञाप्य. Ñ3 महास्त्रमनुसंप्रा°; M6-8 ब्रह्मास्त्राद्यनुसंप्रा°. ❀Nīl.: ज्ञाप्ये-

ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान् ।
अब्रवीत्पुरुषव्याघ्रः सखायं विद्धि मामिति ॥ १४

द्रुपद उवाच ।

नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः सखा ।
नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ॥ १५

ब्राह्मण उवाच ।

स विनिश्चित्य मनसा पाञ्चाल्यं प्रति बुद्धिमान् ।
जगाम कुरुमुख्यानां नगरं नागसाह्वयम् ॥ १६
तस्मै पौत्रान्समादाय वसूनि विविधानि च ।
प्रीताय प्रददौ भीष्मः शिष्यान्द्रोणाय धीमते ॥ १७
द्रोणः शिष्यांस्ततः सर्वानिदं वचनमब्रवीत् ।
समानीय तदा विद्वान्द्रुपदस्यासुखाय वै ॥ १८
आचार्यवेतनं किंचिद्धृदि संपरिवर्तते ।
कृतास्त्रैस्तत्प्रदेयं स्यात्तद्दतं वदतानघाः ॥ १९
यदा च पाण्डवाः सर्वे कृतास्त्राः कृतनिश्रमाः ।
ततो द्रोणोऽब्रवीद्धृयो वेतनार्थमिदं वचः ॥ २०
पार्षतो द्रुपदो नाम छत्रवत्यां नरेश्वरः ।
तस्यापकृष्य तद्राज्यं मम शीघ्रं प्रदीयताम् ॥ २१
ततः पाण्डुसुताः पञ्च निर्जित्य द्रुपदं युधि ।
द्रोणाय दर्शयामासुर्बद्ध्वा ससचिवं तदा ॥ २२

C. 1. 6349
B. 1. 166. 22
K. 1. 180. 24

स्यपपाठः । प्राप्येत्यपि पठंति । ❀ — [d]) D1.4.5 °त्वप्यधि°.

14 =(var.) 1. 122. 1. — [a]) Ko.4 आगत्य; K2.3 आगम्य (for आसाद्य). — Ko om. 14[cd]. — [c]) Ś1 K1.3 T2 G2.4.6 °व्याघ्र; D5 G1 M3.5 °ष्याग्रं; M6-8 समनुप्राप्तं.

15 =(var.) 1. 122. 9. — Ko om. द्रुपद उ°; K1 S (but not Ś1!) om. उवाच. — After 15, K4 B3 ins.:

1677* ययोरेव समं वित्तं ययोरेव समं श्रुतम् ।
तयोर्विवाहः सख्यं च न तु पुष्टविपुष्टयोः ।

[=(var.) 1. 122. 8. — (L. 1) B3 समं धनं. — (L. 2) B3 °र्विवादो मैत्री च.]

16 =(var.) 1. 122. 11. — N1.3 om. ब्राह्मण उ°; T G M3.5 om. उवाच. Ś1 K1.2 M6-8 वैशं°; B5 वैशं° उ°. — [a]) Ś1 (*sup. lin.* as in text) पूर्वं नि°; K1 सर्वं नि°; B5 परिनि°. — [b]) S (except G3) पांचालं. — [d]) Ñ3 सकाशं (for नगं°).

17 17[ab] =(var.) 1. 122. 39[cd]. — [a]) Ko पुत्रान्; T G (except G2.5) पार्थान्. T G M3 समानीय. — [b]) D5 अस्त्राणि (for वसू°). — [d]) G3.5 शीघ्रं (for शिष्यान्).

18 [a]) Ko transp. शिष्यान् and सर्वान्. Ko T1 तदा (for ततः). N2 V1 Dn पार्थान् (for सर्वान्). M °ष्यान्समाहेदं (M5 °मादाय). — M om. 18[bc]. — Cf. 1. 122. 41[ab]. — [c]) Ñ2 V1 B D (except D5) तु तान्; T G ततः (for तदा). Ñ2 V1 B5 Da Dn D1 T1 G शिष्यान् (G2 धीमान्); B1.3.5 D2.4 T2 सर्वान् (for विद्वान्). — [d]) Ś1 द्रुपदस्य सखाय वै (marg. °स्य विरोधता); K1 °दस्य विधायतां. — After 18, M (which om. 18[bc] and 19[ab]) ins.:

1678* द्रोणः ।
गुरुशुश्रूषणं चैव तथैव गुरुदक्षिणाम् ।

19 =(var.) 1. 122. 42. — M om. 19[ab]. — Before 19, T G (except G2.3) ins. द्रोणः. — [b]) Ñ V1 B D हृदि यद्वर्तते (Dn3 संवर्तते) मम; T G प्रदेयं परि°. — [c]) T G (except G1) संप्रदेयं; M3 तत्र देया (cf. 1678*). Ñ1 मे (for स्यात्). — [d]) Ñ1 नानृतं. — After 19, K4 Ñ2 V1 B D (except D5) ins.:

1679* सोऽर्जुनप्रमुखैरुक्तस्तथास्त्विति गुरुस्तदा ।;

while S ins.:

1680* तथेत्युक्त्वा च तं पार्थः पादौ जग्राह बुद्धिमान् ।

G2.4 cont.:

1681* विद्यानिष्क्रयजं वित्तं किं देयं ब्रूहि मे गुरो ।

Cf. 1679* and 1680* with 1. 122. 43.

20 G2 om. 20[ab]. — [a]) Ñ1 ये ते (for यदा). K (except K1) तु (for च). Ś1 K Ñ1 Da D5 कौर° (for पाण्ड°). M5 चान्ये (for सर्वे). — [b]) B3 कृतार्थाः. K4 Ñ2 B3.5 D (except Da) कृतनिश्चयाः; M सर्वतोभवन्. — [c]) T2 G1-3 तदा (for ततो). — [d]) M दातव्या गुरुदक्षिणा.

21 [a]) K4 पार्थिवो; D1 T2 G1.3 M5 पार्षदो. — [b]) G1 चित्रवत्यां; G2 वेत्र°; M5 शत्र°; Cd as in text. K1 महेश्वरः. — [c]) Ś1 (marg. as in text) तस्यापेक्ष्यस्य; Ko अद्यापहृत्य; K3 Ñ1.2 V1 B D M3 तस्मादा°; K4 आदाया°; N3 तस्मात्म°; T1 तस्याव°; M6-8 तत्राप°. — After 21, D4 (marg. *sec. m.*) S (except G3) ins.:

1682* धार्तराष्ट्रैश्च सहिताः पाञ्चालान्पाण्डवा ययुः ।
यज्ञसेनेन संगम्य कर्णदुर्योधनादयः ।
निर्जिताः संन्यवर्तन्त तथान्ये क्षत्रियर्षभाः ।

[G2 ins. lines 2-3 after 1683*.]

22 Cf. 1. 128. 4f. — [c]) G2 °य प्रशशंसुस्ते. — [d]) Ñ3 समुचितं तदा; G3 समधिगं तथा. — After 22, D4 (marg. *sec. m.*) S ins.:

C. 1. 6350
B. 1. 166. 23
K. 1. 180. 27

द्रोण उवाच ।
प्रार्थयामि त्वया सख्यं पुनरेव नराधिप ।
अराजा किल नो राज्ञः सखा भवितुमर्हति ॥ २३
अतः प्रयतितं राज्ये यज्ञसेन मया तव ।
राजासि दक्षिणे कूले भागीरथ्याहमुत्तरे ॥ २४
ब्राह्मण उवाच ।
असत्कारः स सुमहान्मुहूर्तमपि तस्य तु ।
न व्येति हृदयाद्राज्ञो दुर्मनाः स कृशोऽभवत् ॥ २५

इति श्रीमहाभारते आदिपर्वणि चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

1683* महेन्द्र इव दुर्धर्षो महेन्द्र इव दानवम् ।
महेन्द्रपुत्रः पाञ्चालं जितवानर्जुनस्तदा ।
तं दृष्ट्वा तु महावीर्यं फल्गुनस्यामितौजसः ।
व्यस्मयन्त जनाः सर्वे यज्ञसेनस्य बान्धवाः ।
नास्त्यर्जुनसमो वीर्ये राजपुत्र इति ब्रुवन् ।
[(L. 2) G6 M5 पांचालान्. — (L. 3) M महद्वीर्यं.]
— After the above, G2 ins. lines 2–3 of 1682*.

23 Ś1 K1 S om. उवाच (G3 om. the ref.). — 23^{ab} =(var.) 1. 128. 10^{ab}. — [a]) G2 प्रार्थये च. T1 पुनः (for त्वया). — [b]) Ś1 सह; T1 आवां (for एव). — 23^{cd} =(var.) 1. 128. 11^{ab}. — [c]) T G नाराजा. G3 खलु (for किल). Ko.3 D5 राज्ञां.

24 24^{ab}=1. 128. 11^{cd}. — [a]) D1 G2 प्रयाचितं. Ko G3 राज्यं. — [b]) Ñ2 V1 B D (except D5) त्वया सह (D4 किल) (for मया तव). M6–8 नृप (for तव). — 24^{cd}=1. 128. 12^{ab}. — [c]) T G1–3 राजासीद्दक्षिणे. G5 M3 तीरे. — [a]) Ś1 K जाह्नव्यामहं. — After 24, K (except K1) D5 ins.:

1684* तथेति द्रुपदेनोक्ते वचने द्विजसत्तम ।
संपूज्य द्रुपदं द्रोणो प्रेषयामास तत्त्ववित् ।,

which in D5 is followed by lines 1–2 of 1686* (cf. v. l. 25). On the other hand, after 24, Da ins. 1686*, while S ins.:

1685* कन्याकुब्जे च काम्पिल्ये वसेथास्त्वं नरोत्तम ।
ब्राह्मणैः सहितो राजन्नहिच्छत्रे वसाम्यहम् ।
[(L. 1) T2 G3 भजेथास्त्वं. G1 नरेश्वर; M नृपोत्तम.]

25 M om. ब्राह्मण उ°; T G3 om. उवाच. Ś1 K1.2 Ñ3 वैशं°. — Ñ2 V1 B Dn D1.2.4.5 (here lines 3–6 only) ins. after ब्राह्मण उ°: Da, after 24: K4 D5 (here lines 1–2 only), after 1684*:

1686* एवमुक्तो हि पाञ्चाल्यो भारद्वाजेन धीमता ।
उवाचाखविदां श्रेष्ठो द्रोणं ब्राह्मणसत्तमम् ।
एवं भवतु भद्रं ते भारद्वाज महामते ।
सख्यं तदेव भवतु शश्वद्यदभिमन्यसे ।
एवमन्योन्यमुक्त्वा तौ कृत्वा सख्यमनुत्तमम् । [5]
जग्मतुर्द्रोणपाञ्चाल्यौ यथागतमरिंदमौ ।

[Before line 1, Da ins. वैशं° उ°. — (L. 2) B3.5.6 Da D1.2.4 श्रेष्ठं. — (L. 4) K4 °ख्यं तदभवत्ते वै.]
— [a]) Ś1 D4 तु; K B5 D5 T1 G1.3 च; T2 G4.5 सु (for स). Ś1 K1 Ñ2 V1 Da Dn D1 G2 तु; G5 स (for सु-). — [b]) Ś1 K1.3 इव (for अपि). K3 सः; G2 च (for तु). — After 25^{ab}, T1 ins.:

1687* निशम्य तस्य वचनं कृत्वा मनसि दुर्मनाः ।
— [c]) Ko.3.4 Ñ2 V1 B D नापैति; K1 G2 न वेति; G1 सर्वेति; M न व्यैति. Ñ1 तेन (for राज्ञो).

एतदिच्छाम्यहं श्रोतुं यथावत्तद्ब्रूहि मे ॥ ३
य एष गन्धर्वपते पूर्वेषां नः पुरोहितः ।
आसीदेतन्ममाचक्ष्व क एष भगवानृषिः ॥ ४

गन्धर्व उवाच ।
तपसा निर्जितौ शश्वदजेयावमरैरपि ।
कामक्रोधावुभौ यस्य चरणौ संववाहतुः ॥ ५
यस्तु नोच्छेदनं चक्रे कुशिकानामुदारधीः ।
विश्वामित्रापराधेन धारयन्मन्युमुत्तमम् ॥ ६
पुत्रव्यसनसंतप्तः शक्तिमानपि यः प्रभुः ।
विश्वामित्रविनाशाय न मेने कर्म दारुणम् ॥ ७
मृतांश्च पुनराहर्तुं यः स पुत्रान्यमक्षयात् ।
कृतान्तं नातिचक्राम वेलामिव महोदधिः ॥ ८
यं प्राप्य विजितात्मानं महात्मानं नराधिपाः ।
इक्ष्वाकवो महीपाला लेभिरे पृथिवीमिमाम् ॥ ९
पुरोहितवरं प्राप्य वसिष्ठमृषिसत्तमम् ।
ईजिरे क्रतुभिश्चापि नृपास्ते कुरुनन्दन ॥ १०

C. 1. 6643
B. 1. 174. 11
K. 1. 190. 12

---

only तापत्य (K₃ तपत्याख्यान; M₃.₅ तापत्योपाख्यान); to it Ś₁ Ko–₃ Ñ₃ B₆ Dn D₁.₂.₄.₅ T₂ G₁ M₃.₅ add समाप्त (K₃ संपूर्ण); Ñ₁.₂ V₁ तपत्युपाख्यानसमाप्ति. — *Adhy. name:* Ko.₄ तपतीप्राप्तिः; M₃.₅ संवरणविवाहः. — *Adhy. no.* (figures, words or both): Dn₃ 172; D₄m 175; T₁ 171; T₂ G M 123 (G₁ 125; G₃ 122). — *S'loka no.:* Dn 50; M₃ 28.

164

1 Ś₁ K (except Ko) D₂.₅ S om. उवाच. — ᵇ) T₁ G₁.₂ तथा (for तदा). A few MSS. °र्षभः. — ᵉ) D₄ परम- (for परया). K₄ Ñ₂ V₁ B₁.₃ Dn D₁.₅ भक्त्या; M₇ भीत्या.

2 ᵃ) T₂ G₄–₆ महाप्राज्ञो; G₁ महीपालो (for महे°). — ᵉ) Ś₁ कौतूहलं ममातीव; Ś₁m Ko.₂–₄ कौतूहलपरोतीव (Ko वीर); K₁ कौतूहलयुतो° (sic). — ᵈ) D₅ °हुं श्रुतवान्यदा.

3 Before 3, D₄.₅ ins. अर्जुन उ°; S अर्जुनः. — ᵃ) Ñ₂ V₁ Dn M₅–₈ तस्य; T₁ G₁–₃ M₃ कस्य (for यस्य). — ᵇ) D₄.₅ त्वयोदितं; G₄ समी°; G₅ तवे°. — ᵈ) T₁ G₁–₃ M यथावत्तद्र(M₃.₅ °वत्प्रब्र)वीहि मे.

4 ᵃ) T G₁.₂.₅.₆ स; G₄ क (for य). T₂ G₅.₆ एव (for एष). — ᵉ) B₃ चैतन्; T₁ G₂ एनं. Ś₁ K₁ समाचक्ष्व. — ᵈ) Ko.₄ °ष ऋषिसत्तमः. — After 4, D₅ ins.:

1747* सुभिक्षं राज्यं लब्धं वै वसिष्ठस्य तपोबलात् ।

5 Ś₁ K₁ S om. उवाच. — After गन्धर्व उ° (resp. its v. l.), Ñ₁.₂ V₁ D (except Da) S ins.:

1748* ब्रह्मणो मानसः पुत्रो वसिष्ठोऽरुन्धतीपतिः ।

— ᵉ) Ś₁ K₁ G₃ तस्य. — After 5, Ñ₂ V₁ ins.:

1749* इन्द्रियाणां वशकरो वशिष्ठ इति चोच्यते ।;

while S (except G₃ M₅) ins.:

1750* यथा कामश्च क्रोधश्च निर्जितावजितौ नरैः ।
जितारयो जिता लोकाः पन्थानश्च जिता दिवः ।

6 ᵃ) Ś₁ K Ñ₃ स; S (except T₂ G₅) च (for तु).

7 ᵇ) Ñ₂ V₁ B D (except D₂.₅) °नप्यशक्तवत्. — ᵈ) K₁.₂ (both marg.) Ñ₂ V₁ B D (except D₅) T₁ न चक्रे. T₂ G₄–₆ मेने कर्म न (T₂ G₅ सु·) दारुणं.

8 ᵃ) T₁ G₁–₃ M₆–₈ आनेतुं; Cd आहर्तुं (as in text). — ᵇ) Ko.₃ Ñ₂ V₁ B₅.₆ Dn₂ D₄.₅ S शक्तः (for यः स). — ᵉ) Ñ₁ °तं नाक्रमदसौ.

9 ᵃ) Ñ₁ विदिता°; B₁ (m as in text) Da₁m Cd Arjp विश्रुता°; G₁ पूजिता°. — ᵇ) Ñ₁ विदितात्मब्रा°; G₁ वसिष्ठमृषिसत्तमं. — ᵉ) Ko.₂ Ñ₁.₃ B₁m T₂ G₄–₆ M ऐक्ष्वा°.

10 ᵃ) Ñ₂ V₁ B D (except D₄) M₃ °हितमिमं (D₂ °तमनु-). — ᵉ) Ñ₁.₂ V₁ B D (except Da₁ D₅) M₃.₅ चैव (for चापि). — ᵈ) Ś₁ कुरुवर्धन; D₅ °सत्तम.

11 ᵇ) Ś₁ K₁ °वींस्तान्नृपसत्त°; B₅ °तिनंदनान्. — ᵉ) M₃.₅ महर्षिः. G₃ पार्थिव°. — After 11, T G (except G₃) ins.:

C. 1. 6644
B. 1. 174. 12
K. 1. 190. 13

स हि तान्याजयामास सर्वान्नृपतिसत्तमान् ।
ब्रह्मर्षिः पाण्डवश्रेष्ठ बृहस्पतिरिवामरान् ॥ ११
तस्माद्धर्मप्रधानात्मा वेदधर्मविदीप्सितः ।
ब्राह्मणो गुणवान्कश्चित्पुरोधाः प्रविमृश्यताम् ॥ १२
क्षत्रियेण हि जातेन पृथिवीं जेतुमिच्छता ।
पूर्वं पुरोहितः कार्यः पार्थ राज्याभिवृद्धये ॥ १३
महीं जिगीषता राज्ञा ब्रह्म कार्यं पुरःसरम् ।
तस्मात्पुरोहितः कश्चिद्गुणवानस्तु वो द्विजः ॥ १४

इति श्रीमहाभारते आदिपर्वणि चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

१६५

अर्जुन उवाच ।
किंनिमित्तमभूद्वैरं विश्वामित्रवसिष्ठयोः ।
वसतोराश्रमे पुण्ये शंस नः सर्वमेव तत् ॥ १
गन्धर्व उवाच ।
इदं वासिष्ठमाख्यानं पुराणं परिचक्षते ।
पार्थ सर्वेषु लोकेषु यथावत्तन्निबोध मे ॥ २
कन्यकुब्जे महानासीत्पार्थिवो भरतर्षभ ।
गाधीति विश्रुतो लोके सत्यधर्मपरायणः ॥ ३
तस्य धर्मात्मनः पुत्रः समृद्धबलवाहनः ।
विश्वामित्र इति ख्यातो बभूव रिपुमर्दनः ॥ ४
स चचार सहामात्यो मृगयां गहने वने ।
मृगान्विध्यन्वराहांश्च रम्येषु मरुधन्वसु ॥ ५
व्यायामकर्शितः सोऽथ मृगलिप्सुः पिपासितः ।
आजगाम नरश्रेष्ठ वसिष्ठस्याश्रमं प्रति ॥ ६

1751* तथा वसिष्ठेन सह सौदासः संगतस्तदा ।
रक्षोभिर्विप्रयुक्तस्तु विश्वामित्रेण योजितैः ।
तथा द्विजसहायाद्वै न गन्धर्वा न राक्षसाः ।
शक्ताः प्रार्थयितुं वीर मनसापि महाबलाः ।

12 [a]) T1 G4 °ब्रह्मप्र°; T2 G4.5 °प्रधानस्तु. — [b]) S वेदशास्त्रवि° (T2 G4.5 °दीपितः; G6 °प्रदीपितः). — [c]) T1 G2 ज्ञान° (for गुण°). — [d]) Ñ1 प्रविमृग्य°; Ñ2 V1 B (B3 marg.) Dn D1.2.4 प्रतिदृश्य° (B3 orig. प्रतिमृग्य°); Da प्रतिपाद्य°; D5 G3 परिगृह्य°; T1 G2 परिमृश्य°; T2 G1.4-6 M परिमृग्य° (M5 प्रतिगृह्य°).

13 [a]) Ñ2 V1 B (except B1) D T1 G2 °येणाभि- (D2 °याणां हि); T2 G5.6 °ण तु; G3 °णापि; G4 °णानु-. — [d]) S राज्यविवृ°.

14 [a]) Ś1 K D5 विजयता; N3 °षया. Ñ1 G5 जिगीषतां राज्ञां. — [b]) S पुरस्कृतं. — [c]) T1 G1-3 M विद्वान् (for कश्चिद्). — [d]) Ñ1.2 V1 B D °णवान्विजितेंद्रियः; Cd as in text. — After 14, K4 Ñ1.2 V1 B D ins.:

1752* विद्वान्भवतु वो विप्रो धर्मकामार्थतत्त्ववित् ।
[K4 Ñ1 B3.6 Da D4.5 °र्थमोक्षवित्.]
an addition which was lacking in the text of Dev.!

Colophon om. in D4 T2 G1,4-6. — *Major parvan:* G2.3 M संभव° (for आदि°). — *Sub-parvan:* Ñ1.2 V1 चैत्ररथ; T1 संभव. Ś1 K Ñ3 B1.3.5 Da D2 (all om. the sub-parvan name) mention only वासिष्ठ (K3 वसिष्ठोपाख्यान). — *Adhy. name:* Ko D5 वसिष्ठमाहात्म्यं; K4 वसिष्ठवाक्यं. — *Adhy. no.* (figures, words or both): Dn3 173; T1 172; G2 M 124; G3 123. — *S'loka no.:* Dn1.n2 15; M3 16. — *Aggregate s'loka no.:* Dn2 6619.

165

1 Ś1 K1 S om. उवाच. — [c]) G6 वसिष्ठस्याश्रमे. Ñ1.3 T1 G1-3 M रम्ये; Ñ2 V1 B D दिव्ये; T2 G4-6 तत्र (for पुण्ये). — [d]) S तत् (for नः) and मे (for तत्).

2 Ś1 K1 S om. उवाच. — [b])=1. 13. 6[b]. D1 संप्रचक्ष°; M5 परिवर्त°. — [c]) K2.3 काले° (for लोके°). — [d]) Ñ3 यथावृत्तं निबो°.

3 [a]) Ñ V1 D4 S कन्याकु°; B D5 काम्य°. — [d]) Ñ2 V1 B D (except D5) कुशिकस्यात्मसंभवः.

4 K1 om. 4[a]. — [d]) T2 G5.6 रिपुनाशनः.

5 [a]) B3 (m as in text) बभूव. Ś1 सहामात्यं; K4 D1 G1 M5 महा°; G2 समा°. Ñ1 विश्वामित्रस्तु सामात्यो. — [b]) T2 G4.5 °यां स महावने; G3 °गयासुर्महावने. — [c])=1. 166. 2[c]. T G (except G1) निघ्नन् (for विध्यन्). — [d]) D4 समेषु; T2 G4-6 चचार (for रम्ये°).

तमागतमभिप्रेक्ष्य वसिष्ठः श्रेष्ठभागृषिः ।
विश्वामित्रं नरश्रेष्ठं प्रतिजग्राह पूजया ॥ ७
पाद्यार्घ्याचमनीयेन स्वागतेन च भारत ।
तथैव प्रतिजग्राह वन्येन हविषा तथा ॥ ८
तस्याथ कामधुग्धेनुर्वसिष्ठस्य महात्मनः ।
उक्ता कामान्प्रयच्छेति सा कामान्दुदुहे ततः ॥ ९
ग्राम्यारण्या ओषधीश्च दुदुहे पय एव च ।
षड्रसं चामृतरसं रसायनमनुत्तमम् ॥ १०
भोजनीयानि पेयानि भक्ष्याणि विविधानि च ।
लेह्यान्यमृतकल्पानि चोष्याणि च तथार्जुन ॥ ११
तैः कामैः सर्वसंपूर्णैः पूजितः स महीपतिः ।
सामात्यः सबलश्चैव तुतोष स भृशं नृपः ॥ १२
षडायतां सुपार्श्वोरुं त्रिपृथुं पञ्चसंवृताम् ।
मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम् ॥ १३

C. 1. 6661
B. 1. 175. 14
K. 1. 191. 16

6 [a]) A few MSS. °कर्षितः. T2 G (except G8) व्यायामार्तः स तु तदा. — [b]) G1 °लिप्सामुपागतः. — [c]) K2.4 G3.4 M5 °श्रेष्ठः; Ñ3 रथश्रेष्ठ; T2 G5.6 रथिश्रेष्ठः; G1 नृपश्रेष्ठः; M8 नरव्याघ्र.

7 [a]) D2 आयांतं (for आगतं). T2 G4–6 वसिष्ठस्तु स तं दृष्ट्वा. — [b]) K3 D2 T1 G1 श्रेष्ठवागृ°; B5 श्रेष्ठतापसः; D1 G2 °वानृषिः. T2 G4–6 राजर्षिमतिथिं तदा. — [c]) Ś1 K नृपश्रेष्ठं; T2 G4–6 सशिष्यो वै.

8 [a]) Ñ2.3 V1 Dn D1 °नीयैस्तं; B Da D2.4.5 M5 °नीयैस्तु (B5 M5 °श्च); T2 G4–6 पाद्येनार्घ्यप्रदानेन. — [b]) T2 G4–6 तं नृपं (for भारत). — [c]) K2 Ñ1.2 V1 B D (except D1) परिजग्राह. T2 G4–6 प्रतिजग्राह धर्मात्मा. — [d]) K1 Ñ2 V1 B1.6 Dn8 D1.4 T2 G4–6 तदा; T1 G1–3 M (except M5) मुनिः.

9 [a]) T2 G4–6 तस्यैव. G4 कामधेनुस्तु. — [c]) K3 D1 उक्तान्का°. T2 G5.6 उक्ता नंदिनि धत्स्वेति. — [d]) Ś1 K D5 transp. सा and कामान्. Ñ2 V1 B1.3(m as in text).6 D (except D5) G4 दुह्यते. Ñ2 V1 B Da Dn1 D1.2.4.5 G4.5 सदा; Dn2.n3 T2 G6 तदा. — After 9, S ins.:

1753* बाष्पाढ्यस्यौदनस्यैव राशयः पर्वतोपमाः ।
निष्टाक्षानि च सूपांश्च दधिकुल्यास्तथैव च ।
कूपांश्च घृतसंपूर्णान्भक्ष्याणां राशयस्तथा ।
भोजनानि महार्हाणि तत्र तत्र सहस्रशः ।
इक्षून्मधु च लाजांश्च मैरेयांश्च वरासवान् । [5]
वस्त्राणि च महार्हाणि कम्बलानि सहस्रशः ।

[T1 G2.4 ऊष्माढ्य°; G1 उष्णाढ्य°; M3.5 सबाष्प°. — (L. 2) T1 G2 सृष्टान्ना°; G4 सुष्ठ्वन्ना°. — (L. 3) T2 G3–6 दधि° (for घृत°). T2 G4–6 गुडानां (for भक्ष्याणां). — (L. 4) G1 व्यंजनानि; M भाजनानि. T1 G2 M6–8 गौळान्नानि; G3 सगौळानि; M3.5 रौप्यादीनि (for तत्र तत्र). — (L. 5) T1 G2 ऐक्षवान्मधुलाजां°; G1 °न्मधूनि लाजां°.]

10 [a]) D5 T1 °रण्यान्. Ś1 Ñ2 V1 B5 Da Dn D1.4 चौषधीश्च; Ko Ñ3 औष°; D5 G2 औषधींश्च; G1 M6–8 औषधीस्तु. T2 G4–6 °रण्यौषधांश्चैव; M3.5 °रण्यानि दिव्यानि. — [b]) M3.5 (*inf. lin.* as in text) पक्वापक्वानि सर्वशः. — [c]) Ś1 K Ñ2.3 B6 Da Dn D1.5 °मृतनिभं (K1 °मिदं); B1.3 D2 °मृतप्रख्यं; G2 °मृतोपेतं. — [d]) G4 रसास्वादम्; Cd as in text.

11 [a]) Ś1 पानानि; Ko.3.4 D5 भक्ष्याणि (for पेया°). — [b]) Ko.3.4 D5 लेह्यानि (for भक्ष्या°). — [c]) Ko.3.4 D5 चोष्याणि (for लेह्या°). — [d]) Ś1 K1 दूष्याणि; Ko.3.4 D5 पेयानि; T G (except G1) शोष्याणि (for चोष्या°). T1 G1–3 M तथा पुनः. — After 11, K4 Ñ1.2 V1 B D ins.:

1754* रत्नानि च महार्हाणि वासांसि विविधानि च ।
[B1 D2 रुचिराणि (for विवि°).]

12 [a]) G4–6 °संपन्नैः. T G1–3 M यस्य यस्य यथाकामं. — [b]) Ñ2 V1 B3.5 Dn D1.4 च; B1 D2 तु (for स). T1 G2 स स तेन सुतर्पितः. — K3 om. 12[cd]. — [c]) Ś1 K1.2 सगण° (for सबल°). T2 G4–6 तत्र (for चैव). — [d]) Ñ1 Da T2 G5.6 M3.5 सुभृशं; D2.4 G3 M6–8 सदृशं; G1 च भृशं. K1 ततः; K4 पुनः; Ñ2 V1 B5 Da Dn1.n2 D1 T2 G1.3–6 M (except M3) तदा (for नृपः). T1 G2 तर्पितस्तोषितो भृशं. — After 12, K4 (marg.; om. lines 3 and 6) D5 ins.:

1755* शिरो ग्रीवा सक्थिनी च सास्नापुच्छमहस्तनाः ।
शुभान्येतानि धेनूनामायतानि प्रचक्षते ।
पृथुभिः पञ्चभी रज्जैः समावृत्तां षडायताम् ।
ललाटं श्रवणे चैव नयनद्वितयं तथा ।
पृथून्येतानि शस्यन्ते धेनूनां पञ्च सूरिभिः ।
मण्डूकस्यैवमुच्छूने * * यस्याः षडायताम् ।

13 [a]) Ñ2 V1 Dn D1.2.4 T G Arjp षडुन्नतां; Cd as in text. Ś1 K1 सुपार्श्वां तां; G3 त्रिपार्श्वीं°. — [b]) N (including Cd) पृथुपंचसमावृतां (Ko.2.3 Dn D1.4.5 °वतां).

14 [a]) K4 G3.6 M6.8 °लधीं. Ś1 K1 G1 M6–8 °कर्णीं. — [b]) K1 Ñ1 B (except B5) Da1 D2.5 °शृंगीं. Ñ1 T1

C. 1. 6662
B. 1. 175. 14
K. 1. 191. 16

सुवालधिं शङ्कुकर्णां चारुशृङ्गां मनोरमाम् ।
पुष्टायतशिरोग्रीवां विस्मितः सोऽभिवीक्ष्य ताम् ॥ १४
अभिनन्दति तां नन्दीं वसिष्ठस्य पयस्विनीम् ।
अब्रवीच्च भृशं तुष्टो विश्वामित्रो मुनिं तदा ॥ १५
अर्बुदेन गवां ब्रह्मन्मम राज्येन वा पुनः ।
नन्दिनीं संप्रयच्छस्व भुङ्क्ष राज्यं महामुने ॥ १६

वसिष्ठ उवाच ।

देवतातिथिपित्रर्थमाज्यार्थं च पयस्विनी ।
अदेया नन्दिनीयं मे राज्येनापि तवानघ ॥ १७

विश्वामित्र उवाच ।

क्षत्रियोऽहं भवान्विप्रस्तपःस्वाध्यायसाधनः ।
ब्राह्मणेषु कुतो वीर्यं प्रशान्तेषु धृतात्मसु ॥ १८
अर्बुदेन गवां यस्त्वं न ददासि ममेप्सिताम् ।
स्वधर्मं न प्रहास्यामि नयिष्ये ते बलेन गाम् ॥ १९

वसिष्ठ उवाच ।

बलस्थश्चासि राजा च बाहुवीर्यश्च क्षत्रियः ।
यथेच्छसि तथा क्षिप्रं कुरु त्वं मा विचारय ॥ २०

गन्धर्व उवाच ।

एवमुक्तस्तदा पार्थ विश्वामित्रो बलादिव ।
हंसचन्द्रप्रतीकाशां नन्दिनीं तां जहार गाम् ॥ २१
कशादण्डप्रतिहता क्रोश्यमाना ततस्ततः ।
हम्भायमाना कल्याणी वसिष्ठस्याथ नन्दिनी ॥ २२

मनोहरां. T2 G4–6 पीनश्रोणिपयोधरां. — c) Ko. 2. 3 B3 G1 Arjp अष्टां°; T1 G2. 3. 6 स्पष्टां°; T3 G4. 5 अत्यां°; Cd as in text. — After 14abe, T1 G2. 4 ins.:

1756* सुपुष्टाङ्गीं सुयोनिकाम् ।
संभृतोभयपार्श्वोरूं दीर्घवालां पृथूदराम् ।
दृष्ट्वा गृष्टिमृषेर्भूपो.

— d) Ś1 K (except K4) गां (for तां). T1 G2. 4 विस्मयाविष्टचेतनः (G2 °कृष्टचेतसः).

15 a) K1 Ñ1 S अभ्यनंदत्स तां (T2 G4–6 °त्सदा) नंदीं (T1 G2 अभ्यनंदन्नंदिनीं तां); K2 अभिनंदत तां नं°; K4 अभिवीक्ष्याथ तां नं°; Ñ2 V1 Da Dn D1 अभिनंद्य स तां राजन् (Ñ2 V1 राजा); B D2. 4. 5 नंदिनीमभ्यनंदत्तां (D2 °मभिनंद्याथ). — b) Cf. 31b. Ñ2 V1 D (except D2. 4. 5) नंदिनीं गाधिनंदनः; Ñ1 T2 G5. 6 °स्य यशस्विनीं; T1 G2. 4 °स्याग्निहोत्रिणीं. — c) Ko. 3. 4 D5 हृष्टो (for तुष्टो). — d) K4 T2 G3–5 ऋषिं (for मुनिं). Ś1 प्रति (for तदा). K2. 3 Ñ1. 3 G6 °मित्र ऋषिं तदा; Ñ2 V1 B Da Dn D1. 4 स राजा तमृषिं तदा; D2 स राजा मुनिसत्तमं.

16 Before 16, T1 G1. 2 M6–8 ins. विश्वामित्रः. — b) T1 G1. 3 M इमां; T2 G4–6 तथा (for मम). — c) K3 Ñ1 T1 G1–3 M मे (for सं·).

17 Ś1 K1 S om. उवाच. — b) K (except K1) B (except B6) Da D5 T1 G2 इज्यार्थं; Ñ V1 Dn D4 याज्या°; T2 G1. 4–6 होमा°. K1 B3 T1 M5 यशस्विनी. — c) Ñ2 V1 B D °नीयं वै; T2 G4–6 °नी चेयं.

18 Ś1 K1 S om. उवाच. — After विश्वा° (resp. its v. l.), D4 (marg. sec. m.) S ins.:

1757* रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः ।

— d) Ko. 3. 4 °षु कृतात्मसु; Dn1 D1 °ष्वधृता°; T1 G2 °षु जिता°; G5 M5 °षु महा°.

19 a) G3 च; G4 त्वत् (for यस्). K3 D1 तु; G4 नो (for त्वं). — b) G4 ददासीह (for न ददासि). K3 मयेप्सि°; K4 Ñ2 V1 B6 Da Dn D5 T2 G1–3. 5 °प्सितं; Ñ3 B1. 3 D1. 2. 4 यथेप्सितं. — G3 om. 19c–20d. — d) Ñ2 V1 B D G4 नेष्यामि च; G2 ह्यानयिष्ये; G4 स नेष्येते. — After 19, T G (except G3) ins.:

1758* क्षत्रियोऽस्मि न विप्रोऽहं बाहुवीर्योऽस्मि धर्मतः ।
तस्माद्बुजबलेनेमां हरिष्यामीह पश्यतः ।

20 Ś1 K1 S om. उवाच (G3 om. the ref.). — After वसिष्ठः, T G (except G2. 3) ins.:

1759* अत्र हव्यं च कव्यं च प्राणयात्रा तथैव च ।
आयत्तमग्निहोत्रं च आतिथ्यं च न संशयः ।
बहुना किं प्रलापेन न दास्ये कामदोहिनीम् ।

[(L. 1) T2 G1. 5 transp. हव्यं and कव्यं.]

— G3 om. 20 (cf. v. l. 19). — a) Ko. 3. 4 बलवान्; K2 सैन्यस्थः. T1 G3 चापि; M5 अपि हि. — b) T2 G1. 4–6 पार्थिवः (for क्षत्रियः). T1 G2 वीर्यवान्क्षत्रजीविकः; M वीर्यवांस्त्वं नृपोत्तम. — d) Ñ2 V1 B D (except D5) G1. 4 transp. त्वं and मा. — After 20, T G (except G1. 3) ins.:

1760* रत्नद्वयं ब्राह्मणस्य नापहार्यं नृपैर्भुवि ।
अग्निहोत्री च गौः पत्नी प्रजारणिरनुत्तमा ।

21 Ś1 K S om. उवाच (M3 om. the ref.). — a) Ś1 ततः; Ñ V1 B6 Dn D5 तथा. — b) G1 बलाधिकः. — d) T1 G2. 3 M (except M5) transp. तां and गां. T2 G1. 4–6 वै (for तां). — After 21, D4 (marg. sec. m.)

आगम्याभिमुखी पार्थ तस्थौ भगवदुन्मुखी ।
भृशं च ताड्यमानापि न जगामाश्रमात्ततः ॥ २३

वसिष्ठ उवाच ।

शृणोमि ते रवं भद्रे विनदन्त्याः पुनः पुनः ।
बलाद्धियसि मे नन्दि क्षमावान्ब्राह्मणो ह्यहम् ॥२४

गन्धर्व उवाच ।

सा तु तेषां बलान्नन्दी बलानां भरतर्षभ ।
विश्वामित्रभयोद्विग्ना वसिष्ठं समुपागमत् ॥ २५

गौरुवाच ।

पाषाणदण्डाभिहतां क्रन्दन्तीं मामनाथवत् ।
विश्वामित्रबलैर्घोरैर्भगवन्किमुपेक्षसे ॥ २६

गन्धर्व उवाच ।

एवं तस्यां तदा पार्थ धर्षितायां महामुनिः ।
न चुक्षुभे न धैर्याच्च विचचाल धृतव्रतः ॥ २७

वसिष्ठ उवाच ।

क्षत्रियाणां बलं तेजो ब्राह्मणानां क्षमा बलम् ।

C. 1. 6676
B. 1. 175. 29
K. 1. 191. 81

S (except G4, which om. 22) ins.:

1761* सा तदा ह्रियमाणा च विश्वामित्रबलैर्बलात् ।

22 G4 om. 22. — 22^{ab} = (var.) 33^{ab}. — [a]) Ko. 2.3 Ñ2 V1 B1 D2 °प्रणुदिता; K1 G3 °प्रमृदिता; K4 Dn3 °प्रभृतिभिः; Ñ1 कशाग्रदंडचुदिता (cf. 33^{ab}); Ñ3 T1 G2 M °प्रचुदिता; B3 °प्रतुदिता; Da2 °प्रतिहतां; Dn1. n2 D3 °प्रणुदितां; D1 °प्रतुदितां; T2 G1. 5. 6 °प्रहारैश्च. — [b]) K4 Dn3 ताड्यमाना; Ñ2 V1 Dn1. n2 °मानाम्; T2 G3 (corrupt) ताड्यमाना (G5 °नाम्). Ñ2 V1 Dn1. n2 G3 इतस्ततः; T1 G2. 3 यत°. — [c]) D2 जृंभायमाणा; D4 M हुंभा°; D5 रंभा°; T1 G2. 3 हुंफा°; Arjp हंवा°; Cd as in text. T2 G1. 5. 6 ह्रियमाणा तथा (G5 ततस्) तेन.

23 [a]) Ś1 K1 °भिमुखं; T2 G2 °भिमता; G3 उद्यम्याभिमता; G4 °म्याथाब्रवीत्. — [b]) Ś1 K1 तस्याभवदुदङ्मुखी; Ko. 2–4 स्थिताभवदुदङ्मुखी; D2 तथौ दुःखादवाङ्मुखी; B5 °स्थौ विनदनोन्मु°. — [c]) T1 G2 सुभृशं (for भृशं च). G4 सं- (for च). Ñ2 V1 B D (except D4. 5) वै (for अपि). G1. 5. 6 °शं संतप्यमा°; M5 °शं सा कड्यमा°. — [d]) D4. 5 तदा (for ततः). — After 23, T1 G2 ins.:

1762* बलानि तेषां निर्धूय छित्वा पाशनिबन्धनम् ।;

while T2 G1. 4–6 ins.:

1763* आश्रमान्नैव गच्छन्ती हुम्भारावैर्ननाद च ।

N. B. The sequence from 23^{cd} onwards in T1 G2 is 23^{cd}, 1762*, 25^{cd} (om. 25^{ab} altogether), 26, 24, 28, 26^{ab} (repeated), 1766*, 27, 29, 30 etc.; in G1. 4. 5, 23^{cd}, 1763*, 25, 26^{ab}, 1766*, 24, 26 (G4. 5 om. 26^{ab}, but G1 repeats it), 27 etc.

24 T2 G6 transp. 24 and 25. For sequence of T1 G1. 2. 4. 5 cf. v. l. 23. — Ś1 K1 S om. उवाच. — [a]) K3. 4 T2 G2 वरं (for रवं). — [b]) Ko नदंत्या वै; K1 विरुदंत्याः; T2 G1. 4. 5 निन°; G6 रुदंत्या वै; M3. 5 मां क्रंदंत्या. S मुहुर्मुहुः (for पुनः पुनः). — For B1. 3 D1. 2 see below. — [c]) T2 G1. 5. 6 प्रयासि (for ह्रियसि). Ś1 K1 वत्से (for नन्दि). K2 गृह्यसे मे बलान्नंदि; Ñ1. 2 V1 B5. 6 D (for D1. 2 see below) ह्रियसे त्वं बलाद्भद्रे; M3. 5 बलाद्धि ह्रियसे नंदि. — Ñ1. 2 V1 B5. 6 Da Dn D4. 5 ins. after 24^c: B1. 3 D1. 2 (all om. the first half) subst. for 24^c:

1764* विश्वामित्रेण नन्दिनि । किं कर्तव्यं मया तत्र.

[For the latter half Ñ1 reads 24^c.]

After 24, T1 G2 read 28 (cf. v. l. 23, 24).

25 T1 G2 om. 25^{ab}; T2 G6 transp. 24 and 25; For the sequence of T1 G1. 2. 4. 5 cf. v. l. 23. S om. गन्धर्व उ°; Ś1 K1 om. उवाच. — After गन्धर्व उ°, Ñ1 B5 ins.:

1765* अथैनां नन्दिनीं भूयो विश्वामित्रस्य सैनिकाः ।
सर्वतः समकाल्यन्त कशापाषाणपाणयः ।

— [a]) Ñ1. 2 V1 B D सा भयान्नंदिनी तेषां. — [b]) Ś1 K (except Ko) पुरुषर्षभ. — D1 om. 25^{cd}. — [d]) K3 B5 Da D4. 5 °गता.

26 T1 G4 om. गौरु°; G3 M om. उवाच. T2 नंदिनी; G1. 5. 6 नंदी; G2 कामधेनुः (for गौरु°). — For the sequence of T1 G1. 2. 4. 5 cf. v. l. 23. — [a]) Ñ2 V1 B1. 3. 6 D कशाग्रदंडा°; B5 कशादंडप्रतिहतां; G6 पाषाणदंडैर्निहतां; Cd as in text. — [b]) K3 रुदंतीं माम्; Ñ2 V1 B6 Dn D1. 5 M3. 5 क्रोशंतीं माम्; D2 क्रंदमानाम्. — G1. 4. 5 ins. after 26^{ab}: T1 G2, after the repetition of 26^{ab}:

1766* उपेक्षसे कथं ब्रह्मन्भक्तां पादाब्जसेविनीम् ।

— [cd]) T1 G2 गाधिजेन (G2 गाधेयाति-) बलान्नीतां बलवान्किमु°.

27 For the sequence of T1 G2 cf. v. l. 23. Ś1 K1 S om. उवाच. — [a]) K2 T2 G (except G2. 3) तथा (for तदा). Ñ2 V1 B D (except Da D5) नंदिन्यामेवं (Dn1. n3 D1 °व) क्रंदंत्यां. — [b]) G3 तदा (for महा-). — [c]) G3 M3. 5 स (for the second न). Ñ1. 2 V1 B D तदा धैर्यान् (for न धैर्याच्च). Ko. 3. 4 चुक्षुभे न स वै धैर्यान्; T2 G4–6 न चाक्षुभ्यत धै°. — [d]) Ko. 3. 4 Ñ1. 2 V1 B D T1 M3 न (for वि-). T2 G1. 4–6 नैव कोपं समादधे.

C.-1. 6676
B. 1. 175. 29
K. 1. 191. 31

क्षमा मां भजते तस्माद्गम्यतां यदि रोचते ॥ २८

गौरुवाच ।

किं नु त्यक्तास्मि भगवन्यदेवं मां प्रभाषसे ।
अत्यक्ताहं त्वया ब्रह्मन्न शक्या नयितुं बलात् ॥२९

वसिष्ठ उवाच ।

न त्वां त्यजामि कल्याणि स्थीयतां यदि शक्यते ।
दृढेन दाम्ना बद्धैष वत्सस्ते ह्रियते बलात् ॥ ३०

गन्धर्व उवाच ।

स्थीयतामिति तच्छ्रुत्वा वसिष्ठस्य पयस्विनी ।
ऊर्ध्वाञ्चितशिरोग्रीवा प्रबभौ घोरदर्शना ॥ ३१

क्रोधरक्तेक्षणा सा गौर्हम्भारवघनस्वना ।
विश्वामित्रस्य तत्सैन्यं व्यद्रावयत सर्वशः ॥ ३२
कशाग्रदण्डाभिहता काल्यमाना ततस्ततः ।
क्रोधदीप्तेक्षणा क्रोधं भूय एव समादधे ॥ ३३
आदित्य इव मध्याह्ने क्रोधदीप्तवपुर्बभौ ।
अङ्गारवर्षं मुञ्चन्ती मुहुर्वालधितो महत् ॥ ३४
असृजत्पह्लवान्पुच्छाच्छकृतः शबराञ्शकान् ।
मूत्रतश्चासृजच्चापि यवनान्क्रोधमूर्च्छिता ॥ ३५
पुण्ड्रान्किरातान्द्रमिडान्सिंहलान्बर्बरांस्तथा ।
तथैव दरदान्म्लेच्छान्फेनतः सा ससर्ज ह ॥ ३६

---

28 Śi1 K1 S om. उवाच (T1 om. the ref.). T1 G2 read 28 after 24 (cf. v. l. 23). — a) G6 वीर्यं (for तेजो). — b) Ñ1.3 Dn3 T1 G2.3 M transp. क्षमा and बलं. — c) B D2 मे; M (except M3) मा (for मां). B D2 वव्रृणे (for भजते). Ñ1.2 V1 Dn D2.5 T2 G3–6 यस्माद्. — After 28, T1 G2 *repeat* 26ab, which is followed by 1766* (cf. v. l. 26).

29 T1 G2 read 29 after 27 (cf. v. l. 23). — K1 T1 G1 M om. उवाच; G3 om. the ref. Ñ2 V1 B5.6 D (except D2.5) नंदिन्युवाच; T2 G4–6 नंदिनी; G2 कामधेनुः (for गौरु°). — b) Śi1 K1.3.4 सं; Ñ2 V1 B6 D3 Dn D1 त्वं (for मां). B1.3.5 D2.4 त्वया ब्रह्मर्षिसत्तम. — c) B5 अमुक्ता°; T2 G5 नास्यक्ता°; G2.4.6 न त्यक्ता°. — d) Śi1 K न शक्या नेतुमंजसा (Ko °मोजसा); Ñ2 V1 B D नेतुं शक्या न वै बलात्; T1 G2 नेतुं शक्या बलान्न हि; T2 G1.4–6 शक्या नेतुं बलादितः.

30 Śi1 K1.3 S om. उवाच. — b) G1 रोच° (for शक्य°). — c) Ko D2 T1 G2 एव (for एष). — d) Śi1 K1 अपि (for ते). Śi1 आह्रियते; M नीयते. — After 30, S ins.:

1767* येन केनाप्युपायेन त्वया वत्सो निवार्यताम् ।

31 Śi1 K1 S om. उवाच (G3 M3.5 om. the ref.). — b) Cf. 15b. D4 T2 G5 M3 (*inf. lin.* as in text) यशस्विनी. — c) D5 ऊर्ध्वीकृत°; Cd as in text. — d) T1 G2 सा बभौ; G1.4.5 प्रभावाच्. Ñ1.3 S चारु°; Ñ2 V1 B D रौद्र°.

32 a) D5 क्रोधदीप्ते°. — b) N3 Da °राव°; B6 हंबा°; D4 हुंभा°; T1 °स्वनैः; T2 G3–6 हुंफारवघनैः स्वनैः; G1 हुंभारावघनैः स्वनैः; G2 हुंफारवघनस्वनैः; M हुंभाराव(M3.5 °रव)घनस्वनैः. — c) K4 विद्रावयति; D4 द्रावयामास; T1 G2.3 प्राद्रा°; G5 विद्रा°; M6–8 प्रद्रा°.

33 33ab=(var.) 22ab. — a) Śi1 K1.2 कषा(K2 °शा)दंडप्रतुदिता; Ko.3.4 कशादंड(K4 °डैः)प्रव्यथिता; Ñ1 अभ्रदंडप्रणिहिता; B1.6 कषाग्र° (B1m पाषाण°); B5 कशादंडप्रतिहता. — b) Cf. 32a. Ñ1.2 V1 B D T1 G2.3 M क्रोधरक्तेक्षणा (D2 °णात्). Dn3 D4.5 सा गौः (for क्रोधं). — c) Śi1 पुनरेव; Dn3 D4.5 क्रोधं भूयः (for भूय एव). Ko समाययौ; Ñ1.2 V1 B5.6 Dn1.n2 D1.4 T2 G1.2.5 °ददे.

34 b) Ko.3.4 दीप्तरश्मिवपुर्यथा. — c) T1 बालव्यजनवीजनैः; T2 G4–6 मुहुर्वातान् (G4 °र्वैषं; G6 °र्वातं) मुखाद्गमत्; G2 बालव्यसनजीविनैः; G3 मुहुर्ज्वालाधिकं महत्; M मुहु(M5 बहु)र्बालधिनो (M3 °ना) महत्. — After 34, Śi1 K1 ins. an additional colophon.

35 Before 35, Śi1 K1 ins. गंधर्वः (cf. v. l. 34). — a) D5 स बहून्; T1 M पल्लवान्; T2 G पह्लवान्. G1 म्लेच्छान् (for पुच्छात्). — b) Ñ V1 B D S प्रस्रवात् (for शकृतः); see below. Ñ2 V1 B D द्राविडान् (for शबरान्). — After 35ab, Ñ2 V1 Dn S ins.:

1768* योनिदेशाच्च यवनाञ्छकृद्देशाच्छकांस्तथा ।
[Ñ2 V1 Dn °ञ्छकृतः शबरान्बहून्]

— c) K (except K1) M सासृज°; G3 ससृजुश्च. Ñ1 म्लेच्छान्; Ñ2 V1 B3 कांश्चित्; B1.5.6 D कांचीन् (Dn1 कांचिं; Dn2 कांचीत्; Dn3 कांश्चीत्) (for चापि). — After 35abc, K4 ins.:

1769* बर्बरांश्चैव पार्श्वतः ।
प्राणतः प्रासृजच्चेयं.

— d) T2 G1.3–6 M नंदिनी (for यवनान्); cf. 1768*. Ko.2 Ñ1 °मूर्च्छितान्. Ñ2 V1 B D शबरां(B5 शरवां-; Dn2 D4.5 शरभां)श्चैव पार्श्वतः; T1 G2 म्लेच्छानांध्रसिंलिंध्रकान्.

36 a) K4 मुंद्रान्; Ñ1.2 V1 B D पौंड्रान्; G3 आंध्रान्.

तैर्विसृष्टैर्महत्सैन्यं नानाम्लेच्छगणैस्तदा ।
नानावरणसंछन्नैर्नानायुधधरैस्तथा ।
अवाकीर्यत संरब्धैर्विश्वामित्रस्य पश्यतः ॥ ३७
एकैकश्च तदा योधः पञ्चभिः सप्तभिर्वृतः ।
अस्त्रवर्षेण महता काल्यमानं बलं ततः ।
प्रभग्नं सर्वतस्त्रस्तं विश्वामित्रस्य पश्यतः ॥ ३८
न च प्राणैर्वियुज्यन्त केचित्ते सैनिकास्तदा ।
विश्वामित्रस्य संक्रुद्धैर्वासिष्ठैर्भरतर्षभ ॥ ३९
विश्वामित्रस्य सैन्यं तु काल्यमानं त्रियोजनम् ।
क्रोशमानं भयोद्विग्नं त्रातारं नाध्यगच्छत ॥ ४०

दृष्ट्वा तन्महदाश्चर्यं ब्रह्मतेजोभवं तदा ।
विश्वामित्रः क्षत्रभावान्निर्विण्णो वाक्यमब्रवीत् ॥४१
धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम् ।
बलाबलं विनिश्चित्य तप एव परं बलम् ॥ ४२
स राज्यं स्फीतमुत्सृज्य तां च दीप्तां नृपश्रियम् ।
भोगांश्च पृष्ठतः कृत्वा तपस्येव मनो दधे ॥ ४३
स गत्वा तपसा सिद्धिं लोकान्विष्टभ्य तेजसा ।
तताप सर्वान्दीप्तौजा ब्राह्मणत्वमवाप च ।
अपिबच्च सुतं सोममिन्द्रेण सह कौशिकः ॥ ४४

C. 1. 6695
B. 1. 175. 48
K. 1. 191. 60

इति श्रीमहाभारते आदिपर्वणि पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

K (except K1) Ñ1 G3 द्रविडान्; Ñ2 V1 B D यवनान्. — [b]) K4 G3 transp. सिंह° and बर्ब°. T1 G2 तुलुष्कान् (for सिंह°). M5 मालवान्. Ñ2 V1 B3 Dn1 D1.2 खसान्; B1.5.6 Da Dn2.n3 D4.5 खशान्; G3 तदा. — After 36[ab], Ñ2 V1 B D ins.:

1770* चिबुकांश्च पुलिन्दांश्च चीनान्हूणान्सकेरलान् ।

— [c]) Ñ1 शबरान्; Ñ3 T2 G1.3–5 M6–8 दर्दरान्; G6 बर्बरान्; M3 दर्दुरान्; M5 बर्बुरान् (for दरदान्). Ñ2 V1 B D ससर्ज फेनतः (B1 Da शकृतः) सा गौः; T1 G2 पारसीकांश्च सिंहांश्च. — [d]) K4 योनि°; G3 पार्श्व°; M5 क्षीर°; M6–8 फेनकान् (for फेन°). Ś1 संससर्ज सा. Ñ2 V1 B D म्लेच्छान्बहुविधानपि.

37 [a]) K3 B1.6 Dn3 D1.2 G3 महासैन्यं; Ñ V1 B3 Dn1.n2 D4.5 महासैन्यैर्. — [b]) Ś1 Ko B1.5 D4.5 T G M5 तथा (for तदा). — G5 om. 37[cd]. — [c]) B1 T2 G1.3.4 नानाभरण°. — [d]) T2 G1.4 °युधशतैस्; G6 °युधशरैस्. T1 G2 अपि; G6 तदा. — [e]) Ś1 S (except T1 G4) अवकी°. D5 तत्सैन्यं; T1 G2.3 M संनद्धैर्. — [f]) = 38ᵃᵇ. D5 संरब्धै° म्लेच्छकोटिभिः. — After 37, T1 ins. 1771* (cf. v. l. 38).

38 D1 om. 38; T1 reads 38 after line 17 of a passage given in App. I (No. 97). — [a]) K4 एकैकः स; S °कैकशस्. T2 G1.4–6 तस्य; G3 तथा (for तदा). Da योधैः; D5 S योधाः. — [b]) D5 S वृताः. — [c]) K (except K1) Ñ1.3 T2 G1.4.6 M शस्त्र°; G3 शर°. T1 G2 महता शरवर्षेण. — [d]) Ñ1 मथ्यमानं; Ñ2.3 V1 B D (D1 om.) T2 G1.4–6 वध्य°; T1 G2.3 M हन्य°. K2 हि तत्; Ñ2.3 V1 B D (D1 om.) तदा. — [e]) K2 Ñ1 G3 M सर्वशस्. Ś1 तत्र (for त्रस्तं). K1 °भं सर्वशस्त्रैस्तु; Ñ3 °भं सर्वशस्त्रं हि; T1 G2 °भं सर्वशस्त्राणि; T2 G1.5 °भदर्पं संत्रस्तं; G4.6 °भं दर्पसत्रस्तं. — S ins. after 38 (T1, after 37):

1771* तस्य तच्चतुरङ्गं वै बलं परमदुःसहम् ।
प्रभग्नं सर्वतो घोरं पयस्विन्या विवर्जितम् ।

39 [a]) T1 G1.4.5 स्म (for च). K1.2 Ñ3 G2.4 M3.5 व्ययुज्यंत; K3 Ñ2 V1 B D °ज्यंते; K4 व्यमुंचंत; Ñ3 विमुच्यंत. — [b]) K1 ततः (for तदा). Ñ1 B3 Da D1.2.4 केचित्तत्रापि सैनिकाः; Ñ2 V1 B1.3.5 Dn D5 °चित्तत्रास्य सैनिकाः; Ñ3 किंचित्ते सैनिकं तदा; S तदा (G3 तत्र) केचन सैनिकाः. — D1 om. 39°–41[b]; K3 om. 39[cd]. — [c]) G4 वैश्वामित्रैश्च. Ś1 K (K3 om.) Ñ1.3 G3 संक्रुद्धा. — [d]) Ś1 K1 वासिष्ठी; Ko Ñ1.3 G3 वासिष्ठा; K2.4 वसिष्ठा; G2 वासिष्ठो. G4 चैव भारत (for भर°). — After 39, Ś1 K1.4 Ñ1.2 V1 B (except B1) Dn D4 (om. posterior half).5 ins.:

1772* सा गौस्तत्सकलं सैन्यं कालयामास दूरतः ।

40 D1 om. 40 (cf. v. l. 39); D4 om. 40[a]. — [a]) Ñ2.3 V1 B D (D1.4 om.) तत्सैन्यं (for सैन्यं तु). — [cd]) M5 °नं मृशोद्विग्नं त्रा° नाधिगच्छति. — A passage given in App. I (No. 97) is ins. in D4 (marg. *sec. m.*) T2 G (except G3) after 40, in T1 after 41[ab]. — In T1 G2 this passage is followed by a *repetition* of 41[ab].

41 D1 om. 41[ab] (cf. v. l. 39). — [a]) G6 transp. दृष्ट्वा and तत्. M6–8 तु (for तन्). — [b]) Ko.4 T1 G2.3 M °तेजोऽद्भवं बलं (Ko.4 तदा); T2 G1.4–6 °तेजोबलं बलं (= 42[b]). — After 41[ab], T1 ins. a passage given in App. I (No. 97). — [c]) Ś1 क्षत्रबलान्.

१६६

C. 1. 6696
B. 1. 176. 1
K. 1. 192. 6

गन्धर्व उवाच ।
कल्माषपाद इत्यस्मिँल्लोके राजा बभूव ह ।
इक्ष्वाकुवंशजः पार्थ तेजसासदृशो भुवि ॥ १
स कदाचिद्वनं राजा मृगयां निर्ययौ पुरात् ।
मृगान्विध्यन्वराहांश्च चचार रिपुमर्दनः ॥ २
स तु राजा महात्मानं वासिष्ठमृषिसत्तमम् ।
तृषार्तश्च क्षुधार्तश्च एकायनगतः पथि ॥ ३
अपश्यदजितः संख्ये मुनिं प्रतिमुखागतम् ।

---

42 [b]) Śi Ks Ñi °तेजोद्भवं बलं (cf. v. l. 41[b]); Ko. 2. 3 m. 4 °तेजो महद्बलं; Ñs °तेजो वरं बं. — [c]) Ko. 3. 4 D2 S बलाबले. — [d]) Ñi Gi Ms-8 transp. परं and बलं. Ds महत् (for परं).

43 [a]) Śi Ki दीप्तं; G2 स्थितं (for स्फीतं). Gs स्वराज्यस्थितमुं. — [b]) B Ds दृप्तां (for दीप्तां). — [d]) Ñ2 Di S (except Ms. 5) तप एव. Ti Gi. 2 समा° (for मनो). T2 Gs-8 ददे.

44 [a]) Śi transp. स and गत्वा. Ñi स लब्ध्वा तपसः सिं. — [c]) T G Ms-8 लोकांश्च (for दीप्तौजा). Ms ततान सर्वलोकांश्च; Ms °प दीप्तवीर्यौजा. — [d]) G2 Ms-8 ह; Ms सः (for च). Ñ2 Vi Bs. 6 D (except Ds) °त्वमवाप्तवान्. — [e]) K4 Ñ2 Vi B D ततः; Ti G2-4 हुतं; Gi स्तुतं; Cd सुतं (as in text). Śi °बस्सततं सो°; Ki पिबश्च सततं सो°. — After 44, S ins.:

1773* एवंवीर्यस्तु राजर्षिर्विप्रर्षिः संबभूव ह ।

Colophon om. in T2 Gs-6. — *Major parvan*: Gi. 2 M संभव° (for आदि°). — *Sub-parvan*: Ñi. 2 Vi चैत्ररथ, followed by वासिष्ठ; Ti संभव. Śi Ki-3 Ñs B Da Dni. n2 Di. 2. 4. 5 (all om. the sub-parvan name) mention only वासिष्ठ (Ki कौशिक; M वसिष्ठोपाख्यान). — *Adhy. name*: Ko. 4 वसिष्ठ (K4 om. it) धेनुहरणं. — *Adhy. no.* (figures, words or both): Dns 174; D4m 176; Ti 173; Gi 126; G2 124; M 125. — *S'loka no.*: Dni. n2 47; Ms 52. — *Aggregate s'loka no.*: Dn2 6666.

166

Before 1, D4 (marg. *sec. m.*) S (Gs om. lines 3-6; D4 M om. lines 7) ins.:

1774* अर्जुनः ।
ऋष्योस्तु यत्कृते वैरं विश्वामित्रवसिष्ठयोः ।
बभूव गन्धर्वपते ब्रूहि तत्सर्वमेव च ।
माहात्म्यं च वसिष्ठस्य ब्राह्मण्यं ब्रह्मतेजसः ।
विश्वामित्रस्य च तथा क्षत्रियस्य महात्मनः ।
न शृण्वानस्त्वहं तृप्तिमुपगच्छामि खेचर । [5]
आख्याहि गन्धर्वपते विचित्राणीह भाषसे ।
माहात्म्यं च वसिष्ठस्य विश्वामित्रस्य भाषसे ।

[D4 अर्जुन उ°. — (L. 2) Ms-8 शंस (for ब्रूहि). G2 M मे (for च). — (L. 4) Ti G2 ब्राह्मण्यं ब्राह्ममेव च; Gi. 4 Ms. 5 क्षत्रस्य च महा°. — (L. 6) Ti G2 सत्कथासारमेव च; T2 Gi. 3. 4. 6 शंस (T2 G6 ब्रूहि) तत्सर्वमेव मे (for विचित्रा° etc.). — (L. 7) Ti G2 विचित्राणि च; Gs. 6 विचित्राणीह (for विश्वा°).]

1 Śi Ki S om. उवाच. — After गन्धर्वः (resp. its v. l.), D4 (marg. *sec. m.*) S *repeat* (with variation) 1. 165. 2 (v. l.: पुण्यमुत्तमं for परिचक्षते, and विश्रुतं वि- for यथावत्तन्). — [a]) Ñ2 Vi B D (except Ds) एवं (for अस्मिन्). — [c]) S इक्ष्वाकूणां कुले जातः. — [d]) Śi Ki तेजसाप्रतिमो. — After 1, Ti Gs ins.:

1775* नास्ति तत्र महाराज वैश्वानरसमद्युतेः ।

2 [a]) Ki Ti Gi. 2 M वने. Ti Gi. 2 M रम्ये (for राजा). — [b]) Śi Ki Ñi पुरा (for पुरात्). S मृगयामचरद्बली. — [c])=1. 165. 5°. Ti Gi. 2 M निघ्नन् (for विध्यन्). — [d]) Śi Ki °मर्दन; S रिपुसूदनः. — After 2, Ks. 4 Ñi. 2 Vi B D ins.:

1776* तस्मिन्वने महाघोरे खड्गांश्च बहुशोऽहनत् ।
हत्वा च सुचिरं श्रान्तो राजा निववृते ततः ।

Ks. 4 Ñi. 2 Vi B D cont.: Śi Ko. 1 Ñs ins. after 2:

1777* अकामयत्तं याज्यार्थे विश्वामित्रः प्रतापवान् ।

[Śi Ko. 1. 3. 4 °यत. Cd cites याज्यार्थे. Śi Ko. 1. 4 °मित्रस्य पश्यतः.]

3 Gs om. 3[ab]. — [a]) Śi K (except Ks) च (for तु). — [b]) Di मुनि° (for ऋषि°). — [c]) Ds transp. तृषा° and क्षुधा°. Ñi Da Di. 2. 4 तृष्णार्तश्च; S स तृष्णा (Ms. 5 °षा) र्तः. — [d]) Śi K अप्येकायन° (Ks °काकी स); T2 G2. 5 एकयान°.

4 [c]) Here and below N spells the name (mostly) as शक्रि-. Here, only Ko. 4 Bi. 6 Da2 शक्रि; but cf.

शक्तिं नाम महाभागं वसिष्ठकुलनन्दनम् ।
ज्येष्ठं पुत्रशतात्पुत्रं वसिष्ठस्य महात्मनः ॥ ४
अपगच्छ पथोऽस्माकमित्येवं पार्थिवोऽब्रवीत् ।
तथा ऋषिरुवाचैनं सान्त्वयञ्श्लक्ष्णया गिरा ॥ ५
ऋषिस्तु नापचक्राम तस्मिन्धर्मपथे स्थितः ।
नापि राजा मुनेर्मानात्क्रोधाच्चापि जगाम ह ॥ ६
अमुञ्चन्तं तु पन्थानं तमृषिं नृपसत्तमः ।
जघान कशया मोहात्तदा राक्षसवन्मुनिम् ॥ ७
कशाप्रहाराभिहतस्ततः स मुनिसत्तमः ।
तं शशाप नृपश्रेष्ठं वासिष्ठः क्रोधमूर्च्छितः ॥ ८
हंसि राक्षसवद्यस्माद्राजापसद तापसम् ।
तस्मात्त्वमद्य प्रभृति पुरुषादो भविष्यसि ॥ ९
मनुष्यपिशिते सक्तश्चरिष्यसि महीमिमाम् ।
गच्छ राजाधमेत्युक्तः शक्तिना वीर्यशक्तिना ॥ १०
ततो याज्यनिमित्तं तु विश्वामित्रवसिष्ठयोः ।
वैरमासीत्तदा तं तु विश्वामित्रोऽन्वपद्यत ॥ ११
तयोर्विवदतोरेवं समीपमुपचक्रमे ।
ऋषिरुग्रतपाः पार्थ विश्वामित्रः प्रतापवान् ॥ १२
ततः स बुबुधे पश्चात्तमृषिं नृपसत्तमः ।
ऋषेः पुत्रं वसिष्ठस्य वसिष्ठमिव तेजसा ॥ १३
अन्तर्धाय तदात्मानं विश्वामित्रोऽपि भारत ।
तावुभावुपचक्राम चिकीर्षन्नात्मनः प्रियम् ॥ १४
स तु शप्तस्तदा तेन शक्तिना वै नृपोत्तमः ।
जगाम शरणं शक्तिं प्रसादयितुमर्हयन् ॥ १५

C. 1. 6714
B. 1. 176. 19
K. 1. 192. 25

---

other ref. below. K2 शक्रणं सुमहा°. — a) Ñ2 V1 B Da Dn D1.2.4 °कुलवर्धनं. — e/) Ñ2 V1 B D transp. पुत्रश° and पुत्रं. T1 G2 °शतानां च वासिष्ठानां °त्मनां.

5 b) M6-8 एनं (for एवं). — c) Ś1 K Ñ1.3 तथैवर्षिर्; S स चाप्यृषिर्. K (except K1) B (except B3) D2 T G2-5 इदं (for एनं). — After 5, Ko.3.4 Ñ1.2 V1 D (except Da) S ins.:

1778* मम पन्था महाराज धर्म एष सनातनः ।
राज्ञा सर्वेषु धर्मेषु देयः पन्था द्विजातये ।

[Before line 1, S ins. शक्तिः. — (L. 2) Ko.3.4 S धर्मेण (for सर्वेषु). Ko संकल्पाद्; K3.4 संकल्प्य; T1 G2.5 संदिष्टो; T2 G1.3.6 M संकल्पो; G4 सदृष्टो (for धर्मेषु).] K2 Ñ1.2 V1 Dn D1.2.4.5 cont.; B Da ins. after 5:

1779* एवं परस्परं तौ तु पथोऽर्थं वाक्यमूचतुः ।
अपसर्पापसर्पेति वागुत्तरमकुर्वताम् ।

6 Before 6, S ins. गंधर्वः. — K1 lacuna for 6a. — a) D5 शक्तिस्तु; T1 G2 स ऋषिर्. Ś1 यत्तु शक्तिर्महाभागः (marg. *sec. m.* न चोवाच मुनिः किंचित्). — b) K2 तीर्थपथे; Ñ1 धर्मपथि; Ñ3 °र्थे पथि; G3 ब्रह्मपथे; Cd as in text. — c) S om. न. G4 तु तत् (for मुनेः). B5 D4 वाक्यात्; T G (except G3.5) मार्गात्; Cd मानात् (as in text). — d) B3 कोपाच्च; B5 D4.5 क्रोधं च; S क्रोधान्न (G1 °धेन). K2 Ñ1.3 B5 (m as in text) Da1 S अप-; Ñ2 V1 B1.6 Da2 Dn1.n2 D1 अथ (for अपि).

7 b) S (except M3) ऋषिं नृपतिसत्तमः. — G2 (hapl.) om. 7c-13b. — c) Here and below Ś1 K1 Da कषा- for कशा-. — a) S (G2 om.) नृपो (for तदा).

8 G2 om. 8 (cf. v. l. 7). — b) S (G2 om.) राजानं (for ततः स). Ś1 K1-3 Ñ1.3 D5 मुनिपुंगवः; S (G2 om.) ऋषिसं°. — c) Ko transp. तं and शशाप. T1 रुषाविष्टो (for नृप°).

9 G2 om. 9 (cf. v. l. 7). Before 9, T G1.3-6 M6-8 ins. शक्तिः. — a) T2 G1.5.6 यन्मां (for यस्माद्). G4 हंसि राजन्स्वयं यन्मां. — b) K1 S °पशद.

10 G2 om. 10 (cf. v. l. 7). — a) Ś1 K1 G3 मानुष्य°; D1.5 T1 °विशिता-. Ś1 K1 मत्तः (for सक्तः). — d) Ś1 K B1 Da शक्रिणा.

11 G2 om. 11 (cf. v. l. 7). — a) T G1.4.5 तत्र (T1 यत्र) मार्ग°; G3.6 M6-8 तत्र राज्य°. Cd cites याज्यः. — b) T G1.4.5 भूपवासिष्ठयोस्तदा (T1 °योर्यदा). — c) T2 G4-6 यदा. Ko.4 D4 तत्र; K3 G3 तत्तु. — d) S (G2 om.) °त्रोन्वविंदत (M3.5 °त्रोभ्यपद्यत). Cd cites अनुपद्यत.

12 G2 om. 12 (cf. v. l. 7). — a) T G (G2 om.) M5 एव (for एवं). — c) Ś1 (*sup. lin.* as in text) °रात्ततपाः; Ñ1 °स्रश्रवाः.

13 G2 om. 13a-b (cf. v. l. 7). — b) Ś1 K1 G5 M6-8 °सत्तम. — c) G1.3 ऋषिपुत्रं. T1 G2 transp. ऋषेः पुत्रं and वसिं°. — d) Ś1 K (except K2) °द्दृसमतेजसं.

14 a) Ko.4 तमात्मा°; K2 Ñ2 V1 B (except B3) D (except D2) ततोत्मा°; G3 तथात्मा°. — b) B5 (m as in text) हि; S तु (for अपि). — c) Ñ2 V1 B5 D4.5 अति-; D1 अपि; G3 अभि-; G4.6 अप- (for उप-). — d) D4 G6 चिकीर्षुर्.

15 a) Ñ3 M6-8 तथा (for तदा). — b) Ś1 K B

C. 1. 6715
B. 1. 176. 20
K. 1. 192. 26

तस्य भावं विदित्वा स नृपतेः कुरुनन्दन ।
विश्वामित्रस्ततो रक्ष आदिदेश नृपं प्रति ॥ १६
स शापात्तस्य विप्रर्षेर्विश्वामित्रस्य चाज्ञया ।
राक्षसः किंकरो नाम विवेश नृपतिं तदा ॥ १७
रक्षसा तु गृहीतं तं विदित्वा स मुनिस्तदा ।
विश्वामित्रोऽप्यपक्रामत्तस्मादेशादरिंदम ॥ १८
ततः स नृपतिर्विद्वान्रक्षन्नात्मानमात्मना ।
बलवत्पीड्यमानोऽपि रक्षसान्तर्गतेन ह ॥ १९
ददर्श तं द्विजः कश्चिद्राजानं प्रस्थितं पुनः ।
ययाचे क्षुधितश्चैनं समांसं भोजनं तदा ॥ २०
तमुवाचाथ राजर्षिर्द्विजं मित्रसहस्तदा ।
आस्स्व ब्रह्मंस्त्वमत्रैव मुहूर्तमिति सान्त्वयन् ॥ २१
निवृत्तः प्रतिदास्यामि भोजनं ते यथेप्सितम् ।
इत्युक्त्वा प्रययौ राजा तस्थौ च द्विजसत्तमः ॥ २२
अन्तर्गतं तु तद्राज्ञस्तदा ब्राह्मणभाषितम् ।
सोऽन्तःपुरं प्रविश्याथ संविवेश नराधिपः ॥ २३
ततोऽर्धरात्र उत्थाय सूदमानाय्य सत्वरम् ।
उवाच राजा संस्मृत्य ब्राह्मणस्य प्रतिश्रुतम् ॥ २४
गच्छामुष्मिन्नसौ देशे ब्राह्मणो मां प्रतीक्षते ।
अन्नार्थी त्वं तमन्नेन समांसेनोपपादय ॥ २५

(except B3) Da Dn1 D1 शक्रिणा. T G M6-8 अथ (for वै). M3.5 °ना नृपसत्तम. — After 15ab, K4 ins.:

1780* तस्थौ तत्र च राजा तु सविषादो बभूव ह ।

— c) K3.4 B Da2 D1 शक्रिं. S राजा (for शक्तिं). — After 15, K4 D5 ins.:

1781* शापान्तो द्वादशे वर्षे तव राजन्भविष्यति ।
उक्तस्तु शक्रिणा राजा स तु तत्रैव संस्थितः ।

[D5 शापांतो तव राजर्षे द्वादशाब्दे भवि°, and ययौ स शक्तेरनयात्स तु तत्रै°.]

16 a) Ś1 K (except K2) तं; Ñ1.3 G1 M तु (M5 च) (for स). — b) K2 Ñ2 V1 B (except B1) D (except D5) कुरुसत्तम. — c) Ś1 K (except K2) तदा (for ततो). — d) Ś1 K1 संदि°.

17 a) K2 Ñ2 V1 B D (except D5) शापात्त(K2 °पांत)स्य तु; Ñ3 स शापं त°. Ś1 K1 विप्रस्य; Dn3 T1 G2 राजर्षेर्. — G1 om. 17c-18b. — d) Ko.3.4 ततः (for तदा).

18 G1 om. 18ab (cf. v. l. 17). — a) K2 Ñ2 V1 B3 Da Dn D1 transp. तु and तं. Ñ1 रक्षसांतर्गृ°; T1 G2 राक्षसेन गृ°. K3.4 D4.5 तु (for तं). — b) Ñ3 ऋषिः (for मुनिः). Ñ1.3 ततः (for तदा). K2 Ñ2 V1 B D °त्वा मुनिसत्तमः. — c) Ś1 Ko.1.3 Ñ1.3 D2.5 M3.5 °त्रोपचक्राम; K2 Ñ2 V1 B Da Dn1.n2 G1-3.5 °त्रोप्यपाक्रा°; K4 °त्रोपि चक्राम; D1 G6 °त्रोप्युपक्रा°.

19 a) K2.3 Ñ2 V1 B D तेन (for विद्वान्). — b) Ś1 K1 रक्षंतात्मा°; Ko रक्षत्यात्मा°; K2.3 Ñ2 V1 B D रक्षसांतर्गतेन वै; K4 Ñ1.3 रक्षसात्मा°. — c) Ś1 बलवान्; K4 बलात्सं. K2.3 Ñ2 V1 B D पीडितः पार्थ. — d) Ś1 Ko.1.4 च (for ह). K2.3 Ñ2 V1 B D नान्वबुध्यत किंचन.

20 a) Ñ2 V1 B6 Da Dn D1 अथ; T2 G3.5 तत् (for तं). K2.3 B1.3.5 D2.4.5 अथ तं ब्राह्मणः क°. — b) Ś1 तदा; Ñ2.3 V1 B6 Da Dn D1 वनं (D1 °ने); M5 पथि (for पुनः). K2.3 B1.3.5 D4.5 दृष्ट्वा पार्थिवसत्तमं; D2 दृष्ट्वा पार्थ वसन्वने. — c) Ñ2 V1 B D अयाचत क्षुधापन्नः.

21 a) K (except K2) Ñ1.3 D5 T1 G1.2 M स (for अथ). — Before 21cd, M6-8 ins. राजा. — c) Ś1 K (except K1) Ñ2.3 V1 B6 Da1 Dn D1.2.4 T G M3.5 आस्व; Ñ1 आस्तां; D5 M6-8 आस्थ; Cd आसु (sic). G2 अद्य (for अत्र). — d) Ś1 S (except G3.5 M3) इव (for इति). Ś1 K (except K2) चिंतयन् (for सान्त्व°). Ñ2 V1 B6 D (except D2.4.5) °तैं प्रतिपालयन्.

22 a) S विनिवृत्तः प्रदास्या°. — c) Ko स (for प्र-). — d) Ko.3.4 D5 S (except G2.3.6) स; K1 Ñ1.3 तु (for च).

23 a) T1 G2 M6-8 °गैतं ततो राजा; T2 G4.5 M3.5 °गैंतस्ततो राजा; G1.6 अंतःपुरं गतो राजा; G3 अंततस्तु तदा राजा. — b) T1 G1.2 M ततो (for तदा). Ko.3.4 °भोजनं. — c) K3 om. सः. — d) S न सस्मार (for संवि°). — For 23, K2 Ñ2 V1 B D subst.:

1782* ततो राजा परिक्रम्य यथाकामं यथासुखम् ।
निवृत्तोऽन्तःपुरं पार्थ प्रविवेश महामनाः ।

The st. (23) is preserved intact only in the Kāśmīrī (Śāradā) version!

24 b) T1 G2 आहूय (for आनाय्य). K2 Ñ3 S सत्वरः (T2 as in text; G4-6 सत्तमः). — c) G6 °च वचनं स्मृ°. — d) Ñ1.3 प्रतिश्रवं; B5.6 प्रतिष्ठितं; D2 परिश्रुतं; B5m Cd as in text.

25 Before 25, S ins. राजा. — a) K2 गच्छ यस्मिन्; B5 अस्मिन्गच्छ; D2 G2 °च्छ तस्मिन्; D1 °च्छायुष्मन्; T1 तच्च तस्मिन्. K2 Ñ2 V1 B D (except D5) G4.5 वनोद्देशे.

एवमुक्तस्तदा सूदः सोऽनासाद्यामिषं क्वचित् ।
निवेदयामास तदा तस्मै राज्ञे व्यथान्वितः ॥ २६
राजा तु रक्षसाविष्टः सूदमाह गतव्यथः ।
अप्येनं नरमांसेन भोजयेति पुनः पुनः ॥ २७
तथेत्युक्त्वा ततः सूदः संस्थानं वध्यघातिनाम् ।
गत्वा जहार त्वरितो नरमांसमपेतभीः ॥ २८
स तत्संस्कृत्य विधिवदन्नोपहितमाशु वै ।
तस्मै प्रादाद्ब्राह्मणाय क्षुधिताय तपस्विने ॥ २९
स सिद्धचक्षुषा दृष्ट्वा तदन्नं द्विजसत्तमः ।
अभोज्यमिदमित्याह क्रोधपर्याकुलेक्षणः ॥ ३०
यस्मादभोज्यमन्नं मे ददाति स नराधिपः ।
तस्मात्तस्यैव मूढस्य भविष्यत्यत्र लोलुपा ॥ ३१
सक्तो मानुषमांसेषु यथोक्तः शक्तिना पुरा ।
उद्वेजनीयो भूतानां चरिष्यति महीमिमाम् ॥ ३२
द्विरनुव्याहृते राज्ञः स शापो बलवानभूत् ।
रक्षोबलसमाविष्टो विसंज्ञश्चाभवत्तदा ॥ ३३
ततः स नृपतिश्रेष्ठो राक्षसोपहतेन्द्रियः ।
उवाच शक्तिं तं दृष्ट्वा नचिरादिव भारत ॥ ३४
यस्मादसदृशः शापः प्रयुक्तोऽयं त्वया मयि ।
तस्मात्त्वत्तः प्रवर्तिष्ये खादितुं मानुषानहम् ॥ ३५
एवमुक्त्वा ततः सद्यस्तं प्राणैर्विप्रयुज्य सः ।
शक्तिनं भक्षयामास व्याघ्रः पशुमिवेप्सितम् ॥ ३६
शक्तिनं तु हतं दृष्ट्वा विश्वामित्रस्ततः पुनः ।
वसिष्ठस्यैव पुत्रेषु तद्रक्षः संदिदेश ह ॥ ३७

C. 1. 6736
B. I. 176. 41
K. I. 192. 48

— [e]) Ko.1 Ñ V1 B (except B8) Da Dn D2.4 transp. त्वं and तं. Ś1 तत् (for तं). D5 S अन्नार्थिनं त्वम° (M6-8 तम°). — [d]) Ñ1 °नोपहारय.

26 Before 26, Ś1 S (except M8.5) ins. गंधर्वः; Ko.4 Ñ2 V1 B5.6 D (D4 after corr.) गंधर्व उ°; K1.3 वैशं°; Ñ1.3 B3 D4 (before corr.) वैशं उ°. — [a]) Ñ2 V1 B (except B3) Da Dn1.n3 D2.4 ततः (for तदा). — [b]) Ś1 K (except K2) D2.5 विद्यते नामिषं क्व°. — [c]) Ñ1 S (except G3.4) पुनः (for तदा).

27 [a]) T1 G2 महीपो (for राजा तु). B1.3 D2 G3 M5 राक्ष°. — [c]) Ko.4 D2.5 अथैनं; G4 अन्नेन.

28 [a]) K1 D5 G1 पुनः (for ततः). — [c]) Ś1 K1 त्वरितं. — [d]) G4 °सं व्यपेत°.

29 [a]) K2 B1.5 D2.4 T2 G5.6 ततः; K3 स च; K4 D5 स तु; Ñ1.2 V1 Dn एतत् (for स तत्). T1 G2 तत्संस्कृत्य च वि°. — [b]) Ñ V1 °न्नोपहत°; B1.3 °न्नापिहि°; S अन्नं सामिषमाशु वै. Cd cites अपिहितं.

30 [a]) Ś1 (orig.) समृद्धश्र°; Ś1 (*sup. lin.*) K4 समिद्धश्र°; K1 स तृसश्र°; B3 संसिद्ध°; M5 स दिव्य°. Cd cites सिद्धचक्षुषा (as in text). T G M8.6-8 स दिव्यचक्षुर्दृष्ट्वा तु (T1 G2 तत्). — [b]) T1 G2 अभोज्यं (for तदन्नं). — [c]) K2 B (except B5) D4 न (for अ-). S अभोज्यमिति मत्वाह (G1 °थ) (T1 G2 स मानुषामिषं ज्ञात्वा). — [d]) T1 G2 निजगाद रुषान्वितः.

31 Before 31, K2 B D ins. ब्राह्मण उ°. — [b]) Ś1 K (except K2) D5 M5 transp. ददाति and स. Ñ2 V1 B5 D (except D4.5) S नृपाधमः (for नरा°). — [c]) G3 अस्यैव. G6 मुग्धस्य. — [d]) K4 B5 D5 G3 M6-8 लोलुपः (G3 °पं); T1 G1.2 लोलता; G4 लोभता; Cd as in text.

32 [a]) Ś1 K (except K1) °मांसस्य. — [b]) Ś1 K1.3 S °थोक्तं. Ś1 K B Da2 D1 शक्रिणा. Ñ2 V1 D5 तथा (for पुरा).

33 Before 33, S ins. गंधर्वः. — [a]) K Da B1 Cd °व्याहृतो; T1 G1.2 द्विर्जेन व्या°; M6-8 द्विरप्युदा°. K (except Ko) Ñ1 राजा; S वाक्ये. — [b]) Ś1 K Ñ1.3 ततः स ब°; S शापो हि (G2 M5 -पि) ब°. — [d]) K2 Ñ1.2 V1 B D (except D5) नृपः (for तदा).

34 [a]) S °तिः पार्थ. — [b]) Ko.3.4 Ñ2.3 V1 B3 Dn D1.4.5 S रक्षसा. Ko Ñ1.2 V1 Dn1.n2 T G3-8 M अपहृतेंद्रियः; K2-4 Ñ3 Da D1 उपहृ°; B3 D5 G1.2 अपहृ°. — [c]) Some MSS. शक्रिणं. T1 G2.3 M6-8 दृष्ट्वा तं (by transp.); T2 G1.4-6 M3.5 दृष्ट्वा तु.

35 Ko om. 35[ab]. — [a]) K4 Dn3 D2 M5 पापः. — [b]) T1 G3 यस्; G2 स (for अयं). K2.4 Ñ2 V1 B D (except D5) transp. त्वया and मयि. — [d]) Ñ2 V1 Dn D5 पुरुषान्; D1 मानवान्.

36 Before 36, M6-8 ins. गंधर्वः. — [b]) Ko-2.4 B3 Da D2.4.5 S °प्रयोज्य. K4 Ñ2.3 V1 Dn च (for सः). K3 तं च प्राणैर्वियोज्य च. — [c]) Ś1 Ko.1.3.4 Da Dn1 शक्रिणं; K2 D1.2.4 T1 G2 तं शक्तिं; B तं शक्रिं; G3.4 शक्तिं तं.

37 [a]) Ś1 K Da शक्रिणं; B तं शक्रिं; D2-4 T1 G2 तं

C. 1. 6787
B. 1. 176. 42
K. 1. 192. 49

स ताञ्शतावरान्पुत्रान्वसिष्ठस्य महात्मनः ।
भक्षयामास संक्रुद्धः सिंहः क्षुद्रमृगानिव ॥ ३८
वसिष्ठो घातिताञ्श्रुत्वा विश्वामित्रेण तान्सुतान् ।
धारयामास तं शोकं महाद्रिरिव मेदिनीम् ॥ ३९
चक्रे चात्मविनाशाय बुद्धिं स मुनिसत्तमः ।
न त्वेव कुशिकोच्छेदं मेने मतिमतां वरः ॥ ४०
स मेरुकूटादात्मानं मुमोच भगवानृषिः ।
शिरस्तस्य शिलायां च तूलराशाविवापतत् ॥ ४१
न ममार च पातेन स यदा तेन पाण्डव ।
तदाग्निमिद्ध्वा भगवान्संविवेश महावने ॥ ४२
तं तदा सुसमिद्धोऽपि न ददाह हुताशनः ।
दीप्यमानोऽप्यमित्रघ्न शीतोऽग्निरभवत्ततः ॥ ४३
स समुद्रमभिप्रेत्य शोकाविष्टो महामुनिः ।
बद्ध्वा कण्ठे शिलां गुर्वीं निपपात तदम्भसि ॥ ४४
स समुद्रोर्मिवेगेन स्थले न्यस्तो महामुनिः ।
जगाम स ततः खिन्नः पुनरेवाश्रमं प्रति ॥ ४५

इति श्रीमहाभारते आदिपर्वणि षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

शक्तिं; G3 शक्तिं तं; G4 शक्तिं तु. K (except K1) B D2,4,5 G4 निहतं; Ñ2 V1 Da Dn D1 तु मृतं; T1 G2 भक्षितं. — b) Ko.2 ततस्ततः; Ñ2 V1 B D पुनः पुनः.

38 a) Ś1 K2 Ñ1 D5 G1,2,3 शतवरान्; K4 Ñ2 V1 B5 Da2 Dn D1,2,4 M6-8 शक्तयव°; B1,3 शक्रयव°; Da1 शक्रव°; G3,5 शतान्व°.

39 a) T1 G2 स्वपुत्रान्खादिता°. — b) S स्वान्सु° (T1 G2 रक्षसा). — c) Ko S क्रोधं; K2-4 कोपं; D5 क्रुद्धं (for शोकं); cf. 1. 167. 7 etc. — d) T1 G2 सुमेरुरिव.

40 a) D5 प्राण° (for चात्म°). — b) Ś1 M8 मतिं (for बुद्धिं). D5 ऋषिसत्तमः; S मुनिपुंगवः. K (except K1) बुद्धिं नृपतिसत्तमः. — c) K2 Ñ2,3 V1 B D (except D5) कौशिको°. T1 G2 न तस्योच्छेदनं मेने. — d) T1 G2 मुनिं (for मेने). Ś1 K (except K3) D5 मेने स मुनिपुंगवः (Ko D5 °सत्तमः).

41 a) Ñ1 सुमेरु°. — b) B1,3 मुमुचे. — c) Ñ2 V1 B D गिरेः (for शिरः). Ś1 K Ñ1,2 V1 Dn तु (for च). G1 शूलस्य च शिखायां च; G3 शिरसस्तस्य निलयं. — d) K2,4 D1 G1 तूलराशिम्.

42 a) M5 transp. न and ममार. T1 G2 स (for च). — b) S तदा स (G1 स तदा; G3 निपाते) मुनिसत्तमः (T1 G2 तदा मुनिवरोत्तमः). — c) B5 तद्; S (except T1) तथा. Ñ2,3m V1 B D (except Da) इद्धं; Cd इद्ध्वा (as in text). K (except K1) तदा(K4 इषा)ग्निमध्ये. — d) K2 महामुनिः; G1 °नले.

43 a) Ś1 K1 तथा. Ko स; K1 स्व; G1 तु (for सु-). G1 [s]ग्निः. — c) K2,4 T2 G (except G2) M5 °ग्नः. — d) K2,4 D4,5 T G M3,6-8 तदा (for ततः). M5 शैशिरोऽग्निरभूत्तदा.

44 a) K1,2 Ñ V1 B D (except Da) G1,2 °प्रेक्ष्य. Ś1 K4 समुद्रमभिसंप्रेत्य. — b) D5 क्रोधावि°. — After 44ab, K4 reads 1. 167. 1cd, repeating it in its proper place. — K3 om. 44c-45b. — c) T2 G4-6 transp. बद्ध्वा and कण्ठे. — d) N (except B1,5 D2; K3 om.) T1 G3,5 M3 तदांभसि; M6-8 महां°.

45 K3 om. 45ab (cf. v. l. 44). — After 45ab, Ñ3 D4 (marg. *sec. m.*) ins.:

1783* न ममार तदा विप्रः कथंचित्संशितव्रतः ।

— c) Ś1 K1 च ततः; Ko.2-4 स तदा; S (except M6-8) सततं.

Colophon om. in B5. — *Major parvan:* T2 G M संभव° (for आदि°). — *Sub-parvan:* Ñ1,2 V1 चैत्ररथ, followed by वासिष्ठ; T1 संभव. Ś1 Ko.1,3 Ñ3 B1,3,6 Da Dn D1,2 M5 (all om. the sub-parvan name) mention only वासिष्ठ (M5 वसिष्ठोपाख्यान). — *Adhy. name:* Ko.4 वसिष्ठशोकः. — *Adhy. no.* (figures, words or both): Dn3 175; D4m 177; T1 174; T2 G2-5 125; G1 127; G6 M 126. — *S'loka no.:* Dn 49; M3 50. — *Aggregate s'loka no.:* Dn2 6714.

167

1 Ś1 K1 S om. उवाच. B5 वैशं° उ°. — a) S (except T1 G1-3) स आश्रमपदं इद्ध्वा. — b) T1 G2 पुत्रैर्विरहितं मुनिः; M6-8 °तं तैर्महामुनिः. — c) K1,3,4 Da1 Dn3 स (for सु-). — d) Ñ2 V1 B D (except D5) T2 G3-6 अपि (for एव).

2 a) D5 T2 G4 पुण्यां (for पूर्णां). — b) G3 °ले तदांभसा. — c) S (except T1 G2,3) वृक्षान्वंचु(G1 °न्मंजु)लनीपादीन्. — d) Ś1 Ko-2 Da1 T1 G1 वहंती; K4

१६७

गन्धर्व उवाच ।

ततो दृष्ट्वाश्रमपदं रहितं तैः सुतैर्मुनिः ।
निर्जगाम सुदुःखार्तः पुनरेवाश्रमात्ततः ॥ १
सोऽपश्यत्सरितं पूर्णां प्रावृट्काले नवाम्भसा ।
वृक्षान्बहुविधान्पार्थ वहन्तीं तीरजान्बहून् ॥ २
अथ चिन्तां समापेदे पुनः पौरवनन्दन ।
अम्भस्यस्यां निमज्जेयमिति दुःखसमन्वितः ॥ ३
ततः पाशैस्तदात्मानं गाढं बद्ध्वा महामुनिः ।
तस्यां जले महानद्यां निममज्ज सुदुःखितः ॥ ४
अथ छित्त्वा नदी पाशांस्तस्यारिबलमर्दन ।
समस्थं तमृषिं कृत्वा विपाशं समवासृजत् ॥ ५
उत्ततार ततः पाशैर्विमुक्तः स महानृषिः ।
विपाशेति च नामास्या नद्याश्चक्रे महानृषिः ॥ ६
शोके बुद्धिं ततश्चक्रे न चैकत्र व्यतिष्ठत ।
सोऽगच्छत्पर्वतांश्चैव सरितश्च सरांसि च ॥ ७
ततः स पुनरेवर्षिर्नदीं हैमवतीं तदा ।
चण्डग्राहवतीं दृष्ट्वा तस्याः स्रोतस्यवापतत् ॥ ८
सा तमग्निसमं विप्रमनुचिन्त्य सरिद्वरा ।
शतधा विद्रुता यस्माच्छतद्रुरिति विश्रुता ॥ ९
ततः स्थलगतं दृष्ट्वा तत्राप्यात्मानमात्मना ।
मर्तुं न शक्यमित्युक्त्वा पुनरेवाश्रमं ययौ ॥ १०
वध्वादृश्यन्त्यानुगत आश्रमाभिमुखो व्रजन् ।
अथ शुश्राव संगत्या वेदाध्ययननिःस्वनम् ।
पृष्ठतः परिपूर्णार्थैः षड्भिरङ्गैरलंकृतम् ॥ ११

C. 1. 6756
B. 1. 177. 12
K. 1. 193.513

वहतीं; Ñ1.2 V1 B Dn D2.4 G3 हरंतीं; D1 हरंती; D5 वहती. B3 द्रुमान् (for बहून्).

3 M6–8 om. 3ab. — b) Ñ1 M3.5 मुनिः (for पुनः). Ñ2 V1 B D (except D5) T2 G3–6 कौरवं. — c) Ś1 K1 Ñ1.3 B5 G1 अंभस्यस्यां; M3 अस्यां नद्यां. D5 अंभस्यंगानि म°. — d) D5 M5 अतिदुःख°.

4 a) Ś1 तथा (for ततः). Ñ1 इव; G1 M6–8 तथा (for तदा). — b) Ś1 K इदं; D5 इदैर्. — c) K2 तस्मिन् (for तस्या). — d) G3 न्यमज्जत्स (for निम°). K3 G1 स (for सु-).

5 a) Ś1 K1 अवच्छि°; T1 G2 ततश्छि°; G3 अथ भि°. — b) B3 Dn D1 °बलसूदन. — c) Ñ2 V1 B D T G स्थलस्थं; M5 समर्थं. G4 नीत्वा. — d) T G सा समा(G3 समपा)सृजत्.

6 a) Ñ1 महा-; M6–8 जलात् (for ततः). — b) Ś1 K1.2 G3 महामुनिः (see below). — Ś1 K1 (hapl.) om. 6cd. — d) K (K1 om.) Ñ3 B3 D5 M (except M3) महामुनिः (see above); G3.4 महातपाः. — After 6, D4 (marg. *sec. m.*) S ins.:

1784* सा विपाशेति विख्याता नदी लोकेषु भारत ।
ऋषेस्तस्य नरव्याघ्र वचनात्तस्य धीमतः ।
उत्तीर्य च ततो राजन्दुःखितो भगवानृषिः ।

7 a) Ñ3 B3.6 Dn D4 शोक°. Ñ2 V1 B3 D (except D4) तदा; G3 तु तां (for ततः). T1 G2 शोकाविष्टं मनश्चक्रे. — b) G1 चैकत्राप्यतिष्ठ°. — cd) Ś1 स गच्छन्; S (except G1.2) सोपश्यत्. D4 transp. पर्वतान् and सरितः.

8 a) K4 Ñ2 V1 B1.3.6 दृष्ट्वा (for ततः). S (except G3 M5) च (for स). B5 स दृष्ट्वा पुन°. — c) Ñ2 V1 B D भीमां (for दृष्ट्वा). — G1 (hapl.) om. 8c–10a. — d) Ñ V1 Dn D1 °स्वपातयत्; B D2.4.5 °स्थापतत्; S (G1 om.) स्रोतस्यात्मानमात्मना (cf. 10b). — After 8, S (except G1) ins.:

1785* मज्जयामास शोकार्तो मरणे कृतनिश्चयः ।

9 G1 om. 9 (cf. v. l. 8). — b) T2 G4–6 M उपलभ्य (for अनुचिन्त्य). — c) Ñ3 T1 G2 तस्माच्.

10 G1 om. 10a (cf. v. l. 8). — b) S (except G3) आत्मानमृषिसत्तमः (cf. v. l. 8d). — c) Ś1 शक्यतेत्यु°; Ñ V1 B D (except D4) शक्यामीत्यु°. — d) D5 °रेव समाययौ. — After 10, N T1 G1–3 ins.:

1786* स गत्वा विविधाञ्शैलान्देशान्बहुविधांस्तथा ।

11 ab) Ś1 K4 °दृशंत्यानुगत; K1 °दृश्यत्यनु°; Ñ1.3 °दृश्यंत्यानुगम्य. T2 G5.6 M °मुखं. Ko.4 °खो व्रजेत्; K2 °खो ययौ; Ñ3 °खोगमत्. Ñ2 V1 B D (except D5) अदृश्यंत्याख्यया वध्वाथा(B5 Da D2 °ध्वा आ)श्रमेनुस्रुतो भवत्; T1 G2.3 अदृशंत्यागतश्रीमानाश्रमाभिमुखो ययौ; G1 अपि दृश्यागतश्रीमानाश्र° °खो ययौ. — M7 (hapl.) om.

C. 1. 6757
B. 1. 177. 13
K. 1. 193. 14

अनुव्रजति को न्वेष मामित्येव च सोऽब्रवीत् ।
अहं त्वदृश्यती नाम्ना तं स्नुषा प्रत्यभाषत ।
शक्तेर्भार्या महाभाग तपोयुक्ता तपस्विनी ॥ १२

वसिष्ठ उवाच ।

पुत्रि कस्यैष साङ्गस्य वेदस्याध्ययनस्वनः ।
पुरा साङ्गस्य वेदस्य शक्तेरिव मया श्रुतः ॥ १३

अदृश्यन्त्युवाच ।

अयं कुक्षौ समुत्पन्नः शक्तेर्गर्भः सुतस्य ते ।
समा द्वादश तस्येह वेदानभ्यसतो मुने ॥ १४

गन्धर्व उवाच ।

एवमुक्तस्ततो हृष्टो वसिष्ठः श्रेष्ठभागृषिः ।
अस्ति संतानमित्युक्त्वा मृत्योः पार्थ न्यवर्तत ॥१५

ततः प्रतिनिवृत्तः स तया वध्वा सहानघ ।
कल्माषपादमासीनं ददर्श विजने वने ॥ १६
स तु दृष्ट्वैव तं राजा क्रुद्ध उत्थाय भारत ।
आविष्टो रक्षसोग्रेण इयेषातुं ततः स्म तम् ॥ १७
अदृश्यन्ती तु तं दृष्ट्वा क्रूरकर्माणमग्रतः ।
भयसंविग्नया वाचा वसिष्ठमिदमब्रवीत् ॥ १८
असौ मृत्युरिवोग्रेण दण्डेन भगवन्नितः ।
प्रगृहीतेन काष्ठेन राक्षसोऽभ्येति भीषणः ॥ १९
तं निवारयितुं शक्तो नान्योऽस्ति भुवि कश्चन ।
त्वदृतेऽद्य महाभाग सर्ववेदविदां वर ॥ २०
त्राहि मां भगवन्पापादस्मादारुणदर्शनात् ।
रक्षो अत्तुमिह ह्यावां नूनमेतच्चिकीर्षति ॥ २१

इति श्रीमहाभारते आदिपर्वणि सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

11c–13b. — c) K3 °र्थं; Ñ2.3 V1 B D °र्थं.

12 M7 om. 12 (cf. v. l. 11). — a) K1 अन्वव्रजत. — b) Ś1 K Ñ3 मामित्यथ; G1.3 मामिहेति. Ñ1 तु; Ñ2 V1 B D G1.3 अथ (for च). — c) Ko अहं नाम्ना न्वदृश्यंती; K2 °हं त्वदृश्यंती नां°; K3 अदृश्यंतीं त्वहं नां°; K4 °हं तु दृशती नां°; Ñ1 अहमित्यदती नां°; Ñ2 V1 B D अहमित्यदृश्यं(D1 °शं)तीमं (B3 Da अर्हाहमित्यदृश्यंती); Ñ3 अहमित्यनुदृश्यंती; S अदृश्यंत्यहमित्येव. — d) Ñ2 V1 B (except B3) D सा; Ñ3 तत् (for तं). M प्रत्युवाच ह. — e) K2.3 G3 शक्ति(G3 °क्ति)भार्या; B (except B6) Da D1 शक्तेर्भार्या. T2 G1.4–6 M transp. शक्तेर् and भार्या. Ś1 Ko B3 Da D4 T1 G1.2.4 M °भागा. — f) Ñ1 S मन(T1 G2.3 यश)स्विनी.

13 M7 om. 13ab (cf. v. l. 11). Ś1 K1 S om. उवाच. — a) M5 भद्रे (for पुत्रि). T1 G2.3 पुत्रस्यैष हि सांग°. — b) Ś1 K1 °ध्वनिः; Ñ1 B6 Da D5 S (except G4; M7 om.) वेदाध्ययननिःस्वनः. — c) Ś1 K B (except B6) Da Dn1 शक्तेरिव. Ś1 M श्रुतं.

14 S (except T1 G2!) om. उवाच. K1 D1 अदृशत्यु°. — a) Ñ3 पुरा (for अयं). K1 Ñ3 ममोत्पन्नः. — b) Ś1 K Da शक्तेर्. — c) G2.3 तस्यैव. — d) Ñ2.3 V1 B D (except D5) T1 G1.2 M3.5 °भ्यस्यतो; G3 °भ्यासितो. S (except G2.3) गताः (for मुने).

15 Ś1 K S om. उवाच (G1 M3.5 om. the ref.). — a) K (except K1) D5 तदा; Ñ2 V1 B3 Da Dn D1 तया (for ततो). — b) T1 G2 भगवानृषिः; T2 G1.4–6 M5 श्रेष्ठभागिनीं; G3 श्रेष्ठवागृ°. — c) Ś1 K D5 मार्गात्; B1 पथि; T1 G2 पाशात्; G3 प्रति- (for पार्थ). Ko अवर्तत; K2.3 G3 निव°.

16 a) K2 तु; T1 G2.3 सन् (for स). — b) T1 G2.3 अदृश्यंत्या सहायवान्. — c) G3 आयांतं (for आसीनं). — d) K3 गहने वने; G3 विपिने तदा.

17 a) Ś1 Ko–3 Ñ1 B1.5 स च; T1 G2 मुनिं. Da G4.6 तां (for तं). K4 स दृष्ट्वैव ततो राजा. — b) G3 राक्षसेंद्रेण. — c) K2.3 स (for स्म). Ko ह (for तं). K1 ततः स्मृतः; Ñ1.2 V1 B D तदा मुनिं; S अथौजसा. Ñ3 इयेषादयितुं तदा.

18 a) Ś1 अदृश्यती; K1.3.4 T2 °शंती. T1 G2 अपि (for तु). — b) T2 G1.4–6 घोर° (for क्रूर°). Ś1 उद्यतं; T1 G2.3 अध्वनि (for अग्रतः). — c) Ko.2.4 °संदिग्धया.

19 Before 19, S (except G3.5) ins. अदृश्यंती. — b) B5 भगवान्मुने. — c) T2 G5 अयस्मयेन; G6 प्रगृहीतोति-. S घोरेण. — d) Ñ2 V1 B D (except D5) दारुणः (for भीष°).

20 ab) Ñ1 transp. शक्तो and नान्यो. Ś1 [s]स्ति भुवनत्रये; Ñ1 भुवि कथंचन. — c) K1 त्वदृतेस्य; Ñ1 B1 G3 त्वामृतेद्य; M5 दृश्यते°.

21 a) Ñ1.2 V1 B D G3–5 पाहि. — b) Ko.2 Ñ1 M6–8 तस्माद्. — c) M3.5 रक्ष. Ś1 K Ñ1 भक्षयितुं; Ñ3 M6–8 आददितुं (for अत्तुमिह). T2 अप्यायां; G5 अप्यायन्

१६८

वसिष्ठ उवाच ।
मा भैः पुत्रि न भेतव्यं रक्षसस्ते कथंचन ।
नैतद्रक्षो भयं यस्मात्पश्यसि त्वमुपस्थितम् ॥ १
राजा कल्माषपादोऽयं वीर्यवान्प्रथितो भुवि ।
स एषोऽस्मिन्वनोद्देशे निवसत्यतिभीषणः ॥ २

गन्धर्व उवाच ।
तमापतन्तं संप्रेक्ष्य वसिष्ठो भगवानृषिः ।
वारयामास तेजस्वी हुंकारेणैव भारत ॥ ३
मन्त्रपूतेन च पुनः स तमभ्युक्ष्य वारिणा ।
मोक्षयामास वै घोराद्राक्षसाद्राजसत्तमम् ॥ ४
स हि द्वादश वर्षाणि वसिष्ठस्यैव तेजसा ।
ग्रस्त आसीद्ग्रहेणेव पर्वकाले दिवाकरः ॥ ५
रक्षसा विप्रमुक्तोऽथ स नृपस्तद्वनं महत् ।
तेजसा रञ्जयामास संध्याभ्रमिव भास्करः ॥ ६
प्रतिलभ्य ततः संज्ञामभिवाद्य कृताञ्जलिः ।
उवाच नृपतिः काले वसिष्ठमृषिसत्तमम् ॥ ७
सौदासोऽहं महाभाग याज्यस्ते द्विजसत्तम ।
अस्मिन्काले यदिष्टं ते ब्रूहि किं करवाणि ते ॥ ८

वसिष्ठ उवाच ।
वृत्तमेतद्यथाकालं गच्छ राज्यं प्रशाधि तत् ।
ब्राह्मणांश्च मनुष्येन्द्र मावमंस्थाः कदाचन ॥ ९

राजोवाच ।
नावमंस्याम्यहं ब्रह्मन्कदाचिद्ब्राह्मणर्षभान् ।
त्वन्निदेशे स्थितः शश्वत्पूजयिष्याम्यहं द्विजान् ॥ १० C. 1. 6776 B. 1. 177. 3 K. 1. 198. 34

(for ह्यावां). Ñ2 V1 B D राक्षसोयमिहात्तुं वै; T1 G1.2 राक्षसोत्तुमयं ह्या°; G3 राक्षसात्तु भयं नायान्; G4 अमर्षात्वत्तुमित्याह; G6 राक्षसोत्तुमिहाप्यायान्. — a) T2 G (except G2) चिकीर्षितं. Ñ2 V1 B D नूनमावां समीहते (B1 महीपते).

तपस्विनस्ततोऽपृच्छत्प्राञ्जलिः कुरुनन्दनः ।
तीर्थानीमानि वर्ज्यन्ते किमर्थं ब्रह्मवादिभिः ॥ ५

तापसा ऊचुः ।
ग्राहाः पञ्च वसन्त्येषु हरन्ति च तपोधनान् ।
अत एतानि वर्ज्यन्ते तीर्थानि कुरुनन्दन ॥ ६

वैशंपायन उवाच ।
तेषां श्रुत्वा महाबाहुर्वार्यमाणस्तपोधनैः ।
जगाम तानि तीर्थानि द्रष्टुं पुरुषसत्तमः ॥ ७
ततः सौभद्रमासाद्य महर्षेस्तीर्थमुत्तमम् ।
विगाह्य तरसा शूरः स्नानं चक्रे परंतपः ॥ ८
अथ तं पुरुषव्याघ्रमन्तर्जलचरो महान् ।
निजग्राह जले ग्राहः कुन्तीपुत्रं धनंजयम् ॥ ९
स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम् ।
उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः ॥ १०
उत्कृष्ट एव तु ग्राहः सोऽर्जुनेन यशस्विना ।
बभूव नारी कल्याणी सर्वाभरणभूषिता ।
दीप्यमाना श्रिया राजन्दिव्यरूपा मनोरमा ॥ ११
तदद्भुतं महद्दृष्ट्वा कुन्तीपुत्रो धनंजयः ।

G2–4 M8. 7. 8 अवतीर्णानि. Ko. 4 तान्यासन्; K2 तानि स्युः; M6–8 यत्रासन्.

3 a) Ś1 K1 कारंधमप्र°; Ko. 2 करंधमप्र°; Ñ1 कर्वंधसंप्र°; D1 करं°; D2 G2 करंधर्मप्र°; T1 कारंकमं प्र°; T3 G3–6 करंधर्मप्लवं चैव; M5 °समं प्र°; M8 °धर्मं प्र°. — d) D5 °मेधपरं. Ñ2 B1 Dn1. n2 D1. 5 तत् (for यत्). T1 °मेधं च पंचमं; T3 G1. 2. 4 °मेधं च यत्फलं. — e) K1. 2 T G2–4 भरद्वा°. Ko D5 यत्; K3 Ñ2. 3 V1 B (except B5) Dn D1. 2. 4 तु (for च). M5 °स्य तीर्थानि. — f) K4 परं (for महत्). T1 पापोपशमनं महत्; M5 पापप्रशमनानि च. — After 3, N ins.:

2039* एतानि पञ्च तीर्थानि ददर्श कुरुसत्तमः ।
[K1. 2 V1 B5 कुरुनंदनः.]

4 K2 om. 4a–5b. — a) Ñ1 °क्तान्यभिल°. — b) M5 भारत (for पाण्डवः). — c) D5 तानि वर्ज्यानि; G4 वर्जनीयानि. — d) Ñ1 प्राणिभिर्. Ś1 धर्मवादिभिः; D1. 2 तत्वदर्शिभिः; T3 G4 °पत्तिभिः; M3 °चारिभिः. G1 मुनिधर्मार्थबु°.

5 Ś1 (hapl.) om. 5; K2 Ñ1 om. 5ab (cf. v. l. 4). — b) N3 B5. 6 Da D1. 2 कुरुसत्तमः. — c) S एतानि. — d) K1 धर्मवादि°; Ñ1 धर्मचारि°; V1 B3 ब्रह्मचारि°; T3 G4 ब्राह्मणादि°.

6 Ś1 K1 S om. ऊचुः. — b) T1 इह (for च). T3 G2–4 भक्षयंति (for हरंति च). — K2 (hapl.) om. 6c–7b. — c) Ñ1. 2 B1 Dn D2. 4 M3 ततः (for अतः). D5 एवाभिवर्ज्यंते. — d) K1 D5 T G1–4 M3. 5 कुरुसत्तम.

7 K2 om. 7ab (cf. v. l. 6). — Ś1 K1. 3. 4 S om. उवाच. — a) Ñ1 °त्वा वचः पार्थो. S श्रुत्वा तु वचनं तेषां. — b) K1 (before corr.) तपोधनात्; M6–8 तपस्विभिः. — d) K1 V1 °ष्टुं भरतस°; K3 दुष्टानि कुरुस°.

8 a) K1 द्रौपदं (for सौभद्रं). — c) K2. 3 Ñ2. 3 V1 B D (except D5) T G (except G1) सह° (for तर°). Ko. 4 Ñ1 B1 D1. 2. 5 वीरः.

9 b) Ko D5 स्थितमंतर्जले महान्. — c) K2 Ñ V1 B D जग्राह चरणे ग्राहः. — d) S शापमोक्षाय भारत.

10 b) V1 जलेश्वरं; M6–8 जलेशयं. — c) M5 महाराज (for महाबाहुर्).

11 a) Ś1 K1 V1 T3 G2–4 उत्सृष्ट; K4 आकृष्ट; Ñ1 उक्षिप्त; Cd as in text. K2. 3 Ñ2. 3 V1 B Da Dn D1. 4 transp. तु and ग्राहः. T3 G3. 4 तद् (for तु). Ś1 स

तां स्त्रियं परमप्रीत इदं वचनमब्रवीत् ॥ १२
का वै त्वमसि कल्याणि कुतो वासि जलेचरी ।
किमर्थं च महत्पापमिदं कृतवती पुरा ॥ १३

नार्युवाच ।

अप्सरास्मि महाबाहो देवारण्यविचारिणी ।
इष्टा धनपतेर्नित्यं वर्गा नाम महाबल ॥ १४
मम सख्यश्चतस्रोऽन्याः सर्वाः कामगमाः शुभाः ।
ताभिः सार्धं प्रयातास्मि लोकपालनिवेशनम् ॥ १५
ततः पश्यामहे सर्वा ब्राह्मणं संशितव्रतम् ।
रूपवन्तमधीयानमेकमेकान्तचारिणम् ॥ १६
तस्य वै तपसा राजंस्तद्वनं तेजसावृतम् ।
आदित्य इव तं देशं कृत्स्नं स व्यवभासयत् ॥ १७
तस्य दृष्ट्वा तपस्ताद्यूपं चाद्भुतदर्शनम् ।
अवतीर्णाः स्म तं देशं तपोविघ्नचिकीर्षया ॥ १८
अहं च सौरभेयी च समीची बुद्बुदा लता ।
यौगपद्येन तं विप्रमभ्यगच्छाम भारत ॥ १९
गायन्त्यो वै हसन्त्यश्च लोभयन्त्यश्च तं द्विजम् ।
स च नास्मासु कृतवान्मनो वीर कथंचन ।
नाकम्पत महातेजाः स्थितस्तपसि निर्मले ॥ २०
सोऽशपत्कुपितोऽस्मांस्तु ब्राह्मणः क्षत्रियर्षभ ।
ग्राहभूता जले यूयं चरिष्यध्वं शतं समाः ॥ २१

C. 1. 7860
B. 1. 216. 23
K. 1. 236. 23

इति श्रीमहाभारते आदिपर्वणि अष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥

ग्राहो; K1 D2 T1 जग्राह (for तु ग्राहः). — b) Ś1 हि (for सः). Ko Ñ1 T G2-6 M5 तपस्विना; D5 G1 M3 तर°. — f) G1 M5 मनोहरा.

12 a) Ko.4 S °द्भुततमं; D5 °द्भुतमिदं.

13 Before 13, S (except G1 M3.5) ins. अर्जुनः. — b) G1 M3.5 वापि. K2 B (except B1) D (except Da1 D5) G5.6 M3.5 °चरि. Ś1 Ko.1.3.4 Ñ1.3 V1 कुतो वा जलचारिणी. — c) G5.6 त्वं (for च). — d) Ś1 K1 Ñ1 ह्यसि (for पुरा).

14 Ko.4 D5 स्त्री उ°; Ñ2 Dn D2.4 वर्गोवाच; T G M3.5 स्त्री; M6-8 अप्सरा (for नार्युवाच). *N. B.* In this instance neither Ś1 or K1 om. उवाच; both read the ref. exactly as in text! — a) K2 हि (for ऽस्मि). Ś1 Ko.1.4 Ñ1 D5 °रा ह्यस्मि कौंतेय. — b) Ś1 Ko.1.3.4 Ñ1 V1 D5 °निवासिनी; Ñ2.3 B3.6 Da Dn D1.2.4 M °विहारिणी; T3 G4 इष्टारण्य°. — c) K2 Ñ3 अहं; B5 कांता (for इष्टा). — d) Ś1 K1 वर्षा; Ko.2-4 V1 वर्चा; Ñ1 वृंदा; B3 वर्दा; D5 T3 G M3.5 वंदा; T1 नंदा; M6-8 विंदा.

15 a) Ś1 K1 °श्च तत्रान्याः; G1 °श्चतुर्थान्याः. — b) Ś1 समं (for सार्धं). — d) Ś1 Ko.1.4 D5 देवराजनिवेशनं (Ko °शनात्); K2.3 °निवेशनात्.

16 a) Ś1 तथा; K1 तत्र. T1 पश्याम वै सार्धं. — b) MSS. (as usual) शंसित°, संश्रित°, शंशित°; cf. v. l. 1. 1. 2 etc. — c) Ñ3 V1 B1.3.6m Da D1.2.5 तपस्विनं. Da D1.2 रूपवंतं.

17 a) K3 Ñ2 B1 Dn S एव (for वै). Ś1 K1.2 तेजसा; K4 तरसा. Ś1 Ko.3.4 Ñ1 D1.2.5 वीर; K1 निलं (for राजन्). — e) T1 रूपस् (for इव). — d) K1 समभा°; K2 विप्रोच्य भा°; Ñ1 एवावभा°; Ñ2.3 Dn D4 सर्वं व्यकाशयत्; B1.3 स हि व्यभा°; B5 D1.2 स व्यत्यकाशयत्; B6 Da एव व्यकाश°; D5 सो व्यवभा°; T G अभ्यवभासयन् (G1 तद्यवभासयन्); M5 तद्यवभा°; M6-8 °यन्.

18 b) Ko Ñ3.3 B D (except D1.2.5) °चाद्भुतमुत्तमं. — c) K3 D5 G5.6 °र्णास्मि.

19 b) Ś1 Ko.3.4 सामेची; K1 सामैची; K2 सध्यायी; N1 सौत्रेया; D2 शमीची. K3 D5 S (except G1) °दालसा. — c) K2 transp. तं and विप्रं. — d) Ś1 K1 अभ्याग°; T3 G2-4 अभिग°.

20 a) K2 च; N2 B5 D अथ; B1.3.5 वि- (for वै). Ś1 Ko.1 Ñ1 गायंत्यो ललमानाश्च; K4 °त्यो नृत्यमानाश्च. Cd cites ललमानाः. — b) Ś1 लोभमानाश्च; Ñ2 Dn लोभयित्वा च; B5.6 लोभयंतश्च; T1 क्षोभयंत्यश्च. T3 G नृत्यंतश्च (T3 G5.6 °तो वै) वरांगनाः (G1 विशेषतः). — After 20ab, T G ins.:

2040* प्रेक्षणानि च कुर्वन्त्यो विवृतं कारयन्ति च ।
अनिच्छन्त्य इवाङ्गानि हासभावविलासितैः ।
बाहूरुमूलदन्तानां दर्शनं वै वराङ्गनाः ।
कुर्वन्त्यो लोभयन्त्यश्च तं द्विजं परितः स्थिताः ।

[(L. 1) G3 प्रेक्षमाणानि कु°. T1 विकारान्कारयाम च. — (L. 2) T1 आविशद्भिर्; G1 आनमंतीर्; G5.6 °च्छंतीर्. — (L. 4) T3 G4 पुरतः; G3 परतः. G5.6 श्रिताः.]

— c) K4 वै (for च). Ñ1 मास्मा°. — d) Ś1 K1 वीरः;

२०९

C. 1. 7861
B. 1. 217. 1
K. 1. 237. 1

वर्गोवाच ।
ततो वयं प्रव्यथिताः सर्वा भरतसत्तम ।
आयाम शरणं विप्रं तं तपोधनमच्युतम् ॥ १
रूपेण वयसा चैव कन्दर्पेण च दर्पिताः ।
अयुक्तं कृतवत्यः स्म क्षन्तुमर्हसि नो द्विज ॥ २
एष एव वधोऽस्माकं सुपर्याप्तस्तपोधन ।
यद्वयं संशितात्मानं प्रलोब्धुं त्वामिहागताः ॥ ३
अवध्यास्तु स्त्रियः सृष्टा मन्यन्ते धर्मचिन्तकाः ।
तस्माद्धर्मेण धर्मज्ञ नास्मान्हिंसितुमर्हसि ॥ ४
सर्वभूतेषु धर्मज्ञ मैत्रो ब्राह्मण उच्यते ।
सत्यो भवतु कल्याण एष वादो मनीषिणाम् ॥ ५
शरणं च प्रपन्नानां शिष्टाः कुर्वन्ति पालनम् ।
शरणं त्वां प्रपन्नाः स्म तस्मात्त्वं क्षन्तुमर्हसि ॥ ६

वैशंपायन उवाच ।
एवमुक्तस्तु धर्मात्मा ब्राह्मणः शुभकर्मकृत् ।
प्रसादं कृतवान्वीर रविसोमसमप्रभः ॥ ७

ब्राह्मण उवाच ।
शतं सहस्रं विश्वं च सर्वमक्षयवाचकम् ।
परिमाणं शतं त्वेतन्नैतदक्षयवाचकम् ॥ ८
यदा च वो ग्राहभूता गृह्णन्तीः पुरुषाञ्जले ।

K₂ Ñ₁ B₅ Da D₁ धीरः. — *f*) T G निर्मलः; M₅ निश्चलः.

21 *a*) Ko सोपश्यत्. Ś₁ Ko.1.2(after corr.).4 °स्माकं; K₂(before corr.).3 D₅ °स्मांश्च; Ñ2.3 V₁ B₅ Dn G₁ °स्मासु. — *c*) Ko.4 Da₁ D₅ ग्राही°. — *d*) Ś₁ Ko.3.4 D₅ भविष्यध्वं; K₁ भविष्यंति; Ñ1.2 V₁ B₁ Dn D₄ T G चरिष्यथ.

Colophon. *Major parvan:* T₂ G M संभव° (for आदि°). — *Sub-parvan:* Ś₁ K Ñ₃ B Da Dn1.n2 D1.2.4 M3.5 अर्जुनतीर्थयात्रा (B₅ °वनवास); T₁ संभव. — *Adhy. name:* Ś₁ Ko.1.4 D₅ अप्सरसां (Ś₁ K₁ अप्सरः-) शापवर्णनं; K₃ अप्सराःशापः; M3.5 वन्दाशापमोचनं (M₅ °क्षणं). — *Adhy. no.* (figures, words or both): Dn3 215; D4m 225; D₅ 166; T₁ 221; T3 G1.4 176; G₂ 173; G3 177; G5.6 M 175. — *S'loka no.:* Da₁ Dn M3 23. — *Aggregate s'loka no.:* Dn2 7839.

209

1 Ś₁ K₁ वर्षोवाच (sic); Ko.3.4 V₁ वर्षो°; K₂ T₁ नंदो°; Ñ₁ वृंदो°; B1.3 वर्दो°; T₂ G M3.5 वंदा; M6-8 विंदा. — *a*) Ñ₁ प्रस्थिताः स्म (for प्रव्य°). — *b*) Ñ₂ B D2.4 भारत°. — *c*) Ko.3.4 D₅ आयाताः; Ñ₁ B1.3 Dn अयाम; V₁ जगाम; S याचाम.

2 *b*) M₅ मोहि° (for दर्पि°). — *c*) T₂ G3-6 च (for स्म). — *d*) K₄ भवान् (for द्विज).

3 *a*) Ko एवम्; K₄ एक; T G श्रेय (for एष). — *b*) Ñ₃ Da स्वयं प्राप्तस्; T₃ G3.4 सा पर्याप्तिस्. — *c*) MSS. (as usual) शंसि°, शंशि° etc. — *d*) Ś₁ K (except K₂) Da D1.4 Cd प्रलब्धुं. Ś₁ K Ñ₁ V₁ D₁ उप- (for इह). T G (except G₁) प्रलोभयितुमा°.

4 *a*) Ś₁ K₁ सृष्टौ; K₂ सर्वाः. — *b*) Ñ₂ V₁ Dn D₄ धर्मचारिणः. — *c*) T₁ G3.4 अस्माद्. Ñ₂ B1.3 Dn D₄ वर्धं त्वं; B₅ वर्तस्व; D1.2 वर्धध्वं (for धर्मज्ञ).

5 *a*) V₁ D₅ सर्वे° (for धर्मे°). — *a*) K₂ Ñ2.3 B3.5 Dn D2.4 एवं (for एष).

6 *b*) Ś₁ K₁ द्रष्टं (for शिष्टाः). — Da₁ om. 6*cd*. — *c*) Ko D₅ शिष्टं च (for शरणं). T G (except G₂) M₅ च (for त्वां).

7 Ś₁ K Ñ₁ D₂ S om. उवाच (Ko.4 Ñ₁ M₅ om. the ref.). — *a*) K₂ Ñ2.3 B D (except D₅) T₂ G3-6 स (for तु). — *c*) Ś₁ K (except K₂) Ñ₁ V₁ शूर (for वीर). — *d*) Ś₁ °शुचिप्रभः; G2.3 °शशिप्रभः.

8 Ś₁ K₁ D₂ S om. उवाच. K₂ विप्र उ°; K₃ ऋषिरु°. — *a*) T G M3.5 विश्वं (for शतं). K₂ Ñ2.3 B (B₃ marg.) D (except Da) T₁ G5.6 शतसहस्रं; V₁ सहस्रमखं; B₃ सहस्रं त्रिंशं; T₂ G1-4 M3.5 शतं सहस्रं (for सहस्रं विश्वं). Ñ2.3 B (B₃ marg.) Dn G₂ M₅ तु (for च). Cd as in text. — *b*) K (except K₁) Ñ V₁ B D M3.5 °मक्षय्य°; Cd as in text. — *c*) T₂ G3.4 °णशतं; G₁ °णं तु तं. Ś₁ K₁ D₅ त्वेनं; Ko.2 Da त्वेव; Ñ₁ चैव; T₁ G₂ चैतं; T₂ G3.4 चैतत्. — *d*) Ñ₂ B D नेदम् (D₅ एतद्); Ñ₃ V₁ सत्यं. Ko.3 Ñ1.2 V₁ B (B₁ marg.) D T₁ M3.5

उत्कर्षति जलात्कश्चित्स्थलं पुरुषसत्तमः ॥ ९
तदा यूयं पुनः सर्वाः स्वरूपं प्रतिपत्स्यथ ।
अनृतं नोक्तपूर्वं मे हसतापि कदाचन ॥ १०
तानि सर्वाणि तीर्थानि इतः प्रभृति चैव ह ।
नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्वशः ।
पुण्यानि च भविष्यन्ति पावनानि मनीषिणाम् ॥ ११

वर्गोवाच ।

ततोऽभिवाद्य तं विप्रं कृत्वा चैव प्रदक्षिणम् ।
अचिन्तयामोपसृत्य तस्मादेशात्सुदुःखिताः ॥ १२
क्व नु नाम वयं सर्वाः कालेनाल्पेन तं नरम् ।
समागच्छेम यो नस्तद्रूपमापादयेत्पुनः ॥ १३
ता वयं चिन्तयित्वैवं मुहूर्तादिव भारत ।
दृष्टवत्यो महाभागं देवर्षिमुत नारदम् ॥ १४
सर्वा हृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्युतिम् ।
अभिवाद्य च तं पार्थ स्थिताः स्म व्यथिताननाः ॥ १५
स नोऽपृच्छदुःखमूलमुक्तवत्यो वयं च तत् ।
श्रुत्वा तच्च यथावृत्तमिदं वचनमब्रवीत् ॥ १६
दक्षिणे सागरानूपे पञ्च तीर्थानि सन्ति वै ।
पुण्यानि रमणीयानि तानि गच्छत माचिरम् ॥ १७
तत्राशु पुरुषव्याघ्रः पाण्डवो वो धनंजयः ।
मोक्षयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः ॥ १८
तस्य सर्वा वयं वीर श्रुत्वा वाक्यमिहागताः । C. 1. 7879 B. 1. 217. 19 K. 1. 237. 19

अक्षय्य°; Ñ8 नाक्षय्य°.

9 a) Ko ग्रहीभूत्वा; K2 ग्रहो भूत्वा; K4 ग्रहीभूता. — b) Ko. 1. 4 Ñ1 B8. 5 Da Dn1. n8 T1 गृह्णतीः; K2 गृह्णीतं; V1 B5 D1 गृह्णीतः; G2. 3. 5 M6-8 गृह्णंति. — c) V1 उद्धरिष्यति; D5 उत्कृष्यति; T G उत्तारयेज्; M उद्धरिष्येज्. K2 Ñ2 B (except B5) D (except D1. 2. 5) तस्मात्; G1 कच्चित्; G2. 3. 4 (before corr.). 5 किंचित्. — d) K (except K2) D5 स्थले; M6-8 पदा.

10 a) G2. 3. 4 (before corr.). 5. 6 सर्वं; M6-8 स्वस्थाः. — b) Ś1 K2 Ñ V1 B Da2 Dn1 D2. 4. 5 M8. 8 स्वं (for स्व-). — c) Ñ1 स्वैरेष्वपि; D5 सहसापि; G5. 6 भवितापि. B5 कथंचन; T8 G2-4 न किंचन.

11 a) Ś1 K1. 3 तत्र; Ko. 4 ततः (for तानि). T G transp. सर्वा° and तीर्था°. — b) K8 Ñ1. 2 B (except B5) D M ततः (for इतः). K (except K2) D5 T G2. 4. 5 हि (for ह). — c) Ś1 K1 तानीह; Ko. 3. 4 D5 ह्येतानि; D1 चैवेह; M5 याम्येह (for नाम्नेह). — d) V1 चैव ह (for सर्वशः). D1 नाम्ना ख्यातानि सर्वं°. — f) Ś1 च सर्वशः; T1 विशेषतः (for मनी°).

12 Ś1 K1 वर्षोवाच (sic); Ko. 3. 4 V1 वर्षोवाच; K2 नंदो°; B1. 3 वर्दो°; T1 नंदा; G1 M8 वंदा; M6-8 विंदा; D5 T8 G2-6 M5 om. the ref. — a) D2 तीर्थानि (for तं विप्रं). — b) K8 Ñ2 Dn D4 S अपि (M6-8 अभि-) (for एव). — c) K4 चिंतयाना ह्युपक्रांताः; Ñ2. 3 Dn1. n2 D4. 5 आचिंत°; B1 आचिंतयामोपसृताः; B8 आचिंतयामास सृताः; B5 संचिंत्य स्नेहापसृताः; B5m M8. 7 °यामाप°; B6 अचिंतयञ्शापभृताः; T1 अचिंतयमपासृत्य; T8 G2-4 चिंतयंत्योपसृत्याथ; G1. 5. 6 M8 °यामावसृत्य.

13 b) K4 स्थिताः कालेन; M8. 5 कालेनानेन. B1 (mas in text) जनं (for नरं). — c) Ñ8 V1 अभि° (for समा°). — d) K4 आदाय तत्; Da1 T1 M6-8 आसादयेत्; G5. 6 आवापयेत्.

14 a) K1. 2 B D1. 2 चिंतयित्वेह; K4 N Da Dn D4 S °त्वैव. — b) Ś1 Ko. 1 D2. 5 मुहूर्तम्. — c) Ś1 K1 पृष्ट°. Ko B5 D5 महात्मानं; D1. 2 T8 G1. 3. 4 °भाग. — d) Ś1 K1 महर्षिमुत; Ko. 2. 4 Da1 °र्षिसुत-; K8 Ñ1 T8 G4 °र्षिमथ; D1. 2 °र्षि तत्र.

15 a) K2 Ñ2. 3 B D (except D5) संप्रहृष्टाः; Ñ1 ततो हृष्टाः. K2 सर्वाः (for दृष्ट्वा). — b) G6 अमरद्युतिं. — c) Ñ1 विप्रं (for पार्थं). K4 om. 15c-16c. — d) M6-8 स्थित्वा. K1 प्रव्यथि°; K2 Ñ V1 B D स्म व्रीडि°; K8 स व्यथी°; S व्रीडितचेतनाः (T1 G8 M8 °लोचनाः).

16 K4 om. 16abc (cf. v. l. 15). — a) Ñ1 G2 दुःखहेतुं. — b) Ko Ñ1. 2 Dn D5 M6-8 तं; B6 Da2 T1 यत्. K2 °त्योथ तं वयं. — After 16ab, Ñ1 ins.:

2041* क्व गच्छामो वयं सर्वा यत्र लप्स्यामहे पुनः ।

— c) Ñ1 एतत् (for श्रुत्वा). Ko D5 स च; K2 Ñ2. 3 B1. 5 Dn D4 तत्र; Ñ1 श्रुत्वा; B8 तत्तु; B6 तं च; D2 तं तु (for तच्च). Ś1 K1 यथातथ्यं; Ko Ñ1 °तत्वं; V1 G1 तथा°.

17 Before 17, S (except M8. 5) ins. नारदः. — a) K2. 3 सागरोपांते; Ñ1 संगतानीह; D5 सागरद्वीपे. — b) Ñ1 यानि (for पञ्च). — d) V1 तत्र (for तानि). K4 G1 M गच्छथ.

18 a) Ś1 Ko. 3. 4 D1. 2. 5 तत्रस्थाः; K1 Ñ1 तत्रस्थः; M5 तत्र वः. — b) Ko Ñ2 V1 B8. 6 D (except Da2) पांडवेयो; K2 °वो वै; Ñ1. 3 G1. 3. 5. 6 M °वोथ. — c) Ś1

C. 1. 7879
B. 1. 217. 19
K. 1. 237. 19

तदिदं सत्यमेवाद्य मोक्षिताहं त्वयानघ ॥ १९
एतास्तु मम वै सख्यश्चतस्रोऽन्या जले स्थिताः ।
कुरु कर्म शुभं वीर एताः सर्वा विमोक्षय ॥ २०

वैशंपायन उवाच ।

ततस्ताः पाण्डवश्रेष्ठः सर्वा एव विशां पते ।
तस्माच्छापाददीनात्मा मोक्षयामास वीर्यवान् ॥ २१
उत्थाय च जलात्तस्मात्प्रतिलभ्य वपुः स्वकम् ।
तास्तदाप्सरसो राजन्नदृश्यन्त यथा पुरा ॥ २२
तीर्थानि शोधयित्वा तु तथानुज्ञाय ताः प्रभुः ।
चित्राङ्गदां पुनर्द्रष्टुं मणलूरपुरं ययौ ॥ २३
तस्यामजनयत्पुत्रं राजानं बभ्रुवाहनम् ।
तं दृष्ट्वा पाण्डवो राजन्गोकर्णमभितोऽगमत् ॥ २४

इति श्रीमहाभारते आदिपर्वणि नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

K1 Dn8 धर्मात्मा. — After 18, D4 (marg. *sec. m.*) S (except M8) ins.:

2042* इत्युक्त्वा नारदः सर्वांस्तत्रैवान्तरधीयत ।

19 Mc.7 read 19^{ab} *twice*, once with the S reading and again with the N reading! — ^{a}) S (Mc.7 first time) तस्मात्सर्वा (T1 सर्वांस्तस्माद्). — ^{b}) Mc.7 (both second time).8 वाचम् (for वाक्यम्). K2 Ñ2 B1 Dn1. n2 D4 इतोगताः (for इहा°). S (Mc.7 first time) निवसामा(T1 Mc.5 °मो)त्र नित्यशः. — ^{c}) T3 G4.5 सर्वम् (for सत्यम्). T G2.4 अत्र (for अद्य).

20 ^{a}) K2.3 V1 D2 च (for तु). K2 Ñ2.3 B D (except D5) G3 ताः (for वै). Ś1 transp. वै and सख्यः. — ^{b}) K1 शतद्रोण्यां (for चतस्रोऽन्या); see below. Ko.1.4 V1 जलं; S ह्रदे. K Ñ2.3 V1 B1m Da Dn1. n2 D4 श्रिताः (K2 -चराः) (for स्थिताः). Dn8 जलस्थिताः; D5 जलाश्रि°. Ś1 शतद्रोणाजलं श्रिताः. — ^{c}) S (except Mc-8) एता अपि महाबाहो. — ^{d}) Ñ1.3 B3.5 शापाद्; D1.2 पापाद् (for सर्वा). Ś1 ताश्चाप्याशु विमो°; Ko.1.3.4 एताश्चाप्याशुं मोक्ष°; V1 एताः शापात्प्रमोचय; B5 एता अप्याशु मोचय; B3m Da एताः शापाद्विमोचय; D5 एता रम्याश्च मोचय; S मुनिशापाद्विमो° (Mc-8 एताश्चैवापि मोचय). K2 Ñ2 B1 Dn D4 as in text.

21 Ś1 K1-3 D2 T G Mc-8 om. उवाच; Ko.4 V1 Da D5 M8 om. the ref. — ^{a}) S (except Mc-8) तच्छ्रुत्वा (for ततस्ताः). G3 पांडवस्तत्र. — ^{b}) Mc-8 °र्वा भरतसत्तम. — ^{c}) G2 transp. तस्मात् and शापात्. Ś1 °पाद्विनीतात्मा.

22 ^{a}) K1 V1 D1 G1 M (except M8) तु (for च). S (except Mc-8) सर्वाः (for तस्मात्). — ^{b}) D2 ततः (for वपुः). K4 D1 स्वयं. S (except Mc-8) transp. वपुः and स्वकं. — ^{c}) Ś1 Ko.1.4 Ñ1 तास्ततः; K3 Mc-8 तास्तथा; T1 तस्माद्. — ^{d}) S -पुरम्. B1 (m as in text) तत्रैवांतरधीयत.

23 ^{a}) S अथ (T3 G3.4 च) (for तु). — ^{b}) Ñ1 °ज्ञाप्य ताः. — ^{d}) Ś1 मणियूर°; Ko-2.4 Ñ1 V1 B3 Da D1.5 मणिपूर°; K3 Ñ3 B1.3.5 मणपूर°; Ñ2 Dn D2.4 मणिपूरं पुनर्; T1 G1.3.6 मणलूरु°.

24 ^{c}) K2 Da Dn1. n3 D1.4 तां (for तं). — After 24^{c}, Ñ2 D4 (marg. *sec. m.*) S ins. a passage given in App. I (No. 112). *N. B.* This passage, though included in all other printed edns., is missing even in Dn MSS.; cf. v. l. 1. 96. 6 (998*)! — ^{d}) Ś1 K2 °भितो गतः; V1 °र्णाभिमुखो ययौ; D1.2 G2 °भितो ययौ. — After 24, almost all edns. ins. the following stanza, which is not found in any MS. hitherto collated except Ñ2:

2043* आद्यं पशुपतेः स्थानं दर्शनादेव मुक्तिदम् ।
यत्र पापोऽपि मनुजः प्राप्नोत्यभयदं पदम् ।

— illuminating for the growth of the epic corpus!

Colophon om. in B3. — *Major parvan:* T3 G M संभव° (for आदि°). — *Sub-parvan:* Ś1 K Ñ3 B (B3 om.) Da Dn1. n3 D1.3.4 M3.5 अर्जुनतीर्थयात्रा (B3 °वनवास); T1 संभव. — *Adhy. name:* Ś1 K1 M3.5 बभ्रुवाहनजन्म (M3.5 °नोत्पत्तिः); Ko.4 अप्सरसां शापमोक्षः; D5 चित्रांगदाप्राप्तिः. — *Adhy. no.* (figures, words or both): Dn8 216; D4m 226; D5 167; T1 222; T3 G1.4 177; G2 174; G3 178; G5.6 M 176. — *S'loka no.:* Dn 24; M3 35. — *Aggregate s'loka no.:* Dn3 7873.

210

1 Ś1 K (except Ko) S om. उवाच (G5 om. the ref.). — ^{a}) K2 °पराण्येव; Ñ3 V1 °पराण्यथ; D5 °पराण्यपि; M3 (*inf. lin.* as in text).5-8 °परांतानि. K3.4 तीर्थेषु. — Ś1 K1 (hapl.) om. 1^{c}-2^{b}. — ^{c}) B1 G5.6 च (for

२१०

वैशंपायन उवाच ।
सोऽपरान्तेषु तीर्थानि पुण्यान्यायतनानि च ।
सर्वाण्येवानुपूर्व्येण जगामामितविक्रमः ॥ १
समुद्रे पश्चिमे यानि तीर्थान्यायतनानि च ।
तानि सर्वाणि गत्वा स प्रभासमुपजग्मिवान् ॥ २
प्रभासदेशं संप्राप्तं बीभत्सुमपराजितम् ।
तीर्थान्यनुचरन्तं च शुश्राव मधुसूदनः ॥ ३
ततोऽभ्यगच्छत्कौन्तेयमज्ञातो नाम माधवः ।
ददृशाते तदान्योन्यं प्रभासे कृष्णपाण्डवौ ॥ ४
तावन्योन्यं समाश्लिष्य पृष्ट्वा च कुशलं वने ।
आस्तां प्रियसखायौ तौ नरनारायणावृषी ॥ ५
ततोऽर्जुनं वासुदेवस्तां चर्यां पर्यपृच्छत ।
किमर्थं पाण्डवेमानि तीर्थान्यनुचरस्युत ॥ ६
ततोऽर्जुनो यथावृत्तं सर्वमाख्यातवांस्तदा ।
श्रुत्वोवाच च वार्ष्णेय एवमेतदिति प्रभुः ॥ ७
तौ विहृत्य यथाकामं प्रभासे कृष्णपाण्डवौ ।
महीधरं रैवतकं वासायैवाभिजग्मतुः ॥ ८
पूर्वमेव तु कृष्णस्य वचनात्तं महीधरं ।
पुरुषाः समलंचक्रुरुपजह्रुश्च भोजनम् ॥ ९
प्रतिगृह्यार्जुनः सर्वमुपभुज्य च पाण्डवः ।
सहैव वासुदेवेन दृष्टवान्नटनर्तकान् ॥ १०
अभ्यनुज्ञाप्य तान्सर्वानर्चयित्वा च पाण्डवः ।
सत्कृतं शयनं दिव्यमभ्यगच्छन्महाद्युतिः ॥ ११
तीर्थानां दर्शनं चैव पर्वतानां च भारत । C. 1. 7896 B. 1. 218. 12 K. 1. 238. 31

एव). Some MSS. °पूर्वेण.

2 Ś1 K1 om. 2ab (cf. v. l. 1). — ab) V1 °द्रे यानि तीर्थानि पश्चिमे भरतर्षभः. — e) S transp. सर्वाणि and गत्वा स. — After 2, D4 (marg. *sec. m.*) S ins. a passage given in App. I (No. 113).

3 a) Ś1 K1 °देशे. T G (except G1) प्रभासं समनुप्राप्तं. — e) K2 तं; M6–8 तु (for च). Ñ2. 3 B (except B6) Dn D4 सुपुण्यं रमणीयं च. — After 3, D4 (marg. *sec. m.*) S ins.:

2044* चारणानां तु वचनादेकाकी स जनार्दनः ।

4 a) M (except M3) तत्राप्यगच्छ°. — b) K1 नृप (for नाम). K4 Ñ V1 B D सखायं तत्र; Cd अज्ञातो नाम (as in text).

5 Ś1 K1 om. 5; G1 (hapl.) om. 5a–8b. — b) Ko. 2. 3 Ñ1 G3 (after corr.) जने; Da1 मुने; T1 G2. 5. 6 M पथि; T3 G3 (befor corr.) जले (for वने). — e) V1 रमेतां (for आस्तां). — d) K4 Ñ1 V1 उभौ (for ऋषी).

6 G1 om. 6 (cf. v. l. 5). — b) G5. 6 तं च पार्थो ह्यपृच्छ°; M तत्कार्यं पर्य°. — G5. 6 om. 6ad. — e) K2. 3 Ñ2. 3 B D (except Dn3 D1. 2) एतानि (for इमानि). T1 °र्थं पार्थ सर्वाणि; T3 G2. 4 °र्थं पावनानीति. — d) Ś1 K1. 2 तीर्थान्युपच(K2 °स)र°; K3 °न्यनुसर°; D5 °न्यनुसरांसि च.

7 G1 om. 7 (cf. v. l. 5). — Before 7, T1 M3 ins. वैशं°. — a) Ś1 K (except K2) Ñ1 B3 Da D1 तस्य (for ततो). — e) V1 S (G1 om.) transp. उवाच and च. Ñ1 वाचं (for उवाच). Ś1 K Ñ1 स (for च). — d) S (G1 om.) त्वेवमे° प्रभो.

8 G1 om. 8ab (cf. v. l. 5). — b) T1 समेतौ (for प्रभासे). Ś1 °पार्थिवौ. — d) Ś1 K2 M6–8 उप°; K1 अप° (for अभि°).

9 b) G1 M3. 5 तु (for तं). — e) K2 Ñ1. 3 V1 B D (except D4. 5) समंतात्; B1m पुरस्तात्. K2. 3 Ñ2. 3 B D (except D5) मंडयांचक्रुः; T3 G3. 4 तमलं°. — d) Ś1 Ko. 1. 4 सर्वकामसमृद्धिभिः.

10 K2 (hapl.) om. 10e–11b.

11 K2 om. 11ab (cf. v. l. 10). — a) N V1 B D (except D5) °ज्ञाय तान्; S (except M6–8) °ज्ञातवान्. — b) M6–8 तु (for च). — e) Da D1. 2 transp. सत्कृतं and शयनं. — d) Ko. 3. 4 Ñ1 D5 T G3–8 M सहाच्युतः; K2 G1. 2 सहार्जुनः; Ñ2. 3 Dn D4 महामतिः; B (except B6) समद्युतिः. — After 11, N (except Ko. 1 Ñ1) ins.:

2045* ततस्तत्र महाबाहुः शयानः शयने शुभे ।

12 T G M5 om. 12. — a) Ñ3 B Da1 Dn D4 नदीनां (for तीर्थानां). N2. 3 B D (except D1. 2. 5) पल्वलानां च (for दर्शनं चैव). — b) K2. 3 Ñ3 Dn D4 तथैव च; Ñ2 B Da D5 च दर्शनं (for च भा°). — a) Ś1

C. 1. 7896
B. 1. 216. 12
K. 1. 268. 12

आपगानां वनानां च कथयामास सात्वते ॥ १२
स कथाः कथयन्नेव निद्रया जनमेजय ।
कौन्तेयोऽपहृतस्तस्मिञ्शयने स्वर्गसंमिते ॥ १३
मधुरेण स गीतेन वीणाशब्देन चानघ ।
प्रबोध्यमानो बुबुधे स्तुतिभिर्मङ्गलैस्तथा ॥ १४
स कृत्वावश्यकार्याणि वार्ष्णेयेनाभिनन्दितः ।
रथेन काञ्चनाङ्गेन द्वारकामभिजग्मिवान् ॥ १५
अलंकृता द्वारका तु बभूव जनमेजय ।
कुन्तीसुतस्य पूजार्थमपि निष्कुटकेष्वपि ॥ १६
दिदृक्षवश्च कौन्तेयं द्वारकावासिनो जनाः ।
नरेन्द्रमार्गमाजग्मुस्तूर्णं शतसहस्रशः ॥ १७
अवलोकेषु नारीणां सहस्राणि शतानि च ।
भोजवृष्ण्यन्धकानां च समवायो महानभूत् ॥ १८
स तथा सत्कृतः सर्वैर्भोजवृष्ण्यन्धकात्मजैः ।
अभिवाद्याभिवाद्यांश्च सर्वैश्च प्रतिनन्दितः ॥ १९
कुमारैः सर्वशो वीरः सत्कारेणाभिवादितः ।
समानवयसः सर्वानाश्लिष्य स पुनः पुनः ॥ २०
कृष्णस्य भवने रम्ये रत्नभोज्यसमावृते ।
उवास सह कृष्णेन बहुलास्तत्र शर्वरीः ॥ २१

इति श्रीमहाभारते आदिपर्वणि दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥ समाप्तमर्जुनवनवासपर्व ॥

K1 सात्वतः; M (except M5) तत्वतः.

13 [a]) Ś1 Ko.1.4 D5 स तथा; K2.3 Ñ2.3 B Da Dn D1.2.4 एवं स; G1 कथां स; M6-8 स कथं. — [c]) Ñ2.3 B3 Da1 Dn D1.5 °योपि ह°; B5 कुंतीपुत्रो ह°. — [d]) K2.3 Ñ V1 B D °संनिभे; T G (except G1) सत्यविक्रमः.

14 [a]) Ś1 K1 M6-8 च; K2.3 Ñ2.3 B D (except D1.2) एव; M5 सु- (for स). — [b]) T G (except G1) वाद्यशब्देन. Ś1 Da M6-8 भारत; K1 वानघ; Ñ2 Dn D2.4 चैव ह. — [cd]) M6-8 transp. बुबुधे and स्तुतिभिर्.

15 [a]) M5 कृत्वा च (for स कृत्वा). Ś1 Ko.3 B3 D5 °कर्माणि. — [b]) Ś1 °वंदितः. — After 15[ab], S ins.:

2046* वार्ष्णेयं समनुज्ञाय ततो वासमरोचयत् ।
तथेत्युक्त्वा वासुदेवो भोजनं वै शशास ह ।
यतिरूपधरं पार्थं विसृज्य सहसा हरिः ।
[(L. 1) M6-8 °ज्ञाप्य.]

— [d]) Here and below Ś1 द्वारिका (for द्वार°).

16 S (except M6-8) om. 16[cd]. — [c]) K2.3 Ñ2.3 V1 B D (except D1) M6-8 कुंतीसुतस्य. — [d]) Ko.4 D1 अभि-; Ñ1 अथ; M6-8 इह (for the first अपि). Ko M7.8 निष्कंट°.

17 [a]) Ñ2 B5 D दिदृक्षंतश्च. S गोविदं. — [d]) Ñ1 स्तुवंतश्च सह°. — After 17, T G (except G1.2) ins.:

2047* क्षणार्धमपि वार्ष्णेया गोविन्दविरहाक्षमाः ।
कौतूहलसमाविष्टा भृशमुत्प्रेक्ष्य संस्थिताः ।
[(L. 1) T1 G5.6 °क्षताः.]

18 [a]) Ś1 K (except K2) Ñ1 D5 अथावलोके (for अव°). — [b]) V1 तस्मिंस्तु शतशस्तथा. — [d]) V1 °योभवन्महान्.

19 [a]) K1 सत्कृतः (for स तथा). M5.6 transp. स and तथा. — [b]) Ś1 K Ñ1 D1.2.5 °कादिभिः. — [c]) G1 °द्याभिवाद्यार्हान्.

20 Ś1 om. 20; G1 (? hapl.) om. 20[ab]. — [a]) V1 सत्कृतो; T3 G3-6 सर्वतो. — [b]) Ko D5 °वंदितः; K1-4 V1 B5 °पूजितः; Ñ2.3 B1.3.6 Dn °चोदितः; M3 (*inf. lin.* as in text).5 °नंदितः. — [d]) K4 आभाष्य. K1 D1 S (except T1) च (for स).

21 [b]) Ñ1 वृष्णिभोजस°. — For 21, S subst.:

2048* कृष्णः स्वभवनं रम्यं प्रविवेश महाद्युतिः ।
प्रवासादागतं सर्वा देव्यः कृष्णमपूजयन् ।
[(L. 1) M3.5 दिव्यं (for रम्यं). G1 M3.5 महाबलः. — (L. 2) T3 G2-4 प्रभासाद्.]

Colophon. *Major parvan:* T3 G M संभव° (for आदि°). — *Sub-parvan:* K Ñ3 B Da Dn1.n3 D1.2.4 M3 अर्जुन(B6 om.)तीर्थयात्रा (B5 °वनवास); T1 संभव; to it Ko.4 add समाप्त. — *Adhy. name:* Ś1 K1 रैवतकगिरिम(Ś1 °स)हः; Ko.3.4 D5 द्वारका(K3 °कामि)गमनं; M5 वासुदेवागमः. — *Adhy. no.* (figures, words or both): Dn3 217; D4m 227; D5 168; T1 223; T3 G1.4 178; G2 175; G3 179; G5.6 M 177. — *S'loka no.:* Dn 21; M3 40. — *Aggregate s'loka no.:* Dn3 7894.

211

1 Ś1 K (except Ko) S om. उवाच. — In Ś1 the portion of the text from कतिपया° (in [a]) up to

२११

वैशंपायन उवाच ।
ततः कतिपयाहस्य तस्मिन्नैवतके गिरौ ।
वृष्ण्यन्धकानामभवत्सुमहानुत्सवो नृप ॥ १
तत्र दानं ददुर्वीरा ब्राह्मणानां सहस्रशः ।
भोजवृष्ण्यन्धकाश्चैव महे तस्य गिरेस्तदा ॥ २
प्रासादै रत्नचित्रैश्च गिरेस्तस्य समन्ततः ।
स देशः शोभितो राजन्दीपवृक्षैश्च सर्वशः ॥ ३
वादित्राणि च तत्र स्म वादकाः समवादयन् ।
ननृतुर्नर्तकाश्चैव जगुर्गानानि गायनाः ॥ ४
अलंकृताः कुमाराश्च वृष्णीनां सुमहौजसः ।
यानैर्हाटकचित्राङ्गैश्चञ्चूर्यन्ते स्म सर्वशः ॥ ५
पौराश्च पादचारेण यानैरुच्चावचैस्तथा ।
सदाराः सानुयात्राश्च शतशोऽथ सहस्रशः ॥ ६
ततो हलधरः क्षीबो रेवतीसहितः प्रभुः ।
अनुगम्यमानो गन्धर्वैरचरत्तत्र भारत ॥ ७
तथैव राजा वृष्णीनामुग्रसेनः प्रतापवान् ।
उपगीयमानो गन्धर्वैः स्त्रीसहस्रसहायवान् ॥ ८
रौक्मिणेयश्च साम्बश्च क्षीबौ समरदुर्मदौ ।
दिव्यमाल्याम्बरधरौ विजह्रातेऽमराविव ॥ ९
अक्रूरः सारणश्चैव गदो भानुर्विदूरथः ।
निशठश्चारुदेष्णश्च पृथुर्विपृथुरेव च ॥ १०
सत्यकः सात्यकिश्चैव भङ्गकारसहाचरौ ।

C. 1. 7916
B. 1. 219. 11
K. 1. 239. 11

°मभवत् (in °) is lost on a broken part. — ᵃ) T1 G1.2 M °पयाहस्सु. — ᵇ) S तत्र रैव°. — ᵈ) K2.3 Ñ2 B D (except D5) उत्सवो नृपसत्तम.

2 Ś1 missing for 2ᵇᶜ. — ᵇ) K (except K2) Ñ V1 Dn D5 ब्राह्मणेभ्यः. — ᵈ) K2 m.4 V1 Dn1 D5 महेंद्रस्य; K3 महांतश्च; T1 महत्यस्मिन्; T3 G1.4 (after corr.) M3 महे तस्मिन्; G2.3.4 (before corr.).5.6 M5–8 मखे तस्मिन्. Ñ3 गिरस्तथा; S गिरौ तथा (G1.2 M6–8 °दा). Cd cites महः.

3 ᵃ) Ś1 Ko.1.4 Ñ1 पादपै (for प्रासादै). — Ś1 missing from च (in ᵃ) up to दीप (in ᵈ). K1 S (except M6–8) तु (for च). — ᵇ) Ko.3 Ñ3 V1 तत्र (for तस्य). K4 समीपतः. — G1 om. 3ᶜᵈ. — ᵉ) K1 °शः पूजितो. — ᵈ) K2 फल°; Ñ2 B (except B5) D कल्प°; Ñ3 V1 नदी°; Cd Arjp दीप° (as in text). Ś1 K4 च सर्वतः; Ko.2 S (G1 om.) च शोभितः (M3.5 समंततः).

4 V1 (hapl.) om. 4–5. Ś1 missing from स्म (in ᵃ) up to जगुर्गा· (in ᵈ). — ᵃ) K3 Ñ B D तत्रान्ये (Ñ3 तान्येव); T3 G2–4 तत्र स्युर्. — ᵇ) Ko चाथ वादयन्. — M6–8 om. 4ᵉ–5ᵈ. — ᵉ) Ko.4 D1.5 चापि (for चैव). — ᵈ) K2 Ñ2 B Da Dn1.n2 D4 गेयानि; K4 सामानि; Ñ3 तत्रैव; Dn3 D1.2 S (M6–8 om.) गीतानि. Ñ3 Dn3 D1.5 S (M6–8 om.) गायकाः.

5 V1 M6–8 om. 5 (cf. v. l. 4). — Ś1 missing from श्च (in ᵃ) up to चञ्चूर्यन्ते (in ᵈ). — ᵇ) K2 Ñ2.3 B3.6 D T3 G2–4 M3 (*inf. lin.* as in text) सुमहौजसां. — Ñ1 om. 5ᵉ–6ᵈ. — ᵉ) K1 कांचन° (? gloss); K2 Ñ2.3 V1 B D (except D5) हाटकचित्रैश्च. — ᵈ) K2 B1.3 च (for स्म). M3.5 भारत (for सर्व°).

6 Ñ1 om. 6 (cf. v. l. 5); M3 (? hapl.) om. 6–7.

7 M3 om. 7 (cf. v. l. 6). — ᵃ) Ś1 K (except K2) D5 हलायुधः. — ᵇ) Ś1 K1 रेवत्या. — ᵉ) Hypermetric! cf. 8ᵉ. Ś1 K D5 अनुगीय° (K2 m as in text); T3 G4 अभिगम्य°; G3 अभेद्य°. T G M5 बहुभिर्. — K1 D1 (hapl.) om. 7ᵈ–8ᵉ.

8 K1 D1 om. 8ᵃᵇᵉ (cf. v. l. 7). — ᵉ) Hypermetric! K2 प्रगीय°; K3 Ñ Dn D2.4.5 अनुगीय°; V1 B1.3 Da अनुगम्य° (cf. 7ᵉ); B5 अनुगीतः स.

9 ᵃ) K2 (m as in text).4 G2 M3 रौहिणे°; Cd as in text. Some MSS. शांबश्च. — ᵇ) K3 D2.5 S (except M3) समर(M6–8 परम)दुर्जयौ. — ᵉ) Ś1 K1.3.4 Da1 D5 °मालांबर°.

10 ᵇ) K2.3 Ñ B D (except D5) गदो बभ्रुर्. N (except Dn1) T1 G1.2.5.6 विदू(Ś1 °भू)रथः; cf. 1. 90. 42. — ᵉ) Ś1 निषद°; K1 °शह°; K2 °सित°; K3 °वध°; T3 G4 निःशठ°; G2.3 निःशंक°.

11 ᵇ) Ko.4 D5 भृंगकार-; K2.3 भद्रकार-; T1 G1 भंगाकार-. Ko.2.3 Da -सहावरौ; K4 -महाबलः; Ñ1

C. 1. 791c
B. 1. 219. 11
K. 1. 239. 11

हार्दिक्यः कृतवर्मा च ये चान्ये नानुकीर्तिताः ॥ ११
एते परिवृताः स्त्रीभिर्गन्धर्वैश्च पृथक्पृथक् ।
तमुत्सवं रैवतके शोभयांचक्रिरे तदा ॥ १२
तदा कोलाहले तस्मिन्वर्तमाने महाशुभे ।
वासुदेवश्च पार्थश्च सहितौ परिजग्मतुः ॥ १३
तत्र चङ्क्रम्यमाणौ तौ वसुदेवसुतां शुभाम् ।
अलंकृतां सखीमध्ये भद्रां ददृशतुस्तदा ॥ १४
दृष्ट्वैव तामर्जुनस्य कन्दर्पः समजायत ।
तं तथैकाग्रमनसं कृष्णः पार्थमलक्षयत् ॥ १५
अथाब्रवीत्पुष्कराक्षः प्रहसन्निव भारत ।
वनेचरस्य किमिदं कामेनालोड्यते मनः ॥ १६
ममैषा भगिनी पार्थ सारणस्य सहोदरा ।
यदि ते वर्तते बुद्धिर्वक्ष्यामि पितरं स्वयम् ॥ १७

अर्जुन उवाच ।

दुहिता वसुदेवस्य वासुदेवस्य च स्वसा ।
रूपेण चैव संपन्ना कमिवैषा न मोहयेत् ॥ १८
कृतमेव तु कल्याणं सर्वं मम भवेद्ध्रुवम् ।
यदि स्यान्मम वार्ष्णेयी महिषीयं स्वसा तव ॥ १९
प्राप्तौ तु क उपायः स्यात्तद्ब्रवीहि जनार्दन ।
आस्थास्यामि तथा सर्वं यदि शक्यं नरेण तत् ॥ २०

वासुदेव उवाच ।

स्वयंवरः क्षत्रियाणां विवाहः पुरुषर्षभ ।
स च संशयितः पार्थ स्वभावस्यानिमित्ततः ॥ २१
प्रसह्य हरणं चापि क्षत्रियाणां प्रशस्यते ।
विवाहहेतोः शूराणामिति धर्मविदो विदुः ॥ २२
स त्वमर्जुन कल्याणीं प्रसह्य भगिनीं मम ।

-महाबलौ; Ñ2 B Dn D4 -महारथौ; D1.2 -महोदरौ; M5 -सखेचरौ; M6-8 -सहायकौ. — c) K2.3 Ñ2.3 V1 B D (except D5) °क्य उद्धवश्चैव.

12 After 12, S ins.:

2049* वासुदेवो ययौ तत्र सह स्त्रीभिर्गुणान्वितः ।
दत्त्वा दानं द्विजातिभ्यः परिव्राजमपश्यत ।

13 a) Ś1 Ko.1.4 D5 ततः; K2 B1.3.5 चित्रे; K3 तत्र; N1 D1.3 तथा; Da1 Dn D4 चित्र-. Ñ2 Dn D4 S (except M8.5) कौतूहले. — b) K2m.3 Ñ V1 B D (except D5) महाद्भुते; K4 महे शुभे; S महोत्सवे.

14 a) Ś1 Ko.1 ततः (for तत्र). Ñ1.2 B (except B1) Dn D2.4 G1 M8.5 चंक्रम°; D5 चंक्रममाणानां. — c) Ko.3.4 N1 V1 S (except G1 M6.7) स्वलंकृतां. — d) K2 V1 B5 Dn1.n3 T G (except G5.6) M5 सुभद्रां ददृशुस्तदा; D1.2.4 सुभद्रां ददृशेऽर्जुनः.

15 a) G2 दृष्ट्वैतामर्जुनस्यास्य. — c) Ko D5 S त्व(T3 G2-4 चा)नेकाग्र°; K2-4 B3.6 D1.2.4 (after corr.) तदेकाग्र°; Ñ3 B1.5 Da Dn D4 (before corr.) तदैकाग्र°; Cd अनेकाग्र°.

16 a) Ñ2 B3.6 D (except Da D5) अब्रवीत्पुरुषव्याघ्रः; S अब्रवीत्पुंडरीकाक्षः.

17 a) M6-8 ममैव. — b) T G सहोदरी. — After 17ab, K2-4 N2.3 V1 B D ins.:

2050* सुभद्रा नाम भद्रं ते पितुर्मे दयिता सुता ।

— d) B3 D1.2 °रं स्वकं. — After 17, M6-8 (which om. the ref. before 18) ins.:

2051* अब्रवीत्पुण्डरीकाक्षं प्रहसन्निव भारत ।

(cf. 16ab and v. l.).

18 Ś1 K1 S om. उवाच (M6-8 om. the ref.). — c) Ś1 K4 Ñ1 एव च; Ñ2 B1 Da1 Dn चैषा (for चैव). G2 रूपयौवनसंपन्ना. — d) B (except B1) Dn1 (by corr.) कमेवैषा; G1 कथं चैषा. Ko D5 न लोभयेत्; G4 (before corr.) मनो हरेत्.

19 b) K2 स्वयमेव भ°. N1 स्वयं (for ध्रुवम्). — T3 G2-4 ins. after 19ab: G5.6, after 19:

2052* देववृन्दः सदा त्वां तु स्मृत्वा विजयतेऽसुरान् ।
तव संदर्शनात्स्वामिन्नप्राप्यं न हि तत्किमु ।

— c) G (except G1.4) वार्ष्णेय.

20 a) Ś1 Ko.1.4 B5 प्राप्तौ च; G1 प्राप्तुं तां. T1 तत्प्राप्तौ क उपायं मां. — b) Ś1 Ko.1 तत्प्रब्रूहि; K2.3 Ñ2 V1 B5.6 D S (except M6-8) तं ब्रूं; K4 तद्ब्रूहि त्वं. — c) K2 Ñ V1 B D M6-8 तदा; K4 G1 M5 यथा; T3 G4 इति तत्. — d) K2 कर्तव्यं मानुषेण तत्; D5 यदि शक्यं जनार्दन.

21 Ś1 K1 S om. उवाच. — b) K4 क्षत्रियर्षभ; M6-8 पुरुषोत्तम. — c) B5 M3 स तु. Ś1 K1 संगमितः पार्थ; D2 संशयितार्थश्च. Cd cites संशयितः (as in text). — d) K2 विवाहस्यानि°; S (except G1.5 M3.5) स्वभाव[:]स्यान्नि°.

22 b) K1 विशिष्यते; G3 विशां पते. — c) Ñ2.3 M3 विवाहहेतुः. S कन्यानां. — d) T3 G2-4 वेदविदो.

हर स्वयंवरे ह्यस्याः को वै वेद चिकीर्षितम् ॥ २३
वैशंपायन उवाच ।
ततोऽर्जुनश्च कृष्णश्च विनिश्चित्येतिकृत्यताम् ।
शीघ्रगान्पुरुषात्राजन्प्रेषयामासतुस्तदा ॥ २४
धर्मराजाय तत्सर्वमिन्द्रप्रस्थगताय वै ।
श्रुत्वैव च महाबाहुरनुजज्ञे स पाण्डवः ॥ २५

इति श्रीमहाभारते आदिपर्वणि एकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥

२१२

वैशंपायन उवाच ।
ततः संवादिते तस्मिन्ननुज्ञातो धनंजयः ।
गतां रैवतके कन्यां विदित्वा जनमेजय ॥ १
वासुदेवाभ्यनुज्ञातः कथयित्वेतिकृत्यताम् ।
कृष्णस्य मतमाज्ञाय प्रययौ भरतर्षभः ॥ २
रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि ।
सैन्यसुग्रीवयुक्तेन किङ्किणीजालमालिना ॥ ३
सर्वशस्त्रोपपन्नेन जीमूतरवनादिना ।
ज्वलिताग्निप्रकाशेन द्विषतां हर्षघातिना ॥ ४
संनद्धः कवची खड्गी बद्धगोधाङ्गुलित्रवान् । C. 1. 7985 B. 1. 220. 5 K. 1. 244. 35

---

23 ^{a}) Śi Ko. 1. 4 Ni अतः प्रचिंत्य क°. — After 23^{ab}, Ts G (except G1) ins.:

2053* यतिरूपधरस्त्वं तु यदा कालविपाकता ।

— ^{e}) Da तस्याः; S चा(Gs वा)स्याः. — ^{d}) Ko Ds कस्ते वेद; D1 को वेद वै (by transp.).

24 Before 24, only Dns ins. वैशं° उ° (as in text), and G1. 2 Ms-8 वैशं°; the rest om. the ref. — ^{b}) Śi K1 विनिश्चित्य विहृत्य च (Śi तां). — ^{c}) K2 Ñ2. 3 B D अन्यान् (for राजन्).

25 ^{b}) Ko. 3. 4 °प्रस्थ(K4 °स्थे)स्थिताय वै; T1 °प्रस्थनिवासिने. — ^{c}) T1 G1 M महाबुद्धिर्. — ^{d}) K1 च पांडवः; T1 समात्मकः; Ts G2-4 समाहितः; G1 समावृतः; G5. 6 M (except M5) समातृकः. — After 25, S ins.:

2054* भीमसेनस्तु तच्छ्रुत्वा कृतकृत्यं स्म मन्यते ।
इत्येवं मनुजैः सार्धमुक्त्वा प्रीतिमुपेयिवान् ।

Colophon. *Major parvan:* Ts G M संभव° (for आदि°). — *Sub-parvan:* Śi K Ns Bs. 5. 6 Da Dn1. n2 D1. 2. 4. 5 Ms. 5 सुभद्राहरण (Ks अर्जुनतीर्थयात्रा and सुभद्राहरण); B1 अर्जुनतीर्थयात्रा. — *Adhy. name:* Ko. 4 वासुदेवार्जुन(K4 °नयोर्)मंत्रः; K1 वासुदेवमंत्रः. — *Adhy. no.* (figures, words or both): K1 213; Dns 218; D4m 228; D5 169; T1 224; Ts G1. 4 179; G2 176; G3 180; G5. 6 M 178. — *S'loka no.:* Dn Ms 25. — *Aggregate s'loka no.:* Dn2 7919.

212

☞ The sequence of st. 1-8 in S (which om. 5^{cd}, 7^{c}-8^{b}) is: 1^{ab}, 2, 6, 7^{ab}, 1^{cd} (followed by passage No. 114 given in App. I, see below), 3-5^{ab}, 8^{cd}.

1 K1. 3. 4 D2 S om. उवाच; K2 om. the ref. Śi om. up to संवादि- (in ^{a}). — ^{a}) Ko. 3. 4 संनिश्चिते; K1 N1 संचारिते; Ñ3 V1 Bs. 6 समु°; B1. 3m संव°; Da संमु°. S चारैः संचारिते त°; Arjp (?) संचारिणा तु तच्छ्रुत्वा. Cd cites संचारिणा (=वार्ताहरेण). — Ts G2. 4 om. 1^{cd}. — ^{c}) S (Ts G2. 4 om.) रैवतकात्. — ^{d}) K2 विनिश्चित्य शुभाननां; S (Ts G2. 4 om.) प्रविष्टां द्वारकां प्रति. — A passage given in App. I (No. 114) is ins. in S after 1^{cd} (in Ts G2. 4, which om. 1^{cd}, after 7^{ab}); in D4, suppl. fol. *sec. m.*, after 2^{ab}.

2 For the sequence of S cf. v. l. 1. — ^{a}) K2 ततोर्जुनोभ्य°. After 2^{ab}, D4 ins. a passage given in App. I (No. 114); cf. v. l. 1. — ^{c}) Ñ2 Dn D2. 4. 5 आदाय; S आस्थाय. — ^{d}) K4 पुरुष°; Some MSS. °र्षभ. — After 2, S ins.:

2055* वृत्तैः सहोत्सवैरेवं वृष्णयोऽप्यगमन्पुरीम् ।
[M वृत्तोत्सवे रैवतके (for the prior half).]

3 For sequence of S cf. v. l. 1; Gs om. 3-5^{ab}. — ^{c}) Śi Ko-s S (Gs om.) सैन्य- (as in text); Bs. 6 सैठ्य-; the rest शैब्य-.

4 Gs om. 4 (cf. v. l. 3). — ^{b}) Ko Ñ1 V1 D2. 5 Ts G4-6 -वर-; K2 -रथ-; D1 इव (for -रव-). — ^{c}) Ts G4 ज्वलितार्क°. — ^{d}) Ts G4 °नाशिना.

5 Gs om. 5^{ab} (cf. v. l. 3). Ks reads 5^{abc} in marg. — After 5^{ab}, S (except Gs) ins.:

2056* युक्तः सेनानुयात्रेण रथमारोप्य माधवीम् ।

C. 1. 7935
B. 1. 220. 5

मृगयाव्यपदेशेन यौगपद्येन भारत ॥ ५
सुभद्रा त्वथ शैलेन्द्रमभ्यर्च्य सह रैवतम् ।
दैवतानि च सर्वाणि ब्राह्मणान्स्वस्ति वाच्य च ॥ ६
प्रदक्षिणं गिरिं कृत्वा प्रययौ द्वारकां प्रति ।
तामभिद्रुत्य कौन्तेयः प्रसह्यारोपयद्रथम् ॥ ७
ततः स पुरुषव्याघ्रस्तामादाय शुचिस्मिताम् ।
रथेनाकाशगेनैव प्रययौ स्वपुरं प्रति ॥ ८
ह्रियमाणां तु तां दृष्ट्वा सुभद्रां सैनिको जनः ।
विक्रोशन्प्राद्रवत्सर्वो द्वारकामभितः पुरीम् ॥ ९
ते समासाद्य सहिताः सुधर्मामभितः सभाम् ।
सभापालस्य तत्सर्वमाचख्युः पार्थविक्रमम् ॥ १०
तेषां श्रुत्वा सभापालो भेरीं सांनाहिकीं ततः ।
समाजघ्ने महाघोषां जाम्बूनदपरिष्कृताम् ॥ ११
क्षुब्धास्तेनाथ शब्देन भोजवृष्ण्यन्धकास्तदा ।
अन्नपानमपास्याथ समापेतुः सभां ततः ॥ १२
ततो जाम्बूनदाङ्गानि स्पर्ध्यास्तरणवन्ति च ।
मणिविद्रुमचित्राणि ज्वलिताग्निप्रभाणि च ॥ १३
भेजिरे पुरुषव्याघ्रा वृष्ण्यन्धकमहारथाः ।
सिंहासनानि शतशो विष्ण्यानीव हुताशनाः ॥ १४
तेषां समुपविष्टानां देवानामिव संनये ।
आचख्यौ चेष्टितं जिष्णोः सभापालः सहानुगः॥१५
तच्छ्रुत्वा वृष्णिवीरास्ते मदरक्तान्तलोचनाः ।
अमृष्यमाणाः पार्थस्य समुत्पेतुरहंकृताः ॥ १६
योजयध्वं रथानाशु प्रासानाहरतेति च ।

[T₃ G₄.₆ गुप्त-; G₅ गुप्तः (for युक्तः).]
— S om. 5ᶜᵈ. — ᵈ) Ñ₁ चानघ. K₃.₄ Ñ₃ B₃ D₁.₂ स (B₃ म-) ययौ भरतर्षभ (Ñ₃ D₁ °भः); V₁ ययौ रैवतकं गिरिं; B₅.₆ Dn D₄.₅ प्र(B₅ स)ययौ पुरुषर्षभः.

6 For sequence of S cf. v. l. 1. — ᵃ) K₂ S °त्यथ. — ᵇ) Ś₁ K₁ °भ्यर्च्य मह; Ko °भ्यर्च्य स्म ह; K₃.₃ corrupt; Ñ₁ समभ्यर्च्य च; Ñ₂ B (except B₁) D (except D₅) °भ्यर्च्यैव हि. M (except M₃) दैवतं.

7 ᵃ) Ś₁ Ko Ñ₂ Dn D₂.₄.₅ गिरेः; K₃ स्वयं. — After 7ᵃᵇ, Ñ₁ ins.:
2057* सुभद्रां कृष्णभगिनीं स्त्रीभिः परिवृतां तदा ।,
while S reads 1ᵉᵈ (om. in T₃ G₃.₄; cf. v. l. 1). — S om. 7ᶜ–8ᵇ (G₃ om. 7ᶜ–14ᵃ). — After 7, K (except K₁) Ñ₂ V₁ B D ins.:
2058* सुभद्रां चारुसर्वाङ्गीं कामबाणप्रपीडितः ।

8 S om. 8ᵃᵇ; G₃ om. 8ᶜᵈ also (cf. v. l. 7). — ᵃ) Ś₁ K₁ आकाशवेगेन; K₂.₄ Ñ₂ V₁ B₁.₃.₆ Dn₁.n₂ D₄ कांचनांगेन; Ñ₁ कामवानेव; Dn₃ D₁.₂ कामवे(D₁ °थो)गेन. — ᵈ) K₄ G₅.₆ स्वपुरीं.

9 G₃ om. 9 (cf. v. l. 7). — ᵇ) K₂ Ñ₂ V₁ B D T₁ °का जनाः. — ᶜ) Ko T₃ G₂.₄–₆ व्या(Ko G₂ व्य)क्रोशत्. K₂ Ñ₂ V₁ B D T₁ विक्रोशन्तो(D₅ T₁ व्याक्रोशन्प्रा)द्रवन्सर्वे.

11 G₃ om. 11 (cf. v. l. 7). — ᵇ) T₁ G₁ M संनादयं(G₁ °धीं)स्तदा; T₃ G₄ सांनाहयंस्तदा; G₅.₆ सांनाहयत्तदा.

12 G₃ om. 12 (cf. v. l. 7). — ᵃ) Ñ₁ क्रुद्धास् (for क्षुब्धास्). T₃ G₄–₆ क्षोभितास्तेन; G₂ क्षुधर्मास्तेन (all these om. अथ). — ᵇ) Ś₁ Ko.₄ B₅ तथा; Ñ₁.₃ ततः. — After 12ᵃᵇ, S (except G₃) ins.:
2059* अन्तर्द्वीपात्समुत्पेतुः सहसा सहितास्तदा ।
[G₁ M₅ सभां वै; M₆–₈ तथैव (for सहसा). T₁ सहसैव कृते तदा.]
— ᶜ) D₃ D₁.₂ अथापास्य (by transp.); S (G₃ om.) अपाहाय. Ś₁ K₁ Ñ₁ °पानाद्य(°नम)पास्यैव. — ᵈ) K₂ Ñ₂ V₁ B D (except D₃₂ D₅) T₃ G₂.₄–₆ समंततः; Ñ₁ ततः सभां (by transp.).

13 G₃ om. 13 (cf. v. l. 7). — ᵃ) Ñ₂ V₁ B₅.₆ D तत्र. — ᵇ) K₁ T₃ G₂.₄.₆ परार्ध्यास्तरणानि; G₁ चित्रास्तरण°.

14 G₃ om. 14 (cf. v. l. 7). — ᵇ) G₁ M₆–₈ °महाबलाः. — D₁ om. 14ᶜ–15ᵈ. — ᵉ) Ś₁ Ko.₁.₄ Ñ₁ बहुशः. — ᵈ) K₁ काष्ठानीव. T₃ G₂.₄ दीप्यमानानि सर्वशः.

15 D₁ om. 15 (cf. v. l. 14). — ᵇ) T₃ G (except G₁) संगमे. — ᵈ) Ñ₁ सभानुगः; T₁ तथाविधं; G₁ सभाभृतः; M समागतः (M₃.₅ °तान्) (for सहा°).

16 ᵃ) Ñ₁ °त्वा पृथु°. — ᵇ) Ñ₂ V₁ B₅ D (except D₅) मदसंरक्त°; B₃ क्रोध°. — ᶜ) K₂ B पार्थाय. — ᵈ) Ko.₄ D₅ अमर्षिताः; T₃ G (except G₁) महाबलाः (for अहं°). T₁ यादवाः सहसा कृताः.

17 ᵃ) G₂ योजयित्वा. — After 17ᵃ, S ins.:
2060* नागानश्वांस्तथैव च ।
कवचानाहर क्षिप्रं.

धनूंषि च महार्हाणि कवचानि बृहन्ति च ॥ १७
सूतानुच्चुक्रुशुः केचिद्रथान्योजयतेति च ।
स्वयं च तुरगान्केचिन्निन्युर्हेमविभूषितान् ॥ १८
रथेष्वानीयमानेषु कवचेषु ध्वजेषु च ।
अभिक्रन्दे नृवीराणां तदासीत्संकुलं महत् ॥ १९
वनमाली ततः क्षीबः कैलासशिखरोपमः ।
नीलवासा मदोत्सिक्त इदं वचनमब्रवीत् ॥ २०
किमिदं कुरुथाप्रज्ञास्तूष्णीं भूते जनार्दने ।
अस्य भावमविज्ञाय संक्रुद्धा मोघगर्जिताः ॥ २१
एष तावदभिप्रायमाख्यातु स्वं महामतिः ।
यदस्य रुचितं कर्तुं तत्कुरुध्वमतन्द्रिताः ॥ २२
ततस्ते तद्वचः श्रुत्वा ग्राह्यरूपं हलायुधात् ।
तूष्णीं भूतास्ततः सर्वे साधु साध्विति चाब्रुवन् ॥ २३
समं वचो निशम्येति बलदेवस्य धीमतः ।
पुनरेव सभामध्ये सर्वे ते समुपाविशन् ॥ २४
ततोऽब्रवीत्कामपालो वासुदेवं परंतपम् ।
किमवागुपविष्टोऽसि प्रेक्षमाणो जनार्दन ॥ २५
सत्कृतस्त्वत्कृते पार्थः सर्वैरस्माभिरच्युत ।
न च सोऽर्हति तां पूजां दुर्बुद्धिः कुलपांसनः ॥ २६
को हि तत्रैव भुक्त्वान्नं भाजनं भेत्तुमर्हति ।
मन्यमानः कुले जातमात्मानं पुरुषः क्वचित् ॥ २७
ईप्समानश्च संबन्धं कृतपूर्वं च मानयन् ।
को हि नाम भवेनार्थी साहसेन समाचरेत् ॥ २८
सोऽवमन्य च नामास्माननादृत्य च केशवम् ।

C. 1. 7939
B. 1. 220. 29
K. 1. 244. 56

[(L. 2) T3 G2–4 °चान्याहर (G2 °रत्); G5.6 °चानाहरन्; G1 °चानक्षतान्.]
— K3 (hapl.) om. 17c–18b. — c) G1 M3 तोमराणि. B6 D2 D1.2 महांति च.

18 K3 om. 18ab (cf. v. l. 17). — a) Ñ1 च चुक्रु°; T3 G (except G1) विचुक्रु°. — b) Ko रथानायोजयेति; D5 रथानां योजयेति; T1 रथानाहरतेति. — d) Ñ1 T1 हेमपरिष्कृतान्. Ś1 K1 आनिन्युर्हेमभू°; N2 B6 D1.2.4 अयुंजन् हेमभू° (D1 हेममालिनः).

19 b) T3 G2–6 महत्सु (for ध्वजे°). — c) D1 आक्रंदे च; G5.6 महास्कंधे. Ś1 K1.2 M3.5 °क्रंदेन वी°; T3 G2–4 महायादववी°. — d) K2.3 Ñ2 V1 B D2 D4.5 G1 तुमु(or °म)लं; M6–8 क्रंदनं.

20 a) K2 B (except B6) D1 तदा (for ततः).

21 a) Ś1 K2 D1.5 °ताम्रा°; Ko.1 N3 °ताम्र°; N1 पुरुषाः म्रा°; T1 M त्वकृतम्र°; T3 G चाकृतम्र° (G1 तु कृतं म्रा°). — Ko (? hapl.) om. 21d–22a. — a) Ś1 K1 G2–6 M5 मेघ°; K3.4 D5 किमु गर्जथ (K3 °त); D1 मोह°; D2 आहव°.

22 Ko om. 22a (cf. v. l. 21). — b) Ś1 K2 D1.5 G2.5.6 आख्यातुं स्वं; G1 M आख्यातीव. B6 सु (for स्वं). T3 G (except G1) °तु मम यद्भवि. — c) Ś1 Ko.1.4 यदस्मै; K3 यद्यस्य. K2–4 B1 Dn D2 G1 M3.5 रुचिरं. T1 corrupt.

23 a) Ñ1 M5 °स्तद्वचनं; T3 G (except G1) °स्ते वचनं. — c) Ko.3 D1.2.5 G3 M5 तूष्णीभूतास् (D5 °भूत्वा). — d) Ś1 Ko.1.4 D5 T1 अथ (for च).

24 a) Ko.3.4 सु(K4 स)संवादं; B1 D2.4.5 समं वाचो; B3.5 सर्वे वाचं; B6 सर्वे व°. Ko D5 निशम्यैते; Ñ2 B6 Da Dn D4 °म्यैव; B1.3.5 °म्याथ. K2 V1 D1 समं ततो(V1 समवाये)थ निःशब्दे; T1 G5.6 समवाच(°वोचं)स्तु निःशब्दा; T3 G2–4 यादवास्त्वपि (G2 om. तु) निःशब्दा; G1 समा वाचा तु निःशब्दा.

25 ab) K2.3 Ñ3 B (except B6) वचो रामो वासु°; Ñ2 Dn D4 वासुदेवं वचो रामः; T1 G1 M वासुदेवं कामपालः (by transp.). Ś1 K1 अरिंदमं; K4 Ñ2 B D M (except M3) परंतपः. — After 25ab, S ins.:

2061* त्रैलोक्यनाथ हे कृष्ण भूतभव्यभविष्यकृत् ।

[Before the line, T1 ins. कामपालः; G1 बलः; M6–8 बलदेवः.]
— e) T1 M6–8 किमिवांगोप°; T3 G3.4 किमुपांशूप°; G5.6 किमु चात्रोप°. — T1 om. 25d–26a. — d) V1 मुहुर्मुहुः; S (T1 om.) जनाकुलं.

26 T1 om. 26ab (cf. v. l. 25). — b) G1 M (except M3) अर्चितः (for अच्युत).

27 a) Ś1 Ko.1.4 Ñ1 D1.2.4 भुक्त्वैव (Ñ1 °क्त्वाति; D2 °क्त्वा हि) तत्रान्नं; G6 तत्रैव भित्त्वागां. — b) G2 पापकृद् (for भाज°). Ś1 K1 भक्तुम्. T1 G5 भोक्तुमर्हति पापकृत्; G6 अपीमां भोक्तुमर्हसि. — c) Ś1 K (except K2) D5 जन्म; T3 G3 M5 जातः (for जातम्).

28 a) K2 Ñ3 B3.5 D1 ईप्सन्नेव हि; Ñ2 B1.6 Da Dn D4 इच्छन्नेव हि; D2 °मानः स्व°. — b) K2.4 Ñ2 B1.3.5 D (except Da2 D2) M6.8 कृतं (for कृत°). T1 सुमारयन्; G1 समानवै; M समानयेत् (M3 °नयन्; M5 °पयत्).

C. 1. 7959
B. 1. 220. 29
K. 1. 244. 56

प्रसह्य हृतवानद्य सुभद्रां मृत्युमात्मनः ॥ २९
कथं हि शिरसो मध्ये पदं तेन कृतं मम ।
मर्षयिष्यामि गोविन्द पादस्पर्शमिवोरगः ॥ ३०
अद्य निष्कौरवामेकः करिष्यामि वसुंधराम् ।
न हि मे मर्षणीयोऽयमर्जुनस्य व्यतिक्रमः ॥ ३१

तं तथा गर्जमानं तु मेघदुन्दुभिनिःस्वनम् ।
अन्वपद्यन्त ते सर्वे भोजवृष्ण्यन्धकास्तदा ॥ ३२

इति श्रीमहाभारते आदिपर्वणि द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥ समाप्तं सुभद्राहरणपर्व ॥

२१३

वैशंपायन उवाच ।
उक्तवन्तो यदा वाक्यमसकृत्सर्ववृष्णयः ।
ततोऽब्रवीद्वासुदेवो वाक्यं धर्मार्थसंहितम् ॥ १
नावमानं कुलस्यास्य गुडाकेशः प्रयुक्तवान् ।
संमानोऽभ्यधिकस्तेन प्रयुक्तोऽयमसंशयम् ॥ २
अर्थलुब्धान्न वः पार्थो मन्यते सात्वतान्सदा ।
स्वयंवरमनाधृष्यं मन्यते चापि पाण्डवः ॥ ३
प्रदानमपि कन्यायाः पशुवत्कोऽनुमंस्यते ।

— [a]) Ś1 Ñ1 D1 भवेन्नार्थी; T G °र्थी. — [d]) K1.2 समाचरन्; S चरेद्बुधः.

29 [a]) S सोवमत्य. K2.4 Ñ1.2 V1 B3.5.6 Da Dn D2.4.5 तथास्माकम्; K3 च नः सर्वान्; B1 तथा चास्मान्; T3 G4 च नैवास्मान्; G1 च नास्मासु. D1 सोवमन्यत तानस्मान्. — [b]) S अवमत्य (for अना°). — [c]) K2 B3 (before corr.) Da2 D5 कृतवान्.

30 [a]) D5 ते; T3 G2–4 तु (for हि). T3 G2–4 सात्वतां मध्ये. — [b]) Ko.2.3 Ñ2 B D (except D1) transp. पदं and कृतं. M5 महत् (for मम). T1 पादं संनिहितं मम; T3 G2–4 कृत (G2 °तः) प्रोद्वाहकः (G3 °कं) कथं. — After 30[ab], T3 G (except G1) ins.:

2062* त्वया चेन्नाभ्यनुज्ञातो धर्षयिष्यति माधव ।
[G5.6 मर्षयिष्यामि.]

— [c]) N1 न सहिष्यामि; T3 G (except G1) न मर्षयिष्ये.

31 [a]) T3 G2–4 एतां; M उर्वीं (for एकः). — [b]) G1 M °मि न संशयः. — [d]) Ś1 K (except K2) Ñ1 D1.2.5 अर्जुनेन (Ś1 Ñ1 °नस्य) पराभवः. — After 31, T3 G (except G1) ins.:

2063* तमहं भ्रातृभिः सार्धं निहन्मि कुलपांसनम् ।

— After 31, M5–8 (erroneously) read 1. 213. 4[a]–5[b]!

32 Before 32, T G ins. वैशं. — [a]) S रौहिणेयं गर्जमानं. — [b]) D1.2 °गंभीर°. — [c]) Ś1 K1 D5 अभ्य°; M5 °वर्तत. — [d]) Ś1 K1 Ñ1 B5.6 Da Dn3 D4.5 G5.6 तथा; T1 M ततः. T3 G3.4 °वृष्ण्यंधकेश्वराः.

Colophon. *Major parvan:* T3 G M संभव° (for आदि°). — *Sub-parvan:* Ś1 K Ñ3 B Da Dn1.n2 D1.2.4.5 T3 G3–5 M3.5 सुभद्राहरण; T1 संभव. — *Adhy. name:* Ś1 K1 वृष्ण्यंधककोपः (K1 °कप्रकोपः); Ko.3.4 D5 बलदेवक्रोधः (Ko °क्रोधनः; K3 °कोपः); T3 G3–5 बलभद्रकोपः (G5 °कोपनं); M5 सभाक्षोभः. — *Adhy. no.* (figures, words or both): Dn3 219; D4m 233; D5 170; T1 229; T3 G1.4–6 M 183; G2 181; G3 184. — *S'loka no.:* Dn 32; M3 63. — *Aggregate s'loka no.:* Dn2 7950.

213

1 Ś1 K (except Ko) D2 S om. उवाच. — [a]) Ś1 Ko.1.4 तदा वाक्यं; K2.3 Ñ2 B1.3 Dn1.n2 D4 T3 G3.4 यथा वीर्यैः; B1m.5 D2 M5 यदा वीर्यैः; Dn3 यथा वा°; D5 तथा वा°. — [b]) G1 M3.5 सर्वयादवाः. — [d]) K3 Ñ2.3 B D (except D1) °संयुतं. Ñ1 वाचां धर्मार्थसंहितां. — After 1, S ins.:

2064* मयोक्तं न श्रुतं पूर्वं सहितैः सर्वयादवैः ।
अतिक्रान्तमतिक्रान्तं न निवर्तति कर्हिचित् ।
शृणुध्वं सहिताः सर्वे मम वाक्यं सहेतुकम् ।

2 [c]) K (except Ko.1) Da1 D1 सन्मानो. — [d]) K3 Dn3 D1.2.4.5 T G3.4 M3–5 °यमसंशयः; Ñ B3.5 Dn1.n2 °यं न संशयः; G2 धर्मसंश्रयः.

3 [a]) G5.6 अर्थं धर्मान्. Ko.1.4 न नः; K3 मनः; Ñ1 स नः; D5 अर्यः; T3 G (except G1) च वः (for न वः).

4 G2 (hapl.) om. 4–5. M5–8 read 4[a]–5[b] after 1. 212. 31! — [a]) T1 एव; G1 M इह (for अपि). — [b]) K2.3 Ñ2.3 V1 B D G1 °मन्यते; T3 G3–6 M5–8 °मंस्यति. N1 पशुत्वान्न तु शस्यते. — [a]) G5.6 समानः पुरु°.

विक्रयं चाप्यपत्यस्य कः कुर्यात्पुरुषो भुवि ॥ ४
एतान्दोषांश्च कौन्तेयो दृष्टवानिति मे मतिः ।
अतः प्रसह्य हृतवान्कन्यां धर्मेण पाण्डवः ॥ ५
उचितश्चैव संबन्धः सुभद्रा च यशस्विनी ।
एष चापीदृशः पार्थः प्रसह्य हृतवानिति ॥ ६
भरतस्यान्वये जातं शंतनोश्च महात्मनः ।
कुन्तिभोजात्मजापुत्रं को बुभूषेत नार्जुनम् ॥ ७
न च पश्यामि यः पार्थं विक्रमेण पराजयेत् ।
अपि सर्वेषु लोकेषु सेन्द्ररुद्रेषु मारिष ॥ ८
स च नाम रथस्तादृङ्मदीयास्ते च वाजिनः ।
योद्धा पार्थश्च शीघ्रास्त्रः को नु तेन समो भवेत् ॥ ९
तमनुद्रुत्य सान्त्वेन परमेण धनंजयम् ।
निवर्तयध्वं संहृष्टा ममैषा परमा मतिः ॥ १०
यदि निर्जित्य वः पार्थो बलाद्गच्छेत्स्वकं पुरम् ।
प्रणश्येद्वो यशः सद्यो न तु सान्त्वे पराजयः ॥ ११
तच्छ्रुत्वा वासुदेवस्य तथा चक्रुर्जनाधिप ।
निवृत्तश्चार्जुनस्तत्र विवाहं कृतवांस्ततः ॥ १२
उषित्वा तत्र कौन्तेयः संवत्सरपराः क्षपाः ।
पुष्करेषु ततः शिष्टं कालं वर्तितवान्प्रभुः ।
पूर्णे तु द्वादशे वर्षे खाण्डवप्रस्थमाविशत् ॥ १३
अभिगम्य स राजानं विनयेन समाहितः ।
अभ्यर्च्य ब्राह्मणान्पार्थो द्रौपदीमभिजग्मिवान् ॥ १४
तं द्रौपदी प्रत्युवाच प्रणयात्कुरुनन्दनम् ।
तत्रैव गच्छ कौन्तेय यत्र सा सात्वतात्मजा ।

C. 1. 7978
B. 1. 221. 17

---

5 G1 om. 5 (cf. v. l. 4). — [e]) Ñ1 Da कृतवान्; D5 हरणं; T3 G3.4 बलवान्.

6 Ś1 K1 om. 6. — [a]) T3 G (except G1) अपि (for एव). — [b]) Ñ2 B5 D5 सुभद्रां and °स्त्रिनीं. M6.8 om. and M7 has lacuna for च यशस्विनी. — [c]) K0 B1 D1 एष वा; K4 एषा वा. T3 G (except G1) M5 एतस्याः (M5 एषोपि) सदृशः पार्थः. — [d]) K0.4 B5 T1 हृतः; T3 G M अतः (for इति).

7 [a]) K2 B5 T G2-4 जातः. — [b]) Ñ V1 B Da Dn शांतनोश्. Ñ2 Dn D4 यशस्विनः. T1 G1 M शंतनोः पौत्रमद्य वै; T3 G2-4 शत्रुशात(G2.3 °स)नकृत्तथा; G5.6 शत्रुशातनमद्य वै. — [c]) K2 T3 G (except G1) M5 का (for को). T1 बुभूषेच्च. Ś1 K1 को नु दूषितवानमुं. G1 corrupt.

8 [a]) K4 G1 तं (for च). T1 M (except M5) तं (for यः). — [b]) K2.3 Ñ2.3 B D (except D1.2.5) M5 विजयेत रणे बलात्; M6-8 °ण तु यो जयेत्. — After 8[ab], Ñ1.2 B3 Dn D5 ins.:

2065* वर्जयित्वा विरूपाक्षं भगनेत्रहरं हरम् ।

— [c]) K1.3 लोके° सर्वे° (by transp.). — [d]) Ś1 K1 सेंद्ररुद्रवसुष्वपि; K4 सेंद्रैरपि च मा°; Ñ1 सेंद्ररूपेण मानवः; D1.2 सेंद्रैरपि सुरासुरैः; T3 G (except G1) सदेवमनुजेषु च (G5.6 °जेष्वपि).

9 [a]) M6-8 स च मानी. T3 G2-4 रथस्तावत्. — After 9[ab], D4 (marg. *sec. m.*) S ins.:

2066* मम शस्त्राण्यशेषेण तूणी चाक्षयसायकौ ।

— [c]) T3 G (except G1) स (for च). — [d]) Ś1 K (except K2) D2.5 T1 कौर्जुनेन (D5 °नस्य); G3 कौन्यस्तेन.

10 [a]) B1 G3 तद् (for तम्). K2.3 Ñ2.3 B D T3 G4 अभिद्रुत्य (B5 अतिक्रम्य). — [c]) K2 Ñ2.3 V1 B Dn1.n2 D4 नि(Ñ2.3 Dn1.n2 न्य)वर्तयत. S हृष्टाः सर्वे निवर्तध्वं. — [d]) G1-3.4 (before corr.) °मा गतिः.

11 [a]) Ś1 K1 नः पार्थो. — [b]) K0.3.4 D5 एको गच्छेत्; G1 युद्धाद्गं°. D5 T3 G2-4 स्वयं पुरं. — [c]) T1 च; G1 नो (for वो). K4 यशः सर्वं. — [d]) K2 वः; D1 च (for तु). — After 11, S ins.:

2067* पितृष्वसायाः पुत्रो मे संबन्धं नार्हति द्विषाम् ।

12 Before 12, K2.3 T3 G (except G1) ins. वैशं°; D5 वैशं° उ°. — [b]) S तथा कर्तुं. Ś1 K1.3 Ñ1 V1 D2.5 G1 M3.5 नराधिप (D2.5 °पाः); K0 B3 Da M8 जनाधिपाः. — After 12[ab], K4 (marg. *sec. m.*) D4 (suppl. fol. *sec. m.*) S (which latter om. 12[c]-16[d]) ins. a passage given in App. I (No. 115). — [d]) K2 Ñ2.3 V1 B D (except D1.2.5) कृतवान्प्रभुः.

13 S om. 13 (cf. v. l. 12). — [a]) Ś1 K1 उषितस्तत्र. — After 13[ab], N (except Ś1 K1) ins.:

2068* विहृत्य च यथाकामं पूजितो वृष्णिनन्दनैः ।

— [c]) K2 Ñ2.3 B5 Dn पुष्करे तु. K2 Ñ2 B D ततः शेषं. — [e]) Ś1 पूर्णे द्वादशवर्षे तु. — [f]) K2 Ñ2.3 V1 B D (except D1.2.5) °प्रस्थमागतः.

C. 1. 7979
B. 1. 221. 17

सुबद्धस्यापि भारस्य पूर्ववन्धः श्लथायते ॥ १५
तथा बहुविधं कृष्णां विलपन्तीं धनंजयः ।
सान्त्वयामास भूयश्च क्षमयामास चासकृत् ॥ १६
सुभद्रां त्वरमाणश्च रक्तकौशेयवाससम् ।
पार्थः प्रस्थापयामास कृत्वा गोपालिकावपुः ॥ १७
साधिकं तेन रूपेण शोभमाना यशस्विनी ।
भवनं श्रेष्ठमासाद्य वीरपत्नी वराङ्गना ।
ववन्दे पृथुताम्राक्षी पृथां भद्रा यशस्विनी ॥ १८
ततोऽभिगम्य त्वरिता पूर्णेन्दुसदृशानना ।
ववन्दे द्रौपदीं भद्रा प्रेष्याहमिति चाब्रवीत् ॥ १९
प्रत्युत्थाय च तां कृष्णा स्वसारं माधवस्य ताम् ।
सस्वजे चावदत्प्रीता निःसपत्नोऽस्तु ते पतिः ।
तथैव मुदिता भद्रा तामुवाचैवमस्त्विति ॥ २०
ततस्ते हृष्टमनसः पाण्डवेया महारथाः ।

---

14 Śi1 S om. 14 (cf. v. l. 12). — [a]) Ñ2 B5 Dn D4 च (for स). — [b]) Ñ2 B5 Dn1.n2 D4 नियमेन. B5 समन्वितः. — [d]) K1 Ñ1 उपजग्मिवान्.

15 S om. 15 (cf. v. l. 12). — [b]) Śi1 K1 D2.4 विनयात्. Śi1 पांडुनंदनं. — Śi1 K1 om. 15[cf]. — [e]) Ñ1 स्वबंधस्यापि. N1.3 V1 भावस्य. — [f]) K4 Ñ1 Dn3 D2.5 पूर्वो बंधः.

16 S om. 16 (cf. v. l. 12). — [d]) Śi1 K3 क्षामयामास; V1 कामया°; D1.2 शमया°.

17 [a]) T3 G3–6 त्वरमाणां. D4 S तु (for च). D1.2 सुभद्रां चानयामास. — [b]) Śi1 K1–3 Ñ1 पीत-; D2 क्षौम- (for रक्त-). Ko.2 D2 M3 (*inf. lin.* as in text).6–8 वाससीं; K3.4 Ñ V1 B Da Dn D4 T3 G3–6 -वासिनीं (for -वाससम्). — [d]) Ñ1 कृत- (for कृत्वा). K3 D4 T3 G गो(G2 गौ)पालिकं वपुः.

18 [b]) D4 T G4 बभौ कृष्णसहोदरा. — After 18[ab], S ins.:

2069* गोपालिकामध्यगता प्रययौ व्रजिनं पुरम् ।
ततः पुरवरश्रेष्ठमिन्द्रप्रस्थं यशस्विनी ।
त्वरिता खाण्डवप्रस्थमाससाद विवेश च ।

G1 om. 18[cd]. — [c]) D4 T1 सा गृहद्वार°; T3 G2–4 सा पुरश्रेष्ठ°; G5.6 M6–8 सा गृहश्रेष्ठ°. — [d]) Ñ1 नवांगना; D4 S (G1 om.) यशस्विनी. — [e]) Ñ1 पृथिवी साक्षात् (for पृथु°). — [f]) D4 T G4 पांडवमातरं; G1–3.5.6 M भद्रा पितृष्वसां. — After 18, K4 Ñ2.3 V1 B D (except D1) ins.:

2070* तां कुन्ती चारुसर्वाङ्गीमुपाजिघ्रत मूर्धनि ।
प्रीत्या परमया युक्ता आशीर्भिर्युंजतातुलाम् ।

[(L. 2) K4 °र्युंजती तदा; Ñ3 V1 आशिषोयुंक्त चातुला.]

19 [b]) K3 D4 T1 G (except G1.4) °शाननां.

20 [a]) K3 Ñ2.3 B Da Dn D2. तदा; K3 ततः; D4 G2–6 M तु तां (for च तां). D4 T3 G2–6 M देवीं (G2 M3.7.8 °वी) (for कृष्णा). T1 गृहीत्वोत्थाप्य तां हस्ते; G1 प्रत्युपस्थाय तां देवी. — [b]) Śi1 Ñ1 D1.4 ह; Ko.1.4 Ñ2 V1 Dn D3 च (for ताम्). D4 S कृष्णा कृष्णसहोदरीं (T1 G3.6 M °रां). — [c]) V1 आलिंग्य. D1 चाब्रवीत्; D4 सावदत्; T3 G (except G1) चाभवत्. Ñ2 B Da Dn D4.5 परिष्वज्यावदत् (Da °ज्याब्रवीत्); D2 परिष्वज्य तदा; M3.5 सस्वजानावदत्. K2 Ñ2.3 V1 B Da Dn D4.5 M3 प्रीत्या; D2 कृष्णा (for प्रीता). — After 20[cd], T3 G (except G1) ins.:

2071* वीरसूर्भव भद्रे त्वं भव भर्तृप्रिया तथा ।

T3 G2–6 cont.: D4 (marg. *sec. m.*) T1 G1 M ins. after 20[cd]:

2072* ओजसा निभृता बह्वीरुवाच परमाशिषः ।

[D4 T1 M निर्जिता; G1 निर्मिता (for निभृता).]

— [f]) D4 S तथा (for एवम्). — After 20, D4 (suppl. fol. *sec. m.*) S ins. a passage given in App. I (No. 116).

21 D4 orig. reads 21 as in text, suppl. fol. *sec. m.* as in S. — [b]) D4 (suppl. fol.) पांडवाश्च महा°. — For 21[cd], D4 (suppl. fol.) S subst.:

2073* युधिष्ठिरमुखाः प्रीता बभूवुर्जनमेजय ।
कुन्ती च परमप्रीता कृष्णा च सततं तथा ।,

followed by a colophon (*adhy. no.*: D4 suppl. fol. 235; T1 230; T3 G4–6 M 185; G1 184; G2 183; G3 186). — D4 (suppl. fol. *sec. m.*) cont.:

वैशंपायनः ।

त्रिभिर्वर्षैर्महाभागः कृष्णद्वैपायनः शुभः ।
प्रबन्धं भारतस्येमं चकार भगवान्प्रभुः ।
कृष्णद्वैपायनः पुत्रं पूर्वमध्यापयच्छुकम् । [10]
सुमन्तुं जैमिनिं पैलं वैशंपायनमेव च ।
तैश्चाप्यनन्यबुद्धिभ्यो ब्राह्मणेभ्यः प्रकाशितम् ।
या क्रिया क्रियते काचिच्च कश्चित्क्रियाविधिः ।
इदं प्रवर्तते सर्वं श्रोतॄणां प्रीतये क्षितौ ।

Then follows 237^{ab}, which is followed by:

अधीयीत यथान्यायं वेदज्ञो वेदभृद्द्विजः ।
वेदैश्चतुर्भिः समितमिदमाख्यानमुत्तमम् ।

3

1 For lines 1–2, cf. passage No. 2 above. — For lines 3–4, 22–23, cf. 66* (v. l. 1. 1. 191). — Lines 10–11 = (var.) 1. 56. 33.

5

Lines 1–2 = 1. 56. 33. — Lines 4–5 = (var.) 1. 56. 31. — Lines 6–7 = (var.) 1. 1. 191^{cdef}. — Lines 8–9 = (var.) 1. 56. 32.

भविष्यत्युपजीव्यं च कवीनामिदमन्नवत् ।
न चास्य कवयः केचिद्भविष्यन्ति विशेषणे ।
विशेषणे गृहस्थस्य त्रय एवाश्रमा यथा ।
धन्यमारोग्यमायुष्यं पुण्यं सत्कर्मसाधकम् ।
बुभूषते महाख्यानमभिमन्तव्यमादितः ।
यदधीतं तदा सम्यग्द्विजश्रेष्ठैर्द्विजोत्तमात् ।
वैशंपायनविप्राद्यैस्तैश्चापि कथितं तदा ।

6

After 216* (cf. v. l. 1. 5. 6), Ñ₂ V₁ ins.:

भृगोर्बभूवुः षट् पुत्रास्तपसा भावितात्मनः ।
कविश्च च्यवनश्चैव शङ्खलश्च महातपाः ।
सुरश्मिः सप्तरश्मिश्च वितथश्च महातपाः ।
वीतहव्यस्य तनयः स्मृतो गृत्समदः प्रभुः ।
गृत्समस्यापि सुतस्त्वस्य ब्रह्मन्सावेदसोऽभवत् । [5]
सावेदस्य तु पुत्रोऽभूदूर्वः श्रुतवतां वर ।
ऊर्वस्य तु विहव्योऽभूद्ब्रह्मसूनुर्महात्मनः ।
विहव्यस्य तु दायादो विहरः कीर्तिमान्स्मृतः ।
विहरस्यात्मवान्पुत्रो वत्सश्चाधिरथः स्मृतः ।
वत्सस्यापि विनिन्दस्तु सूनुरासीन्महातपाः । [10]
भृगोर्विनिन्दस्य सुतः सद्यो नाम बभूव ह ।
सद्यस्याप्यात्मजो ब्रह्मन्वित्तो नाम सुवीर्यवान् ।
वित्तस्य तु महातेजा बभूव च श्रुतश्रवाः ।
श्रुतश्रवसस्तु सूनुर्बभूव तपवान्प्रभो ।
तपसस्तु महातेजाः प्रकाशस्तनयोऽभवत् । [15]
ऊर्ध्वः प्रकाशस्य सुतो ब्रह्मर्षिर्ब्रह्मवित्तमः ।
ब्रह्मसृष्टो मतो येन येन पूर्वं महात्मना ।
ऊर्ध्वस्य चैव वागिन्द्रो वागिन्द्रो ब्रह्मवादिनः ।
ऋचीकस्तस्य तनयो ब्रह्मसूनुर्महातपाः ।
जमदग्निः सुतस्तस्य जज्ञे जनकसंनिभः । [20]
जमदग्नेस्तु वै पञ्च आसन्पुत्रा महात्मनः ।
रुमण्वांश्च सुषेणश्च वसुर्विश्वावसुस्तथा ।
रामस्तस्य जघन्योऽभून्महाञ्जो रेणुकासुतः ।
त्रिःसप्तकृत्वः पृथिवी येन निःक्षत्रिया कृता ।

7

After 1. 11. 3[ab], G₁ ins.:

मैवं सर्पेण बाधेथाः सखे भीराविशन्मम ।
शप्तश्च त्वं मया विप्र न नन्दासि कदाचन ।
तेनैव बहुशोक्तोऽहं सर्पके त्वात्मजे (sic) द्विज ।
अग्निहोत्रे समासीनं वेषयामि समोहितः ।

8

Between adhy. 12 and 13, there are in M₂₋₄ the foll. insertions, reference to which was inadvertently om. in the footnotes to the text (p. 111). At the indicated place, M₂ ins.:

किमर्थं राजशार्दूल राजा स जनमेजयः ।
सर्पसत्रेण सर्पाणां गतोऽन्तं तद्वदस्व मे ।
इति श्रीरामाय नमः । श्रीगुरुभ्यो नमः । श्रीवेदव्यासाय नमः ।
अक्षरं यत्परिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य न स्याद्व्यतिक्रमः ।
शिव शिव । कपर्दि समर्थ भूतेश भगनेत्रनिपातन ।
व्यतिक्रमं मे भगवन्क्षन्तुमर्हसि शंकर ।
नारायणाय नमः । श्रीवेदव्यासाय नमः । गणपतये नमः ।
अविघ्नमस्तु ।;

M₃ ins.: हरिः स्वस्ति श्रीवेदव्यासाय नमः ।;
M₄ ins.: हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।.

9

After 1. 16. 15, S (except M₁) ins.:

वासुकेर्मथ्यमानस्य निःसृतेन विषेण च ।
अभवन्मिश्रितं तोयं तदा भार्गवनन्दन ।
मथनान्मन्दरेणाथ देवदानवबाहुभिः ।
विषं तीक्ष्णं समुद्भूतं हालाहलमिति श्रुतम् ।
देवाश्च दानवाश्चैव दग्धास्तेन विषेण ह । [5]
अपाक्रामंस्ततो भीता विषादमगमंस्तदा ।
ब्रह्माणमब्रुवन्देवाः समेत्य मुनिपुंगवैः ।
मथ्यमानेऽमृते जातं विषं कालानलप्रभम् ।
तेनैव तापिता लोकास्तस्य प्रतिकुरुष्व ह ।
एवमुक्तस्तदा ब्रह्मा दध्यौ लोकेश्वरं हरम् । [10]
त्र्यक्षं त्रिशूलिनं रुद्रं देवदेवमुमापतिम् ।
तदाथ चिन्तितो देवस्तज्ज्ञात्वा द्रुतमाययौ ।
तस्याथ देवस्तत्सर्वमाचचक्षे प्रजापतिः ।
तच्छ्रुत्वा देवदेवेशो लोकस्यास्य हितेप्सया ।
अपिबत्तद्विषं रुद्रः कालानलसमप्रभम् । [15]

6

Ñ₂, which om. lines 8-10, has the following v. l.: — (L. 4-5) कवेश्च तनयः पूर्वं स्मृतः सूर्यमदः प्रभुः । सूर्यमदस्यापि सुतस्त्वस्य सावेदसोऽभवत् । — (L. 6) वर्चा (for ऊर्वः). — (L. 7) वर्चसस् (for ऊर्वस्य). — (L. 11) भूमेर्विहव्यस्य सुतः सद्यो etc. — (L. 12) सद्यस्य तनयो ब्रह्मन्सवितो नाम वीर्यवान्. — (L. 13) सवितस्य (for वित्तस्य तु). — (L. 17) ब्रह्मसृष्टं सहायेन येन etc.

कण्ठे स्थापितवान्देवो लोकानां हितकाम्यया ।
यस्मात्तु नीलता कण्ठे नीलकण्ठस्ततः स्मृतः ।
पीतमात्रे विषे तत्र रुद्रेणामिततेजसा ।
देवाः प्रीताः पुनर्जग्मुश्चक्रुर्वै कर्म तत्तथा ।

S (except G_8 M_1) end the adhy. here, beginning the new adhy. with:

सूतः ।
मथ्यमानेऽमृतस्यार्थे भूयो वै देवदानवैः ।,

which in T_2 G (except G_8) is followed by a *repetition* of 1. 16. 15, an unmistakable sign that the passage is an interpolation!

10

After 1. 16. 27, K_4 ins.:

एतस्मिन्नन्तरे जातं वासुकेर्मुखनिःस्वात् ।
कालकूटं विषं घोरं सर्वसत्त्वभयंकरम् ।
तस्मिन्समुत्थिते घोरे विषे कालानलप्रभे ।
संत्रस्तासुरदेवौघा दिशः सर्वाः प्रपेदिरे ।
येन विष्णुः कृतः कृष्णो विषेण महता तदा । [5]
यत्र हाहाकृतं सर्वं जगदासीच्चराचरम् ।
ततस्तु ब्रह्मणो वाक्याद्देवदेवो महेश्वरः ।
अपिबत्तद्विषं घोरं प्रत्यक्षं दैवतेषु वै ।
तस्मिन्विषे पीयमाने हरेणामिततेजसा ।
विस्मयं परमं जग्मुर्दैत्याश्च मुनिदानवाः । [10]
ततः कण्ठमनुप्राप्तं विषं दृष्ट्वा हरस्य च ।
ब्रह्मा प्रोवाच देवेशं कण्ठे धारय वै प्रभो ।
स्वयंभुवचनाच्छंभुर्दधार विषमुत्तमम् ।
कण्ठे हालाहलं घोरं नीलकण्ठस्ततः स्मृतः ।

11

After 1. 16. 36, K_4 ins.:

भ्रममाणस्य तु गिरेर्मन्दरस्य तु विप्लुषः ।
तेष्वप्सरसो जज्ञे षष्टिः कोट्यो वराङ्गनाः ।
अजरामराश्चारुरूपाः पीनश्रोणिपयोधराः ।
यासां संदर्शनान्मर्त्यः उन्मत्तक इवाभवत् ।

12

After adhy. 19, $\tilde{N}_{1.2}$ (both om. lines 1–6) V_1 B D (which all transp. l. 19. 17) ins. an addl. adhy.:

सौतिरुवाच ।

ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम ।
जग्मतुः परमप्रीते परं पारं महोदधेः ।
कद्रूश्च विनता चैव दाक्षायण्यौ विहायसा ।
आलोकयन्त्यावक्षोभ्यं समुद्रं निधिमम्भसाम् ।
वायुनातीव महता क्षोभ्यमाणं महास्वनम् । [5]
तिमिंगिलसमाकीर्णं मकरैरावृतं तथा ।
संयुतं बहुसाहस्रैः सत्त्वैर्नानाविधैरपि ।
घोरैर्घोरमनाधृष्यं गम्भीरमतिभैरवम् ।
आकरं सर्वरत्नानामालयं वरुणस्य च ।
नागानामालयं चापि सुरम्यं सरितां पतिम् । [10]
पातालज्वलनावासमसुराणां तथालयम् ।
भयंकराणां सत्त्वानां पयसो निधिमव्ययम् ।
शुभं दिव्यममर्त्यानाममृतस्याकरं परम् ।
अप्रमेयमचिन्त्यं च सुपुण्यजलसंमितम् ।
महानदीभिर्बह्वीभिस्तत्र तत्र सहस्रशः । [15]
आपूर्यमाणमत्यर्थं नृत्यन्तमिव चोर्मिभिः ।

☞ In Dn D_{1-4} this passage is *immediately preceded* by passage No. 13 given below (*q. v.*); it is uniformly followed by 1. 19. 17 and colophon.

13

K (except K_1) V_1 (marg.) Da D_{5-7} $G_{1.2.4.5}$ ins. after सूत उ° (resp. its v. l.) of 1. 20. 1: Dn D_{1-4}, after सौतिरु° of passage No. 12 above:

नागाश्च संविदं कृत्वा कर्तव्यमिति तद्वचः ।
निःस्नेहा वै दहेन्माता असंप्राप्तमनोरथा ।
प्रसन्ना मोक्षयेदस्मांस्तस्माच्छापाच्च भामिनी ।
कृष्णं पुच्छं करिष्यामस्तुरगस्य न संशयः ।
तथा हि गत्वा ते तस्य पुच्छे वाला इव स्थिताः । [5]
एतस्मिन्नन्तरे ते तु सपत्न्यौ पणिते तदा ।

12

(L. 2) Dn D_1 परया प्रीत्या (for परम°). — (L. 5) $N_{1.2}$ Dn D_1 सहसा; some D MSS. सहितं (for महता). — D_1 om. lines 6–16. — (L. 13) $\tilde{N}_{1.2}$ V_1 Dn शुभं (for शुभं).

13

(L. 1) $G_{1.2.4.5}$ नागास्तु सहिताः कृत्वा. Da कर्तव्ये कृतनिश्चयाः; D_8 कद्रोश्चैव च तद्व°. — (L. 2) K (except K_1) D_2 अस्नेहाद्वै; D_5 निश्चेष्टा वै; $G_{1.2.4.5}$ विस्नेहा वि-. D_5 भवेत् (for दहेत्). — (L. 3) Da प्रसादयामो यत्नेन (for prior half). Da $D_{1.6}$ भाविनी. — (L. 4) $G_{1.2.4.5}$ महात्मनः (for न सं°). — (L. 5) K (except K_1) Da $D_{2.5-7}$ $G_{1.2.4.5}$ इति (for हि). K (except K_1) D_2 उक्त्वा; $D_{3.4}$ कृत्वा; $G_{1.2.4.5}$ तस्य (for गत्वा). K (except K_1) D_2 तु (for ते). $G_{1.2.4.5}$ कृष्णा (for पुच्छे). Dn D_1 स्मृताः (for स्थिताः). — (L. 6) $G_{1.2.4.5}$ पत्न्यौ वै (for सपत्न्यौ).

☞ In Dn D1–4 this passage is followed by passage No. 12 above; in K (except K1) V1 Da D5–7, by 1. 20. 1; and lastly in G1. 2. 4. 5 *irrelevantly* by 294*.

14

After adhy. 20, K4 (marg.) N V1 B D (except D5; D2 on a suppl. fol.) T1 G1. 2. 4. 5 ins.:

सौतिरुवाच ।
स श्रुत्वाथात्मनो देहं सुपर्णः प्रेक्ष्य च स्वयम् ।
शरीरप्रतिसंहारमात्मनः संप्रचक्रमे ।

सुपर्ण उवाच ।
न मे सर्वाणि भूतानि बिभियुर्देहदर्शनात् ।
भीमरूपात्समुद्विग्नास्तस्मात्तेजस्तु संहरे ।

सौतिरुवाच ।
अरुणं चात्मनः पृष्ठमारोप्य स पितुर्गृहात् । [5]
ततः कामगमः पक्षी कामवीर्यो विहंगमः ।
मातुरन्तिकमागच्छत्परया मुदया युतः ।
तत्रारुणः स निक्षिप्तः दिशं पूर्वां महाद्युतिः ।
सूर्यतेजोविनिहताँल्लोकान्दग्धुं महारथः ।

रुरुरुवाच ।
किमर्थं भगवान्सूर्यो लोकान्दग्धुमनास्तदा । [10]
किमस्यापकृतं देवैर्येनेमं मन्युराविशत् ।

प्रमतिरुवाच ।
चन्द्रादित्यैर्यदा राहुराख्यातो ह्यमृतं पिबन् ।
वैरानुबन्धं कृतवांश्चन्द्रादित्ये तदानघ ।
वध्यमाने ग्रहेणाथ आदित्ये मन्युराविशत् ।
सुरार्थाय समुत्पन्नो रोषो राहोस्तु मां प्रति । [15]
बह्वनर्थकरं पापमेकोऽहं समवाप्नुयाम् ।
सहाय एकः कार्येषु न मे कृच्छ्रेषु जायते ।
पश्यन्ति ग्रस्यमानं मां सह देवैर्दिवौकसः ।
तस्माल्लोकविनाशाय ह्यवतिष्ठे न संशयः ।
एवं कृतमतिः सूर्यो ह्यस्तमभ्यगमद्गिरिम् । [20]
ततोऽर्धरात्रसमये सर्वलोकभयावहः ।
उत्पत्स्यते महान्दाहस्त्रैलोक्यस्य विनाशनः ।
ततो देवाः सर्षिगणा उपगम्य पितामहम् ।

देवा ऊचुः ।
भगवन्किमिदं चाद्य महद्दाहकृतं भयम् ।
न तावद्दृश्यते सूर्यः क्षपेयं न प्रभाति च । [25]
उदिते भगवन्भानौ कथमेतद्भविष्यति ।

पितामह उवाच ।
एष लोकविनाशाय रविरुद्यन्तुमुद्यतः ।
दहन्नेव हि लोकान्स भस्मराशीकरिष्यति ।
तस्य प्रतिविधानं च विहितं पूर्वमेव हि ।
कश्यपस्य सुतो विद्वानरुणेत्यभिविश्रुतः । [30]
महाकायो महातेजाः स स्थास्यति पुरो रवेः ।
करिष्यति च सारथ्यं तेजश्चास्य हरिष्यति ।
लोकानां शान्तिरेवं स्यादृषीणां च दिवौकसाम् ।

प्रमतिरुवाच ।
ततः पितामहाज्ञातः सर्वं चक्रे तदारुणः ।
उदितश्चैव सविता अरुणेन तदावृतः । [35]
एतत्ते सर्वमाख्यातं यत्सूर्यं मन्युराविशत् ।
अरुणश्च यथैवास्य सारथ्यमकरोत्प्रभुः ।
भूय एवापरं प्रश्नं शृणु पूर्वमुदाहृतम् ।

Colophon.

G3 ins. lines 1–4 of the above passage before 1. 21. 1; G3. 6 ins. line 6 after 1^{a5}.

14

G1. 2 om. lines 1–2; G5 om. 1–4. — (L. 1) Ñ3 स तु श्रुत्वात्मनो; B Da स तच्छ्रुत्वात्म°; T1 स्तवं श्रुत्वाप्म°; G4 वचः श्रुत्वात्म°. — (L. 4) T1 G1. 2. 4 समुद्विग्नानि रूपान्मे इति तेजः समाहरत्. — After line 4, G1. 2 ins. a colophon, while G4 repeats 1. 20. 15, which latter is then followed by a colophon. — Da Dn D1. 2 T1 G1. 2. 4. 5 transp. lines 5 and 6. — (L. 5) Ñ3 अभिरोप्य; G1. 2. 4. 5 उपारोप्य (for आरोप्य स). — (L. 6) G1. 2. 4. 5 महा° (for काम°), and महाबलः (for विहं°). — (L. 7) G1. 2. 4. 5 आगम्य (for आगच्छत्). Ñ3 Dn D1. 2 T1 परं तीरं महोदधेः (for the posterior half). — (L. 8) G1. 2. 4. 5 पुरोदेशे महाद्युतेः. — K4 om. lines 9–38. — (L. 9) This is the reading of B Da, which is unintellegible and appears to be corrupt, but the other readings seem to be all emendations. B3. 4 सूर्यस्तेजोविनि°; Ñ1. 2 V1 Dn D1–4. 6. 7 T1 सूर्यस्तेजोभिरत्युग्रैः; G1. 2. 4. 5 सूर्यस्तु सहितान्छोकान्. G1. 2. 4. 5 तदा (for लोकान्). Ñ2 V1 B1 महाबलः; Ñ3 महातपाः; G1. 2. 4. 5 समुद्यतः (for महारथः). B5 Dn D1–4. 6. 7 T1 लोकान्दग्धुमना यदा. — D4 (by corr.) G1. 2. 4. 5 शौनकः (for रुरुः). — (L. 11) B2 Dn D1. 2 °स्यापहृतं. — D4 सूत उ°; D5 T1 प्रमतिः; G1. 2. 4. 5 सूतः (for प्रमतिरु°). — (L. 12–13) G1. 2. 4. 5 चंद्रार्काभ्यां (for चन्द्रादित्यैः and °दित्ये). — (L. 14) B4 ग्रस्यमाणे; G1. 2. 4. 5 बाध्यमाने. — (L. 15) G1. 2. 4. 5 सुरार्थं यत्समुत्पन्नो दोषो राहोस्तु सांप्रतं. — (L. 16) G1. 2. 4. 5 अहोहं (for एकोऽहं). — (L. 17) Ñ1. 2 V1 Dn D1. 2 T1 G1. 2. 4. 5 एव; D3. 4. 6. 7 एवं (for एकः). Dn D1. 2 T1 न च कृ° दृश्यते. — (L. 18) G1. 2. 4. 5

15

After विनता of 1.24.6, M1.3 (which om. उवाच) ins.:

मेखलाजिनदण्डेन ब्रह्मचारीति लक्षयेत् ।
शुक्लवस्त्रः शुचिर्दान्तो रुक्मकुण्डलमण्डितः ।
वैणवीं धारयन्यष्टिमुपवीतं कमण्डलुम् ।
एतैस्तु लक्षणैर्युक्तं गृहस्थमिति लक्षयेत् ।
नखरोमाचितं विप्रं चीराजिनजटाधरम् । [5]
वनवासरतं नित्यं वनवासीति लक्षयेत् ।
मुण्डी त्रिदण्डी काषायी कमण्डलुधरो यतिः ।
एतैस्तु लक्षणैः पुत्र विद्धि तान्ब्राह्मणानृजून् ।

16

Ka ins. after 1. 25. 2:

कथं च त्वमिहायातो निषादानां महालयम् ।
अस्पृश्या याजिनां नित्यं सत्यं च वद मे द्विज ।;

after 3ab:

ब्राह्मण उवाच ।

मध्यदेशात्समायातो धनार्थी मेदिनीं भ्रमन् ।
ततो निषादान्संप्राप्तो रतिं चाप्यत्र लब्धवान् ।
गां हिरण्यं धनं धान्यं घटांश्च कटकांस्तथा ।
निषादा मे प्रयच्छन्ति सततं प्रियकारिणः ।
निषादी शोभना चात्र भार्या जाता खगोत्तम ।
तया सह वसन्नित्यं रतिमभ्यामवाप्तवान् ।;

and after 3cd:

ततोऽहं निर्गमिष्यामि न निर्गच्छेयमन्यथा ।

17

After 1. 30. 22, Ko.4 ins. a *phalas'ruti*:

न चाग्निजं चोरनृपाश्रयं वा
क्षुत्सर्पवेतालपिशाचजं वा ।
भयं भवेद्यत्र गृहे गरुत्मतो
तिष्ठेत्कथेयं लिखितापि पुस्तके ॥
यः संस्मरेन्नित्यमतन्द्रितो नरो
गरुत्मतो मूर्तिमथार्चयेद्गृहे ।
ॐ पक्षिराजेति जपंश्च सर्वदा
तस्याशु सर्पा वशगा भवन्ति ॥

18

After 1. 32. 1, Ko.4 Da1 ins.:

कश्च तेषां भवेन्मन्त्रः सर्पाणां सूतनन्दन ।
किं वा कार्यमकुर्वन्त शापजं भुजगोत्तमाः ।
वासुकिश्चापि नागेन्द्रो महाप्राज्ञः किमाचरत् ।

19

After 1. 33. 4, Ko.4 Da1 ins.:

आराध्य तु जगन्नाथं ब्रह्माणं पन्नगोत्तमाः ।
मातृशापविमोक्षार्थं न शेषो लब्धवान्वरम् ।

20

After पितामह ङ° of 1. 35. 8, Ka.4 ins.:

मातृशापो नान्यथायं कर्तुं शक्यो मया सुराः ।
यस्मान्माता गुरुतरी सर्वेषामेव देहिनाम् ।

21

After 1. 37. 20, Ko.4 ins.:

कामं क्रोधं तथा लोभं यस्तपस्वी न शक्नुयात् ।
विजेतुमकृतप्रज्ञः स याति नरकं ध्रुवम् ।
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।
यः प्रव्रज्यां गृहीत्वा तु न भवेद्विजितेन्द्रियः । [5]
वर्षकोटिसहस्राणि स याति नरकं ध्रुवम् ।

वध्यमानं (for ग्रस्य°). B4 Dn D2 T1 सहंते वै; G1.2.4.5 सह लोकैर्. — (L. 19) Ñ1.2 V1 Dn D1–4.6.7 T1 °विनाशार्थं. G1.2.4.5 व्यवतिष्ठे. — After line 20, B3 (om. line 1).5 Dn D1–4 T1 ins.:

तस्माल्लोकविनाशाय संतापयत भास्करः ।
ततो देवानुपागम्य प्रोचुरेवं महर्षयः ।

— (L. 21) Ñ1 Dn D1–4.6 T1 अद्यार्धरात्र°; B4 Da D7 अपररात्र°; B5 अपूर्वो रात्र°; G1.2.4.5 अह्नः प्रारंभ°. — (L. 22) G1.2.4.5 उत्पत्स्यति महाबाहुः. — After 23, B1 ins.:

ऊचुरुद्विग्नमनसः सर्वलोकपितामहम् ।;

while D4.6 ins.:

ऊचुर्विसयमापन्नाः प्रणताः सर्वतो भृशम् ।

— Ñ1.3 Da Dn D1.2 T1 G1.2.4.5 om. देवा ऊ°. — (L. 24) Ñ1.2 Dn D1.2 T1 अब्रुवन्किमिवेहाद्य. G1.2.4.5 अब्रुवन् किमिदं देव अद्य भानुकृतं भयम्. — (L. 25) V1 Dn D1–3 T1 क्षयोयं प्रतिभाति च. — (L. 28) V1 B1.3.5 पश्यन्. D3.6.7 दृश्यंते च हि; G1.4 दृश्यंते यदि. Ñ B Da D3 G1.4 °राशिं. — (L. 30) Dn D1.2 T1 धीमान् (for विद्वान्). — (L. 33) Ñ3 Dn D1.2 T1 स्वस्ति चैवं (for शान्तिरेवं). G1.2.4.5 सूतः (for प्रमतिरु°). — (L. 34) Ñ3 G1.2.4.5 °महाज्ञप्तः. — (L. 35) Ñ V1 B (except B2) Da Dn D1–4.6.7 T1 ह्यरुणेन. Ñ1.2 V1 Dn D1.2 T1 समावृतः; G1.2.4.5 सदा युतः. — (L. 37–38) G1.2.4.5 तदा चास्य (for यथैवास्य), and ब्रह्मन् (for प्रश्नं). — Colophon om. in T1 G1.2.4.5.

22

After 1. 37. 27, Ko.4 ins.:

क्रोधात् शापमुत्सृजता तपोहानिरनुत्तमा ।
कृतात्मनस्त्वया तात विप्रेणेव प्रतिग्रहात् ।
अतोऽहं त्वां ब्रवीमि शापोऽस्य न भवेद्यथा ।
परिक्षितो महाभाग तथा कुरु यतव्रत ।

23

After 1. 38. 8, Ko.4 ins.:

तेऽत्र धन्याः शुभधियो ये धर्मे सततं रताः ।
नराः सुकृतकल्याणा आत्मनः प्रियकाङ्क्षिणः ।

After 11, K4 ins.:

ततो गौरमुखं शिष्यं शीलवन्तं गुणान्वितम् ।
आहूय याहि राजानं वृत्तान्तमिदमुच्यताम् ।
[With line 1, cf. 1. 38. 14^{cd}.]

24

After 1. 39. 17, Ko.4 ins.:

तद्धनं तस्य वो राजा न ग्रहीष्यति किंचन ।
इमे नागा वहिष्यन्ति दत्तं हेम मया बहु ।

25

After 1. 39. 19^{cd}, D5 ins.:

दशको ब्रूहि मे देहि धनं पन्नगसत्तम ।
न राजानं गमिष्यामि किं तेन नृपसूनुना ।
इत्युक्तस्तक्षकस्तेन विंशत्कोटीर्धनं ददौ ।
स जगाम ततो विप्रो धनं लब्ध्वा यथासुखम् ।

26

After 1. 41. 21^{cd}, B4 ins.:

न तच्च कुतपोदानैः प्राप्यते फलमुत्तमम् ।
यच्च कुदारसंतानप्राप्तौ संप्राप्यतेऽमितम् ।
क्षालनस्तात जायंते सर्व एव हि मानवाः ।
पितृदेवर्षिमनुजा भर्तव्या आर्यवर्णजैः ।
अथान्यथा वर्तमाना वार्याः स्युस्त्रिदिवौकसाम् । [5]
त्वं तात सम्यग्जानीहि धर्मज्ञः सन्न वेत्सि किम् ।

27

After 1. 42. 3, Ko.4 Da1 ins.:

धर्मार्थकामैस्तु सुखप्रहीणा
भिक्षाटनाः कर्पटबद्धगात्राः ।
क्षुत्क्षामकण्ठा वसुधां भ्रमन्ति
दारान्परित्यज्य गता नरा ये ॥
न ते क्रतुशतैर्लोकाः प्राप्यन्ते दिवि मानद ।
तपोभिर्विविधैर्वापि याल्लोकान्पुत्रिणो गताः ।

28

After 1. 42. 20, B3 ins.:

रुरुरुवाच ।

किमर्थं सा तु नागेन्द्रो द्विजेन्द्राय कृतात्मने ।
अविज्ञाताय वै दत्ता स्वसा राजीवलोचना ।

प्रमतिरुवाच ।

Then follows a *repetition* (with slight variation) of 1. 13. 35–36.

29

D4 (marg. *sec. m.*) ins. after 1. 50. 1: D5 T2 G6, after 1. 50. 5:

दिलीपराज्ञो नहुषस्य राज्ञो
नलस्य राज्ञः शतबिन्दोश्च राज्ञः ।

Then follows the refrain तथा यज्ञोऽयं etc.

30

After 1. 50. 6, D3 ins.:

नहुषस्य यज्ञः सगरस्य यज्ञः
धुन्धोस्तथा रन्तिदेवस्य चैव ।

Then the refrain तथा यज्ञोऽयं etc.

31

After 1. 55. 3, K4 ins.:

शौनक उवाच ।

जनमेजयेन राज्ञा वै किमर्थं सूतनन्दन ।
सर्पसत्रान्तरे पृष्टो व्यासशिष्यो महातपाः ।
पूर्वजानां कथां मां वै तन्नो वद महामते ।
सर्वज्ञः सर्वदर्शी च न ते ह्यविदितं क्वचित् ।

सूत उवाच ।

सर्पसत्रे च संपूर्णे ऋत्विजश्चागतश्रमाः । [5]
धूमसंभ्रान्तनेत्रास्तु दशाष्टौ सुषुपुस्तदा ।
तेषु सुप्तेषु सर्वेषु राजा पारिक्षितस्तदा ।
यज्ञान्ते ऋषिभिर्नैव निद्रा कार्या कथंचन ।
इति स्मृत्युक्तवचनं स्मृत्वा तानृषिसत्तमान् ।
अभिमन्त्रितेनोदकेन ऋषिभिश्चाभिचारकैः । [10]
प्रोक्षयामास तेषां वै निद्रान्तं तु चिकीर्षवान् ।
एतस्मिन्नन्तरे तत्र मूर्च्छामापुः सुदीर्घिकाम् ।
अचेतनांश्च मुनयस्तान्दृष्ट्वा दुःखितोऽभवत् ।
तदा सभासदो विप्राः प्रोचुश्च जनमेजयम् ।
धिग्धिक्ते चेष्टितं राजन्ब्राह्मणान्हतवानसि । [15]
ब्रह्महत्याष्टादश वै कृतास्त्वया नराधिप ।
चर तीर्थान्यनेकानि पश्चाच्छुद्धिमवाप्स्यसि ।

एतस्मिन्नन्तरे तत्र वागुवाचाशरीरिणी ।
दुःखितं चिन्तयाक्रान्तं राजानं जीवयन्निव ।
ब्रह्महत्याविमोक्षार्थं कृत्वा चीरं निळीयुतम् । [20]
अष्टादशारत्निकं च तद्वासः परिधाय च ।
पाण्डवानां कथा ह्यत्र अष्टादशकपर्वकम् ।
शृणु त्वं भारतं च ततः शुद्धिमवाप्स्यसि ।
इति तद्वचनं श्रुत्वा ऋषिभिश्चानुमोदितः ।
वासस्तदुक्तं वासित्वा व्यासं सत्यवतीसुतम् । [25]
प्रश्रयावनतो राजा पप्रच्छ पूर्वजां कथाम् ।
तामहं वर्णयिष्यामि शृणुध्वं भो मुनीश्वराः ।

Colophon.

32

For 1. 56. 29–32, Ds S subst.:

यस्तु राजा शृणोतीदमखिलामश्नुते महीम् ।
प्रसूते गार्भिणी पुत्रं कन्या चाशु प्रदीयते ।
वणिजः सिद्धयात्राः स्युर्वीरा विजयमाप्नुयुः ।
आस्तिकाञ्श्रावयेन्नित्यं ब्राह्मणाननसूयकान् ।
वेदविद्याव्रतस्नातान्क्षत्रियाञ्जयमास्थितान् । [5]
स्वधर्मनित्यान्वैश्यांश्च श्रावयेत्क्षत्रसंश्रितान् ।
एष धर्मः पुरा दृष्टः सर्ववर्णेषु भारत ।
ब्राह्मणाच्छ्रवणं राजन्विशेषेण विधीयते ।
भूयो भूयः पठेन्नित्यं गच्छेत्स परमां गतिम् ।
श्लोकं वाप्यनुगृह्णीत तथार्धं श्लोकमेव वा । [10]
अपि पादं पठेन्नित्यं न च निर्भारतो भवेत् ।
इह नैकाश्रयं जन्म राजर्षीणां महात्मनाम् ।
इह मन्त्रपदं युक्तं धर्मं चानेकदर्शनम् ।
इह युद्धानि चित्राणि राज्ञां वृद्धिरिहैव च ।
ऋषीणां च कथास्तात इह गन्धर्वरक्षसाम् । [15]
इह तत्तत्समासाद्य विहितो वाक्यविस्तरः ।
तीर्थानां नाम पुण्यानां दर्शनं चैव कीर्तितम् ।
वनानां पर्वतानां च नदीनां सागरस्य च ।
देशानां चैव दिव्यानां पुराणां चैव कीर्तनम् ।
उपचारस्तथैवाग्र्यो वीर्यमप्रतिमानुषम् । [20]
इह सत्कारयोगश्च भारते परमर्षिणा ।
रथाश्वदारणेन्द्राणां कल्पना युद्धकौशलम् ।
वाक्यजातिरनेका च सर्वमस्मिन्समर्पितम् ।
यथा समुद्रोऽतिमहान्यथा च हिमवान्गिरिः ।
ख्यातौ रत्नाकरौ तद्वन्महाभारतमुच्यते । [25]
नाप्रीतिरुपपद्येत यथा प्राप्य त्रिविष्टपम् ।
पुण्यं तथेदमाख्यानं श्रुत्वा प्रीतिर्भवत्युत ।
स्त्रियश्च शूद्राः शृणुयुः पुरस्कृत्य द्विजोत्तमान् ।
प्राप्नुवन्ति यथोक्तानि फलान्यखिलानि च ।
कुलस्य वृद्धये राजन्नायुषे विजयाय च । [30]
शृणु कीर्तयतः कृत्स्नमितिहासं पुरातनम् ।
यश्चेदं श्रावयेत्पित्र्ये ब्राह्मणान्पादमन्ततः ।
अक्षय्यमन्नपानं तत्पितॄंस्तस्योपतिष्ठति ।
य इदं श्रावयेद्विद्वान्यश्चेदं शृणुयान्नरः ।
स ब्रह्मणः स्थानमेत्य प्राप्नुयाद्देवतुल्यताम् । [35]
प्रातर्यदेनः कुरुते इन्द्रियैर्ब्राह्मणश्चरन् ।
महाभारतमाख्याय पश्चात्संध्यां प्रमुच्यते ।
रात्र्यां यदेनः कुरुते इन्द्रियैर्ब्राह्मणश्चरन् ।
महाभारतमाख्याय पूर्वां संध्यां प्रमुच्यते ।
भारतानां महज्जन्म महाभारतमुच्यते । [40]
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ।
त्रिभिर्वर्षैर्महाभागः कृष्णद्वैपायनोऽब्रवीत् ।
नित्योत्थितः सदा योगी महाभारतमादितः ।

33

After 1. 56. 31, N (Ś1 missing; for Ko–4 see footnotes) ins.:

भरतानां यतश्चायमितिहासो महाद्भुतः ।
महतो ह्येनसो मर्त्यान्मोचयेदनुकीर्तितः ।
त्रिभिर्वर्षैर्लब्धकामः कृष्णद्वैपायनो मुनिः ।
नित्योत्थितः शुचिः शक्तो महाभारतमादितः ।
तपो नियममास्थाय कृतमेतन्महर्षिणा । [5]
तस्मान्नियमसंयुक्तैः श्रोतव्यं ब्राह्मणैरिदम् ।
कृष्णप्रोक्तामिमां पुण्यां भारतीमुत्तमां कथाम् ।
श्रावयिष्यन्ति ये विप्रा ये च श्रोष्यन्ति मानवाः ।
सर्वथा वर्तमाना वै न ते शोच्याः कृताकृतैः ।

32

G4.5 read line 3 after line 6; M, after 11. — (L. 6) Ds T G2.4.5 शूद्रांश्च द्विजसंश्रितान्. — (L. 9) Ds T2 G4–6 भूयो वा यः. Some MSS. transp. गच्छेत् and स. Lines 12, 17–18, 22–23 occur (with v. l.) in passage No. 1 of this App. — (L. 13) Ds T1 इदं मंत्रं पठन् ज्ञात्वा; T2 G2.4.5 इमं मंत्रमपि ज्ञात्वा; M इदं मंत्रं वरं ज्ञेयं (M5 इमं मंत्रं परं ज्ञात्वा). — (L. 17) G4–6 देशानां (for दर्शनं). Ds T1 G2.6 कीर्तनं. — (L. 19) G1.2.6 पुण्यानां (for दिव्यानां). — (L. 20) Ds G1–3 °र्यमप्यतिमा°. — (L. 22) T2 G4–6 रथाश्वेभनरेंद्राणां; G2 रथाश्वानां नरेंद्राणां. T1 G1 कल्पानां युद्ध°. — With lines 24–25, 31–32, 40–41, 42–43 cf. 1. 56. 27, 29, 31–32. — T1 G3 M om. lines 28–29. — Lines 36–39 = (var.) 190*.

नरेण धर्मकामेन सर्वः श्रोतव्य इत्यपि । [10]
निखिलेनेतिहासोऽयं ततः सिद्धिमवाप्नुयात् ।
न तां स्वर्गगतिं प्राप्य तुष्टिं प्राप्नोति मानवः ।
यां श्रुत्वैव महापुण्यमितिहासमुपाश्नुते ।
शृण्वन्श्राद्धः पुण्यशीलः श्रावयंश्चेदमद्भुतम् ।
नरः फलमवाप्नोति राजसूयाश्वमेधयोः । [15]
यथा समुद्रो भगवान्यथा मेरुर्महागिरिः ।
उभौ ख्यातौ रत्ननिधी तथा भारतमुच्यते ।
इदं हि वेदैः समितं पवित्रमपि चोत्तमम् ।
श्रव्यं श्रुतिसुखं चैव पावनं शीलवर्धनम् ।
पारिक्षित कथां दिव्यां पुण्याय विजयाय च । [20]
कथ्यमानां मया कृत्स्नां शृणु हर्षकरीमिमाम् ।

34

After 1. 56. 33, K4 ins.:

दातुं भोक्तुं तथा श्रोतुं प्रहर्तुमरिभिः सह ।
स किं जानाति पुरुषो भारतं येन न श्रुतम् ।
य इदं भारतं राजन्वाचकाय प्रयच्छति ।
तेन सर्वा मही दत्ता भवेत्सागरमेखला ।
पर्वाण्यष्टादशेमानि व्यासेन कथितानि वै । [5]
यच्चैकमपि यो दद्यात्तेन सर्वं कृतं भवेत् ।

35

After 1. 57. 57, Ds.4 (suppl. fol., *see. m.*) T G ins.:

संभवं चिन्तयित्वा तां ज्ञात्वा प्रोवाच शक्तिजः ।
क्व कर्णधारो नौर्येन नीयते ब्रूहि भामिनि ।

मत्स्यगन्धा ।

अनपत्यस्य दाशस्य सुता तत्प्रियकाम्यया ।
सहस्रजनसंपूर्णा नौर्मया वाह्यते द्विज ।

पराशरः ।

शोभनं वासवि शुभे किं चिरायसि वाह्यताम् । [5]
कलशं भविता भद्रे सहस्रार्धेन संमितम् ।
अहं शेषो भविष्यामि नीयतामचिरेण नौः ।

वैशंपायनः ।

मत्स्यगन्धा तथेत्युक्त्वा नावं वाहयती जले ।
वीक्षमाणं मुनिं दृष्ट्वा प्रोवाचेदं वचस्तदा ।

मत्स्यगन्धा ।

मत्स्यगन्धेति मामाहुर्दाशराजसुतां जनाः । [10]
जन्म शोकाभितप्तायाः कथं ज्ञास्यसि कथ्यताम् ।

पराशरः ।

दिव्यज्ञानेन दृष्टं हि दृष्टमात्रेण ते वपुः ।
प्रणयग्रहणार्थाय वक्ष्ये वासवि तच्छृणु ।
बर्हिषद इति ख्याताः पितरः सोमपास्तु ते ।
तेषां त्वं मानसी कन्या अच्छोदा नाम विश्रुता । [15]
अच्छोदं नाम तद्दिव्यं सरो यस्मात्समुत्थितम् ।
त्वया न दृष्टपूर्वास्तु पितरस्ते कदाचन ।
संभूता मनसा तेषां पितॄन्स्वान्नाभिजानती ।
सा त्वन्यं पितरं वव्रे स्वानतिक्रम्य तान्पितॄन् ।
नाम्ना वसुरिति ख्यातं मनुपुत्रं महीश्वरम् । [20]
अद्रिकाप्सरसा युक्तं विमाने दिवि विष्ठितम् ।
सा तेन व्यभिचारेण मनसा कामचारिणी ।
पितरं प्रार्थयित्वान्यं योगाद्रष्टा पपात सा ।
अपश्यत्पतमाना सा विमानत्रयमन्तिकात् ।
त्रसरेणुप्रमाणांस्तांस्तत्रापश्यत्स्वकान्पितॄन् । [25]
सुसूक्ष्मानपरिव्यक्तानङ्गैरङ्गेष्विवाहितान् ।
त्रातेति तानुवाचार्ता पतन्ती सा ह्यधोमुखी ।
तैरुक्ता सा तु मा भैषीस्तेन सा संस्थिता दिवि ।
ततः प्रसादयामास स्वान्पितॄन्दीनया गिरा ।
तामूचुः पितरः कन्यां भ्रष्टैश्वर्यां व्यतिक्रमात् । [30]

33

Ko-4 have a variant version, differing from the above mainly as regards sequence, which in these MSS. is as follows: 1. 56. 31; lines 3-11 of the passage under reference; then 1. 56. 27, 25^{c-f}, 26^{ab} (both latter repetitions with v. l.); then 491*, and 1. 56. 28-30, 31 (repetition); and finally lines 1-2, 12-15, 18-21 of the passage under reference. The variant readings, being unimportant, may be ignored. — Ñ1 om. lines 3-11; Ñ2 V1 B Da Ds.5 om. 3-4 (cf. 1. 56. 32). — With lines 16-18, cf. 1. 56. 27, 15^{ab}. — Dn ins. after line 19: D1.3.4, after 1. 56. 33: K4, after line 2 of passage No. 34 below:

य इदं भारतं राजन्वाचकाय प्रयच्छति ।
तेन सर्वा मही दत्ता भवेत्सागरमेखला ।

35

N. B. The passage occurs in T1 also, which was ignored, through oversight, in the footnotes. — After line 16, G1.2.4.5 repeat (with v. l.) 1. 57. 21. — (L. 42) D4 G1.2.4.5 महाराज्याभिषिक्तस्य (for the prior half). — (L. 43) D4 G4.5 चित्रवीर्यं यवीयसं. — (L. 53) T2 G4-6 विस्मयादृष्ट°.

अष्टैश्वर्या स्वदोषेण पतसि त्वं शुचिस्मिते ।
यैरारभन्ते कर्माणि शरीरैरिह देवताः ।
तैरेव तत्कर्मफलं प्राप्नुवन्ति स्म देवताः ।
मनुष्यास्त्वन्यदेहेन शुभाशुभमिति स्थितिः ।
सद्यः फलन्ति कर्माणि देवत्वे प्रेत्य मानुषे । [35]
तस्मात्त्वं पतसे पुत्रि प्रेत्य त्वं प्राप्स्यसे फलम् ।
पितृहीना तु कन्या त्वं वसोर्हि त्वं समागता ।
मत्स्ययोनौ समुत्पन्ना सुता राज्ञो भविष्यसि ।
अद्रिका मत्स्यरूपाभूद्वज्रायमुनसंगमे ।
पराशरस्य दायादं त्वं पुत्रं जनयिष्यसि । [40]
यो वेदमेकं ब्रह्मर्षिश्चतुर्धा विभजिष्यति ।
महाभिषक्सुतस्यैव शंतनोः कीर्तिवर्धनम् ।
ज्येष्ठं चित्राङ्गदं वीरं चित्रवीरं च विश्रुतम् ।
एतानुत्पाद्य पुत्रांस्त्वं पुनरेवागमिष्यसि ।
व्यतिक्रमात्पितॄणां च प्राप्स्यसे जन्म कुत्सितम् । [45]
अस्यैव राज्ञस्त्वं कन्या ह्यद्रिकायां भविष्यसि ।
अष्टाविंशे भवित्री त्वं द्वापरे मत्स्ययोनिजा ।
एवमुक्ता पुरा तैस्त्वं जाता सत्यवती शुभा ।
अद्रिकेत्यभिविख्याता ब्रह्मशापाद्वराप्सराः ।
मीनभावमनुप्राप्ता त्वां जनित्वा गता दिवम् । [50]
तस्यां जातासि सा कन्या राज्ञो वीर्येण चैव हि ।
तस्माद्वासवि भद्रं ते याचे वंशकरं सुतम् ।

वैशंपायनः ।

विस्मयाविष्टसर्वाङ्गी जातिस्मरणतां गता ।

स्मार्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः ।
धर्मे तु धारणे धातुर्महत्त्वे चापि पठ्यते ।
तत्रेष्टफलभाग्धर्म आचार्यैरुपदिश्यते ।
अनिष्टफलभाक्चेति तैरधर्मो भविष्यति ।
तस्मादिष्टफलार्थाय धर्ममेव समाचरेत् । [15]
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यश्च धार्मिकः ।
विवाहा ब्राह्मणानां तु गान्धर्वो नैव धार्मिकः ।
त्रिवर्णेतरजातीनां गान्धर्वासुरराक्षसाः ।
पैशाचो नैव कर्तव्यः पिशाचश्चाष्टमोऽधमः ।
सामर्षां व्यङ्गितां कन्यां मातुः स्वकुलजां तथा । [20]
वृद्धां प्रव्राजितां वन्ध्यां पतितां च रजस्वलाम् ।
अपस्मारकुले जातां पिङ्गलां कुष्ठिनीं व्रणीम् ।
न चाख्यातां स्त्रियं गच्छेदिति धर्मानुशासनम् ।
पिता पितामहो भ्राता माता मातुल एव च ।
उपाध्यायर्त्विजश्चैव कन्यादाने प्रभूतमाः । [25]
एतैर्दत्तां निषेवेत नादत्तामाददीत च ।
इत्येव ऋषयः प्राहुर्विवाहे धर्मवित्तमाः ।
अस्या नास्ति पिता भ्राता माता मातुल एव च ।
गान्धर्वेण विवाहेन न स्पृशामि यदृच्छया ।
क्रियाहीनं तु गान्धर्वं न कर्तव्यमनापदि । [30]
यद्यस्यां जायते पुत्रो वेदव्यासो भवेदृषिः ।
क्रियाहीनः कथं विप्रो भवेदृषिरुदारधीः ।
एवं चिन्तयतो भावं महर्षेर्भावितात्मनः ।
ज्ञात्वा चैवाभ्यवर्तन्त पितरो बर्हिषस्तदा ।
तस्मिन्क्षणे ब्रह्मपुत्रो वसिष्ठोऽपि समेयिवान् । [35]
पूर्वं स्वागतमित्युक्त्वा वसिष्ठः प्रत्यभाषत ।

पितृगणाः ।

अस्माकं मानसीं कन्यामस्मच्छापेन वासवीम् ।
यदि चेच्छसि पुत्रार्थं कन्यां गृह्णीष्व माचिरम् ।

वैशंपायनः ।

पितॄणां वचनं श्रुत्वा वसिष्ठः प्रत्युवाच ह ।
महर्षीणां वचः सत्यं पुराणेऽपि मया श्रुतम् । [40]
पराशरो ब्रह्मचारी प्रजार्थी मम वंशधृत् ।
एवं संभाषमाणे तु वसिष्ठे पितृभिः सह ।
ऋषयोऽभ्यागमंस्तत्र नैमिषारण्यवासिनः ।
विवाहं द्रष्टुमिच्छन्तः शक्तिपुत्रस्य धीमतः ।
अरुन्धती महाभागा अदृश्यन्त्या सहैव सा । [45]

36

After 1. 57. 68ab, D_3 T_2 G (except G_6) ins.:

ततो रम्ये वनोद्देशे दिव्यास्तरणसंवृतम् ।
वीरासनमुपास्थाय योगी ध्यानपरोऽभवत् ।
श्वेतपट्टगृहे रम्ये पर्यङ्के सोत्तरच्छदे ।
तूष्णींभूतां तदा कन्यां ज्वलन्तीं योगतेजसा ।
दृष्ट्वा तां तु समाधाय विचार्य च पुनः पुनः । [5]
स चिन्तयामास मुनिः किं कृतं सुकृतं भवेत् ।
शिष्टानां तु समाचारः शिष्टाचार इति स्मृतः ।
श्रुतिस्मृतिविदो विप्रा धर्मज्ञा ज्ञानिनः स्मृताः ।
धर्मज्ञैर्विहितो धर्मः श्रौतः स्मार्तो द्विधा द्विजैः ।
दानाग्निहोत्रमिज्या च श्रौतस्यैतद्धि लक्षणम् । [10]

36

(L. 2) T_2 $G_{1.2.4.5}$ ततो (for योगी). — (L. 6) G_3 चिंतयामास तेजस्वी विवाहश्च कृतो भवेत्. — (L. 8) G_3 °विदो विप्रो ज्ञानाद्धर्मश उच्यते. — (L. 20) $G_{2.4.5}$ वक्रितां (for व्यङ्गितां). — (L. 36) MSS. वसिष्ठं (for °ष्ठः). — (L. 61) G_1 स वृतोथो; G_3 स प्रयातो; $G_{4.5}$ संवृतोसौ (for सप्रतोदो). — (L. 63) $G_{1.2.4.5}$ स्वगुत्तमाम्. — (L. 73) G_3 वर्धिता; G_4 पालिता (for धीमता). — (L. 79) $G_{1.4.5}$ निष्कृतिनो. — MSS. wrongly ins. वैशंपायनः *after* line 84, instead of inserting it *before* the line (as in text).

विश्वकर्मकृतां दिव्यां पर्णशालां प्रविश्य सा ।
वैवाहिकांस्तु संभारान्संकल्प्य च यथाक्रमम् ।
अरुन्धती सत्यवतीं वधूं संगृह्य पाणिना ।
भद्रासने प्रतिष्ठाप्य इन्द्राणीं समकारयत् ।
आपूर्यमाणपक्षे तु वैशाख्यां सोमदैवते । [50]
शुभग्रहे त्रयोदश्यां मुहूर्ते मैत्र आगते ।
विवाहकाल इत्युक्त्वा वसिष्ठो मुनिभिः सह ।
यमुनाद्वीपमासाद्य शिष्यैश्च मुनिपत्निभिः ।
स्थण्डिलं चतुरस्रं च गोमयेनोपलिप्य च ।
अक्षतैः फलपुष्पैश्च स्वस्तिकैरार्द्रपल्लवैः । [55]
जलपूर्णघटैश्चैव सर्वतः परिशोभितम् ।
तस्य मध्ये प्रतिष्ठाप्य वृक्ष्यां मुनिवरं तदा ।
सिद्धार्थयवकल्कैश्च स्नातं सर्वौषधैरपि ।
कृत्वार्जुनानि वस्त्राणि परिधाप्य महामुनिम् ।
वाचयित्वा तु पुण्याहमक्षतैस्तु समर्चितः । [60]
गन्धानुलिप्तः स्रग्वी च सप्रतोदो वधूगृहे ।
अपदातिस्ततो गत्वा वधूज्ञातिभिरर्चितः ।
स्नातामहतसंवीतां गन्धलिप्तां स्रगुज्वलाम् ।
वधूं मङ्गलसंयुक्तामिषुहस्तां समीक्ष्य च ।
उवाच वचनं काले कालज्ञः सर्वधर्मवित् । [65]
प्रतिग्रहो दातृवशः श्रुतमेवं मया पुरा ।
यथा वक्ष्यन्ति पितरस्तत्करिष्यामहे वयम् ।

वैशंपायनः ।

तद्धर्मिष्ठं यशस्यं च वचनं सत्यवादिनः ।
श्रुत्वा तु पितरः सर्वे निःसङ्गा निष्परिग्रहाः ।
वसुं परमधर्मिष्ठमाहूयेदं वचोऽब्रुवन् । [70]
मत्स्ययोनौ समुत्पन्ना तव पुत्री विशेषतः ।
पराशराय मुनये दातुमर्हसि धर्मतः ।

वसुः ।

सत्यं मम सुता सा हि दाशराजेन धीमता ।
अहं प्रभुः प्रदाने तु प्रजापालः प्रजार्थिनाम् ।

पितरः ।

निराशिषो वयं सर्वे निःसङ्गा निष्परिग्रहाः । [75]
कन्यादानेन संबन्धो दक्षिणाबन्ध उच्यते ।
कर्मभूमिस्तु मानुष्यं भोगभूमिस्त्विविष्टपम् ।
इह पुण्यकृतो यान्ति स्वर्गलोकं न संशयः ।
इह लोके दुष्कृतिनो नरकं यान्ति निर्घृणाः ।
दक्षिणाबन्ध इत्युक्ते उभे सुकृतदुष्कृते । [80]
दक्षिणाबन्धसंयुक्ता योगिनः प्रपतन्ति ते ।
तस्मान्नो मानसीं कन्यां योगाद्भ्रष्टां विशां पते ।
सुतात्वं तव संप्राप्तां सतीं भिक्षां ददस्व वै ।

वैशंपायनः ।

इत्युक्त्वा पितरः सर्वे क्षणादन्तर्हितास्तदा ।
याज्ञवल्क्यं समाहूय विवाहाचार्यमित्युत । [85]
वसुं चापि समाहूय वसिष्ठो मुनिभिः सह ।
विवाहं कारयामास श्रुतिदृष्टेन कर्मणा ।

वसुः ।

पराशर महाप्राज्ञ तव दास्याम्यहं सुताम् ।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।

वैशंपायनः ।

वसोस्तु वचनं श्रुत्वा याज्ञवल्क्यमते स्थितः । [90]
कृतकौतुकमङ्गल्यः पाणिना पाणिमस्पृशत् ।
प्रभूताज्येन हविषा हुत्वा मन्त्रैर्हुताशनम् ।
त्रिरग्निं तु परिक्रम्य समभ्यर्च्य हुताशनम् ।
महर्षीन्याज्ञवल्क्यादीन्दक्षिणाभिः प्रतर्प्य च ।
लब्धानुज्ञोऽभिवाद्याशु प्रदक्षिणमथाकरोत् । [95]
पराशरे कृतोद्वाहे देवाः सर्षिगणास्तदा ।
हृष्टा जग्मुः क्षणादेव वेदव्यासो भवत्विति ।

37

After 1. 57. 69, Ds T (T1 contains only line 1) G ins.:

जातमात्रः स ववृधे सप्तवर्षोऽभवत्तदा ।
स्नात्वाभिवाद्य पितरं तस्थौ व्यासः समाहितः ।
स्वस्तीति वचनं चोक्त्वा ददौ कलशमुत्तमम् ।
गृहीत्वा कलशं पार्श्वे तस्थौ व्यासः समाहितः ।
ततो दाशभयात्पत्नी स्नात्वा कन्या बभूव सा । [5]
अभिवाद्य मुनेः पादौ पुत्रं जग्राह पाणिना ।
स्पृष्टमात्रे तु निर्भर्त्स्य मातरं वाक्यमब्रवीत् ।
मम पित्रा तु संस्पर्शान्मातस्त्वमभवः शुचिः ।
अद्य दाशसुता कन्या न स्पृशेर्मामनिन्दिते ।

वैशंपायनः ।

व्यासस्य वचनं श्रुत्वा बाष्पपूर्णमुखी तदा । [10]
मनुष्यभावात्सा योषित्पतिता मुनिपादयोः ।
महाप्रसादो भगवान्पुत्रं प्रोवाच धर्मवित् ।
मा त्वमेवंविधं कार्षीर्नैतद्धर्म्यं मतं हि नः ।
न दूष्यौ मातापितरौ तथा पूर्वोपकारिणौ ।
धारणाद्दुःखसहनात्तयोर्माता गरीयसी । [15]
बीजक्षेत्रसमायोगे सस्यं जायेत लौकिकम् ।
जायते च सुतस्तद्वत्पुरुषस्त्रीसमागमे ।
मृगीणां पक्षिणां चैव अप्सराणां तथैव च ।
शूद्रयोन्यां च जायन्ते मुनयो वेदपारगाः ।
ऋष्यशृङ्गो मृगीपुत्रः कण्वो बर्हिसुतस्तथा । [20]
अगस्त्यश्च वसिष्ठश्च उर्वश्यां जनितावुभौ ।
सोमश्रवास्तु सर्प्यां तु अश्विनावश्विसंभवौ ।
स्कन्दः स्कन्नेन शुक्रेन जातः शरवणे पुरा ।
एवमेव च देवानामृषीणां चैव संभवः ।
लोकवादप्रवृत्तिर्हि न मीमांस्या बुधैः सदा । [25]

वेदव्यास इति प्रोक्तः पुराणे च स्वयंभुवा ।
धर्मनेता महर्षीणां मनुष्याणां त्वमेव च ।
तस्मात्पुत्र न दूष्येत वासवी योगचारिणी ।
मत्प्रीत्यर्थं महाप्राज्ञ सस्नेहं वक्तुमर्हसि ।
प्रजाहितार्थं संभूतो विष्णोर्भागो महानृषिः । [30]
तस्मात्त्वमातरं स्नेहात्प्रब्रवीहि तपोधन ।

वैशंपायनः ।

गुरोर्वचनमाज्ञाय व्यासः प्रीतोऽभवत्तदा ।
चिन्तयित्वा लोकवृत्तं मातुरङ्कमथाविशत् ।
पुत्रस्पर्शात्तु लोकेषु नान्यत्सुखमतीव हि ।
व्यासं कमलपत्राक्षं परिष्वज्याश्ववर्तयत् । [35]
स्तन्यासारैः क्लिद्यमाना पुत्रमाघ्राय मूर्धनि ।

वासवी ।

पुत्रलाभात्परं लोके नास्तीह प्रसवार्थिनाम् ।
दुर्लभं चेति मन्येऽहं मया प्राप्तं महत्तपः ।
महता तपसा तात महायोगबलेन च ।
मया त्वं हि महाप्राज्ञ लब्धोऽमृतमिवामरैः । [40]
तस्मात्त्वं मामृषेः पुत्र त्यक्तुं नार्हसि सांप्रतम् ।

वैशंपायनः ।

एवमुक्तस्ततः स्नेहाद्व्यासो मातरमब्रवीत् ।
त्वया स्पृष्टः परिष्वक्तो मूर्ध्नि चाघ्रायितो मुहुः ।
एतावन्मात्रया प्रीता भविष्येथा नृपात्मजे ।

38

After 1. 57. 70, D_8 T_2 G ins.:

ततः कन्यामनुज्ञाय पुनः कन्या भवत्विति ।
पराशरोऽपि भगवान्पुत्रेण सहितो ययौ ।
गत्वाश्रमपदं पुण्यमदृश्यन्त्याः पराशरः ।
जातकर्मादिसंस्कारं कारयामास धर्मतः ।
कृतोपनयनो व्यासो याज्ञवल्क्येन भारत । [5]
वेदानधिजगे साङ्गानोंकारेण त्रिमात्रया ।
गुरवे दक्षिणां दत्त्वा तपः कर्तुं प्रचक्रमे ।

39

After 1. 57. 75, D_8 T_2 G ins.:

ततः सत्यवती हृष्टा जगाम स्वं निवेशनम् ।
तस्यास्तु योजनाद्गन्धमाजिघ्रन्ति नरा भुवि ।
दाशराजस्तु तद्गन्धमाजिघ्रन्प्रीतिमावहत् ।

दाशराजः ।

त्वामाहुर्मत्स्यगन्धेति कथं बाले सुगन्धता ।
अपास्य मत्स्यगन्धत्वं केन दत्ता सुगन्धता । [5]

सत्यवती ।

शक्तेः पुत्रो महाप्राज्ञः पराशर इति श्रुतः ।
नावं वाहयमानाया मम दृष्ट्वा सुगर्हितम् ।
अपास्य मत्स्यगन्धत्वं योजनाद्गन्धतां ददौ ।
ऋषेः प्रसादं दृष्ट्वा तु जनाः प्रीतिमुपागमन् ।
एवं लब्धो मया गन्धो न रोषं कर्तुमर्हसि । [10]

वैशंपायनः ।

दाशराजस्तु तद्वाक्यं प्रशशंस ननन्द च ।
एतत्पवित्रं पुण्यं च व्यासंभवमुत्तमम् ।
इतिहासमिमं श्रुत्वा प्रजावन्तो भवन्ति च ।

Here follows a colophon in all the above mentioned MSS. except G_4 5.

40

After 1. 58. 8^{ab}, $Ko._4$ ins.:

प्रनष्टमुद्धृतं राजन्यथा प्रोक्तं स्वयंभुवा ।
सर्वेषामेव वर्णानां प्रनष्टानां महीपते ।
ब्राह्मणा एव कुर्वन्ति नित्यमेव युगे युगे ।

41

After 1. 61. 83, $Ks._4$ $Ñ_2$ $_3$ V_1 B D (except D_5) ins.:

वैश्यापुत्रो युयुत्सुश्च धार्तराष्ट्रः शताधिकः ।

जनमेजय उवाच ।

ज्येष्ठानुज्येष्ठतां चैव नामधेयानि वा विभो ।
धृतराष्ट्रस्य पुत्राणामानुपूर्व्येण कीर्तय ।

वैशंपायन उवाच ।

दुर्योधनो युयुत्सुश्च राजन्दुःशासनस्तथा ।
दुःसहो दुःशलश्चैव दुर्मुखश्च तथापरः । [5]
विविंशतिर्विकर्णश्च जलसंधः सुलोचनः ।
विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षणः ।
दुर्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च ।
चित्रोपचित्रौ चित्राक्षश्चारुचित्राङ्गदश्च ह ।
दुर्मदो दुष्प्रहर्षश्च विवित्सुर्विकटः समः । [10]
ऊर्णनाभः सुनाभश्च तथा नन्दोपनन्दकौ ।
सेनापतिः सुषेणश्च कुण्डोदरमहोदरौ ।
चित्रबाहुश्चित्रवर्मा सुवर्मा दुर्विमोचनः ।
अयोबाहुर्महाबाहुश्चित्रचापसुकुण्डलौ ।
भीमवेगो भीमबलो बलाकी बलवर्धनः । [15]
उग्रायुधो भीमशरः कनकायुर्दृढायुधः ।
दृढवर्मा दृढक्षत्रः सोमकीर्तिरनूदरः ।
जरासंधो दृढसंधः सत्यसंधः सहस्रवाक् ।
उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः ।
अपराजितः पण्डितको विशालाक्षो दुराधरः । [20]
दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ ।

आदित्यकेतुर्बह्वाशी नागदन्तोग्रयायिनौ ।
कवची निषङ्गी पाशी दण्डधारो धनुर्ग्रहः ।
उग्रो भीमरथो वीरो वीरबाहुरलोलुपः ।
अभयो रौद्रकर्मा च तथा दृढरथश्च यः । [25]
अनाधृष्यः कुण्डभेदी विराबी दीर्घलोचनः ।
दीर्घबाहुर्महाबाहुर्व्यूढोरुः कनकध्वजः ।
कुण्डाशी विरजाश्चैव दुःशला च शताधिका ।
वैश्यापुत्रो युयुत्सुश्च धार्तराष्ट्रः शताधिकः ।
एतदेकशतं राजन्कन्या चैका प्रकीर्तिता । [30]
नामधेयानुपूर्व्या च ज्येष्ठानुज्येष्ठतां विदुः ।
सर्वे त्वतिरथाः शूराः सर्वे युद्धविशारदाः ।
सर्वे वेदविदश्चैव राजशास्त्रे च पारगाः ।
सर्वे संसर्गविद्यासु विद्याभिजनशोभिनः ।
सर्वेषामनुरूपाश्च कृता दारा महीपते । [35]
दुःशलां चैव समये सिन्धुराजाय कौरवः ।
जयद्रथाय प्रददौ सौबलानुमते तदा ।

☞ This passage is an anticipation of adhy. 108 (*q. v.*).

42

After l. 61. 86, Ks.4 N V1 B D (except D5) ins.:

यस्यावतरणे राजन्सुरान्सोमोऽब्रवीद्वचः ।
नाहं दद्यां प्रियं पुत्रं प्रेयांसमपि जीवितात् ।
समयः क्रियतामेष न शक्यमतिवर्तितुम् ।
सुरकार्यं हि नः कार्यमसुराणां क्षितौ वधः ।
तत्र यास्यत्ययं वर्चां न च स्थास्यति मे चिरम् । [5]
ऐन्द्रिर्नरस्तु भविता यस्य नारायणः सखा ।
सोऽर्जुनेत्यभिविख्यातः पाण्डोः पुत्रः प्रतापवान् ।
तस्यायं भविता पुत्रो बालो भुवि महारथः ।
तत्र षोडश वर्षाणि स्थास्यत्यमरसत्तमाः ।
अस्य षोडशवर्षस्य स संग्रामो भविष्यति । [10]
यत्रांशा वः करिष्यन्ति कर्म दानवसूदनम् ।
नरनारायणाभ्यां तु स संग्रामो विनाकृतः ।
चक्रव्यूहं समास्थाय योधयिष्यन्ति चासुराः ।
विमुखान्शात्रवान्सर्वान्कारयिष्यति मे सुतः ।
बालः प्रविश्य तं व्यूहमभेद्यं विचरिष्यति । [15]
महारथानां वीराणां कदनं च करिष्यति ।
सर्वेषां चैव शत्रूणां चतुर्थांशं नयिष्यति ।
दिनार्धेन महाबाहुः प्रेतराजपुरं प्रति ।
ततो महारथैर्वीरैः समेत्य बहुभी रणे ।
दिनक्षये महाबाहुर्मया भूयः समेष्यति । [20]
एकं वंशकरं वीरं पुत्रं वै जनयिष्यति ।
प्रनष्टं भारतं वंशं स भूयो धारयिष्यति ।
एतत्सोमवचः श्रुत्वा तथास्विति दिवौकसः ।
प्रत्यूचुः सहिताः सर्वे ताराधिपमपूजयन् ।
एवं ते कथितं राजंस्तव जन्म पितुः पितुः । [25]

43

After l. 61. 88, K4 N V1 B D (except D5) ins.:

प्रतिविन्ध्यः सुतसोमः श्रुतकीर्तिस्तथापरः ।
नाकुलिश्च शतानीकः श्रुतसेनश्च वीर्यवान् ।
शूरो नाम यदुश्रेष्ठो वसुदेवपिताभवत् ।

41

N3 D2.3 om. line 1; after line 1, B1 reads (for the first time) line 30 (v. l. चैव शताधिका for चैका प्र°). K3 om. lines 2-31. — (L. 2) V1 तेषां; Dn D1 एषां (for चैव). — (L. 9) K4 B Da2 D1-3 चित्रोपचित्रश्. — (L. 11) Dn D1.3.4 पद्मनाभः (for सुना°). — (L. 13) N2 V1 B4m Dn D1.4 दुर्विरोचनः. — (L. 15) Da बलमर्दनः; Dn D1.4 भीमविक्रमः. — (L. 17) Ñ1 B (except B5) दृढधन्वा (for °वर्मा). Ñ2 Dn D1 अनूदयः; Ñ3 V1 अयोदरः. — (L. 19) Ñ2.3 V1 Dn D1.4 क्षेममू(Ñ2.3 V1 °धू)र्तिस्तथैव च (for the posterior half). — (L. 20) Ñ2 दुरासदः; B4 °युधः; Dn D1 °धनः. — (L. 22) K4 नागदत्तश्च याजिनौ; B5 Da °ग्रगामिनौ; Dn D1.4 नागदत्तानुयायिनौ. — (L. 23) Dn D1.4 दंडी (for पाशी). — (L. 27) Da Dn D1.3.4 व्यूढोरः. N1 Da कनकस्तथा; Dn D1.4 कनकांगदः; D3 कनकत्सरुः. — (L. 28) Ñ3 V1 B1 Da Dn D1.3.4 कुंडजश्चित्रकश्चैव. — L. 29 = L. 1. — (L. 34) K4 समग्र°; V1 संसक्त°; Dn D1.4 संग्राम° (for संसर्ग°). K3 V1 दिव्याभिज्ञानशो°; K4 विद्याविज्ञान°; Ñ3 °जनसंमताः. — (L. 36) K4 Ñ2 V1 Dn D1.4 °लां समयें राजन्.

42

(L. 1) Dn D1.3.4 इदं (for वचः). — (L. 2) K3.4 Ñ1.2 V1 B3m Da Dn D1.3.4 मम प्राणैर्गरीयसं. — (L. 5) B मे (as in text); the rest वै. — (L. 9) K3 B Dn3 D2 ततः (for तत्र). K3.4 N1.2 V1 B3m वत्स्यते (for स्थास्यति). — (L. 11) K3 तत्राङ्कतं; K4 D2 यत्राश्वर्यं; Ñ V1 B5 यत्र शक्ताः (for यत्रांशा वः). Ñ2 V1 B3.5 Dn D1.3.4 वीरनिषूदनं (for दानव°). — (L. 13) K4 ये सुराः; B3 वै सु°; Dn D1 वः सु°. — (L. 14) K3.4 Ñ1.2 B3 Da D1.2 वा(*or* धा)रयि°. — (L. 19) K3.4 Ñ2 V1 Dn D1.3.4 बहुशो रणे. — (L. 21) K4 N1.2 V1 Dn D1.3.4 transp. वीरं and पुत्रं.

तस्य कन्या पृथा नाम रूपेणासदृशी भुवि ।
पितुः स्वसीयपुत्राय सोऽनपत्याय वीर्यवान् । [5]
अग्रमग्रे प्रतिज्ञाय स्वस्यापत्यस्य वै तदा ।
अग्रजातेति तां कन्यां शूरोऽनुग्रहकाङ्क्षया ।
अददत्कुन्तिभोजाय स तां दुहितरं तदा ।
सा नियुक्ता पितुर्गेहे ब्राह्मणातिथिपूजने ।
उग्रं पर्यचरद्घोरं ब्राह्मणं संशितव्रतम् । [10]
निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः ।
तमुग्रं शंसितात्मानं सर्वयत्नैरतोषयत् ।
तुष्टोऽभिचारसंयुक्तमाचक्षे यथाविधि ।
उवाच चैनां भगवान्प्रीतोऽस्मि सुभगे तव ।
यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि । [15]
तस्य तस्य प्रसादात्त्वं देवि पुत्राञ्जनिष्यसि ।
एवमुक्ता च सा बाला तदा कौतूहलान्विता ।
कन्या सती देवमर्कमाजुहाव यशस्विनी ।
प्रकाशकर्मा तपनस्तस्यां गर्भं दधौ तदा ।
अजीजनत्सुतं चास्यां सर्वशस्त्रभृतां वरम् । [20]
सकुण्डलं सकवचं देवगर्भं श्रियान्वितम् ।
दिवाकरसमं दीप्त्या चारुसर्वाङ्गभूषणम् ।
निगूहयन्ती जातं वै बन्धुपक्षभयात्तदा ।
उत्ससर्ज जले कुन्ती तं कुमारं यशस्विनम् ।
तमुत्सृष्टं जले गर्भं राधाभर्ता महायशाः । [25]
राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा ।
चक्रतुर्नामधेयं च तस्य बालस्य तावुभौ ।
दम्पती वसुषेणेति दिक्षु सर्वासु विश्रुतम् ।
स वर्धमानो बलवान्सर्वास्त्रेषूत्तमोऽभवत् ।
आ पृष्टतापाच्च तदा जजाप जपतां वरः । [30]
यस्मिन्काले जपन्नास्ते धीमान्सत्यपराक्रमः ।
नादेयं ब्राह्मणेष्वासीत्तस्मिन्काले महात्मनः ।
तमिन्द्रो ब्राह्मणो भूत्वा पुत्रार्थे भूतभावनः ।
ययाचे कुण्डले वीरं कवचं च सहाङ्गजम् ।
उत्कृत्य कर्णो ह्यददत्कुण्डले कवचं च तत् । [35]
शक्तिं शक्रोऽददत्तस्मै विस्मितश्चेदमब्रवीत् ।
देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
यस्मिन्क्षेप्स्यसि दुर्धर्ष स एको न भविष्यति ।
पुरा नाम तु तस्यासीद्वसुषेणेति विश्रुतम् ।
ततो वैकर्तनः कर्णः कर्मणा तेन सोऽभवत् । [40]

☞ This passage (from line 3 onwards) is an anticipation of adhy. 104 (*q. v.*).

44

After 1. 67. 14^{ab}, D_2 ins.:

त्वयैवं का समा नारी न गन्धर्वी तथाप्सराः ।
न मिश्रकेशी रम्भा वा न घृताची न मेनका ।
चार्वङ्गी वसुकेशी च यथा त्वं मत्तकाशिनि ।
कम्बुग्रीवा च सुश्रोणी मृगाक्षी सुस्तनीति च ।
निगूढगुल्फा रक्तौष्ठी सुरक्तनखपङ्क्तिः । [5]
ईषच्च गद्गदां वाचं रम्भोरु त्वं शुचिस्मिते ।
यौ तौ जातौ सुसंश्लिष्टौ मध्ये हारविलक्षितौ ।
अनर्हं धारयन्नित्यमलं वा चीरवल्कलम् ।
इदं शैलकुशाकीर्णं पल्वलैरुपसेवितम् ।
सिंहशार्दूलसंयुक्तं मृगपक्षिसमाकुलम् । [10]
वनं कण्टकितं घोरं निर्मनुष्यमभूतवत् ।
अर्हसे हर्म्यप्रासादान्सौवर्णान्मणिकुट्टिमान् ।
स्वास्तीर्णतल्पमुदितान्कार्तस्वरविभूषितान् ।
इदं नार्हसि कल्याणि कृपणत्वं वरानने ।
मुमूर्षुं मदनाश्लिष्टं त्राहि मां शुभचारिणम् । [15]
न स्मृतिं वाभिजानामि न दिशं गतचापलः ।
अर्धनालीकनाराचशक्तितोमरमुद्गराः ।
पतन्ति स्म शरीरं मे पादमूरुशिरांसि च ।
पुनः प्ररोहते देवि वनं परशुना हतम् ।
कामाग्निना सुसंदीप्तं तपत्येव ममाङ्गकम् । [20]
हृदि प्रौढे सुतीक्ष्णाग्रे मन्ये मैषज्यमीदृशम् ।
प्रेम्णा संभाषणं स्पर्शं स्मृतिर्दृष्टिः कथामपि ।
विनान्यौषधकामिन्यः प्रजापतिरथाब्रवीत् ।
एवमेतन्महाभाग सुप्रिये स्मितभाषिणि ।

45

S ins. after 1. 67. 23:

शङ्कितेव च विप्रर्षिमुपचक्राम सा शनैः ।
ततोऽस्य भारं जग्राह आसनं चाप्यकल्पयत् ।

43

(L. 1) K_4 $Ñ_{1.3}$ V_1 $B_{3.5}$ श्रुतकर्मा; $D_{1.3.4}$ श्रुतसोमः (for सुतसोमः). — (L. 16) K_4 $Ñ_3$ B $D_{2.5}$ प्रसादात्तस्य तस्यैव; D_3 प्रसादात्त्वं देवपुत्रान्. K_4 $Ñ_3$ B $D_{2.3.5}$ पुत्रं त्वं (D_3 पुत्रान्हि) जनयिष्यसि. — (L. 22) $Ñ_{1.2}$ V_1 Dn $D_{1.4}$ °भूषितं (for °भूषणम्). — (L. 23) V_1 Bem Dn $D_{1.4}$ निगूहमाना. — (L. 30) V_1 Dn $D_{1.4}$ वेदांगानि च सर्वाणि; D_3 D_8 आ पृष्ठसंप्रतापाच्च. — (L. 34) $Ñ_3$ V_1 Da तदंगजं (for सहा°). — (L. 35) $Ñ_{1.2}$ V_1 Dn $D_{1.4}$ कवचं कुंडले तथा (for the posterior half). — (L. 36) Ñ V_1 Da Dn $D_{1.3.4}$ ददौ (for ऽददत्). — (L. 39) $Ñ_2$ V_1 Dn $D_{1.4}$ °षेण इति क्षितौ.

45

With lines 2–3, 11–12, and 18–19, cf. 1. 67. 30–31.

प्राक्षालयच्च सा पादौ काश्यपस्य महात्मनः ।
न चैनं लज्जयाशक्नोदक्षिभ्यामभिवीक्षितुम् ।
शकुन्तला च सव्रीडा तमृषिं नाभ्यभाषत । [5]
तस्मात्स्वधर्मात्स्खलिता भीता सा भरतर्षभ ।
अभवद्दोषदर्शित्वाद्ब्रह्मचारिण्ययञ्चिता ।
स तदा व्रीडितां दृष्ट्वा ऋषिस्तां प्रत्यभाषत ।

कण्वः ।

सव्रीडैव च दीर्घायुः पुरेव भविता न च ।
वृत्तं कथय रम्भोरु मा त्रासं च प्रकल्पय । [10]

वैशंपायनः ।

ततः प्रक्षाल्य पादौ सा विश्रान्तं पुनरब्रवीत् ।
निधाय कामं तस्यर्षेः कन्दानि च फलानि च ।
ततः संवाह्य पादौ सा विश्रान्तं वेदिमध्यमा ।
शकुन्तला पौरवाणां दुःषन्तं जगुषी पतिम् ।
ततः कृच्छ्रादतिशुभा सव्रीडा श्रीमती तदा । [15]
सगद्गदमुवाचेदं काश्यपं सा शुचिस्मिता ।

शकुन्तला ।

राजा तातागमेह दुःषन्त इलिलात्मजः ।
मया पतिर्वृतो योऽसौ दैवयोगादिहागतः ।
तस्य तात प्रसीद त्वं भर्ता मे सुमहायशाः ।
अतः सर्वं तु यद्वृत्तं दिव्यज्ञानेन पश्यसि । [20]
अभयं क्षत्रियकुले प्रसादं कर्तुमर्हसि ।

☞ The above passage is ins. in *all* S MSS. after 1. 67. 23. The reservation in the footnotes to 1. 67. 23–24 that T₂ G₄₋₆ ins. it after 24 is unnecessary and should be *deleted*.

46

After 1. 68. 9, D₄ (suppl. fol.; *sec. m.*) S ins.:

शकुन्तलां समाहूय कण्वो वचनमब्रवीत् ।

कण्वः ।

शृणु भद्रे मम सुते मम वाक्यं शुचिस्मिते ।
पतिव्रतानां नारीणां विशिष्टमिति चोच्यते ।
पतिशुश्रूषणं पूर्वं मनोवाक्कायचेष्टितैः ।
अनुज्ञाता मया पूर्वं पूजयैतद्व्रतं तव । [5]
एतेनैव च वृत्तेन पुण्याँल्लोकानवाप्य च ।
तस्यान्ते मानुषे लोके विशिष्टां लप्स्यसे श्रियम् ।
तस्माद्भद्रेऽद्य यातव्यं समीपं पौरवस्य ह ।
स्वयं नायाति मत्वा ते गतं कालं शुचिस्मिते ।
गत्वाराधय राजानं दुःषन्तं हितकाम्यया । [10]
दौःषन्तिं यौवराज्यस्थं दृष्ट्वा प्रीतिमवाप्स्यसि ।
देवतानां गुरूणां च क्षत्रियाणां च भामिनि ।
भर्तॄणां च विशेषेण हितं संगमनं सताम् ।
तस्मात्पुत्रि कुमारेण गन्तव्यं मत्प्रियेप्सया ।
प्रतिवाक्यं न दद्यास्त्वं शापिता मम पादयोः । [15]

वैशंपायनः ।

एवमुक्त्वा सुतां तत्र पौत्रं कण्वोऽभ्यभाषत ।
परिष्वज्य च बाहुभ्यां मूर्ध्न्युपाघ्राय पौरवम् ।
सोमवंशोद्भवो राजा दुःषन्त इति विश्रुतः ।
तस्याग्रमहिषी चैषा तव माता शुचिव्रता ।
गन्तुकामा भर्तृपार्श्वं त्वया सह सुमध्यमा । [20]
गत्वाभिवाद्य राजानं यौवराज्यमवाप्स्यसि ।
स पिता तव राजेन्द्रस्तस्य त्वं वशगो भव ।
पितृपैतामहं राज्यमातिष्ठस्व स्वभावतः ।
तस्मिन्काले स्वराज्यस्थो मामनुस्मर पौरव ।

वैशंपायनः ।

अभिवाद्य मुनेः पादौ पौरवो वाक्यमब्रवीत् । [25]
त्वं पिता मम विप्रर्षे त्वं माता त्वं गतिश्च मे ।
न चान्यं पितरं मन्ये त्वामृते तु महातपः ।
तव शुश्रूषणं पुण्यमिह लोके परत्र च ।
शकुन्तला भर्तृकामा स्वयं यातु यथेष्टतः ।
अहं शुश्रूषणपरः पादमूले वसामि वः । [30]
क्रीडां व्यालमृगैः सार्धं करिष्ये न पुरा यथा ।
स्वच्छासनपरो नित्यं स्वाध्यायं च करोम्यहम् ।

वैशंपायनः ।

एवमुक्त्वा तु संश्लिष्य पादौ कण्वस्य तिष्ठति ।
तस्य तद्वचनं श्रुत्वा प्ररुरोद शकुन्तला ।
स्नेहात्पितुश्च पुत्रस्य हर्षशोकसमन्विता । [35]
निशाम्य रुदतीमार्तां दौःषन्तिर्वाक्यमब्रवीत् ।
श्रुत्वा भगवतो वाक्यं किं रोदिषि शकुन्तले ।
गन्तव्यं काल्य उत्थाय भर्तृप्रीतिस्त्वास्ति चेत् ।

शकुन्तला ।

एकस्तु कुरुते पापं फलं भुङ्क्ते महाजनः ।
भोक्तारस्तत्र मुच्यन्ते कर्ता दोषेण लिप्यते । [40]
मया निवारितो नित्यं न करोषि वचो मम ।
निःसृतान्कुञ्जरान्नित्यं बाहुभ्यां संप्रमथ्य वै ।
वनं च लोडयन्नित्यं सिंहव्याघ्रगणैर्युतम् ।
एवंविधानि चान्यानि कृत्वा वै पुरुनन्दन ।

46

(L. 18) T₁ G₁ M नाम (for इति). T₁ G₁ ते पिता (for विश्रुतः). — (L. 23) T₁ G₁.₂ M अनुतिष्ठ (for आतिष्ठस्व). — (L. 30) Noteworthy is the expression पादमूले! Cf. line 35 of passage No. 68. — (L. 36) M तां तु (for आर्तां). — T₂ M₈ om. line 40 (which appears to be redundant!). — (L. 51) M तथ्यं (for पथ्यं).

रुषितो भगवांस्तात तस्मादावां विवासितौ ।
अहं न गच्छे दुःषन्तं नास्मि पुत्रहितैषिणी ।
पादमूले वसिष्यामि महर्षेर्भावितात्मनः ।
वैशंपायनः ।
एवमुक्त्वा तु रुदती पपात मुनिपादयोः ।
एवं विलपतीं कण्वश्चानुनीय च हेतुभिः ।
पुनः प्रोवाच भगवानानृशंस्याद्धितं वचः ।
कण्वः ।
शकुन्तले शृणुष्वेदं हितं पथ्यं च भामिनि ।
पतिव्रताभावगुणान्हित्वा साध्यं न किंचन ।
पतिव्रतानां देवा वै तुष्टाः सर्ववरप्रदाः ।
प्रसादं च करिष्यन्ति आपदर्थे च भामिनि ।
पतिप्रसादात्पुण्यगतिं प्राप्नुवन्ति न चाशुभम् ।
तस्माद्गत्वा तु राजानमाराधय शुचिस्मिते ।
वैशंपायनः ।
शकुन्तलां तथोक्त्वा वै शाकुन्तलमथाब्रवीत् ।
दौहित्रो मम पौत्रस्त्वमिलिलस्य महात्मनः ।
शृणुष्व वचनं सत्यं ब्रवीमि तवानघ ।
मनसा भर्तृकामा वै वाग्भिरुक्त्वा पृथग्विधम् ।
गन्तुं नेच्छति कल्याणी तस्मात्तात वहस्व वै ।
शक्तस्त्वं प्रतिगन्तुं च मुनिभिः सह पौरव ।

किं चिरायसि मातस्त्वं गमिष्यामो नृपालयम् ।
एवमुक्त्वा तु तां देवीं दुःषन्तस्य महात्मनः ।
अभिवाद्य मुनेः पादौ गन्तुमैच्छत्स पौरवः ।
शकुन्तला च पितरमभिवाद्य कृताञ्जलिः ।
प्रदक्षिणीकृत्य तदा पितरं वाक्यमब्रवीत् ।
अज्ञानान्मे पिता चेति दुरुक्तं वापि चानृतम् ।
अकार्यं वाप्यनिष्टं वा क्षन्तुमर्हति तद्भवान् ।
एवमुक्तो नतशिरा मुनिर्नोवाच किंचन ।
मनुष्यभावात्कण्वोऽपि मुनिरशून्यवर्तयत् ।
अब्भक्षान्वायुभक्षांश्च शीर्णपर्णाशनान्मुनीन् ।
फलमूलाशिनो दान्तान्कृशान्धमनिसंततान् ।
व्रतिनो जटिलान्मुण्डान्वल्कलाजिनसंवृतान् ।
समाहूय मुनिः कण्वः कारुण्यादिदमब्रवीत् ।
मया तु लालिता नित्यं मम पुत्री यशस्विनी ।
वने जाता विवृद्धा च न च जानाति किंचन ।
आश्रमेण पथा सर्वैर्नीयतां क्षत्रियालयम् ।
द्वितीययोजने विप्राः प्रतिष्ठानं प्रतिष्ठितम् ।
प्रतिष्ठाने पुरे राजा शाकुन्तलपितामहः ।
अध्युवास चिरं कालमुर्वश्या सहितः पुरा ।
अनूपजाङ्गलयुतं धनधान्यसमाकुलम् ।
प्रतिष्ठितं पुरवरं गङ्गायामुनसंगमे ।
तत्र संगममासाद्य स्नात्वा हुतहुताशनाः ।
शाकमूलफलाहारा निवर्तध्वं महातपाः ।
अन्यथा तु भवेद्विघ्नो अध्वनो गमने श्रमः ।

47

After 1. 68. 11, D₄ (suppl. fol.; *sec. m.*) S (except G₂) ins.:

वैशंपायनः ।
धर्माभिपूजितं पुत्रं काश्यपेन निशाम्य तु ।
काश्यपात्प्राप्य चानुज्ञां मुमुदे च शकुन्तला ।
कण्वस्य वचनं श्रुत्वा प्रतिगच्छेति चासकृत् ।
तथेत्युक्त्वा तु कण्वं च मातरं पौरवोऽब्रवीत् ।

48

After 1. 68. 13, D₄ (suppl. fol.; *sec. m.*) S ins.:

शकुन्तलां समादाय मुनयो धर्मवत्सलाः ।
ते वनानि नदीः शैलान्गिरिप्रस्रवणानि च ।
कन्दराणि नितम्बांश्च राष्ट्राणि नगराणि च ।

47

(L. 5 and 11) T₁ G₁ M भद्रे (for मातः), and काश्यपः (for तद्भवान्). — (L. 20) T₁ G₁ M₈ अश्रमेण.

48

G₂ om. lines 1–14. — (L. 5) M समागताः. — (L. 8) T₁ M₈ °ह्मीचक्रयंत्रैश्च; M₆₋₈ °ह्मीयंत्रचक्रैश्च. — (L. 15) T₁ M₈ (*inf. lin.*) सर्वतः पुष्करिण्यश्च; M₈ सर्वतः पद्मिनीभिश्च; M₆₋₈ वृतां पुष्करिणीं. M (except M₅) उद्यानैरुपशोभितां. — (L. 18) T₁ क्रतुयज्ञैश्च; M₈ क्रतुयज्ञैश्च; M₆₋₈ ब्राह्मणैश्चैव. — (L. 19) M₈.₆₋₈ अकार्यवर्जितैश्चैव (M₈ °वर्जकैर्नित्यं). — (L. 20) M (except M₅) पूर्णां (for सर्वैः). — (L. 21) M इन्द्रस्येवामरावतीं (for the posterior half). — (L. 25) M °कारशोभितः. — (L. 26) M (except M₅) वैश्यैः (for the first चापि). — (L. 28) T₁ G₁.₂ सदाभ्येत्य; M तथाभ्येत्य. — (L. 29) T₁ महायशाः; M₈ महर्षिभिः; M₈ (*inf. lin.*).₆₋₈ मनीषिभिः. — (L. 30) M महर्षयः (for त्वलक्षयन्). — After line 30, M (except M₅) ins.:

शकुन्तलामिदं प्रीता हर्षयन्तोऽब्रुवन्वचः ।

— (L. 32) M (except M₅) अद्य (for एते). — (L. 36) M (except M₅) प्रेक्षकाः प्रशशंसिरे (for the posterior half). — (L. 46) M (except M₅) ये स्वनेत्रैः प्रप°. — (L. 53) M (except M₅) क्लांतान् (for दीनान्). — (L. 60) M (except M₅) नगरं न प्रवेष्टव्यं भवद्भिरिति शासनं. — Colophon. *Adhy. no.*: T₁ 86; T₂ 36; G₁₋₃.₆ M 37. — D₄ T₁ G₂.₃.₆ M (except M₅) om. line 68. — (L. 88) T₁ G₁.₂ M₈ लक्ष्यते (for दृश्यते).

आश्रमाणि च पुण्यानि गत्वा चैव गतश्रमाः ।
शनैर्मध्याह्नवेलायां प्रतिष्ठानं समाययुः । [5]
तां पुरीं पुरुहूतेन ऐलस्यार्थे विनिर्मिताम् ।
परिघाट्टालकैर्मुख्यैरुपतल्पशतैरपि ।
शतघ्नीशतयन्त्रैश्च गुप्तामन्यैर्दुरासदाम् ।
हर्म्यप्रासादसंबाधां नानापण्यविभूषिताम् ।
मण्टपैः ससभै रम्यैः प्रपाभिश्च समावृताम् । [10]
राजमार्गेण महता सुविभक्तेन शोभिताम् ।
कैलासशिखराकारैर्गोपुरैः समलंकृताम् ।
द्वारतोरणनिर्यूहैर्मेङ्गलैरुपशोभिताम् ।
उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ।
सर्वपुष्करिणीभिश्च उद्यानैश्च समावृताम् । [15]
वर्णाश्रमैः स्वधर्मस्थैर्नित्योत्सवसमाहितैः ।
धनधान्यसमृद्धैश्च संतुष्टै रत्नपूजितैः ।
क्रतुयुक्तैश्च विद्वद्भिरग्निहोत्रपरैः सदा ।
वर्जिताकार्यकरणैर्दानशीलैर्दयापरैः ।
अधर्मभीरुभिः सर्वैः स्वर्गलोकजिगीषुभिः । [20]
एवंविधजनोपेतमिन्द्रलोकमिवापरम् ।
तस्मिन्नगरमध्ये तु राजवेश्म प्रतिष्ठितम् ।
इन्द्रसद्मप्रतीकाशं संपूर्णं वित्तसंचयैः ।
तस्य मध्ये सभा दिव्या नानारत्नविचित्रिता ।
तस्यां सभायां राजर्षिः सर्वालंकारभूषितः । [25]
ब्राह्मणैः क्षत्रियैश्चापि मन्त्रिभिश्चापि संवृतः ।
संस्तूयमानो राजेन्द्रः सूतमागधबन्दिभिः ।
कार्यार्थिभिः समभ्येत्य कृत्वा कार्यं गतेषु सः ।
सुखासीनोऽभवद्राजा तस्मिन्काले महर्षयः ।
शकुन्तानां स्वनं श्रुत्वा निमित्तज्ञास्त्वलक्षयन् । [30]

ऋषयः ।

शकुन्तले निमित्तानि शोभनानि भवन्ति नः ।
कार्यसिद्धिं वदन्त्येते ध्रुवं राज्ञी भविष्यसि ।
अस्मिंस्तु दिवसे पुत्रो युवराजो भविष्यति ।

वैशंपायनः ।

वर्धमानपुरद्वारं तूर्यघोषनिनादितम् ।
शकुन्तलां पुरस्कृत्य विविशुस्ते महर्षयः । [35]
प्रविशन्तं नृपसुतं प्रशशंसुश्च प्रेक्षकाः ।
वर्धमानपुरद्वारं प्रविशन्नेव पौरवः ।
इन्द्रलोकस्थमात्मानं मेने हर्षसमन्वितः ।
ततो वै नागराः सर्वे समाहूय परस्परम् ।
द्रष्टुकामा नृपसुतं समपद्यन्त भारत । [40]

नागराः ।

देवतेव जनस्याग्रे भ्राजते श्रीरिवागता ।
जयन्तेनेव पौलोमी इन्द्रलोकादिहागता ।

वैशंपायनः ।

इति ब्रुवन्तस्ते सर्वे महर्षीनिदमब्रुवन् ।
अभिवादयन्तः सहिता महर्षीन्देववर्चसः ।
अद्य नः सफलं जन्म कृतार्थाश्च ततो वयम् । [45]
एवं ये स्म प्रपश्यामो महर्षीन्सूर्यवर्चसः ।
इत्युक्त्वा सहिताः केचिदन्वगच्छन्त पौरवम् ।
हैमवत्याः सुतमिव कुमारं पुष्करेक्षणम् ।
ये केचिदब्रुवन्मूढाः शाकुन्तलदिदृक्षवः ।
कृष्णाजिनेन संछन्नान्द्रष्टुं नेच्छन्ति तापसान् । [50]
पिशाचा इव दृश्यन्ते नागराणां विरूपिणः ।
विना संध्यां पिशाचास्ते प्रविशन्ति पुरोत्तमम् ।
क्षुत्पिपासार्दितान्दीनान्वल्कलाजिनवाससः ।
त्वगस्थिभूतान्निर्मांसान्धमनीसंततानपि ।
पिङ्गलाक्षान्पिङ्गजटान्दीर्घदन्तान्निरूदरान् । [55]
विशीर्षकानू वैहस्तान्दृष्ट्वा हास्यन्ति नागराः ।
एवमुक्तवतां तेषां गिरं श्रुत्वा महर्षयः ।
अन्योन्यं ते समाहूय इदं वचनमब्रुवन् ।
उक्तं भगवता वाक्यं न कृतं सत्यवादिना ।
पुरप्रवेशनं नात्र कर्तव्यमिति शासनम् । [60]
किं कारणं प्रवेक्ष्यामो नगरं दुर्जनैर्वृतम् ।
त्यक्तसंगस्य च मुनेर्नगरे किं प्रयोजनम् ।
तस्माद्गमिष्याम वयं गङ्गायामुनसंगमम् ।
एवमुक्त्वा मुनिगणाः प्रतिजग्मुर्यथागतम् ।

Colophon.

वैशंपायनः ।

गतान्मुनिगणान्दृष्ट्वा पुत्रं संगृह्य पाणिना । [65]
मातापितृभ्यां विरहाद्यथा शोचन्ति दारकाः ।
तथा शोकपरीताङ्गी धृतिमालम्ब्य दुःखिता ।
गतेषु तेषु विप्रेषु राजमार्गेण भामिनी ।
पुत्रेणैव सहायेन सा जगाम शनैः शनैः ।
अदृष्टपूर्वान्पश्यन्वै राजमार्गेण पौरवः । [70]
हर्म्यप्रासादचैत्यांश्च सभा दिव्या विचित्रिताः ।
कौतूहलसमाविष्टो दृष्ट्वा विस्मयमागतः ।
सर्वे ब्रुवन्ति तां दृष्ट्वा पद्महीनामिव श्रियम् ।
गतेन हंसीसदृशीं कोकिलेन स्वरे समाम् ।
मुखेन चन्द्रसदृशीं श्रिया पद्मालयासमाम् । [75]
स्मितेन कुन्दसदृशीं पद्मगर्भसमत्वचम् ।
पद्मपत्रविशालाक्षीं तप्तजाम्बूनदप्रभाम् ।
करान्तमितमध्यां तां सुकेशीं संहतस्तनीम् ।
जघनं सुविशालं वै ऊरू करिकरोपमौ ।
रक्तोन्नखौ पादौ धरण्यां सुप्रतिष्ठितौ । [80]
एवंरूपसमायुक्ता स्वर्गलोकादिहागता ।
इति स्म सर्वेऽमन्यन्त दुःषन्तनगरे जनाः ।
पुनः पुनरवोचंस्ते शाकुन्तलगुणानपि ।
सिंहेक्षणः सिंहदंष्ट्रः सिंहस्कन्धो महाभुजः ।
सिंहोरस्कः सिंहबलः सिंहविक्रान्तगाम्ययम् । [85]

पृथ्वंसः पृथुवक्षाश्च छत्राकारशिरा महान् ।
पाणिपादतले रक्तो रक्तास्यो दुन्दुभिस्वनः ।
राजलक्षणयुक्तश्च राजश्रीश्चास्य दृश्यते ।
आकारेण च रूपेण शरीरेणापि तेजसा ।
दुःषन्तेन समो ह्येष कस्य पुत्रो भविष्यति । [90]
एवं ब्रुवन्तस्ते सर्वे प्रशशंसुः सहस्रशः ।
युक्तिवादानवोचन्त सर्वाः प्राणभृतः स्त्रियः ।
बान्धवा इव सस्नेहा अनुजग्मुः शकुन्तलाम् ।
पौराणां तद्वचः श्रुत्वा तूष्णींभूता शकुन्तला ।
वेश्मद्वारं समासाद्य विह्वलन्ती नृपात्मजा । [95]
चिन्तयामास सहसा कार्यगौरवकारणात् ।
लज्जया च परीताङ्गी राजन्राजसमक्षतः ।
अघृणा किं नु वक्ष्यामि दुःषन्तं मम कारणात् ।
एवमुक्त्वा तु कृपणा चिन्तयन्ती शकुन्तला ।

49

After 1. 68. 51, Da1 ins.:

ब्रह्मा सुरासुरगुरुः सोऽपि शक्तिं पुराकरोत् ।
प्रकृतिं स्वां प्रविश्याशु ब्रह्माण्डमभवत्ततः ।
भर्तव्या रक्षणीया च भार्या हि पतिना सदा ।
धर्मार्थकामसंसिद्धौ भार्या भर्तुः सहायिनी ।
यदा भर्ता च भार्या च परस्परवशानुगौ । [5]
तदा धर्मार्थकामानां त्रयाणामपि संगमः ।
कथं भार्यामृते धर्मः कथं वा पुरुषः प्रभो ।
प्राप्नोति काममर्थं वाप्यस्यां त्रितयमाहितम् ।
तथैव भर्तारमृते भार्या धर्मादिसाधने ।
न समर्था त्रिवर्गोऽयं दंपत्योः समुपाश्रितः । [10]
देवतातिथिभृत्यानामतिथीनां च पूजनम् ।
न पुम्भिः शक्यते कर्तुमृते भार्यां कथंचन ।
प्राप्तोऽपि चार्थो मनुजैरानीतोऽपि निजं गृहम् ।
नाशमेति विना भार्यां कुभार्यासंग्रहेण वा ।
कामस्तु नैव तस्यास्ति प्रत्यक्षेणोपदृश्यते । [15]

50

After 1. 68. 57^{ab}, Da1 ins.:

अपुत्रस्य जगच्छून्यमपुत्रस्य गृहेण किम् ।
पुत्रेण लोकाञ्जयति श्रुतिरेषा सनातनी ।
नास्ति पुत्रसमः स्नेहो नास्ति पुत्रसमं सुखम् ।
नास्ति पुत्रसमा प्रीतिः नास्ति पुत्रसमा गतिः ।
अनृतं वक्ति लोकोऽयं चन्दनं किल शीतलम् । [5]
पुत्रगात्रपरिष्वङ्गश्चन्दनादपि शीतलः ।

51

After 1. 68. 69, S ins.:

पक्षिणः पुण्यवन्तस्ते सहिता धर्मतस्तदा ।
पक्षैस्तैरभिगुप्ता च तस्मादस्मि शकुन्तला ।
ततोऽहमृषिणा दृष्टा काश्यपेन महात्मना ।
जलार्थमग्निहोत्रस्य गतं दृष्ट्वा तु पक्षिणः ।
न्यासभूतामिव मुनेः प्रददुर्मां दयावतः । [5]
कण्वस्त्वालोक्य मां प्रीतो हसन्तीति हविर्भुजः ।
स मारणिमिवादाय स्वमाश्रममुपागमत् ।
सा वै संभाविता राजन्नुक्तोशान्महर्षिणा ।
तेनैव स्वसुतेवाहं राजन्वै वरवर्णिनी ।
विश्वामित्रसुता चाहं वर्धिता मुनिना नृप । [10]
यौवने वर्तमानां च दृष्टवानसि मां नृप ।
आश्रमे पर्णशालायां कुमारीं विजने वने ।
धात्रा प्रचोदितां शून्ये पित्रा विरहितां मिथः ।
वाग्भिस्त्वं सूनृताभिर्मामपत्यार्थमचूचुदः ।
अकार्षीस्त्वाश्रमे वासं धर्मकामार्थनिश्चितम् । [15]
गान्धर्वेण विवाहेन विधिना पाणिमग्रहीः ।
साहं कुलं च शीलं च सत्यवादित्वमात्मनः ।
स्वधर्मं च पुरस्कृत्य त्वामद्य शरणं गता ।
तस्मान्नार्हसि संश्रुत्य तथेति वितथं वचः ।
स्वधर्मं पृष्ठतः कृत्वा परित्यक्तुमुपस्थिताम् । [20]
त्वन्नाथां लोकनाथस्त्वं नार्हसि त्वमनागसम् ।

52

After 1. 88. 12, D4 (suppl. fol., *sec. m.*) S ins.:

वैशंपायनः ।
अश्वमेधे महायज्ञे स्वयंभुविहिते पुरा ।
हयस्य यानि चाङ्गानि संनिकृत्य यथाक्रमम् ।
होताध्वर्युरथोद्गाता ब्रह्मणा सह भारत ।
अग्नौ प्रास्यन्ति विधिवत्समस्ताः षोडशर्त्विजः ।
धूमगन्धं च पापिष्ठा ये जिघ्रन्ति नरा भुवि । [5]

51

(L. 1) G4 धर्मैवत्सलाः; M (except M5) धर्मैतत्पराः. — (L. 2) T1 G1.4 M (except M5) स्वैर् (for तैर्). — T2 G2–6 M6–8 om. line 6. — (L. 9) M (except M5) दयया (for राजन्वै). T1 G1.3 M (except M5) परमर्षिणा (for वर°). — (L. 12) T1 G4–6 M5 तदा (for वने). — (L. 15) M (except M5) अवोचः (for अकार्षीः). S (except G2.5.6 M5) वाचः (for वासं). T1 G3 M (except M5) °मिश्रिताः; T2 G4 °निश्रिताः; G1 °संमिताः. — (L. 21) T1 G1–4 अनापदि; M5 अपोहितुं (for अनागसम्).

विमुक्तपापाः पूतास्ते तत्क्षणेनाभवन्नराः ।
एतस्मिन्नन्तरे चैव माधवी सा तपोधना ।
मृगचर्मपरीताङ्गी परिधाय मृगत्वचम् ।
मृगैः परिचरन्ती सा मृगाहारविचेष्टिता ।
यज्ञवाटं मृगगणैः प्रविश्य भृशविस्मिता । [10]
आघ्रायन्ती धूमगन्धं मृगैरेव चचार सा ।
यज्ञवाटमटन्ती सा पुत्रांस्तानपराजितान् ।
पश्यन्ती यज्ञमाहात्म्यं मुदं लेभे च माधवी ।
असंस्पृशन्तं वसुधां ययातिं नाहुषं तदा ।
दिविष्ठं प्राप्तमाज्ञाय ववन्दे पितरं तदा । [15]
तदा वसुमनापृच्छन्मातरं वै तपस्विनीम् ।

वसुमनाः ।

भवत्या यत्कृतमिदं वन्दनं पादयोरिह ।
कोऽयं देवोपमो राजा याभिवन्दसि मे वद ।

माधवी ।

शृणुध्वं सहिताः पुत्रा नाहुषोऽयं पिता मम ।
ययातिर्मेम पुत्राणां मातामह इति स्मृतः । [20]
पूरुं मे भ्रातरं राज्ये समावेश्य दिवं गतः ।
केन वा कारणेनैवमिह प्राप्तो महायशाः ।

वैशंपायनः ।

तस्यास्तद्वचनं श्रुत्वा स्वर्गाद्भ्रष्टेति चाब्रवीत् ।
सा पुत्रस्य वचः श्रुत्वा संभ्रमाविष्टचेतना ।
माधवी पितरं प्राह दौहित्रपरिवारितम् । [25]

माधवी ।

तपसा निर्जिताँल्लोकान्प्रतिगृह्णीष्व मामकान् ।
पुत्राणामिव पौत्राणां धर्मादधिगतं धनम् ।
स्वार्थमेव वदन्तीह ऋषयो धर्मपाठकाः ।
तस्मादनेन तपसा चास्माकं दिवमाव्रज ।

ययातिः ।

यदि धर्मफलं ह्येतच्छोभनं भविता तव । [30]
दुहित्रा चैव दौहित्रैस्तारितोऽहं महात्मभिः ।
तस्मात्पवित्रं दौहित्रमद्य प्रभृति पैतृके ।
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
त्रीणि चान्न प्रशंसन्ति शौचमक्रोधमत्वराम् ।
भोक्तारः परिवेष्टारः श्राविताराः पवित्रकाः । [35]
दिवसस्याष्टमे भागे मन्दीभवति भास्करे ।
स कालः कुतपो नाम पितॄणां दत्तमक्षयम् ।
तिलाः पिशाचाद्रक्षन्ति दर्भा रक्षन्ति राक्षसात् ।
रक्षन्ति श्रोत्रियाः पङ्क्तिं यतिभिर्भुक्तमक्षयम् ।
लब्ध्वा पात्रं तु विद्वांसं श्रोत्रियं सुव्रतं शुचिम् । [40]
स कालः कालतो दत्तं नान्यथा काल इष्यते ।

वैशंपायनः ।

एवमुक्त्वा ययातिस्तु पुनः प्रोवाच बुद्धिमान् ।
सर्वे ह्यवभृथस्नाता स्वरध्वं कार्यगौरवात् ।

53

After 1. 92. 24^{ab}, D_4 (suppl. fol. *sec. m.*) S ins.:

बभूव सर्वलोकस्य सत्यवागिति संमतः ।
पीनस्कन्धो महाबाहुर्मत्तवारणविक्रमः ।
अन्वितः परिपूर्णार्थैः सर्वैर्नृपतिलक्षणैः ।
अमात्यसंपदोपेतः क्षत्रधर्मविशेषवित् ।
वशे चक्रे महीमेको विजित्य वसुधाधिपान् । [5]
वेदानागमयत्कृत्स्नान्राजधर्मांश्च सर्वशः ।
ईजे च बहुभिः सत्रैः क्रतुभिर्भूरिदक्षिणैः ।
तर्पयामास विप्रांश्च वेदाध्ययनकोविदान् ।
रत्नैरुच्चावचैर्गोभिर्ग्रामैरश्वैर्धनैरपि ।
वयोरूपेण संपन्नः पौरुषेण बलेन च । [10]
ऐश्वर्येण प्रतापेन विक्रमेण धनेन च ।
वर्तमानं च सत्येन सर्वधर्मविशारदम् ।
तं महीपं महीपाला राजराजमकुर्वत ।
वीतशोकभयाबाधाः सुखस्वप्नप्रबोधनाः ।
श्रिया भरतशार्दूल समपद्यन्त भूमिपाः । [15]
शंतनुप्रमुखैर्गुप्तं राष्ट्राधिपतिभिर्जगत् ।
नियमैः सर्ववर्णानां ब्रह्मोत्तरमवर्तत ।
ब्राह्मणाभिमुखं क्षत्रं क्षत्रियाभिमुखा विशः ।
ब्रह्मक्षत्रानुलोमाश्च शूद्राः पर्यचरन्विशः ।
एवं पशुवराहाणां तथैव मृगपक्षिणाम् । [20]
शंतनावथ राज्यस्थे नावर्तत वृथा वधः ।
असुखानामनाथानां तिर्यग्योनिषु वर्तताम् ।
स एव राजा सर्वेषां भूतानामभवत्पिता ।
स हस्तिनाह्नि धर्मात्मा विहरन्कुरुनन्दनः ।
तेजसा सूर्यकल्पोऽभूद्वायुना च समो बले । [25]
अन्तकप्रतिमः कोपे क्षमया पृथिवीसमः ।
बभूव राजा सुमतिः प्रजानां सत्यविक्रमः ।
स वनेषु च रम्येषु शैलप्रस्रवणेषु च ।

☞ This passage is an anticipation of 1. 94. 1–17 (*q. v.*).

52

(L. 5) T_2 G_{4-6} वपायास्तु (for च पापिष्ठा), and नराधिपाः. — (L. 23) G_3 subst. for the posterior half:

मानाद्भ्रष्टो नृपोत्तमः ।
अयमित्यब्रुवन्पुत्रा माधवीं मातरं तदा ।

— (L. 24) G_3 पुत्राणां (for पुत्रस्य). — (L. 28) T_2 G_{4-6} वेदपारगाः (for धर्मपा°). — After line 32, T_2 G_{3-6} ins.:

भविष्यति न संदेहः पितॄणां प्रीतिवर्धनम् ।

53

(L. 1) T $G_{1.2.6}$ सत्तमः; M_3 विश्रुतः (for संमतः). — (L. 7) M चाग्र° (for भूरि°).

54

After 1. 94. 64, S (which om. 65–66) ins.:

अपत्यफलसंयुक्तमेतच्छ्रुत्वा पितुर्वचः ।
सूतं भूयोऽपि संतप्त आह्वयामास वै पितुः ।
सूतस्तु कुरुमुख्यस्य उपयातस्तदाज्ञया ।
तमुवाच महाप्राज्ञो भीष्मो वै सारथिं पितुः ।
त्वं सारथे पितुर्मह्यं सखासि रथधूर्गतः । [5]
अभिजानासि यदि वै कस्यां भावो नृपस्य तु ।
एतदाचक्ष्व मे पृष्टः करिष्ये न तदन्यथा ।

सूतः ।

दाशकन्या नरश्रेष्ठ तत्र भावः पितुर्गतः ।
वृतः स नरदेवेन तदा वचनमब्रवीत् ।
योऽस्यां पुमान्भवेद्गर्भः स राजा त्वदनन्तरम् । [10]
नाकामयत तं दातुं पिता तव वरं तदा ।
स चापि निश्चयरूढ्य न च दद्यामतोऽन्यथा ।
एवं ते कथितं वीर कुरुष्व यदनन्तरम् ।

वैशंपायनः ।

ततः स पितुराज्ञाय मतं सम्यगवेक्ष्य च ।
ज्ञात्वा विमनसं पुत्रः प्रययौ यमुनां प्रति । [15]

☞ The passage is followed by 1. 94. 67 (*q. v.*).

55

After 1. 96. 53[e], K4 (suppl. fol.) D4 (suppl. fol. *sec. m.*) S ins.:

नैनामैच्छत्कथंचन ।
अम्बामन्यस्य कीर्त्यन्तीमब्रवीच्चारुदर्शनाम् ।

विचित्रवीर्यः ।

प्रत्यक्षफल एवैष कामोऽसाधुर्निरर्थकः ।
परतल्पोपभोगे मामार्य नायोक्तुमर्हसि ।

भीष्मः ।

प्रतिष्ठितः शंतनोर्वै तात यस्य त्वमन्वयः । [5]
अकामवृत्तो धर्मात्मन्साधु मन्ये मतं तव ।
इत्युक्त्वाम्बां समालोक्य विधिवद्वाक्यमब्रवीत् ।
विसृष्टा ह्यसि गच्छ त्वं यथाकाममनिन्दिते ।
नानियोज्ये समर्थोऽहं नियोक्तुं भ्रातरं प्रियम् ।
अन्यभावगतां चापि को नारीं वासयेद्गृहे । [10]
अतस्त्वां न नियोक्ष्यामि अन्यकामासि गम्यताम् ।
अहमप्यूर्ध्वरेता वै निवृत्तो दारकर्मणि ।
न संबन्धस्तदावाभ्यां भविता वै कथंचन ।

वैशंपायनः ।

इत्युक्ता सा गता तत्र सखीभिः परिवारिता ।
निर्दिष्टा हि शनै राजन्साल्वराजपुरं प्रति । [15]
अथाम्बा साल्वमागम्य साब्रवीन्मनसा वृता ।
पुरा निर्दिष्टभावा त्वामागतास्मि वरानन ।
देवव्रतं समुत्सृज्य सानुजं भरतर्षभम् ।
प्रतिगृह्णीष्व भद्रं ते विधिवन्मां समुद्यताम् ।
तयैवमुक्तः साल्वोऽपि प्रहसन्निदमब्रवीत् । [20]
निर्जितासीह भीष्मेण मां विनिर्जित्य राजसु ।
अन्येन निर्जितां भद्रे विसृष्टां तेन चालयात् ।
न गृह्णामि वरारोहे तत्र चैव तु गम्यताम् ।
इत्युक्ता सा समागम्य भीष्मं पुनरथाब्रवीत् ।
अम्बाब्रवीत्ततो भीष्मं त्वयाहं सहसा हृता । [25]
क्षत्रधर्ममवेक्षस्व त्वं भर्ता मम धर्मतः ।
यां यः स्वयंवरे कन्यां निर्जयेच्छौर्यसंपदा ।
राज्ञः सर्वान्विनिर्जित्य स तामुद्वाहयेद्ध्रुवम् ।
अतस्त्वमेव भर्ता मे त्वयाहं निर्जिता यतः ।
तस्माद्गृहस्व मां भीष्म निर्जितां संसदि त्वया । [30]
ऊर्ध्वरेता ह्यहमिति प्रत्युवाच पुनः पुनः ।
भीष्मं सा चाब्रवीदम्बा यथाजैषीस्तथा कुरु ।
एवमन्वगमद्भीष्मं षट् समाः पुष्करेक्षणा ।
ऊर्ध्वरेतास्त्वहं भद्रे विवाहविमुखोऽभवम् ।
तमेव साल्वं गच्छ त्वं यः पुरा मनसा वृतः । [35]
अन्यसक्तं किमर्थं त्वमात्मानमवदः पुरा ।
अन्यसक्तां वधूं कन्यां वासयेत्स्वगृहे न हि ।
नाहमुद्वाहयिष्ये त्वां मम भ्रात्रे यवीयसे ।
विचित्रवीर्याय शुभे यथेष्टं गम्यतामिति ।
भूयः साल्वं समभ्येत्य राजन्गृह्णीष्व मामिति । [40]
नाहं गृह्णाम्यन्यजितामिति साल्वनिराकृता ।
ऊर्ध्वरेतास्त्वहमिति भीष्मेण च निराकृता ।
अम्बा भीष्मं पुनः साल्वं भीष्मं साल्वं पुनः पुनः ।
गमनागमनैवमनैषीत्षट् समा नृप ।
अश्रुभिर्भूमिमुक्षन्ती शोचन्ती सा मनस्विनी । [45]
पीनोन्नतकुचद्वन्द्वा विशालजघनेक्षणा ।
श्रोणीभरालसगमा राकाचन्द्रनिभानना ।
वर्षत्कादम्बिनीमूर्ध्नि स्फुरन्ती चञ्चलेव सा ।
सा ततो द्वादश समा बाहुदामभितो नदीम् ।
पार्श्वे हिमवतो रम्ये तपो घोरं समादधे । [50]
संक्षिप्तकरणा तत्र तप आस्थाय सुव्रता ।
पादाङ्गुष्ठेन सातिष्ठदकम्पन्त ततः सुराः ।

54

(L. 5) G8 रथमार्गतः; G1.8 सरयूगतः; G6 रथयुग्यतः. — (L. 6) T2 G1–8 अपि (for अभि-). — (L. 8) T1 G1–8 M दाशकन्यां. G1. 8 M8 तव (for तत्र).

तस्यास्तत्तु तपो दृष्ट्वा सुराणां क्षोभकारकम् ।
विस्मितश्चैव हृष्टश्च तस्यानुग्रहबुद्धिमान् ।
अनन्तसेनो भगवान्कुमारो वरदः प्रभुः । [55]
मानयन्राजपुत्रीं तां ददौ तस्यै शुभां स्रजम् ।
एषा पुष्करिणी दिव्या यथावत्समुपस्थिता ।
अम्बे त्वच्छोकशमनी माला भुवि भविष्यति ।
एतां चैव मया दत्तां मालां यो धारयिष्यति ।
सोऽस्य भीष्मस्य निधने कारणं वै भविष्यति । [60]

Colophon.

अम्बा ।

अन्यपूर्वेति मां साल्वो नाभिनन्दति बालिशः ।
साहं धर्माच्च कामाच्च विहीना शोकधारिणी ।
अपतिः क्षत्रियान्सर्वानाक्रन्दामि समन्ततः ।
इयं वः क्षत्रिया माला या भीष्मं निहनिष्यति ।
अहं च भार्या तस्य स्यां यो भीष्मं घातयिष्यति । [65]

वैशंपायनः ।

तस्याश्चङ्क्रम्यमाणायाः समाः पञ्च गताः पराः ।
नाभवच्छरणं कश्चित्क्षत्रियो भीष्मजाद्भयात् ।
अगच्छत्सोमकं साम्बा पाञ्चालेषु यशस्विनम् ।
सत्यसंधं महेष्वासं सत्यधर्मपरायणम् ।
सा सभाद्वारमागम्य पाञ्चालैरभिरक्षितम् । [70]
पाञ्चालराजमाक्रन्दत्प्रगृह्य सुभुजा भुजौ ।

अम्बा ।

भीष्मेण हन्यमानां मां मज्जन्तीमिव च ह्रदे ।
यज्ञसेनाभिधावेह पाणिमालम्ब्य चेश्वर ।
तेन मे सर्वधर्माश्च रतिभोगाश्च केवलाः ।
उभौ च लोकौ कीर्तिश्च समूलौ सफलौ हृतौ । [75]
क्रोशन्त्येवं न विन्दामि राजन्यं शरणं क्वचित् ।
किं नु निःक्षत्रियो लोको यत्रानाथोऽवसीदति ।
समागम्य तु राजानो मयोक्ता राजसत्तमाः ।
इक्ष्वाकूणां तु ये वृद्धाः पाञ्चालानां च ये वराः ।
त्वत्प्रसादाद्विवाहेऽस्मिन्मा धर्मो मा पराजयेत् । [80]
प्रसीद यज्ञसेनेह गतिर्मे भव सोमक ।

यज्ञसेनः ।

जानामि त्वां बोधयामि राजपुत्रि विशेषतः ।
यथाशक्ति यथाधर्मं बलं संधारयाम्यहम् ।
अन्यस्मात्पार्थिवाद्यत्ते भयं स्यात्पार्थिवात्मजे ।
तस्यापनयने हेतुं संविधातुमहं प्रभुः । [85]
न हि शांतनवस्याहं महास्त्रस्य प्रहारिणः ।
ईश्वरः क्षत्रियाणां हि बलं धर्मोऽनुवर्तते ।
सा साधु व्रज कल्याणि न मां भीष्मो दहेद्बलात् ।
न हि भीष्मादहं धर्मं शक्तो दातुं कथंचन ।

वैशंपायनः ।

इत्युक्ता स्रजमासज्य द्वारि राज्ञो व्यपाद्रवत् । [90]
व्युदस्तां सर्वलोकेषु तपसा संशितव्रताम् ।
तामन्वगच्छद्द्रुपदः सान्त्वं जल्पन्पुनः पुनः ।
स्रजं गृहाण कल्याणि न नो वैरं प्रसज्यय ।

अम्बा ।

एवमेव त्वया कार्यमिति स्म प्रतिकाङ्क्षते ।
न तु तस्यान्यथा भावो दैवमेतदमानुषम् । [95]
यश्चैनां स्रजमादाय स्वयं वै प्रतिमोक्षते ।
स भीष्मं समरे हन्ता मम धर्मप्रणाशनम् ।

वैशंपायनः ।

तां स्रजं द्रुपदो राजा कंचित्कालं ररक्ष सः ।
ततो विस्रम्भमास्थाय तूष्णीमेतामुपैक्षत ।
तां शिखण्डिन्यबध्नात्तु बाला पितुरवज्ञया । [100]
तां पिता त्वरजच्छीघ्रं त्रस्तो भीष्मस्य किल्बिषात् ।
इषीकं ब्राह्मणं भीता साभ्यगच्छत्तपस्विनम् ।
गङ्गाद्वारि तपस्यन्तं तुष्टिहेतोस्तपस्विनी ।
उपचाराभितुष्टस्तामब्रवीद्ऋषिसत्तमः ।
गङ्गाद्वारे विभजनं भविता नचिरादिव । [105]
तत्र गन्धर्वराजानं तुम्बुरुं प्रियदर्शनम् ।
आराधयितुमीहस्व सम्यक्परिचरस्व तम् ।
अहमप्यत्र साचिव्यं कर्तास्मि तव शोभने ।
तं तदाचर भद्रं ते स ते श्रेयो विधास्यति ।

55

Through oversight K4 was omitted from the list of MSS. containing this passage, given in the foot-notes to 1. 96. 53. — (L. 1) M अंबां (for एनां). — (L. 3) K4 D4 M5 पापस्य फलम्; M3 अत्यल्प°; M6-8 असार° (for प्रत्यक्ष°). — (L. 5) D4 M प्रातिष्ठच्छांतनोर्वशः. — (L. 16) K4 D4 M प्रतिपूज्य तम् (for मनसा वृता). — (L. 18) T1 G1.2.6 M3 पुरुषर्षभ (for भरत°). — After line 25, G1 ins.:

स्वयंवरे राजमध्ये त्वयाहं प्रथमं वृता ।

— K4 T1 M (except M5) om. lines 27-30; T2 om. 27-31; G3 om. 27-33. — (L. 31) M (except M5) पूर्वमेवोक्तवांस्तव (for the posterior half). — K4 T1 M3 om. lines 34-44; T2 om. 34-48. K4 D4 T1 M (except M5) om. lines 46-48. — (L. 57) K4 D4 G1.3.4 M3 समुपासिता. — Colophon. *Adhy. no.*: T1 97; T2 47; G M 48. D4 G3.4 M6-8 om. line 78. — (L. 88) K4 T2 M3 अभिषजेत्; T1 G3 अभिभवेत्; G1.2 अभिदहेत् (for भीष्मो दहेत्). — After line 88, G2.4.5 M5 ins.:

न प्रत्यगृह्णंस्ते सर्वे किमित्येव न वेद्म्यहम् ।

ततो विभजनं तत्र गन्धर्वाणामवर्तत । [110]
तत्र द्वाववशिष्येतां गन्धर्वावमितौजसौ ।
तयोरेकः समीक्ष्यैनां स्त्रीबुभूषुरुवाच ह ।
इदं गृह्णीष्व पुंलिङ्गं वृणे स्त्रीलिङ्गमेव ते ।
नियमं चक्रतुस्तत्र स्त्री पुमांश्चैव तावुभौ ।
ततः पुमान्समभवच्छिखण्डी परवीरहा । [115]
स्त्री भूत्वा ह्यपचक्राम स गन्धर्वो मुदान्वितः ।
लब्ध्वा तु महतीं प्रीतिं याज्ञसेनिर्महायशाः ।
ततो बहुदकं गत्वा पुनरस्त्राणि सोऽकरोत् ।
तत्र चास्त्राणि दिव्यानि कृत्वा स सुमहाद्युतिः ।
स्वदेशमभिसंपेदे पाञ्चालं कुरुनन्दन । [120]
सोऽभिवाद्य पितुः पादौ महेष्वासः कृताञ्जलिः ।
उवाच भवता भीष्मान्न भेतव्यं कथंचन ।

Colophon.

वैशंपायनः ।

अम्बायां निर्गतायां तु भीष्मः शांतनवस्तदा ।
न्यायेन कारयामास राज्ञो वैवाहिकीं क्रियाम् ।
अम्बिकाम्बालिके चैव परिणीयाग्निसंनिधौ । [125]

☞ This passage (55), which is followed by a *repetition* (with v. l.) of 1. 96. 53^{abc}, is a version (much abbreviated and in many respects discrepant) of the Ambopākhyāna (in the Udyoga). The repetition of 1. 96. 53^{abc}, is an unmistakable sign that the passage is an interpolation here.

56

S ins. after 1. 98. 17: Dn, after 1038*: D$_4$ (suppl. fol. *sec. m.*), after line 1 of 1038*:

पुत्रलाभाच्च सा पत्नी न तुतोष पतिं तदा ।
प्रद्विषन्तीं पतिर्भार्यां किं मां द्वेष्टीति चाब्रवीत् ।

पत्नी ।

पतिर्भार्यानुभरणाद्भर्ता चेति प्रकीर्त्यते ।
अहं त्वां भरणं कृत्वा जात्यन्धं ससुता सदा ।
नित्यकालं श्रमेणार्ता न भरेयं महातपः । [5]

भीष्मः ।

तस्यास्तद्वचनं श्रुत्वा ऋषिः कोपसमन्वितः ।
प्रत्युवाच ततः पत्नीं प्रद्वेषीं ससुतां तदा ।
नीयतां क्षत्रियकुले धनार्थी त्वं भविष्यसि ।

पत्नी ।

त्वया दत्तं धनं विप्र नेच्छेयं दुःखकारकम् ।
यथेष्टं कुरु विप्रेन्द्र न भरेयं यथा पुरा । [10]

दीर्घतमाः ।

अद्य प्रभृति मर्यादा मया लोके प्रतिष्ठिता ।
एक एव पतिर्नार्या यावज्जीवं परायणम् ।
मृते जीवति वा तस्मिन्नापरं प्रामुयान्नरम् ।
अभिगम्य परं नारी पतिष्यति न संशयः ।
अपतीनां तु नारीणामद्य प्रभृति पातकम् । [15]
यद्यस्ति चेद्धनं सर्वं वृथाभोगा भवन्तु ताः ।
अकीर्तिः परिवादश्च नित्यकालं भवन्तु वै ।

भीष्मः ।

तस्य तद्वचनं श्रुत्वा ब्राह्मणी भृशकोपिता ।
गङ्गामानीयतामेष पुत्रा इत्येवमब्रवीत् ।

☞ It should be noted that here the text of the vulgate contains an injudicious juxtaposition of two interpolations from two separate and unconnected sources, so inharmonious that the first half of 1. 104. 29 of the Bombay ed. remains hanging in the air! Cf. Winternitz, *JRAS.* 1897. 723 f. (with footnote).

57

After वैशंपायनः of 1. 99. 3, S (which om. उवाच) ins.:

भीष्मस्य तु वचः श्रुत्वा धर्म्यं हेत्वर्थसंहितम् ।
माता सत्यवती भीष्मं पुनरेवाभ्यभाषत ।

— G$_6$ (hapl.) om. from the posterior half of line 88 to the prior half of 93 (inclusive). — (L. 100 and 107) K$_4$ T$_1$ G M$_8$ अजानती (for अवज्ञया), and परिचरेर्विभुं. — (L. 114) K$_4$ D$_4$ M स्त्रीत्वे पुंस्त्वे च तावुभौ. — Colophon. *Adhy. no.*: T$_1$ 98; T$_2$ 48; G M 49.

56

(L. 1) Dn °लाभा च. — (L. 2) Dn G$_4$ मां द्वेक्षीति. — (L. 3) Dn T$_1$ M भार्यांया भरणाद्भर्ता पालनाच्च पतिः स्मृतः. — (L. 4) Dn D$_4$ T$_1$ G$_8$ ससुतं. — (L. 9) Dn D$_4$ M$_{6-8}$ दुःखकारणम्. — (L. 10) Dn T$_1$ G$_{3,6}$ transp. यथा and पुरा. — (L. 12) G (except G$_{1,8}$) पत्न्या (for नार्या). — (L. 13) T$_2$ G (except G$_{3,6}$) तस्मिन्न परं. — (L. 17) Dn T$_1$ M (except M$_8$) °वादाश्च. Dn D$_4$ G$_6$ M$_{6-8}$ नित्यं तासां (for नित्यकालं). — (L. 18) Dn M$_8$ इति (for तस्य). — (L. 19) Dn D$_4$ गंगायां नीय°.

सत्यवती ।
औचथ्यमधिकृत्येदमङ्गं च यदुदाहृतम् ।
पौराणी श्रुतिरित्येषा प्राप्तकालमिदं कुरु ।
त्वं हि पुत्र कुलस्यास्य ज्येष्ठः श्रेष्ठश्च भारत । [5]
यथा च ते पितुर्वाक्यं मम कार्यं तवानघ ।
मम पुत्रस्तव भ्राता यवीयान्सुप्रियश्च ते ।
बाल एव गतः स्वर्गं भारतो भरतर्षभ ।
इमे महिष्यौ तस्येह काशिराजसुते उभे ।
रूपयौवनसंपन्ने पुत्रकामे च भारत । [10]
धर्ममेतत्परं ज्ञात्वा संतानाय कुलस्य च ।
आभ्यां मम नियोगात्तु धर्मं चरितुमर्हसि ।
भीष्मः ।
असंशयं परो धर्मस्त्वया मातः प्रकीर्तितः ।
त्वमप्येतां प्रतिज्ञां तु वेत्थ या परमा मयि ।
जानीषे यत्तदा वृत्तं शुल्कहेतोस्त्वदन्तरे । [15]
तत्सत्यवति सत्यं वै पुनरेव ब्रवीमि ते ।
तन्न जात्वन्यथा कार्यं लोकानामपि संक्षये ।
परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः ।
यद्वाभ्यधिकमेताभ्यां न तु सत्यं परित्यजे ।
त्यजेच्च पृथिवी गन्धमापश्च रसमुत्तमम् । [20]
ज्योतिश्च परमं रूपं वायुः स्पर्शगुणं त्यजेत् ।
त्यजेच्च घोषमाकाशः सोमः शीतत्वमुत्सृजेत् ।
प्रभां समुत्सृजेदर्को धूमकेतुरथोष्णताम् ।
वृत्रहा विक्रमं जह्याद्धर्मं जह्याच्च धर्मराट् ।
अमरत्वस्य वा हेतोस्त्रैलोक्यस्यदनस्य वा । [25]
उत्सृजेयमहं प्राणान्न तु सत्यं कथंचन ।
सत्यवती ।
जानामि त्वयि धर्मज्ञ सत्यं सत्यवतां वर ।
इच्छंस्त्वमिह लोकांस्त्रीन्सृजेरन्यानरिंदम ।
यथा तु वः कुलं चैव धर्मश्च न पराभवेत् ।
सुहृदश्च सुहृष्टाः स्युस्तथा त्वं कर्तुमर्हसि । [30]
भीष्मः ।
त्वमेव कुलवृद्धासि गौरवं तु परं त्वयि ।
सोपायं कुलसंताने वक्तुमर्हसि नः परम् ।
स्त्रियो हि परमं गुह्यं धारयन्ति कुले कुले ।
पुरुषांश्चापि मायाभिर्बह्वीभिरुपगूहते ।
सा सत्यवति संपश्य धर्मं सत्यपरायणे । [35]
यथा न जह्यां सत्यं च न सीदेच्च कुलं हि नः ।
वैशंपायनः ।

☞ Lines 7–30 above are a *repetition* (with v. l.) of 1. 97. 8–10, 13–18, 20 and 22.

58

After 1. 104. 9, N ins.:

तां समासाद्य देवस्तु विवस्वानिदमब्रवीत् ।
अयमस्म्यसितापाङ्गे ब्रूहि किं करवाणि ते ।
कुन्युवाच ।
कश्चिन्मे ब्रह्मवित्प्रादाद्वरं विद्यां च शत्रुहन् ।
यद्विजिज्ञासयाह्वानं कृतवत्यस्मि ते विभो ।
तदस्मिन्नपराधे त्वां शिरसाभिप्रसादये । [5]
योषितो हि सदा रक्ष्याः स्वपराद्धापि नित्यदा ।
सूर्य उवाच ।
वेदाहं सर्वमेवैतद्यद्दुर्वासा ददौ तव ।
संत्यज्योभे मानभये क्रियतां संगमो मया ।
अमोघं दर्शनं मह्यमाहूतश्चास्मि ते शुभे ।

57

(L. 1) T G4–6 वचनं (for तु वचः). — (L. 6) T1 तदा कुरु; G1.2.6 तथानघ (for तवा°). — (L. 14) T2 G4.5 मयि वर्तते (for परमा मयि). — (L. 17) T2 G3–5 कुर्या (for कार्यं). — (L. 27) T2 G4–6 सत्यं सत्यपराक्रम; G3 धर्मं सत्यं परंतप. — (L. 33) T2 G4.5 सदा (for the first कुले).

58

(L. 2) K3 N1.2 V1 B D (except D5) °सितापांगि. — (L. 3) Ko महर्षिः; Ñ2 V1 B1.5 D (except D2) ब्राह्मणः (for ब्रह्मवित्). — (L. 4) Ko.4 Ñ2.3 V1 B D तद् (for यद्). — (L. 5) Ko.4 Ñ2 V1 B D एतस्मिन् (for तदस्मिन्). Ñ2 V1 Dn D1 अहं (for अभि-). — (L. 6) Ś1 K1 स्वा(K1 स्व)पराधे; Ko.3.4 D2 सापराधा; Ñ V1 B5 Dn2 D1 स्वाप°. Several MSS. नित्यशः. K2 D5 सापराधा अपि प्रभो. — (L. 7) B D2.4 transp. यद् and दुर्वासा. Ko.4 Ñ2 V1 D (except D5) वरं ददौ (for ददौ तव). — (L. 8) Ñ1 संभेद्य शांतभावेन; V1 Da1 Dn D1 संत्यज्य भयमेवेह; Ñ3 त्यज्यतां भयमेवेह; D2 सत्यं तेभिहितं भद्रे. Ñ3 V1 D (except D2.4.5) मम (for मया). — (L. 10) Ñ1.3 प्रसज्याह्वानि; Ñ2 V1 B5 D (except D2.4.5) °ह्वानेपि. Ñ1.3 दोषोपि स्याद्-निच्छतः; Ñ2 V1 D (except D2.4.5) दोषः स्याच्चात्र संशयः. — (L. 11) Ko.2.4 Ñ2.3 V1 B D om. सा. Ko.1.4 Ñ2.3 V1 B D सांत्वपूर्वं (for सान्त्वं क्रूरं). — (L. 12) K3 भास्कर; V1 Dn D1.5 भारत (for पार्थिव). — (L. 13) Ko.4 Ñ V1 B (except B5) D (except D5) यशस्विनी (for तप°). — After line 15, D1 marg. *sec. m.* reads passage No. 59 given below. — (L. 16) Ko.4 V1 D (except D2.4) स (for तु). K2.3 Ñ1.3 V1 B5 D (except D2.4) °राज° (for °भोज°).

वृथाह्वानाद्धि ते भीरु दोषो हि स्यादसंशयम्। [10]
वैशंपायन उवाच।
सैवमुक्ता बहुविधं सान्त्वं क्रूरं विवस्वता।
सा तु नैच्छद्वरारोहा कन्याहमिति पार्थिव।
बन्धुपक्षभयाद्भीता लज्जया च तपस्विनी।
तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ।
मत्प्रसादान्न ते राज्ञि भविता दोष इत्युत। [15]
एवमुक्त्वा तु भगवान्कुन्तिभोजसुतां तदा।

59

S ins. after l. 104. 9: D4 (marg. *sec. m.*), after line 15 of passage No. 58 above:

साब्रवीद्भगवन्कस्त्वं प्रादुर्भूतो ममाग्रतः।
सूर्यः।
आहूतोपस्थितं भद्रे ऋषिमन्त्रेण चोदितम्।
विद्धि मां पुत्रलाभाय देवमर्कं शुचिस्मिते।
पुत्रस्ते निर्मितः सुभ्रु शृणु यादृक्शुभानने।
आदित्ये कुण्डले बिभ्रत्कवचं चैव मामकम्। [5]
शस्त्रास्त्राणामभेद्यं च भविष्यति शुचिस्मिते।
नास्य किंचिददेयं च ब्राह्मणेभ्यो भविष्यति।
चोद्यमानो मया चापि न क्षमं चिन्तयिष्यति।
दास्यते स हि विप्रेभ्यो मानी चैव भविष्यति।
वैशंपायनः।
एवमुक्ता ततः कुन्ती गोपतिं प्रत्युवाच ह। [10]
कन्या पितृवशा चाहं पुरुषार्थो न चैव मे।
सूर्यः।
यद्येवं मन्यसे भीरु किमाह्वयसि भास्करम्।
यदि मामवजानासि ऋषिः स न भविष्यति।
मन्त्रदानेन यस्य त्वमवलेपेन दर्पिता।
कुलं च तेऽद्य धक्ष्यामि क्रोधदीप्तेन चक्षुषा। [15]
कुन्ती।
प्रसीद भगवन्मह्यमवलेपो हि नास्ति मे।
ममैव परिहार्यं स्यात्कन्याभावस्य दूषणम्।
सूर्यः।
व्यपयातु भयं तेऽद्य कुमारं प्रसमीक्ष्यसे।
मया त्वं चाप्यनुज्ञाता पुनः कन्या भविष्यसि।
वैशंपायनः।
एवमुक्ता ततः कुन्ती संप्रहृष्टतनूरुहा। [20]
संगता च ततः सुभ्रूरादित्येन महात्मना।

60

After 1. 104. 17, D4 (marg. *sec. m.*). 5 S ins.:

ततः काले तु कस्मिंश्चित्स्वप्नान्ते कर्णमब्रवीत्।
आदित्यो ब्राह्मणो भूत्वा शृणु वीर वचो मम।
प्रभातायां रजन्यां त्वामागमिष्यति वासवः।
न तस्य भिक्षा दातव्या विप्ररूपी भविष्यति।
निश्चयोऽस्यापहर्तुं ते कवचं कुण्डले तथा। [5]
अतस्त्वां बोधयाम्येष स्मर्तासि वचनं मम।
कर्णः।
शक्रो मां विप्ररूपेण यदि वै याचते द्विज।
कथं तस्मै न दास्यामि यथा चास्म्यवबोधितः।
विप्राः पूज्यास्तु देवानां सततं प्रियमिच्छताम्।
तं देवदेवं जानन्वै न शक्ष्याम्यवमन्नणे। [10]
सूर्यः।
यद्येवं शृणु मे वीर वरं ते सोऽपि दास्यति।
शक्तिं त्वमपि याचेथाः सर्वशत्रुविघातिनीम्।
वैशंपायनः।
एवमुक्त्वा द्विजः स्वप्ने तत्रैवान्तरधीयत।
कर्णः प्रबुद्धस्तं स्वप्नं चिन्तयानोऽभवत्तदा।

61

For 1. 105. 4–7, K4 N B D subst.:

कुन्त्याः पाण्डोश्च राजेन्द्र कुन्तिभोजो महीपतिः।
कृत्वोद्वाहं तदा तं तु नानावसुभिरर्चितम्।
स्वपुरं प्रेषयामास स राजा कुरुसत्तमम्।
ततो बलेन महता नानाध्वजपताकिना।
स्तूयमानः स चाशीर्भिर्ब्राह्मणैश्च महर्षिभिः। [5]
संप्राप्य नगरं राजा पाण्डुः कौरवनन्दनः।
न्यवेशयत तां भार्यां कुन्तीं स्वभवने प्रभुः।
Colophon.
वैशंपायन उवाच।
ततः शांतनवो भीष्मो राज्ञः पाण्डोर्यशस्विनः।
विवाहस्यापरस्यार्थे चकार मतिमान्मतिम्।

59

(L. 9) D4 T2 G2. 4. 5 दास्यत्येव हि विप्रे°. — (L. 18) T1 G1 M3. 5 प्रसविष्यसे; G2 प्राप्स्यसे शुभे.

60

(L. 9) D4 G5 M6-8 प्रियं मे(M6-8 प्रियम)स्तिति ब्राह्मणः. — (L. 12) D4 G3. 6 M5 °शत्रुविबाधिनीं; D5 °शस्त्राभिघातिनीं.

61

D5 om. line 1. — For details of colophon see footnotes on p. 471. — (L. 17) Dn D1. 5 कन्यार्थिनं (for वरा°). — (L. 30) Ñ2 Dn D1 जनाधिपः (for महा°). — (L. 41) K4 B3. 5 Dn D2. 4 पुरीं (for पुरं). K4 Ñ B3. 4. 6 Da2 D2. 4 प्रहृष्टो. — (L. 49) K4 Ñ B5 Dn1. n2

सोऽमात्यैः स्थविरैः सार्धं ब्राह्मणैश्च महर्षिभिः । [10]
बलेन चतुरङ्गेन ययौ मद्रपतेः पुरम् ।
तमागतमभिश्रुत्य भीष्मं बाह्लीकपुंगवः ।
प्रत्युद्गम्यार्चयित्वा च पुरं प्रावेशयन्नृपः ।
दत्त्वा तस्यासनं शुभ्रं पाद्यमर्घ्यं तथैव च ।
मधुपर्कं च मद्रेशः पप्रच्छागमनेऽर्थिताम् । [15]
तं भीष्मः प्रत्युवाचेदं मद्रराजं कुरूद्वहः ।
आगतं मां विजानीहि वरार्थिनमरिंदम ।
श्रूयते भवतः साध्वी स्वसा माद्री यशस्विनी ।
तामहं वरयिष्यामि पाण्डोरर्थे यशस्विनीम् ।
युक्तरूपो हि संबन्धे त्वं नो राजन्वयं तव । [20]
एतत्संचिन्त्य मद्रेश गृहाणास्मान्यथाविधि ।
तमेवंवादिनं भीष्मं प्रत्यभाषत मद्रपः ।
न हि मेऽन्यो वरस्त्वत्तः श्रेयानिति मतिर्मम ।
पूर्वैः प्रवर्तितं किंचित्कुलेऽस्मिन्नृपसत्तमैः ।
साधु वा यदि वासाधु तन्नातिक्रान्तुमुत्सहे । [25]
व्यक्तं तद्भवतश्चापि विदितं नात्र संशयः ।
न च युक्तं तथा वक्तुं भवान्देहीति सत्तम ।
कुलधर्मः स नो वीर प्रमाणं परमं च तत् ।
तेन त्वां न ब्रवीम्येतदसंदिग्धं वचोऽरिहन् ।
तं भीष्मः प्रत्युवाचेदं मद्रराजं महामतिः । [30]
धर्म एष परो राजन्स्वयमुक्तः स्वयंभुवा ।
नात्र कश्चन दोषोऽस्ति पूर्वैर्विधिरयं कृतः ।
विदितेयं च ते शल्य मर्यादा साधुसंमता ।
इत्युक्त्वा स महातेजाः शातकुम्भं कृताकृतम् ।
रत्नानि च विचित्राणि शल्यायादात्सहस्रशः । [35]
गजानश्वान्रथांश्चैव वासांस्याभरणानि च ।
मणिमुक्ताप्रवालं च गाङ्गेयो व्यसृजच्छुभम् ।
तत्प्रगृह्य धनं सर्वं शल्यः संप्रीतमानसः ।
ददौ तां समलंकृत्य स्वसारं कौरवर्षभे ।
स तां माद्रीमुपादाय भीष्मः सागरगासुतः । [40]
आजगाम पुरं धीमान्प्रविष्टो गजसाह्वयम् ।
तत इष्टेऽहनि प्राप्ते मुहूर्ते साधुसंमते ।
जग्राह विधिवत्पाणिं माद्र्याः पाण्डुर्नराधिपः ।
ततो विवाहे निर्वृत्ते स राजा कुरुनन्दनः ।
स्थापयामास तां भार्यां शुभे वेश्मनि भाविनीम् । [45]
स ताभ्यां व्यचरत्सार्धं भार्याभ्यां राजसत्तमः ।
कुन्त्या माद्र्या च राजेन्द्रो यथाकामं यथासुखम् ।

ततः स कौरवो राजा विहृत्य त्रिदशा निशाः ।
जिगीषया महीं पाण्डुर्निश्चक्राम पुरात्प्रभो ।
स भीष्मप्रमुखान्वृद्धानभिवाद्य प्रणम्य च । [50]
धृतराष्ट्रं च कौरव्यं तथान्यान्कुरुसत्तमान् ।
आमन्त्र्य प्रययौ राजा तैश्चैवाभ्यनुमोदितः ।
मङ्गलाचारयुक्ताभिराशीर्भिश्चाभिनन्दितः ।
गजवाजिरथौघेन बलेन महतागमत् ।
स राजा देवराजाभो विजिगीषुर्वसुंधराम् । [55]
हृष्टपुष्टबलः प्रायात्पाण्डुः शत्रूननेकशः ।

62

This passage, which in the footnotes to the constituted text is said to be ins. in Gs after 1. 107. 24, is not an insertion peculiar to Gs, but occurs, as a matter of fact, in all S MSS. and is nothing more than the S version of the account of the birth of Bhīma. An irregularity in the collation of the S MSS. was responsible for the misleading remark in the footnotes mentioned above.

63

After adhy. 107, all MSS. except Ś1 Ko–s (V1 missing) ins. the foll. addl. adhy.:

जनमेजय उवाच ।
धृतराष्ट्रस्य पुत्राणामादितः कथितं त्वया ।
ऋषेः प्रसादात्तु शतं न च कन्या प्रकीर्तिता ।
वैश्यापुत्रो युयुत्सुश्च कन्या चैका शताधिका ।
गान्धारराजदुहिता शतपुत्रेति चानघ ।
उक्ता महर्षिणा तेन व्यासेनामिततेजसा । [5]
कथं त्विदानीं भगवन्कन्यां जातां ब्रवीषि मे ।
यदि भागशतं पेशी कृता तेन महर्षिणा ।
न प्रजास्यति चेद्भूयः सौबलेयी कथंचन ।
कथं तु संभवस्तस्या दुःशलाया वदस्व मे ।
यथार्हमिह विप्रर्षे परं मेऽत्र कुतूहलम् । [10]

वैशंपायन उवाच ।
साध्वयं प्रश्न उद्दिष्टः पाण्डवेय ब्रवीमि ते ।
तां मांसपेशीं भगवान्स्वयमेव महातपाः ।
शीताभिरद्भिरासिच्य भागं भागमकल्पयत् ।

D1.2 निर(or रा)क्रामत्. — (L. 53) Bs D (except D2.4) om. च. — After line 53, Ñ1 ins. (with v. l.) 1. 105. 6. — (L. 55) Dn D1 देवगर्भाभो. — (L. 56) Dn D1.2 °पुष्टबलैः.

63

(L. 2) S ऋषेर्मेतात्पुत्रशतं. S तु (for च). T2 G5.6 M3.5 अत्र (for प्र-). — (L. 3) K4 Bs T2 G वेश्या°. S एतदेकशतं द्विज (for the posterior half). — S om. line 4. — (L. 5)

यो यथा कल्पितो भागस्तं तं धान्या तदा नृप ।
घृतपूर्णेषु कुण्डेषु एकैकं प्राक्षिपत्तदा । [15]
एतस्मिन्नन्तरे साध्वी गान्धारी सुदृढव्रता ।
दुहितृस्नेहसंयोगमनुध्याय वराङ्गना ।
मनसाचिन्तयद्देवी एतत्पुत्रशतं मम ।
भविष्यति न संदेहो न ब्रवीत्यन्यथा मुनिः ।
ममेयं परमा तुष्टिर्दुहिता मे भवेद्यदि । [20]
एका शताधिका बाला भविष्यति कनीयसी ।
ततो दौहित्रजाल्लोकादबाह्योऽसौ पतिर्मम ।
अधिका किल नारीणां प्रीतिर्जामातृजा भवेत् ।
यदि नाम ममापि स्याद्दुहितैका शताधिका ।
कृतकृत्या भवेयं वै पुत्रदौहित्रसंवृता । [25]
यदि सत्यं तपस्तप्तं दत्तं वाप्यथवा हुतम् ।
गुरवस्तोषिता वापि तथास्तु दुहिता मम ।
एतस्मिन्नेव काले तु कृष्णद्वैपायनः स्वयम् ।
विभज्य तां तदा पेशीं भगवानृषिसत्तमः ।
गणयित्वा शतं पूर्णमंशानामाह सौबलीम् । [30]

व्यास उवाच ।

पूर्णं पुत्रशतं त्वेतन्न मिथ्या वागुदाहृता ।
दैवयोगादयं भाग एकः शिष्टः शतात्परः ।
एषा ते सुभगे कन्या भविष्यति यथेप्सिता ।

वैशंपायन उवाच ।

ततोऽन्यं घृतकुम्भं तु समानाय्य महातपाः ।
तं चापि प्राक्षिपत्तत्र कन्याभागं तपोधनः । [35]
एतत्ते कथितं राजन्दुःशलाजन्म भारत ।
ब्रूहि राजेन्द्र किं भूयो वर्तयिष्यामि तेऽनघ ।

Colophon.

64

After 1. 113. 10, D_4 (marg. *sec. m.*). 5 S ins.:

श्वेतकेतोः पिता देवि तप उग्रं समास्थितः ।
ग्रीष्मे पञ्चतपा भूत्वा वर्षास्वाकाशगोऽभवत् ।
शिशिरे सलिलस्थायी सह पत्न्या महातपाः ।
उद्दालकं तपस्यन्तं नियमेन समाहितम् ।
तस्य पुत्रः श्वेतकेतुः परिचर्यां चकार ह । [5]
अभ्यागच्छद्द्विजः कश्चिद्वलीपलितसंततः ।
तं दृष्ट्वैव मुनिः प्रीतः पूजयामास शास्त्रतः ।
स्वागतेन च पाद्येन मृदुवाक्यैश्च भारत ।
शाकमूलफलाद्यैश्च वन्यैरन्यैरपूजयत् ।
क्षुत्पिपासाश्रमैरार्तः पूजितस्तु महर्षिणा । [10]
विश्रान्तो मुनिमासाद्य पर्यपृच्छद्द्विजस्तदा ।
उद्दालक महर्षे त्वं सत्यं मे ब्रूहि मानृतम् ।

S जन्मापि धृत[? read धार्त]राष्ट्रस्य उक्तमेतन्महर्षिणा. — S om. lines 6–8. — (L. 6) $\tilde{N}_{1.2}$ B_4 त्वं प्र-; $\tilde{N}_3$ Da_2 Dn D_1 त्वं तु (for जातां). — (L. 9) S हि (for तु), and ब्रवीहि (for वदस्व). — (L. 10) Om. in S. $\tilde{N}_2$ D (except $D_{2.4.5}$) यथावदिह. — (L. 12) S तु तदा (for भगवान्), and महामुनिः (for °तपाः). — (L. 13) T G सिंचन्वै; M संसिंचन् (for आसिच्य). T G अधारयत् (for अकल्पयत्). — (L. 14) S कल्प्यते भागः. T G तं तु धान्यस्य वै पृथक्; M तं तु धात्री पृथक्पृथक्. — (L. 15) B_5 $D_{1.2.5}$ M कुंभेषु; T_2 $G_{2.4.5}$ चैकैकं (for कुण्डेषु). — (L. 16) $\tilde{N}_{1.3}$ सुमहाव्रता; S सुमहायशाः. — After line 16, S ins.:

नाब्रवीच्च ऋषिं किंचिद्भौरवाच्च यशस्विनी ।

— (L. 17) Om. in S. $\tilde{N}$ B_1 Dn दुहितुः स्नेह°. — After line 17, B_5 ins.:

महर्षिमब्रवीत्किंचिद्भौरवात्सा तपस्विनी ।

— (L. 19) S न चर्षिर्भाषतेन्यथा (M °ते मृषा). — (L. 20) T G M_5 वै (for इयं). $M_{3.6-8}$ भवेन्मम परा तुष्टिः. — (L. 21) S शतस्यापि (for भविष्यति). — (L. 22) S °व्रजाल्लोकानवाप्तः स्यात्पतिर्मम. — After line 22, S reads line 25; while D_5 ins.:

अध्रुवं कृतमेवैतद्दुहित्रा सह संगताः ।

— (L. 23) S अधिकं, and जामातृभिः. — After line 23, D_5 S (which latter om. line 24 and transp. 25) ins.:

अपत्यं युवतीं चापि दृष्ट्वा प्रीतिमवाप्नुयाम् ।

— (L. 25) S अहं च कृतकृत्या स्यां दुहित्रा सह संगता. — (L. 26) S वा मे (for तप्तं) and गुरवस्तोषिता यदि. — (L. 27) S सुकृतं चेह लोकेस्ति ($G_{1.5}$ M_{6-8} °केसिन्) तथा°. — (L. 29) K_4 $\tilde{N}_3$ B_5 व्यभज्यत; $\tilde{N}_{1.2}$ Da Dn D_1 व्यभजत्स; $D_{4.5}$ व्यभजत्तां (for विभज्य तां). S व्यभजत्सहसा विप्रस्तां पेशीं गर्भसंभवां. — (L. 30) S गण्यमानेषु कुंडेषु शते पूर्णे महात्मना. — After line 30, S ins.:

अभवच्चापरं खण्डं वामहस्ते तदा किल ।

— (L. 31) T_1 कुंभं; T_2 G ह्येव; M ह्येतत् (for त्वेतत्). S वायुदीरिता. — (L. 32) K_4 Da Dn $D_{1.5}$ दौहित्रयोगाय भाग; B_5 दौहित्रयोगाद्भागोयं. $\tilde{N}_2$ D_4 परिशिष्टः; S एको दृष्टः. — (L. 33) Several MSS. सुभगा. — (L. 34) S अन्यद्. Da S घृतकुंडं. S आनाय्य सुमहा°. — (L. 35) S प्राक्षिपत्तं तदा राजन्कन्याभागं परंतप. — After line 35, D_4 (marg. *sec. m.*) S ins.:

संभूता चैव कालेन सर्वेषां च यवीयसी ।

— (L. 36) S वीर (for राजन्). $\tilde{N}_{1.3}$ चैव हि; S चैव तु (for भारत). — (L. 37) S कथये पांडुनंदन (for the posterior half). — For details of colophon see footnotes on p. 480.

ऋषिपुत्रः कुमारोऽयं दर्शनीयो विशेषतः।
तव पुत्रमिमं मन्ये कृतकृत्योऽसि तद्वद ।

उद्दालकः।

मम पत्नी महाप्राज्ञ कुशिकस्य सुता मता। [15]
मामेवानुगता पत्नी मम नित्यमनुव्रता ।
अरुन्धतीव पत्नीनां तपसा कर्शितस्तनी ।
तस्यां जातः श्वेतकेतुर्मम पुत्रो महातपाः ।
वेदवेदाङ्गविद्विप्र मच्छासनपरायणः ।
लोकज्ञः सर्वलोकेषु विश्रुतः सत्यवाग्घृणी । [20]

ब्राह्मणः।

अपूर्वी भार्यया चार्थी वृद्धोऽहं मन्दचाक्षुषः ।
पित्र्यादृणादनिर्मुक्तः पूर्वमेवाकृतस्त्रियः ।
प्रजारणी तु पत्नी ते कुलशीलसमाधिनी ।
सदृशी मम गोत्रेण वहाम्येनां क्षमस्व वै ।

पाण्डुः।

इत्युक्त्वा मृगशावाक्षीं चीरकृष्णाजिनाम्बराम्। [25]
यष्ट्याधारः स्रस्तगात्रो मन्दचक्षुरबुद्धिमान् ।
स्वव्यापारामक्षमां तामचिन्तामात्मनि द्विजः ।

65

After 1. 113. 12, D_5 S ins.:

तपसा दीप्तवीर्यो हि श्वेतकेतुर्न चक्षमे ।
संगृह्य मातरं हस्ते श्वेतकेतुरभाषत ।
दुर्ब्राह्मण विमुञ्च त्वं मातरं मे पतिव्रताम् ।
अयं पिता मे ब्रह्मर्षिः क्षमावान्ब्रह्मवित्तमः ।
शापानुग्रहयोः शक्तस्तूष्णींभूतो महाव्रतः । [5]
तस्य पत्नी दमोपेता मम माता विशेषतः ।
पतिव्रतां तपोवृद्धां साध्वाचारैरलंकृताम् ।
अप्रदानेन ते ब्रह्मन्मातृभूतां विमुञ्च मे ।
एवमुक्त्वा तु याचन्तं विमुञ्चेति मुहुर्मुहुः ।
प्रत्यवोचद्द्विजो राजन्नप्रगल्भमिदं वचः । [10]
अपत्यार्थी श्वेतकेतो वृद्धोऽहं मन्दचाक्षुषः ।
पिता ते ऋणनिर्मुक्तस्त्वया पुत्रेण काश्यप ।
ऋणादहमनिर्मुक्तो वृद्धोऽहं विगतस्पृहः ।
मम को दास्यति सुतां कन्यां संप्राप्तयौवनाम् ।
प्रजारणीमिमां पत्नीं विमुञ्च त्वं महातपः । [15]
एकया प्रजया पित्रोर्मातरं ते ददाम्यहम् ।
एवमुक्तः श्वेतकेतुर्लज्जया क्रोधमेयिवान् ।

66

After 1. 113. 40^{ab}, D_4 (suppl. fol. *sec. m.*) ins.:

यथासौ नीयते दण्डः सततं पापकारिषु ।
दण्डस्य नयनात्सा हि दण्डनीतिरिहोच्यते ।
भूयं स भगवान्ध्यात्वा चिरं शूलधरः प्रभुः ।
असृजत्सर्वशास्त्राणि महादेवो महेश्वरः ।
दण्डनीतेः प्रयोगार्थं प्रमाणानि च सर्वशः । [5]
विद्याश्चतस्रः कूटस्थास्तासां भेदविकल्पना ।
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति निश्चयः ।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु । [10]
दश चाष्टौ च विख्याता एता धर्मस्य संहिताः ।
एतासामेव विद्यानां व्यासमाह महेश्वरः ।
शतानि त्रीणि शास्त्राणामाह तत्राणि सप्ततिः ।
व्यास एव तु विद्यानां महादेवेन कीर्तितः ।
तत्रं पाशुपतं नाम पाञ्चरात्रं च विश्रुतम् । [15]
योगशास्त्रं च सांख्यं च तत्रं लोकायतं तथा ।
तत्रं ब्रह्मलुला नाम तर्कविद्या दिवौकसाम् ।
सुखदुःखार्थजिज्ञासाकारकश्चेति विश्रुतम् ।
तर्कविद्यास्तथा चाष्टौ सश्लोको नव विस्तरः ।
दश चाष्टौ च विज्ञेयाः पौराणां यज्ञसंहिताः । [20]
पुराणस्य प्रणीताश्च तावदेवेह संहिताः ।
धर्मशास्त्राणि तद्वाचः एकार्था नीति नान्यथा ।
एकार्थानि पुराणानि वेदाश्चैकार्थसंहिताः ।
नानार्थानि च सर्वाणि ततः शास्त्राणि शंकरः ।
प्रोवाच भगवान्देवः कालज्ञानानि यानि च । [25]
चतुःषष्टिप्रमाणानामायुर्वेदं च सोत्तरम् ।
अष्टादशविकल्पान्तां दण्डनीतिं च शाश्वतीम् ।
गान्धर्वमितिहासं च नानाविस्तरमुक्तवान् ।
इत्येताः शांकरप्रोक्ता विद्याः शब्दार्थसंहिताः ।
पुनर्भेदसहस्रं च तासामेव तु विस्तरः । [30]
ऋषिभिर्देवगन्धर्वैः सविकल्पः सविस्तरः ।
शश्वदभ्यस्यते लोके वेद एव च सर्वशः ।
विद्याश्चतस्रः संक्षिप्ताः वेदवादाश्च ते स्मृताः ।
एतासां पारगो यश्च स चोक्तो वेदपारगः ।
विदानां पारगो रुद्रो विष्णुरिन्द्रो बृहस्पतिः । [35]
शक्रः स्वायंभुवश्चैव मनुः परमधर्मवित् ।

64

After line 6, D_5 reads 1189*. — After line 24, G_2 ins.:

पुत्रमेकं समुत्पाद्य पितॄणामृणमोचकम् ।

प्रदास्यामि पुनस्तेऽहं पुत्रारणिमिमां तु ते ।

65

(L. 8) T_2 G_{4-6} M_{6-8} प्राणदानेन.

ब्रह्मा च परमो देवः सदा सर्वैः सुरासुरैः ।
सर्वस्यानुग्रहश्चैव व्यासो वै वेदपारगः ।
भीष्म उवाच ।
अहं शांतनवो भीष्मः प्रसादान्माधवस्य च ।
शंकरस्य प्रसादाच्च ब्रह्मणश्च कुरूद्वह । [40]
वेदपारग इत्युक्तो याज्ञवल्क्यश्च सर्वशः ।
कल्पे कल्पे महाभागैर्ऋषिभिस्तत्त्वदर्शिभिः ।
ऋषिपुत्रैर्ऋषिगणैर्भिद्यतेऽऽश्रमिकैरपि ।
शिवेन ब्रह्मणा चैव विष्णुना च विकल्पिताः ।
आदिकल्पे पुनश्चैव भिद्यन्ते साधुभिः पुनः । [45]
इदानीमपि विद्वद्भिः भिद्यन्ते च विकल्पकैः ।
पूर्वजन्मानुसारेण बहुधेयं सरस्वती ।

67

After 1. 115. 28, D_4(suppl. fol. *sec. m.*).5 (partly; and at a different place) S ins.:

जातमात्रानुपादाय शतशृङ्गनिवासिनः ।
पाण्डोः पुत्रानमन्यन्त तापसाः स्वानिवात्मजान् ।
ततस्तु वृष्णयः सर्वे वसुदेवपुरोगमाः ।
पाण्डुः शापभयाद्भीतः शतशृङ्गमुपेयिवान् ।
तत्रैव मुनिभिः सार्धं तापसोऽभूत्तपश्चरन् । [5]
शाकमूलफलाहारस्तपस्वी नियतेन्द्रियः ।
योगध्यानपरो राजा बभूवेति च वादकाः ।
प्रब्रुवन्ति स्म बहवस्तच्छ्रुत्वा शोककर्शिताः ।
पाण्डोः प्रीतिसमायुक्ताः कदा श्रोष्याम सत्कथाः ।
इत्येवं कथयन्तस्ते वृष्णयः सह बान्धवैः । [10]
पाण्डोः पुत्रागमं श्रुत्वा सर्वे हर्षसमन्विताः ।
सभाजयन्तस्तेऽन्योन्यं वसुदेवं वचोऽब्रुवन् ।
न भवेरन्क्रियाहीनाः पाण्डोः पुत्रा महाबलाः ।
पाण्डोः प्रियहितान्वेषी प्रेषय त्वं पुरोहितम् ।
वसुदेवस्तथेत्युक्त्वा विससर्ज पुरोहितम् । [15]
युक्तानि च कुमाराणां पारिबर्हाण्यनेकशः ।
कुन्तीं माद्रीं च संदिश्य दासदासीपरिच्छदम् ।
गावो हिरण्यं रूप्यं च प्रेषयामास भारत ।
तानि सर्वाणि संगृह्य प्रययौ स पुरोहितः ।
तमागतं द्विजश्रेष्ठं काश्यपं वै पुरोहितम् । [20]
पूजयामास विधिवत्पाण्डुः परपुरंजयः ।
पृथा माद्री च संहृष्टे वसुदेवं प्रशंसताम् ।
ततः पाण्डुः क्रियाः सर्वाः पाण्डवानामकारयत् ।
गर्भाधानादिकृत्यानि चौलोपनयनानि च ।
काश्यपः कृतवान्सर्वमुपाकर्म च भारत । [25]
चौलोपनयनादूर्ध्वं वृषभाक्षा यशस्विनः ।
वैदिकाध्ययने सर्वे समपद्यन्त पारगाः ।
शर्यातेः पृषतः पुत्रः शुको नाम परंतपः ।
येन सागरपर्यन्ता धनुषा निर्जिता मही ।
अश्वमेधशतैरिष्ट्वा स महात्मा महामखैः । [30]
आराध्य देवताः सर्वाः पितॄनपि महामतिः ।
शतशृङ्गे तपस्तेपे शाकमूलफलाशनः ।
तेनोपकरणश्रेष्ठैः शिक्षया चोपबृंहिताः ।
तत्प्रसादाद्धनुर्वेदे समपद्यन्त पारगाः ।
गदायां पारगो भीमस्तोमरेषु युधिष्ठिरः । [35]
असिचर्मणि निष्णातौ यमौ सत्त्ववतां वरौ ।
धनुर्वेदे गतः पारं सव्यसाची परंतपः ।
शुकेन समनुज्ञातो मत्समोऽयमिति प्रभो ।
अनुज्ञाय ततो राजा शक्तिं खड्गं तथा शरान् ।
धनुश्च ददतां श्रेष्ठस्तालमात्रं महाप्रभम् । [40]
विपाठश्चुरनाराचान्गृध्रपक्षानलंकृतान् ।
ददौ पार्थाय संहृष्टो महोरगसमप्रभान् ।
अवाप्य सर्वशस्त्राणि मुदितो वासवात्मजः ।
मेने सर्वान्महीपालानपर्याप्तान्स्वतेजसा ।
एकवर्षान्तरास्त्वेवं परस्परमरिंदमाः । [45]
अन्ववर्धन्त पार्थाश्च माद्रीपुत्रौ तथैव च ।

Then follows a *repetition* of 1. 115. 28 —a clear sign of interpolation—and a *colophon* (corresponding to the colophon of our adhy. 115). The MSS. cont.:

67

☞ This passage occurs also in D_4 (suppl. fol. *sec. m.*), which was inadvertantly omitted from the list of MSS. mentioned in the footnote to 1. 115. 28. D_5 ins. lines 4–44 of the passage after 1. 116. 1^{ab}, om. the rest.

(L. 3) D_4 आगता यादवाः सर्वे. — (L. 5) D_4 तत्रैव चावसत्पांडुः शतशृंगे महामनाः. — (L. 7) D_4 तपः परममास्थितः (for the posterior half). — (L. 8) D_4 दृष्ट्वा तु कुशलं तेषां पप्रच्छुरितरेतरं. — (L. 9) Some MSS. संगताः. — (L. 11) D_4 दिनानि कतिचित्त्वैवमुषित्वैकत्रपूजिताः. — (L. 12) D_4 वसुदेवपुरोगमाः. — (L. 13) D_4 प्रतिजग्मुर्गृहानेव तानापृच्छ्य स्वकांस्तदा. — (L. 15) D_4 ततः पुरोहितो राजन्मथुरायां विनिर्गतः. — (L. 16) D_4 वसुदेवाज्ञयादाय (for the prior half). — (L. 18) D_4 हस्त्यश्वरथयानानि वस्त्ररत्नशतानि च. — Colophon. *Adhy. no.*: D_4 123; T_1 115; T_2 65; G M 66. — After the colophon, D_4 ins.:

जनमेजय उवाच ।
कस्मिन्वयसि संप्राप्ताः पाण्डवा गजसाह्वयम् ।
समपद्यन्त देवेभ्यः तेषामायुश्च किंपरम् ।
एतदिच्छामि भगवंस्त्वत्तः श्रोतुं द्विजोत्तम ।

वैशंपायनः ।
पाण्डवानां तथायुस्त्वं शृणु कौरवनन्दन ।
जगाम हास्तिनपुरं षोडशाब्दो युधिष्ठिरः ।
भीमसेनः पञ्चदशे बीभत्सुर्वै चतुर्दशे ।
त्रयोदशाब्दौ च यमौ जग्मतुर्नागसाह्वयम् । [50]
तत्र त्रयोदशाब्दानि धार्तराष्ट्रैः सहोषिताः ।
षट् च मासाञ्जतुगृहान्मुक्ता जातो घटोत्कचः ।
षण्मासानेकचक्रायां वर्षं पाञ्चालके गृहे ।
धार्तराष्ट्रैः सहोषित्वा पञ्च वर्षाणि भारत ।
इन्द्रप्रस्थेऽवसंस्तत्र त्रीणि वर्षाणि विंशतिम् । [55]
द्वादशाब्दानथैकं च विभ्रमद्यूतनिर्जिताः ।
भुङ्क्त्वा षट्त्रिंशतं राज्यं सागरान्तां वसुंधराम् ।
मासैः षड्भिर्महात्मानः सर्वे कृष्णपरायणाः ।
राज्ये परिक्षितं स्थाप्य इष्टां गतिमवाप्नुवन् ।
एवं युधिष्ठिरस्यापि आयुरष्टोत्तरं शतम् । [60]
अर्जुनात्केशवो ज्येष्ठस्त्रिभिर्मासैर्महाभुजः ।
कृष्णात्संकर्षणो ज्येष्ठस्त्रिभिर्मासैर्महाबलः ।

☞ The passage is immediately followed by 1. 116. 1 (*without* वैशं°).

68

After 1. 116. 22, D_4 (marg. *sec. m.*) S ins.:

वैशंपायनः ।
तस्यास्तद्वचनं श्रुत्वा कुन्ती शोकाग्निदीपिता ।
पपात सहसा भूमौ छिन्नमूल इव द्रुमः ।
निश्चेष्टा पतिता भूमौ मोहे न तु चचाल सा ।
तस्मिन्क्षणे कृतस्नानममलाम्बरसंवृतम् ।
अलंकारकृतं पाण्डुं शयानं शयने शुभे । [5]
कुन्तीमुत्थाप्य माद्री तु मोहेनाविष्टचेतनाम् ।
एह्येहीति च तां कुन्तीं दर्शयामास कौरवम् ।
पादयोः पतिता कुन्ती पुनरुत्थाय भूमिपम् ।
रक्तचन्दनदिग्धाङ्गं महारजतवाससम् ।
सस्मितेन तु वक्त्रेण गदन्तमिव भारतीम् । [10]
परिरभ्य तदा मोहाद्विललापाकुलेन्द्रिया ।
माद्री चापि समालिङ्ग्य राजानं विललाप सा ।
तं तथाशायिनं पाण्डुमृषयः सह चारणैः ।
अभ्येत्य सहिताः सर्वे शोकादश्रूण्यवर्तयन् ।
अस्तं गतमिवादित्यं संशुष्कमिव सागरम् । [15]
दृष्ट्वा पाण्डुं नरव्याघ्रं शोचन्ति स्म महर्षयः ।
समानशोका ऋषयः पाण्डवाश्च बभूविरे ।
ते समाश्वासिते विप्रैर्विलेपतुरनिन्दिते ।

कुन्ती ।
हा राजन्कस्य नौ हित्वा गच्छसि त्रिदशालयम् ।
हा राजन्मम मन्दायाः कथं माद्रीं समेत्य वै । [20]
निधनं प्राप्तवान्राजन्मद्वाक्यपरिसंक्षयात् ।
युधिष्ठिरं भीमसेनमर्जुनं च यमावुभौ ।
कस्मात्पुत्रान्प्रियान्हित्वा प्रयातोऽसि विशां पते ।
नूनं त्वां त्रिदशा देवाः प्रतिनन्दन्ति भारत ।
यथा हि तप उग्रं ते चरितं विप्रसंसदि । [25]
आवाभ्यां सहितो राजन्गमिष्यसि दिवं शुभम् ।
आजमीढाजमीढानां कर्मणा चरितां गतिम् ।
ननु नाम सहावाभ्यां गमिष्यामीति नस्त्वया ।
प्रतिज्ञातं कुरुश्रेष्ठ यदासि वनमागतः ।
आवाभ्यां त्वेव सहितो गमिष्यसि विशां पते । [30]
मुहूर्तं क्षम्यतां राजन्नारोक्ष्यावश्चितां तव ।

वैशंपायनः ।
विलपित्वा भृशं त्वेवं निःसंज्ञे पतिते भुवि ।
यथा विद्धे हते मृग्यौ लुब्धैर्वनगते तथा ।
युधिष्ठिरमुखाः सर्वे पाण्डवा वेदपारगाः ।
तेऽप्यागत्य पितुर्मूले निःसंज्ञाः पतिता भुवि । [35]
पाण्डोः पादौ परिष्वज्य विलपन्ति स्म पाण्डवाः ।

— (L. 49) D_4 भीमः पंचदशाब्दे तु मन्वब्दे वै धनंजयः; G_6 M_8 पंचदशाब्दो भीमस्तु चतुर्दशाब्दो धनंजयः(!). — (L. 56) T_1 $G_{1.2}$ बभूवुः; G_6 M_8 बभ्रमुः (for विभ्रम-). D_4 वने वैराटके तथा (for विभ्रम°). — After line 56, D_4 (which om. line 57) ins.:

संधौ युद्धे त्वतिक्रान्तं मासषट्कं नृपोत्तम ।
चतुःपञ्चाशद्वर्षेण निशशासुर्वसुंधराम् ।

— (L. 58) D_4 तपोनिष्ठा वनेभवन् (for the posterior half). — After line 58, D_4 (which om. line 59) ins:

महाप्रस्थानिकविधौ शेषं मासचतुष्टयम् ।

— (L. 60) D_4 इत्येवमादितः प्रोक्तं (for the prior half). — (L. 62) D_4 वर्षेण बलभद्रोपि कृष्णाज्येष्ठः प्रकीर्तितः. — After line 62, S (except $G_{8.5.6}$) ins.:

रामो वृकोदराज्येष्ठः त्रिभिर्मासैर्महाबलः ।;

while D_4 ins.:

पाण्डुः पञ्च महातेजास्तान्पश्यन्पर्वते सुतान् ।
रेमे स काश्यपयुतः पत्नीभ्यां तु भृशं तदा ।
यस्मिन्पक्षे समुत्पन्नः पार्थस्तस्य च धीमतः ।
तस्मिन्नुत्तरफल्गुन्यां प्रवृत्ते तु महोत्सवे ।
पुरोहितेन सहितो ब्राह्मणान्पर्यहर्षयत् ।
तस्मिन्काले समाहूय स ऋषीन्संशितव्रतान् ।
पूजयामास विधिवद्वासोभिर्दक्षिणान्वितैः ।

68

Lines 1-9 (=1263*) are ins. in D_5 after 1. 116

युधिष्ठिरः ।

हा विनष्टाः स्म तातेति हा विनाथा भवामहे ।
त्वद्विहीना महाप्राज्ञ कथं वर्ताम बालकाः ।
लोकनाथस्य पुत्राः स्मो न सनाथा भवामहे ।
क्षणेनैव महाराज अहो लोकस्य चित्रता । [40]
नास्मद्विधा राजपुत्रा अधन्याः सन्ति भारत ।
त्वद्विनाशाच्च राजेन्द्र राज्यप्रस्खलनात्तथा ।
बान्धवानामथाज्ञानात्प्राप्ताः स्म व्यसनं वयम् ।
किं करिष्यामहे राजन्कर्तव्यं नः प्रसीदताम् ।

भीमः ।

हित्वा राज्यं च भोगांश्च शतशृङ्गनिवासिना । [45]
त्वया लब्धाः स्म राजेन्द्र महता तपसा वयम् ।
हित्वा मानं वनं गत्वा स्वयमाहृत्य भक्षणम् ।
शाकमूलफलैर्वन्यैर्भरणं वै त्वया कृतम् ।
पुत्रानुत्पाद्य पितरो यमिच्छन्ति महात्मनः ।
त्रिवर्गफलमिच्छन्तस्तस्य कालोऽयमागतः । [50]
अभुक्त्वैव फलं राजन्गन्तुं नार्हसि भारत ।

वैशंपायनः ।

इत्येवमुक्त्वा पितरं भीमोऽपि विललाप ह ।

अर्जुनः ।

प्रणष्टं भारतं वंशं पाण्डुना पुनरुद्धृतम् ।
तस्मिंस्तपोवनगते नष्टं राज्यं सराष्ट्रकम् ।
पुनर्निस्तारितं क्षत्रं पाण्डुपुत्रैर्महात्मभिः । [55]
एतच्छ्रुत्वा तु मोदित्वा गन्तुमर्हसि कौरव ।

वैशंपायनः ।

इत्येवमुक्त्वा पितरं विललाप धनंजयः ।

यमौ ।

दुःसंचयं तपः कृत्वा लब्ध्वा नौ भरतर्षभ ।
पुत्रलाभस्य महतः शुश्रूषादिफलं त्वया ।
न चावाप्तं किंचिदेव राज्यं पित्रा यथा पुरा । [60]

वैशंपायनः ।

एवमुक्त्वा यमौ चापि विलेपतुरथातुरौ ।

69

After 1. 116. 30, D_4 (marg. *sec. m.*) S ins.:

वैशंपायनः ।

ऋषयस्तान्समाश्वास्य पाण्डवान्सत्यविक्रमान् ।
ऊचुः कुन्तीं च माद्रीं च समाश्वास्य तपस्विनः ।
सुभगे बालपुत्रे तु न मर्तव्यं कथंचन ।
पाण्डवांश्चापि नेष्यामः कुरुराष्ट्रं परंतपान् ।
अधर्मेष्वर्थजातेषु धृतराष्ट्रश्च लोभवान् । [5]
स कदाचिन्न वर्तेत पाण्डवेषु यथाविधि ।
कुन्त्याश्च वृष्णयो नाथाः कुन्तिभोजस्तथैव च ।
माद्र्याश्च बलिनां श्रेष्ठः शल्यो भ्राता महारथः ।
भर्त्रा तु मरणं सार्धं फलवन्नात्र संशयः ।
युवाभ्यां दुष्करं चैतद्वदन्ति द्विजपुंगवाः । [10]
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता ।
यमैश्च नियमैः श्रान्ता मनोवाक्कायजैः शुभैः ।
भर्तारं चिन्तयन्ती सा भर्तारं निस्तरेच्छुभा ।
तारितश्चापि भर्ता स्यादात्मा पुत्रैस्तथैव च ।
तस्माज्जीवितमेवैतद्युवयोर्विद्म शोभनम् । [15]

कुन्ती ।

यथा पाण्डोस्तु निर्देशस्तथा विप्रगणस्य च ।
आज्ञा शिरसि निक्षिप्ता करिष्यामि च तत्तथा ।
यदाहुर्भगवन्तो हि तन्मन्ये शोभनं परम् ।
भर्तुश्च मम पुत्राणां मम चैव न संशयः ।

माद्री ।

कुन्ती समर्था पुत्राणां योगक्षेमस्य धारणे । [20]
अस्या हि न समा बुद्ध्या यद्यपि स्यादरुन्धती ।
कुन्त्याश्च वृष्णयो नाथाः कुन्तिभोजस्तथैव च ।
नाहं त्वमिव पुत्राणां समर्था धारणे तथा ।
साहं भर्तारमन्विष्ये संतृप्ता न त्वहं तथा ।
भर्तृलोकस्य तु ज्येष्ठा देवी मामनुमन्यताम् । [25]
धर्मज्ञस्य कृतज्ञस्य सत्यसंधस्य धीमतः ।
पादौ परिचरिष्यामि तथार्याप्यनुमन्यताम् ।

वैशंपायनः ।

एवमुक्त्वा महाराज मद्रराजसुता शुभा ।
ददौ कुन्त्यै यमौ माद्री शिरसाभिप्रणम्य च ।
अभिवाद्य महर्षींस्ता परिष्वज्य च पाण्डवान् । [30]
मूर्ध्न्युपाघ्राय बहुशः पार्थानात्मसुतौ तथा ।
हस्ते युधिष्ठिरं गृह्य माद्री वाक्यमभाषत ।
कुन्ती माता अहं धात्री युष्माकं तु पिता मृतः ।

---

30. — (L. 10) T_1 $G_{1.2}$ M_8 भारत (for भारतीम्). — (L. 35) Noteworthy is the phrase पितुर्मूले! Cf. line 30 of passage No. 46. — (L. 38) T_1 $G_{1.2.6}$ M_8 जीवाम (for वर्ताम). — (L. 55) T_1 G (except $G_{4.5}$) M_8 °पुत्रैश्च पंचभिः.

69

Line 22 = line 7. — After line 22, D_4 ins.:

न च मे तादृशी बुद्धिर्बान्धवाश्च तथा न मे ।

— (L. 35) D_4 वृद्धोपासनसंसक्ताः; T_1 G_1 M_8 वृद्धानुशासने सक्ताः; G_8 बुद्ध्युपासने सक्ताः; G_5 वृद्धानुपासनायुक्ताः.

युधिष्ठिरः पिता ज्येष्ठश्चतुर्णां धर्मतः सदा ।
वृद्धाद्युपासनासक्ताः सत्यधर्मपरायणाः । [35]
तादृशा न विनश्यन्ति नैव यान्ति पराभवम् ।
तस्मात्सर्वे कुरुध्वं वै गुरुवृत्तिमतन्द्रिताः ।
ऋषीणां च पृथायाश्च नमस्कृत्य पुनः पुनः ।
आयासकृपणा माद्री प्रत्युवाच पृथां ततः ।
धन्या त्वमसि वार्ष्णेयि नास्ति स्त्री सदृशी त्वया । [40]
वीर्यं तेजश्च योगं च माहात्म्यं च यशस्विनाम् ।
कुन्ति द्रक्ष्यसि पुत्राणां पञ्चानाममितौजसाम् ।
ऋषीणां संनिधौ यैषा मया वाग्भ्युदीरिता ।
दिदृक्षमाणया स्वर्गं न ममैषा वृथा भवेत् ।
आर्या चाप्यभिवाद्या च मम पूज्या च सर्वतः । [45]
ज्येष्ठा वरिष्ठा त्वं देवि भूषिता स्वगुणैः शुभैः ।
अभ्यनुज्ञातुमिच्छामि त्वया यादवनन्दिनि ।
धर्मं स्वर्गं च कीर्तिं च त्वत्कृतेऽहमवाप्नुयाम् ।
यथा तथा विधत्स्वेह मा च कार्षीर्विचारणाम् ।
बाष्पसंदिग्धया वाचा कुन्त्युवाच यशस्विनी । [50]
अनुज्ञातासि कल्याणि त्रिदिवे संगमोऽस्तु ते ।
भर्त्रा सह विशालाक्षि क्षिप्रमद्यैव भामिनि ।
संगता स्वर्गलोके त्वं रमेथाः शाश्वतीः समाः ।
ततः पुरोहितः स्नात्वा प्रेतकर्मणि पारगः ।
हिरण्यशकलानाज्यं तिलान्दधि च तण्डुलान् । [55]
उदकुम्भं सपरशुं समानीय तपस्विभिः ।
अश्वमेधाग्निमाहृत्य यथान्यायं समन्ततः ।
काश्यपः कारयामास पाण्डोः प्रेतस्य तां क्रियाम् ।
पुरोहितोक्तविधिना पाण्डोः पुत्रो युधिष्ठिरः ।
तेनाग्निनादहत्पाण्डुं कृत्वा चापि क्रियास्तदा । [60]
रुदञ्शोकाभिसंतप्तः पपात भुवि पाण्डवः ।
ऋषीन्पुत्रान्पृथां चैव विसृज्य च नृपात्मजान् ।

70

After 1. 119. 7, G1 ins.:

ततः पुत्राश्च पौत्राश्च राजानः सर्व एव हि ।
पाण्डवाः कौरवाश्चैव राज्यैश्वर्यमदान्विताः ।
पृथ्वीनिमित्तमन्योन्यं घातयिष्यन्ति निर्घृणाः ।
कुरुपाण्डवयोरर्थः पृथिवीक्षयकारणः ।
अन्योन्यं घोरमासाद्य करिष्यन्ति महीमिमाम् । [5]
रुधिरौघनिमग्नां च बालवृद्धावशेषिताम् ।
घोरमेनमदृष्ट्वैव कालं सर्वक्षयावहम् ।
दृष्ट्वानन्दसुखं प्रीत्या द्रक्ष्यामः श्रृणुष्व ह ।

71

After 1. 119. 30^{ab}, K4 Ñ B D ins. (cf. No. 73 below):

भक्ष्यं भोज्यं च पेयं च चोष्यं लेह्यमथापि च ।
उपाहृतं नरैस्तत्र कुशलैः सूदकर्मणि ।
न्यवेदयंस्तत्पुरुषा धार्तराष्ट्राय वै तदा ।
ततो दुर्योधनस्तत्र पाण्डवानाह दुर्मतिः ।
गङ्गां चैवानुयास्याम उद्यानवनशोभिताम् । [5]
सहिता भ्रातरः सर्वे जलक्रीडामवाप्नुमः ।
एवमस्विति तं चापि प्रत्युवाच युधिष्ठिरः ।
ते रथैर्नगराकारैर्देशजैश्च गजोत्तमैः ।
निर्ययुर्नगराच्छूराः कौरवाः पाण्डवैः सह ।
उद्यानवनमासाद्य विसृज्य च महाजनम् । [10]
विशन्ति स्म तदा वीराः सिंहा इव गिरेर्गुहाम् ।
उद्यानमभिपश्यन्तो भ्रातरः सर्व एव ते ।
उपस्थानगृहैः शुभ्रैर्वलभीभिश्च शोभितम् ।
गवाक्षकैस्तथा जालैर्जलैः सांचारिकैरपि ।
संमार्जितं सौधकारैश्चित्रकारैश्च चित्रितम् । [15]
दीर्घिकाभिश्च पूर्णाभिस्तथा पुष्करिणीभिर्हि (!) ।
जलं तच्छुशुभे छन्नं फुल्लैर्जलरुहैस्तथा ।
उपच्छन्ना वसुमती तथा पुष्पैर्यथर्तुकैः ।
तत्रोपविष्टास्ते सर्वे पाण्डवाः कौरवाश्च ह ।
उपच्छन्नान्बहून्कामांस्ते भुञ्जन्ति ततस्ततः । [20]
अथोद्यानवरे तस्मिंस्तथा क्रीडागताश्च ते ।
परस्परस्य वक्त्रेभ्यो ददुर्भक्ष्यांस्ततस्ततः ।
ततो दुर्योधनः पापस्तद्भक्ष्ये कालकूटकम् ।
विषं प्रक्षेपयामास भीमसेनजिघांसया ।
स्वयमुत्थाय चैवाथ हृदयेन क्षुरोपमः । [25]
स वाचामृतकल्पश्च भ्रातृवच्च सुहृद्यथा ।
स्वयं प्रक्षिपते भक्ष्यं वक्त्रे भीमस्य पापकृत् ।
प्रतीच्छितं च भीमेन तं वै दोषमजानता ।
ततो दुर्योधनस्तत्र हृदयेन हसन्निव ।
कृतकृत्यमिवात्मानं मन्यते पुरुषाधमः । [30]

71

Ds ins. various lines of this passage at different points of its text; its readings have been ignored. — (L. 2) N B4.5 उत्पादितं; Dn1.n2 उपपादितं; D4 दृष्ट्वा कृतं. — (L. 11) Da प्रविशंति (for विशन्ति स्म). — (L. 14) Dn D2.4 यंत्रैः (for जलैः). — (L. 16) Ñ1.2 तथा श्रीकुञ्जलैरपि; D2 तथा पद्माकरैरपि. — (L. 20) Ñ B1.2.6 Da D2.4 उपपन्नान्. — (L. 25) Ñ1.2 D2 भ्रातृबंधु-; Ñ2 Dn भर्तृवच्च. — (L. 27) Ñ2 Dn D1 बहु (for वक्त्रे). — (L. 28) K4 प्रतिक्षितं; Ñ Dn D2.4 प्रतीक्षितं; Da D1 प्रतिष्ठितं.

ततस्ते सहिताः सर्वे जलक्रीडामकुर्वत ।
पाण्डवा धार्तराष्ट्राश्च तदा मुदितमानसाः ।

72

After 1. 119. 38[ab], K4 Ñ B D ins.:

हतावशेषा भीमेन सर्पा वासुकिमभ्ययुः ।
ऊचुश्च सर्पराजानं वासुकिं वासवोपमम् ।
अयं नरो वै नागेन्द्र अप्सु बद्ध्वा प्रवेशितः ।
यथा च नो मतिर्वीर विषपीतो भविष्यति ।
निश्चेष्टोऽस्मानुपाप्तः स च दष्टोऽन्वबुध्यत । [5]
ससंज्ञश्चापि संवृत्तश्छित्त्वा बन्धनमाशु नः ।
पोथयन्तं महाबाहुं तं वै त्वं ज्ञातुमर्हसि ।
ततो वासुकिरभ्येत्य नागैरनुगतस्तदा ।
पश्यति स्म महाबाहुं भीमं भीमपराक्रमम् ।
आर्यकेण च दृष्टः स पृथाया आर्यकेण च । [10]
तदा दौहित्रदौहित्रः परिष्वक्तः सुपीडितम् ।
सुप्रीतश्चाभवत्तस्य वासुकिः सुमहायशाः ।
अब्रवीत्तं च नागेन्द्रः किमस्य क्रियतां प्रियम् ।
धनौघो रत्ननिचयो वसु चास्य प्रदीयताम् ।
एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत । [15]
यदि नागेन्द्र तुष्टोऽसि किमस्य धनसंचयैः ।
रसं पिबेत्कुमारोऽयं त्वयि प्रीते महाबलः ।
बलं नागसहस्रस्य तस्मिन्कुण्डे प्रतिष्ठितम् ।
यावत्पिबति बालोऽयं तावदस्मै प्रदीयताम् ।
एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत । [20]
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः ।
प्राङ्मुखश्चोपविष्टः सन्रसं पिबति पाण्डवः ।
एकोच्छ्वासात्ततः कुण्डं पिबति स्म महाबलः ।
एवमष्टौ स कुण्डानि ह्यपिबत्पाण्डुनन्दनः ।
ततस्तु शयने दिव्ये नागदत्ते महाभुजः । [25]
अशेत भीमसेनस्तु यथासुखमरिंदमः ।

Colophon.

वैशंपायन उवाच ।

ततस्ते कौरवाः सर्वे विना भीमं च पाण्डवाः ।
वृत्तक्रीडाविहारास्तु प्रतस्थुर्गजसाह्वयम् ।
रथैर्गजैस्तथा चाश्वैर्यानैश्चान्यैरनेकशः ।
ब्रुवन्तो भीमसेनस्तु यातो ह्यग्रत एव नः । [30]
ततो दुर्योधनः पापस्तत्रापश्यन्वृकोदरम् ।
भ्रातृभिः सहितो हृष्टो नगरं प्रविवेश ह ।
युधिष्ठिरस्तु धर्मात्मा अविन्दन्पापमात्मनि ।
स्वेनानुमानेन परं साधुं समनुपश्यति ।
सोऽभ्युपेत्य तदा पार्थो मातरं भ्रातृवत्सलः । [35]
अभिवाद्याब्रवीत्कुन्तीमम्ब भीम इहागतः ।
क्व गतो भविता मातर्नेह पश्यामि तं शुभे ।
उद्यानानि वनं चैव विचितानि समन्ततः ।
तदर्थं न च तं वीरं दृष्टवन्तो वृकोदरम् ।
मन्यमानास्ततः सर्वे यातो नः पूर्वमेव सः । [40]
आगताः स्म महाभागे व्याकुलेनान्तरात्मना ।
इहागम्य क्व नु गतस्त्वया वा प्रेषितः क्व नु ।
कथयस्व महाबाहुं भीमसेनं यशस्विनि ।
न हि मे शुध्यते भावस्तं वीरं प्रति शोभने ।
यतः प्रसुप्तं मन्येऽहं भीमं नेति हतस्तु सः । [45]
इत्युक्ता च ततः कुन्ती धर्मराजेन धीमता ।
हा हेति कृत्वा संभ्रान्ता प्रत्युवाच युधिष्ठिरम् ।
न पुत्र भीमं पश्यामि न मामभ्येति स प्रभो ।
शीघ्रमन्वेषणे यत्नं कुरु तस्यानुजैः सह ।
इत्युक्त्वा तनयं ज्येष्ठं हृदयेन विदूयता । [50]
क्षत्तारमानाय्य तदा कुन्ती वचनमब्रवीत् ।
क्व गतो भगवन्क्षत्तर्भीमसेनो न दृश्यते ।
उद्यानान्निर्गताः सर्वे भ्रातरो भ्रातृभिः सह ।
तत्रैकस्तु महाबाहुर्भीमो नाभ्येति मामिह ।
न च प्रीणयते चक्षुः सदा दुर्योधनस्य सः । [55]
क्रूरोऽसौ दुर्मतिः क्षुद्रो राज्यलुब्धोऽनपत्रपः ।

72

(L. 1) N3 Be Dn D1. 5 सर्वे (for सर्पा). — (L. 3) Dn D1 ह्यप्सु. — (L. 7) Ñ B1 Dn D1 transp. तं and त्वं. — (L. 22) Ñ1. 3 B1. 5 Dn D1. 4 स (for सन्). — (L. 25) N3 B (except B1) D2. 5 नागदंते. — Colophon om. in B D2. 5. *Adhy. no.:* Dn2 D4 128; Dn3 127. *Aggregate śloka no.:* Dn2 5037. — (L. 33) K4 नाविंदन्; Ñ1. 2 Dn ह्यविंदन्; B1 D2 अविंदन्; B5 ह्यविंदन्; D5 चिंतयन्. — After line 36, D5 ins.:

नैतत्साह तदा कुन्ती ततस्ते व्यथिताभवन् ।
द्रुतं गत्वा पुरोद्यानं व्यचिन्वन्त स पाण्डवाः ।
भीम भीमेति ते वाचमुच्चमुच्चैरुदीरयन् ।
विचिन्वत वनं सर्वे न पश्यन्ति स मारुतिम् ।
आगताः स्वगृहं भूय इदमूचुर्वनान्तरे ।

— (L. 48) Ñ2 Dn °भ्येत्यसाविति. — After line 5[4] B5 ins.:

विदुर उवाच ।

द्रुतं गत्वा पुरोद्यानं चिन्वन्तु सह पाण्डवैः ।
ते तत्र गत्वा त्वरिता भीमेत्युच्चैरुदीरयन् ।
विचिन्वन्तो वनं सर्वे ते न पश्यन्ति तं जनाः ।
आगम्य नगरं भूय इदमूचुः पृथां तदा ।
न दृश्यते महाबाहुरम्ब भीमो महाबलः ।

निहन्यादपि तं वीरं जातमन्युः सुयोधनः ।
तेन मे व्याकुलं चित्तं हृदयं दह्यतीव च ।

विदुर उवाच ।

मैवं वदस्व कल्याणि शेषसंरक्षणं कुरु ।
प्रत्यादिष्टो हि दुष्टात्मा शेषेऽपि प्रहरेत्तव । [60]
दीर्घायुषस्तव सुता यथोवाच महामुनिः ।
आगमिष्यति ते पुत्रः प्रीतिं चोत्पादयिष्यति ।

वैशंपायन उवाच ।

एवमुक्त्वा ययौ विद्वान्विदुरः स्वं निवेशनम् ।
कुन्ती चिन्तापरा भूत्वा सहासीना सुतैर्गृहे ।
ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः । [65]
तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली ।
तं दृष्ट्वा प्रतिबुद्धं तु पाण्डवं ते भुजंगमाः ।
सान्त्वयामासुरव्यग्रा वचनं चेदमब्रुवन् ।
यस्ते पीतो महाबाहो रसोऽयं वीर्यसंभृतः ।
तस्मान्नागायुतबलो रणेऽधृष्यो भविष्यसि । [70]
गच्छाद्य च त्वं स्वगृहं स्नातो दिव्यैरिमैर्जलैः ।
भ्रातरस्ते तु तप्यन्ति त्वां विना कुरुपुंगव ।
ततः स्नातो महाबाहुः शुचिः शुक्लाम्बरस्रजः ।
ततो नागस्य भवने कृतकौतुकमङ्गलः ।
ओषधीभिर्विषघ्नीभिः सुरभीभिर्विशेषतः । [75]
भुक्त्वान्परमान्नं च नागैर्दत्तं महाबलः ।
पूजितो भुजगैर्वीर आशीर्भिश्चाभिनन्दितः ।
दिव्याभरणसंछन्नो नागानामभयं पाण्डवः ।
उदतिष्ठत्प्रहृष्टात्मा नागलोकादरिंदमः ।
उत्क्षिप्तः स तु नागेन जलाजलरुहेक्षणः । [80]
तस्मिन्नेव वनोद्देशे स्थापितः कुरुनन्दनः ।
ते चान्तर्दधिरे नागाः पाण्डवस्यैव पश्यतः ।
तत उत्थाय कौन्तेयो भीमसेनो महाबलः ।
आजगाम महाबाहुर्मातुरन्तिकमञ्जसा ।
ततोऽभिवाद्य जननीं ज्येष्ठं भ्रातरमेव च । [85]
कनीयसः समाघ्राय शिरःस्वरिविमर्दनः ।
तैश्चापि संपरिष्वक्तः सह मात्रा नरर्षभैः ।
अन्योन्यगतसौहार्दाद्दिष्ट्या दिष्ट्येति चाब्रुवन् ।
ततस्तत्सर्वमाचष्ट दुर्योधनविचेष्टितम् ।
भ्रातॄणां भीमसेनश्च महाबलपराक्रमः । [90]
नागलोके च यद्वृत्तं गुणदोषमशेषतः ।
तच्च सर्वमशेषेण कथयामास पाण्डवः ।
ततो युधिष्ठिरो राजा भीममाह वचोऽर्थवत् ।
तूष्णीं भव न ते जल्प्यमिदं कार्यं कथंचन ।
एवमुक्त्वा महाबाहुर्धर्मराजो युधिष्ठिरः । [95]
भ्रातृभिः सहितः सर्वैरप्रमत्तोऽभवत्तदा ।

73

After adhy. 119, T G ins.:

वैशंपायनः ।

ततस्ते मन्त्रयामासुर्दुर्योधनपुरोगमाः ।
प्राणहा विक्रमी चापि शौर्ये च महति स्थितः ।
स्पर्धते चापि सततमस्मानेको वृकोदरः ।
तं तु सुप्तं पुरोद्याने जलशूले क्षिपामहे ।
ततो जलविहारार्थं कारयामास भारत । [5]
चेलकम्बलवेश्मानि चित्राणि च शुभानि च ।
तत्र संस्कारयामासुर्नानागाराण्यनेकशः ।
उदकक्रीडनार्थानि कारयामास भारत ।
प्रमाणकोट्यामुद्देशे स्थले कृत्वा परिच्छदम् ।
भक्ष्यं भोज्यं च पेयं च चोष्यं लेह्यं तथैव च । [10]
उपार्जितं नरैस्तत्र तथा सूदकृतं च तत् ।
न्यवेदयन्त पुरुषा धातराष्ट्रस्य तत्तथा ।
ततो दुर्योधनस्त्वाह पाण्डवांस्तु सुदुर्मतिः ।
गङ्गां वै मानयामोऽद्य उद्यानवनशोभिताम् ।
सहिता भ्रातरः सर्वे जलक्रीडामवाप्नुमः । [15]
एवमस्विति तं चापि प्रत्युवाच युधिष्ठिरः ।
ते रथैर्नगराकारैर्देशजैश्च हयोत्तमैः ।
निर्ययुर्नगराद्वीराः कुरवः पाण्डवैः सह ।
उद्यानवनमासाद्य संप्रसृज्य च वाहनम् ।
प्राविशंस्तु महावीर्याः सिंहा इव गिरेर्गुहाम् । [20]
उद्यानं स्माथ पश्यन्ति भ्रातरः सर्व एव ते ।
उपस्थानगृहैः शुभ्रैर्वलभीभिश्च शोभितम् ।
गवाक्षकैस्तथा जालैर्जलसंसारकैरपि ।
सूपस्थितं सुधाकारैश्चित्रकारैश्च शिल्पिभिः ।
दीर्घिकाभिश्च पुण्याभिस्तथा कारण्डकैरपि । [25]
जलं तु शुशुभे छन्नं फुल्लैर्जलरुहैस्तथा ।
उपकीर्णा वसुमती तथा पुष्पैर्यथर्तुकैः ।
उपविष्टास्तदा सर्वे पाण्डवाः कुरवस्तथा ।

(cf. the ins. in D_5 given above). — (L. 61) D_5 दीर्घायुषः सुतास्तुभ्यं दत्ता देवैरभिष्टुतैः. — (L. 67) N_2 B_5 Dn $D_{1.5}$ प्रतिबुध्यंतं. — (L. 71) $Ñ_{1.3}$ $B_{3.6}$ Da $D_{4.5}$ °च स्वगृहं स्नातो दिव्यैरेभिः शुभैर्जलैः. — After line 94, K_4 $Ñ_3$ $B_{1.5}$ D (except D_5) ins.:

इतः प्रभृति कौन्तेया रक्षतान्योन्यमादृताः ।

73

The first few lines of this passage are found in D_5 also. — (L. 2) $G_{1.4.6}$ प्राणवान्. For lines 5–6, cf. 1. 119. 29; for 7–8, cf. 1310*; for 9, cf. 30^{ab}. Lines 10–40 are an almost verbatim repetition of lines 1–31 of passage No. 71 above. — (L. 14) T_1 G_{1-3}

उपपन्नान्बहून्कामांस्तेऽथ भुक्त्वा ततस्ततः ।
अथोद्यानवने तस्मिंस्तथा क्रीडागताश्च ते । [30]
परस्परस्य वक्त्रेषु ददुर्भक्ष्यांस्ततस्ततः ।
ततो दुर्योधनः पापस्तद्भक्ष्ये कालकूटकम् ।
विषं प्रक्षेपयामास भीमसेनजिघांसया ।
स्वयमुत्थाय चैवाथ हृदयेन क्षुरोपमः ।
सत्कृत्य भ्रातृवत्तत्र वाचा चामृतकल्पया । [35]
प्राक्षिपद्वै स्वयं भक्ष्यं वक्त्रे भीमस्य पापकृत् ।
प्रभक्षितं च भीमेन ह्यस्य दोषमजानता ।
ततो दुर्योधनस्तत्र हृदयेन हसन्निव ।
कृतकृत्यमिवात्मानं मेने स पुरुषाधमः ।
ततस्ते सहिताः सर्वे जलक्रीडामकुर्वत । [40]
दिवसान्ते परिश्रान्ता विहृत्य कुरुनन्दनाः ।
विहारायतनेष्वेव वीरा वासमरोचयन् ।
भीमस्तु बलवान्भुक्त्वा व्यायामाभ्यधिकं जले ।
वाहयित्वा कुमारांस्ताञ्जले क्रीडां महाबलः ।
प्रमाणकोट्यां वासार्थी सुप्त्वापारुह्य तत्स्थलम् । [45]
स हि तत्स्थलमासाद्य श्रान्तश्चाप्सु विशेषतः ।
श्रमेण च परीताङ्गः सुष्वाप मृतकल्पवत् ।
ततो बद्ध्वा लतापाशैर्भीमं दुर्योधनः स्वयम् ।
शूलान्यप्सु निखान्याशु स्थलाज्जलमपातयत् ।
सशेषत्वान्न संप्राप्तो जले शूलानि पाण्डवः । [50]
पपात यत्र तत्रास्य शूलं नासीच्चदृच्छया ।
स निःसंज्ञो जलस्यान्तमवाप्यै पाण्डवोऽविशत् ।
आक्रम्य नागभवने तथा नागकुमारकान् ।
ततः समेत्य बहुभिस्तदा नागैर्महाविषैः ।
दश्यते पाण्डवस्तत्र विषदिग्धो महाविषैः । [55]
ततोऽस्य दश्यमानस्य तद्विषं कालकूटकम् ।
हतं सर्पविषेणाशु स्थावरं जङ्गमेन तु ।
ततः प्रबुद्धः कौन्तेयः स तत्संछिद्य बन्धनम् ।
पोथयामास तान्सर्वान्कांश्चित्प्राणैर्व्ययोजयत् ।
ते हन्यमानाः पार्थेन सर्पा वासुकिमभ्ययुः । [60]
ऊचुश्च सर्पराजानं वासुकिं वासवोपमम् ।
अयं नरो वै नागेन्द्र ह्यप्सु बद्ध्वा प्रवेशितः ।
यथा च नो मतिर्वीर विषपीतो भविष्यति ।
विनिविष्टोऽन्तरं प्राप्तः स च दष्टो ह्यनेकशः ।
ससंज्ञश्चापि संवृत्तश्छित्त्वा बन्धनमाशु नः । [65]
पोथयानो महाबाहुस्तं वै त्वं ज्ञातुमर्हसि ।
ततो वासुकिरभ्येत्य नागैरनुगतस्तदा ।
पश्यति स्म महानागो भीमं भीमपराक्रमम् ।
आर्यकेण च दृष्टः सन्पृथायाश्चार्यकेण तु ।
ततो दृष्टश्च तेनापि परिष्वक्तश्च पाण्डवः । [70]
सुप्रीतश्चाभवत्तस्य वासुकिः सुमहायशाः ।
अब्रवीत्तं च नागेन्द्रः किमस्य क्रियतामिति ।
प्रियं धनौघं रत्नानि यावदस्य प्रदीयताम् ।
एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत ।
यदि नागेन्द्र प्रीतोऽसि किमस्य धनसंचयैः । [75]
रसं पिबेत्कुमारोऽयं त्वयि प्रीते महाबलः ।
बलं नागसहस्रस्य कुण्डे चास्मिन्प्रतिष्ठितम् ।
यावत्पिबति बालोऽयं तावदस्मै प्रदीयताम् ।
एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत ।
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः । [80]
प्राङ्मुखश्चोपविष्टः सन्रसं पिबति पाण्डवः ।
एकोच्छ्वासात्तदा कुण्डं पिबति स्म महाबलः ।
एवमष्टौ तु कुण्डानि सोऽपिबत्पाण्डुनन्दनः ।
ततस्तु शयने दिव्ये नागदत्ते महाभुजः ।
शेते स्म च तदा भीमो दिवसान्यष्ट चैव तु । [85]
दुर्योधनोऽपि पापात्मा भीममाशीविषह्रदे ।
प्रक्षिप्य कृतकृत्यं स्म आत्मानं मन्यते तदा ।
प्रभातायां रजन्यां तु वनात्प्रविविशुः पुरम् ।
वदन्तो भीमसेनस्तु यातो ह्यग्रत एव सः ।
युधिष्ठिरस्तु धर्मात्मा चिन्तयन्पापमात्मनि । [90]

गंगामिमां न(T1 च; G1 प्र-)यामोघ. — After line 16, G1 ins.:

जानन्नप्यनुमेने तद्भेदबुद्धिभिया तदा ।

— After line 31, G1 ins.:

नानाविधानि भक्ष्याणि भोज्यापूपानि मोदकान् ।
खेलन्तः प्रहसन्तश्च विवृतेषु कुमारकाः ।

— For line 34, G1 reads:

ख* * क्षेपयामास स्वयमुत्थाय मित्रवत् ।
बहिर्मधुरया वाचा हृदयेन क्षुरोपमः ।

— For lines 41–49, cf. 1. 119. 31–34. — After line 48, G1 ins.:

खानयित्वाप्सु शूलानि प्रदेशाभ्यन्तराणि च ।

— (L. 49) G1 लतापाशैर्दृढं बद्ध्वा. — For lines 52–57, cf. 1312*; for lines 58–59, cf. 1. 119. 38^{ab}; for 60–85, cf. lines 1–26 of passage No. 72 above. — (L. 64) T1 G1 विषाविष्टोंतरं प्रा°; G6 निश्चेष्टोसाननुप्रा°. G1.2 दष्टोप्यनै°; G5.6 दष्टोन्वबुध्यत. — For lines 69–71, G1 subst.:

अथ वासुकिना भीमो दृष्टः स्पृष्टः सुहृत्तमः ।
परिष्वक्तश्च सस्नेहं भीमः प्रीतोऽभवत्तदा ।
वासुकिश्चापि सुप्रीतो भीममाहामृतं वचः ।

— (L. 88) T1 G4.5 प्रविवेश पुरं ततः. — For lines 89–93, cf. lines 30, 33–36 of passage No. 72 above. — After line 89, G1 ins.:

इति स पृच्छतां नॄणां कुन्त्याश्च विदुरस्य च ।

स्वेनानुमानेन परं तदा तं स्मानुपश्यति ।
उपगम्य ततः पार्था मातरं मातृवत्सलाः ।
अभिवाद्याब्रुवंस्ते वै अम्ब भीम इहागतः ।
नेति स्माह तदा कुन्ती ततस्ते व्यथिताभवन् ।
द्रुतं गत्वा पुरोद्यानं विचिन्वन्ति स्म पाण्डवाः । [95]
भीम भीमेति ते वाचं नित्यमुच्चैरुदीरयन् ।
विचिन्वन्तोऽथ ते सर्वे न स्म पश्यन्ति भ्रातरम् ।
आगताः स्वगृहं भूय इदमूचुः पृथां तदा ।
न दृश्यते महाबाहुरम्ब भीमो वने क्वितः ।
विचितानि च सर्वाणि उद्यानानि नदीस्तथा । [100]
ततो विदुरमानाय्य कुन्ती सा स्वनिवेशनम् ।
उवाच क्षत्तर्बलवान्भीमसेनो न दृश्यते ।
उद्यानान्निर्गताः सर्वे भ्रातरो भ्रातृभिः सह ।
तत्र ह्येको महाबाहुर्भीमो नाभ्येति मामिह ।
न च प्रीणयते चक्षुः सदा दुर्योधनस्य तु । [105]
ततः प्रसुप्तं मन्येऽहं पापेन निहतं सुतम् ।

विदुरः ।

मा मैवं वद कल्याणि शेषसंरक्षणं कुरु ।
प्रत्यादिष्टो हि पापात्मा शेषेषु प्रहरेत ह ।
दीर्घायुषः सुतास्तुभ्यं तथा ह्यृषिरभाषत ।
आगमिष्यति ते पुत्रः प्रीतिं ते वर्धयिष्यति । [110]

वैशंपायनः ।

एवमुक्ता तदा कुन्ती निःश्वसन्ती मुहुर्मुहुः ।
शय्यापरा महाभागा पुत्रैः परिवृता तदा ।
ततोऽष्टमेऽथ दिवसे प्रत्यबुध्यत पाण्डवः ।
तस्मिंस्तदा रसे जीर्णे ह्यप्रमेयबलो बली ।
ओषधीभिर्विषघ्नीभिः सुरभीभिर्विभूषितः । [115]
भुक्त्वा तु परमान्नं च नागैर्दत्तं महाभुजः ।
उत्क्षिप्य च तदा नागैर्जलाजलरुहेक्षणः ।
तस्मिन्नेव वनोद्देशे स्थापितः पाण्डुनन्दनः ।
अन्तर्दधुश्च ते नागाः पाण्डवस्यैव पश्यतः ।
तत उत्थाय भीमस्तु आजगाम स्वकं गृहम् । [120]
अभिवाद्य परिष्वक्तः समाघ्रातश्च मूर्धनि ।
प्रणम्य धर्मपुत्राय सस्वजे फल्गुनं ततः ।
अभिवादितश्च तैर्वीरैः सस्वजे च यमावपि ।
तच्च सर्वं यथावृत्तमाख्याति स्म वृकोदरः ।
यदा स्ववगमंस्ते वै पाण्डवास्तस्य कर्म तत् । [125]
न स्वेव बहुलं चक्रुः प्रयता मत्ररक्षणे ।
धर्मात्मा विदुरस्तेषां प्रददौ मतिमान्मतिम् ।
दुर्योधनोऽपि तं दृष्ट्वा पाण्डवं पुनरागतम् ।
निःश्वसंश्चिन्तयंश्चैव अहन्यहनि तप्यते ।
एवं दुर्योधनः पापः शकुनिश्चापि सौबलः । [130]
अनेकैरभ्युपायैस्ताञ्जिघांसन्ति स्म पाण्डवान् ।
पाण्डवाश्चापि तत्सर्वं प्रत्यजानन्नरिंदमाः ।
उद्भावनमकुर्वन्तो विदुरस्य मते स्थिताः ।
अधिजग्मुश्च कुरवो धनुर्वेदं कृपात्तु ते ।

Colophon.

☞ This additional adhy. is nothing more than a recast of our adhy. 119, incorporating the additional matter contained in passages No. 71–72 above, which latter are Northern interpolations. It is worth nothing that this (addl.) adhy. ends (lines 130–133) with a *repetition* of the last two stanzas of adhy. 119, a confirmation (if any were needed) of the fact that this adhy. is an interpolation in T G MSS. The last line (134) of the passage, which is otherwise found only in Dn D1 (cf. 1323*), was added only to link up somehow with the next adhy., which, in the constituted text, seems to begin rather abruptly. — Cf. also footnote under 1. 119. 29.

74

After 1. 121. 21, B1 ins.:

प्रयच्छ भगवन्मह्यं वरमेतन्मया वृतम् ।
कृतार्थं च भविष्यामि वरं लब्ध्वा द्विजोत्तम ।

— (L. 91) T1 G4 नायांतं स्म स पश्यति; G1 तेषामेवासमंजसं. — (L. 100) G1 उद्यानानि विचित्राणि नदीनि च सरांसि च. — After line 100, G1 ins.:

विचिन्वाना न पश्यामो भीममम्ब कुतो गतः ।

— For lines 101–105, cf. lines 51–52 of passage No. 72 above. — (L. 105) G1 न च मे प्रीयते चक्षुर्न मनो मे प्रसीदति. — After line 105, G1 ins.:

दुर्योधनो न हि स्वच्छस्तच्छङ्के मे मनः ।

— For lines 107–114, cf. lines 59–66 of passage No. 72 above. — After line 112, G1 ins.:

विचिन्वन्तो वने भीमं पाण्डवाः प्रत्यहं दिवा ।
दुःखाकारं गोपयन्तः दुःखिताः [शेरते] निशि ।

— For lines 115–124, cf. lines 74–75, 80–89 of passage No. 72 above. — (L. 123) G1 तैः सर्वैरर्जुनं परिषस्वजे. — (L. 124) G1 यमावपि परिष्वज्य यथावृत्तं न्यवेदयत. — After line 124, G1 (which om. line 125) ins.:

तन्नागलोकवृत्तान्तं प्रत्यागमनमेव च ।
प्रजानंस्ते यदा कर्म दुर्योधनकृतं नृप ।

— (L. 126) T1 प्रयत्नं तस्य रक्षणे; T2 G6 प्रयतंतास्य रक्षणे; G1 प्रचक्रुस्ते स्वर°; G2.3 प्रयतुस्तस्य र°; G5 प्रयतंतश्च र°. — (L. 130) T1 G1.2 कर्णः (for पापः).

राम उवाच ।
प्रतिगृह्णीष्व विप्रेन्द्र द्रोण मत्तो यदीच्छसि ।
वरं तव ददाम्यद्य यदुक्तं ते द्विजोत्तम ।
गृहाणास्त्राणि दिव्यानि धनुर्वेदं च मामकम् । [5]
सपुत्रस्य ददाम्येतत्तव द्रोण महद्वरम् ।
कृतार्थो गच्छ विप्रेन्द्र गच्छ चैव यथागतम् ।
कृतास्त्रश्चैव शूरश्च सर्वशास्त्रविशारदः ।
अश्वत्थामेति विख्यातो भविष्यति महारथः ।

75

After 1. 122. 31^{ab}, all MSS. except Ś1 Ko-3 ins.:

तच्च वाक्यमहं नित्यं मनसाधारयं तदा ।
सोऽहं पितृनियोगेन पुत्रलोभाद्यशस्विनीम् ।
नातिकेशीं महाप्रज्ञामुपयेमे महाव्रताम् ।
अग्निहोत्रे च सत्ये च दमे च सततं रताम् ।
अलभद्गौतमी पुत्रमश्वत्थामानमौरसम् । [5]
भीमविक्रमकर्माणमादित्यसमतेजसम् ।
पुत्रेण तेन प्रीतोऽहं भरद्वाजो यथा मया ।
गोक्षीरं पिबतो दृष्ट्वा धनिनस्तत्र पुत्रकान् ।
अश्वत्थामारुदद्बालस्तन्मे संदेहयद्दिशः ।
न स्नातकोऽवसीदेत वर्तमानः स्वकर्मसु । [10]
इति संचिन्त्य मनसा तं देशं बहुशो भ्रमन् ।
विशुद्धमिच्छन्गाङ्गेय धर्मोपेतं प्रतिग्रहम् ।
अन्तादन्तं परिक्रम्य नाध्यगच्छं पयस्विनीम् ।
अथ पिष्टोदकेनैनं लोभयन्ति कुमारकाः ।
पीत्वा पिष्टरसं बालः क्षीरं पीतं मयापि च । [15]
ननर्तोत्थाय कौरव्य हृष्टो बाल्याद्विमोहितः ।
तं दृष्ट्वा नृत्यमानं तु बालैः परिवृतं सुतम् ।
हास्यतामुपसंप्राप्तं कश्मलं तत्र मेऽभवत् ।
द्रोणं धिगस्त्वधनिनं यो धनं नाधिगच्छति ।
पिष्टोदकं सुतो यस्य पीत्वा क्षीरस्य तृष्णया । [20]
नृत्यति स्म मुदाविष्टः क्षीरं पीतं मयाप्युत ।
इति संभाषतां वाचं श्रुत्वा मे बुद्धिरच्यवत् ।
आत्मानं चात्मना गर्हन्मनसेदं व्यचिन्तयम् ।
अपि चाहं पुरा विप्रैर्वर्जितो गर्हितो भृशम् ।
परोपसेवां पापिष्ठां न च कुर्यां धनेप्सया । [25]
इति मत्वा प्रियं पुत्रं भीष्मादाय ततो ह्यहम् ।
पूर्वस्नेहानुरागित्वात्सदारः सौमकिं गतः ।

76

K$_4$ N B D T$_2$ G$_{1.4.5}$ ins. after 1. 122. 47: G$_2$, after 41^{ab}:

अभ्ययात्स ततो द्रोणं धनुर्वेदचिकीर्षया ।
शिक्षाभुजबलोद्योगैस्तेषु सर्वेषु पाण्डवः ।
अस्त्रविद्यानुरागाच्च विशिष्टोऽभवदर्जुनः ।
तुल्येष्वस्त्रप्रयोगेषु लाघवे सौष्ठवेषु च ।
सर्वेषामेव शिष्याणां बभूवाभ्यधिकोऽर्जुनः । [5]
ऐन्द्रिमप्रतिमं द्रोण उपदेशेष्वमन्यत ।

75

(L. 1) K$_4$ अहं तु वाक्यं नित्यं च सारत्वेवाभवं तदा; S उक्त(T$_2$ G$_{4.5}$ तच्च)वाक्यमहं ज्ञात्वा (T$_2$ G$_{4.5}$ हित्वा) प्रहृष्टेनांतरात्मना. — (L. 2)=(var.) 1. 121. 11^{cd}. S पितृनियुक्तत्वात्. — (L. 3) D$_5$ T G शारद्वतीं; M नाचिकेतीं. T$_1$ G$_{1.6}$ M महाप्राज्ञ. K$_4$ S समाहितः (G$_1$ विधानतः) (for महाव्रताम्). — Lines 4–5=(var.) 1. 121. 12. — (L. 4) K$_4$ N$_{1.2}$ B$_6$ Dn D$_1$ सत्रे; S धर्मे (for सत्ये). — (L. 5) S आत्मजं (M$_3$ अच्युतं) (for औरसम्). — (L. 8) K$_4$ धनिकान्वीक्ष्य पुत्र°; S धनिनां सुकुमारकान्. — (L. 9) S °रुदत्तात (T$_2$ G$_{4.5}$ °दन्दृष्ट्वा; G$_2$ °दद्राजन्; G$_3$ M$_5$ °दंस्तात) दिशो दश विमोहयन्. — After line 9, S (except T$_2$ G$_{4.5}$) read lines 14–15. — (L. 10) S स्वकर्मणि. — (L. 11) S आगच्छामीति जानंस्तानहं देशान् बहूनपि (T$_2$ G$_{2.4.5}$ भ्रमन्नपि). — S (which om. line 12) ins. after line 11: K$_4$, after line 12:

अविलोपेन धर्मस्य सततं धर्मसंहितम् ।

— (L. 13) S अयाचित्वा परिक्रामन्नाध्यगच्छं धनं क्वचित्. — (L. 15) S नृत्यति प्रहसन्स स्म (T$_2$ G$_{4.5}$ स स्म नृत्यति पीत्वा तु) पीतक्षीरोहमित्यपि. — S om. lines 16–17. — (L. 18) S तं दृष्ट्वा कश्मलं घोरं तत्र मामन्व(T$_2$ G$_{4.5}$ M$_{5-8}$ °मुप)पद्यत. — After line 19, S (which om. lines 20–23) ins.:

क्षीरारसज्ञः क्षीरमिति पीत्वा पिष्टं प्रनृत्यति ।
अश्वत्थामा तु धिङ् मां तु यः पयो नाधिगच्छति ।

— (L. 24) S (except T$_2$ G$_{1.4}$) न (for च). M सुरैर् (for पुरा). Ñ B$_{1.5}$ Dn D$_{1.2}$ वसे (for भृशम्). S वर्जितां गर्हितां भृशं. — (L. 25) K$_4$ S पापिष्ठामाचरेयं धनाशया. — (L. 26) S (except G$_{1.2}$) प्रियं पूर्वं वक्तारं सूनृतां गिरं. — (L. 27) K$_4$ पूर्वसख्यनुसंबद्धः; S पूर्वसंगतसंसिद्धः (°द्धं or °द्धिं). S सोमकं.

76

(L. 1) Om. in T$_2$ G$_{1.5}$. G$_{2.4}$ अभिजग्मुस्तदा द्रोणं. — After line 1, D$_5$ ins. a colophon (*adhy. no.* 33). — (L. 2) T$_2$ G$_{1.2.4.5}$ बुद्ध्या भुजबलोद्योगे. — (L. 4) T$_2$ G$_{1.2.4.5}$ लाघवात्सौष्ठवेन च. — (L. 5) Ñ$_{1.3}$ शिक्षार्थमेव; T$_2$ G$_{1.2.4.5}$ समेतानां तु (for सर्वे°). — (L. 6) T$_2$ G$_{1.2.4.5}$

एवं सर्वकुमाराणामिष्वस्त्रं प्रत्यपादयत् ।
कमण्डलुं च सर्वेषां प्रायच्छच्चिरकारणात् ।
पुत्राय च ददौ कुम्भमविलम्बनकारणात् ।
यावत्ते नोपगच्छन्ति तावदस्त्रे परां क्रियाम् । [10]
द्रोण आचष्ट पुत्राय तत्कर्म जिष्णुरौहत ।
ततः स वारुणास्त्रेण पूरयित्वा कमण्डलुम् ।
सममाचार्यपुत्रेण गुरुमभ्येति फाल्गुनः ।
आचार्यपुत्रात्तस्मात्तु विशेषोपचये पृथक् ।
न व्यहीयत मेधावी पार्थोऽस्त्रविदुषां वरः । [15]

77

T2 G5 ins. after 1. 123. 6ab: G2.4, after 6: G1, after 7:

अस्त्रवान्नान्वियेषास्त्रं यथा त्वं नाद्य कश्चन ।
धनुर्ग्रहेऽपि मे शिष्यो भविष्यसि विशेषवान् ।
एतच्छ्रुत्वा तदा जिष्णोर्वर्धते द्रोणशासनम् ।
परमं चाकरोद्यत्नं धनुर्वेदे परंतपः ।
अर्जुनो नरशार्दूलः सर्वशस्त्रभृतां वरः । [5]
सर्वक्रियाभ्यनुज्ञानात्तथा शिष्यान्समानयत् ।
दुर्योधनं चित्रसेनं दुःशासनविविंशती ।
अर्जुनं च समानीय अश्वत्थामानमेव च ।
शिशुकं मृण्मयं कृत्वा द्रोणो गङ्गाजले ततः ।
शिष्याणां पश्यतां चैव क्षिपति स्म महाभुजः । [10]
चक्षुषी वाससा चैव बद्ध्वा प्रादाच्छरासनम् ।
शिशुकं विध्यतेमं वै जलस्थं बद्धचक्षुषः ।
तत्क्षणेनैव बीभत्सुरावापैर्दशभिर्वशी ।
पञ्चकैरनुविव्याध मग्नं शिशुकमम्भसि ।
तस्य दृष्ट्वा क्रियाः सर्वा द्रोणोऽमन्यत पाण्डवम् । [15]
विशिष्टं सर्वशिष्येभ्यः प्रीतिमांश्चाभवत्तदा ।

अथाब्रवीन्महात्मानं भारद्वाजो महारथम् ।
अस्त्रं विशिष्टमन्येषु यन्न विद्येत पाण्डव ।
ससंहारप्रयोगं च त्वमधीष्व व्रतं चर ।
अस्त्रं ब्रह्मशिरो नाम दहेद्यत्पृथिवीमपि । [20]
यावन्मन्त्रप्रयोगोऽपि विनियोगे भविष्यति ।
तावानेव तु संहारे कर्तव्य इति चान्ततः ।
न मानुषे प्रयोक्तव्यं ब्रह्मणोऽस्त्रं कथंचन ।
बाधते मानुषाञ्शत्रून्यदा वामानुषः क्वचित् ।
तस्मादेतत्प्रयोक्तव्यं ब्राह्ममस्त्रं सनातनम् । [25]
तथेत्येव च बीभत्सुरुवाच च कृताञ्जलिः ।
चकार च तथा सर्वं यथोक्तं मनुजर्षभ ।
अवाप्तास्त्रं तु बीभत्सुमनुज्ञाय महामतिः ।
उवाच परमप्रीतो मत्समोऽसीति पाण्डवम् ।

78

Da1 Ds S ins. after 1. 128. 4ab: K4 Dn D5, after 4: D2 (suppl. fol. *sec. m.*), after 1. 127. 11ab:

दुर्योधनश्च कर्णश्च युयुत्सुश्च महाबलः ।
दुःशासनो विकर्णश्च जलसंधः सुलोचनः ।
एते चान्ये च बहवः कुमारा बहुविक्रमाः ।
अहं पूर्वमहं पूर्वमित्येवं क्षत्रियर्षभाः ।
ततो रथपदात्योघाः कुञ्जराः सादिभिः सह । [5]
प्रविश्य नगरं सर्वे राजमार्गमुपाययुः ।
तस्मिन्काले तु पाञ्चालः श्रुत्वा दृष्ट्वा महद्बलम् ।
भ्रातृभिः सहितो राजा त्वरया निर्ययौ गृहात् ।
ततस्तु कृतसंनाहा यज्ञसेनसहोदराः ।
शरवर्षाणि मुञ्चन्तः प्रणेदुः सर्वतोदिशम् । [10]
ततो रथेन शुभ्रेण समासाद्य तु कौरवान् ।
यज्ञसेनः शरान्घोरान्ववर्ष युधि दुर्जयः ।

पेंद्रं तु विषमं द्रोण उपदेशेभ्यभाषत (G1 °णो धनुर्वेदचिकीर्षया). — (L. 7) T2 G1.2.4.5 एकः सर्व° विव्याध शरमुत्तमम्. — (L. 8) T2 G1.2.4.5 प्रायच्छदुदकानये. — (L. 10) T2 G1.2.4.5 यावन्नाभ्यधि(G2.4 यावत्तेनाभि)गच्छंति तावदस्य परा गतिः. — (L. 11) D2 कर्म तज्जिष्णुना श्रुतं; D5 जिष्णुस्तत्कर्म चाप्तवान्; T2 G1.2.4.5 तज्ज्ञे शंकयान्वितं. — (L. 12) T2 G1.2.4.5 पर्जन्येनैव सोस्त्रेण. — (L. 13) T2 G1.2.4.5 गुरुमायात्स फल्गुनः. — (L. 15) K4 नावसीदति; D2.5 न प्रहीयत; T2 G1.2.4.5 न चाहीयत. Dn पार्थोऽप्यस्त्रविदां वरः; T2 G1.2.4.5 पार्थः शस्त्रभृतां वरः.

77

G2 om. lines 1, 17–29. — After line 23, G5 reads 1. 123. 76. — After the above passage, G1 *repeats* 1. 123. 7ab with v. l. ततश्चित्रान्धनुर्मार्गान् (for 7a); the repetition is followed by 1386*.

78

☞ Da2 was erroneously included in, and should be deleted from, the list of MSS. containing this passage, as given in the footnotes on p. 571.

(L. 5) Da1 Dn D2.4 वररथारूढाः; D5 T1 G1–3.5 रथवरारूढाः. Da1 Dn D2.4.5 T1 G1.3.5 कुमाराः (for कुञ्जराः). — (L. 8) Some MSS. राजन् (for राजा). — (L. 9) Da1 Dn D2.4 °संनाहो, and यज्ञसेनो महीधरः. — (L. 10) Da1 Dn D2.4 °दुः सर्व एव ते. — (L. 14) Da1

पूर्वमेव तु संमन्त्र्य पार्थो द्रोणमथाब्रवीत् ।
दर्पोत्सेकः कुमाराणामवार्यो द्विजसत्तम ।
एषां पराक्रमस्यान्ते वयं कुर्याम साहसम् । [15]
कुमारैरशक्यः पाञ्चालो ग्रहीतुं रणमूर्धनि ।
एवमुक्त्वा तु कौन्तेयो भ्रातृभिः सहितोऽनघः ।
अर्धक्रोशे तु नगरादतिष्ठद्बहिरेव सः ।
द्रुपदः कौरवान्दृष्ट्वा प्रधावत समन्ततः ।
शरजालेन महता मोहयन्कौरवीं चमूम् । [20]
तमुद्यन्तं रथेनैकमाशुकारिणमाहवे ।
अनेकमिव संत्रासान्मेनिरे सर्वकौरवाः ।
द्रुपदस्य शरा घोरा विचेरुः सर्वतोदिशम् ।
ततः शङ्खाश्च भेर्यश्च मृदङ्गाश्च सहस्रशः ।
प्रावाद्यन्त महाराज पाञ्चालानां निवेशने । [25]
सिंहनादश्च संजज्ञे पाञ्चालानां महात्मनाम् ।
धनुर्ज्यातलशब्दश्च संस्पृशन्गगनं महत् ।
दुःशासनो विकर्णश्च सुबाहुर्दीर्घलोचनः ।
दुर्योधनश्च संक्रुद्धः शरवर्षैरवाकिरन् ।
सोऽतिविद्धो महेष्वासः पार्षतो युधि दुर्जयः । [30]
व्यधमत्तान्यनीकानि तत्क्षणादेव भारत ।
दुर्योधनं विकर्णं च कर्णं चापि महाबलम् ।
नानानृपसुतान्वीरान्सैन्यानि विविधानि च ।
अलातचक्रवत्सर्वांश्चरन्बाणैरतर्पयत् ।
ततस्तु नागराः सर्वे मुसलैर्यष्टिपाणयः । [35]
अभ्यवर्षन्त कौरव्यान्वर्षमाणा घना इव ।
सबालवृद्धाः काम्पिल्याः कौरवानभ्ययुस्तदा ।
श्रुत्वा तु तुमुलं युद्धं नागराणां च भारत ।
द्रवन्ति स्म नदन्ति स्म क्रोशन्तः पाण्डवान्प्रति ।
पाण्डवास्तु स्वनं श्रुत्वा आर्तानां रोमहर्षणम् । [40]
अभिवाद्य ततो द्रोणं रथानारुह्य पाण्डवाः ।
युधिष्ठिरं निवार्याशु मा युद्धमिति पाण्डव ।
माद्रेयौ चक्ररक्षौ तु फल्गुनस्तु तदाकरोत् ।
सेनाग्रगो भीमसेनो गदापाणिर्नदन्स्थितः ।
तदा शङ्खध्वनिं कृत्वा भ्रातृभिः सहितोऽनघः । [45]
आयाज्जवेन कौन्तेयो रथघोषेण नादयन् ।
पाञ्चालानां ततः सेनामुद्भूतार्णवनिःस्वनाम् ।
भीमसेनो महाबाहुर्दण्डपाणिरिवान्तकः ।
प्रविवेश महासेनां सागरं मकरो यथा ।
स्वयमभ्यद्रवद्भीमो नागानीकं गदाधरः । [50]
सुयुद्धकुशलः पार्थो बाहुवीर्येण चातुलः ।
अहनत्कुञ्जरानीकं गदया कालरूपधृक् ।
ते गजा गिरिसंकाशाः क्षरन्तो रुधिरं बहु ।
भीमसेनस्य गदया भिन्नमस्तकपिण्डकाः ।
पतन्ति द्विरदा भूमौ वज्रघातादिवाचलाः । [55]
गजानश्वान्रथांश्चैव पातयामास पाण्डवः ।
पदातीन्नागरांश्चैव नावधीदर्जुनाग्रजः ।
गोपाल इव दण्डेन यथा पशुगणान्वने ।

Dn D2.4 दर्पोद्रेकात्. K4 T1 आचार्य द्विज°; Da1 Dn D2.4 M5 आचार्य °त्तमं; G1 अनिवार्यो द्विजोत्तम. — (L. 16) Hypermetric! Da1 Dn D2.4.5 T1 G1-3.6 एतैरशक्यः पां°; T2 G4.5 एतैरशक्यो यज्ञसेनो. — (L. 19) Da1 Dn D4.5 G1 M8 प्राधा°; T2 G2.4.5 संप्रधावत. — (L. 22) Da1 Dn D2.4.5 तत्र (for सर्वे). — (L. 26) T2 G2.4.5 शुश्रुवुः सिंहनादांश्च पांडवाः सुमहाबलाः. — (L. 27) Da1 Dn D2.4 संस्पृश्य गगनं महान्. — (L. 28-29) Da1 Dn D2.4 transp. दुर्योधनः and दुःशासनः. Some MSS. संक्रुद्धाः. — (L. 34) MSS. अवाकिरत्, अपातयत्, अताडयत्, अवारयत् (for अतर्पयत्). K4 चचार च ववर्ष च; T2 G2.4.5 शरवर्षैः(G2.4 °पातै)रवाकिरत्. — After line 34, T2 G (except G8) ins.:

दुःशासनं द्वादशभिर्विकर्णं विंशकैः शरैः ।
शकुनिं विशिखैस्तीक्ष्णैर्दशभिर्मर्ममेदिभिः ।
कर्णदुर्योधनौ चोभौ शरैः सर्वाङ्गसंधिषु ।
अष्टाविंशतिभिः सर्वैः पृथक्पृथगरिंदमः ।
सुबाहुं पञ्चभिर्विद्धा तथान्यान्विविधैः शरैः ।
विव्याध सहसा भूयो ननाद बलवत्तरम् ।
विनद्य कोपात्पाञ्चालः सर्वशस्त्रभृतां वरः ।
धनूंषि रथयन्त्रं च हयांश्चिच्छेद सायकैः ।
चकर्त सर्वपाञ्चालाः प्रणेदुः सिंहसंघवत् ।

— (L. 35) Da1 Dn D2.4.5 T1 G1.3.6 मुसलैर्यष्टिभिस्तदा. — (L. 36) K4 M6-8 अभ्यद्रवंत. M3.5 अभ्यद्रवन्त संक्रुद्धा वर्षमाणा इवाम्बुदाः. — (L. 37) K4 D5 पांचाल्याः; Da1 Dn D2.4 ते पौराः (for काम्पिल्याः). — (L. 38) Da1 Dn D2.4 कौरवानेव; D5 T1 G2.3.6 कौरवाणां च (for नागराणां च). — (L. 39) K4m न तिष्ठंति; T1 G1 रुदंति स्म (for नदन्ति स्म). — After line 39, D4 (marg. *see. m.*) T2 G (except G8) ins.:

पाञ्चालशरभिन्नाङ्गो भयमासाद्य वै तदा ।
कर्णो रथादवप्लुत्य पलायनपरोऽभवत् ।

G2.4.5 cont.:

न पाण्डुपुत्रान्न द्रोणमेक एव वनं ययौ ।

— (L. 41) Da1 Dn D2.4 रथानारुरुहुस्तदा. — (L. 42) Da1 Dn D2.4.5 मा युद्ध्यस्वेति पांडवं; T1 मा युध्येति च पांडवं. — (L. 44) Da1 Dn D2.4.5 G1.3.6 सदाभूद्भयं सह; T1 तदा तस्मिन्रणोत्सवे; T2 G2.4.5 गदाचापधरोरिहा (T2 °रो रणे); M5 तदा दण्डसहायवान्. — (L. 45) Da1 Dn D2.4 शत्रुस्वनं; D5 T1 G1.3 शंखस्वनं. K4 Da1 Dn D2.4 T1 G8 M6-8 श्रुत्वा (for कृत्वा). — (L. 46) Da Dn D2.4 रथेनानादयन्दिशः.

कालयन्रथनागाश्वान्संचचार वृकोदरः ।
भारद्वाजप्रियं कर्तुमुद्यतः फल्गुनस्तदा । [60]
पार्षतं शरजालेन क्षिप्रं प्रच्छाद्य पाण्डवः ।
हयौघांश्च गजौघांश्च रथौघांश्च समन्ततः ।
पातयन्समरे राजन्युगान्ताग्निरिव ज्वलन् ।
ततस्ते हन्यमाना वै पाञ्चालाः सृञ्जयास्तथा ।
शरैर्नानाविधैस्तूर्णं पार्थं प्रच्छाद्य सर्वशः । [65]
सिंहनादरवान्कृत्वा समयुध्यन्त पाण्डवम् ।
तद्युद्धमभवद्घोरं सुमहाद्भुतदर्शनम् ।
सिंहनादस्वनं श्रुत्वा नामृष्यत धनंजयः ।
ततः किरीटी सहसा पाञ्चालं समभिद्रवत् ।
छादयन्निषुजालेन महता मोहयन्निव । [70]
शीघ्रमभ्यस्यतो बाणान्संदधानस्य चानिशम् ।
नान्तरं ददृशे किंचित्कौन्तेयस्य यशस्विनः ।
न दिशो नान्तरिक्षं च तदा नैव च मेदिनी ।
नादृश्यत महाराज तत्र किंचन संयुगे ।
बाणान्धकारे बलिना कृते गाण्डीवधन्विना । [75]
पाञ्चालानां कुरूणां च साधु साध्विति निःस्वनः ।
ततस्तूर्यनिनादश्च शङ्खानां च महास्वनः ।
सिंहनादश्च संजज्ञे साधुशब्देन मिश्रितः ।
ततः पाञ्चालराजस्तु तथा सत्यजिता सह ।
त्वरमाणोऽभिदुद्राव महेन्द्रं शम्बरो यथा । [80]
महता शरवर्षेण पार्थः पाञ्चालमावृणोत् ।
ततो हलहलाशब्द आसीत्पाञ्चालके बले ।
जिघृक्षति महासिंहे गजानामिव यूथपम् ।
दृष्ट्वा पार्थं तदायान्तं सत्यजित्सत्यविक्रमः ।
पाञ्चालं वै परिप्रेप्सुर्धनंजयमभिद्रवत् । [85]
ततस्त्वर्जुनपाञ्चालौ युद्धाय समुपागतौ ।
व्यक्षोभयेतां तौ सेने इन्द्रवैरोचनाविव ।

ततः सत्यजितं पार्थो दशभिर्मर्मभेदिभिः ।
विव्याध बलवद्राजंस्तदद्भुतमिवाभवत् ।
ततः शरशतैः पार्थं पाञ्चालः शीघ्रमर्दयत् । [90]
पार्थस्तु शरवर्षेण छाद्यमानो महारथः ।
वेगं चक्रे महावेगो धनुर्ज्यामवमृज्य च ।
ततः सत्यजितश्चापं छित्त्वा राजानमभ्ययात् ।
अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरम् ।
साश्वं ससूतं सरथं पार्थं विव्याध सत्वरः । [95]
स तं न ममृषे पार्थः पाञ्चालेनार्दितो मृधे ।
ततस्तस्य विनाशार्थं सत्वरं व्यसृजच्छरान् ।
हयान्ध्वजं धनुर्मुष्टिमुभौ तौ पार्ष्णिसारथी ।
स तथा भिद्यमानेषु कार्मुकेषु पुनः पुनः ।
हयेषु विनिकृत्तेषु विमुखोऽभवदाहवे । [100]
स सत्यजितमालोक्य तथा विमुखमाहवे ।
वेगेन महता राजन्नभ्यधावत पार्षतम् ।
तदा चक्रे महद्युद्धमर्जुनो जयतां वरः ।
तस्य पार्थो ध्वजं छत्रं धनुश्चोर्व्यामपातयत् ।
पञ्चभिस्तस्य विव्याध हयान्सूतं च सायकैः । [105]
तत उत्सृज्य तच्चापमाददानं शरावरम् ।
खड्गमुद्गृह्य कौन्तेयः सिंहनादमथाकरोत् ।
पाञ्चालस्य रथस्येषामाछ्य सहसानदत् ।
पाञ्चालरथमास्थाय अवित्रस्तो धनंजयः ।
विक्षोभ्याम्भोनिधिं तार्क्ष्यस्तं नागमिव सोऽग्रहीत् । [110]
ततस्तु सर्वे पाञ्चाला विद्रवन्ति दिशो दश ।
दर्शयन्सर्वसैन्यानां बाह्वोर्बलमथात्मनः ।
सिंहनादस्वनं कृत्वा निर्जगाम धनंजयः ।
आयान्तमर्जुनं दृष्ट्वा कुमाराः सहितास्तदा ।
ममृदुस्तस्य नगरं द्रुपदस्य महात्मनः । [115]

— (L. 51) Some MSS. स (for सु-). — (L. 57) Da1 Dn D2.4.5 पदातींश्च रथांश्चैव. K4 Da1 Dn D2.4.5 G2 न्य(D2.4 G2 अ)वधीत् (for नावधीत्). — (L. 59) Da1 Dn D2.4.5 T2 G1.2.4.5 चालयन्. Da1 Dn D2.4.5 रथनागांश्च, and संचचाल. — (L. 61) Da1 Dn D2.4 क्षिपन्नागात्स पांडवः. — (L. 65) K4 Da1 Dn D2.4.5 संछाद्य. — (L. 66) Da1 Dn D2.4.5 सिंहनादं मुखैः (D5 महत्) कृत्वा. — (L. 68) Da1 Dn D2.4 नामृष्यत्पाकशासनिः. — (L. 69) K4 पांडवः; Da1 Dn D2.4.5 पांचालान् (for पाञ्चालं). Da1 Dn D2.4 समरेद्रवत्. Dn D2 om. lines 73–77. — After line 73, K4 D2 G4.5 M ins.:

अदृश्यत महाराज बाणभूतमिवाभवत् ।

— (L. 74) Da1 D5 T G1–3.6 om. न. — (L. 79) K4 m सह सत्यजितेन च. — (L. 83) K4 Da1 Dn D2 G3 M3 महासिंहो. — (L. 85) Da1 Dn D2.4 °जयमद्रुद्रुवुः. — (L. 87) Da1 Dn D2.4.5 सैन्यं; T1 G2 सैन्ये; T2 G1.4.5 सेनां. — (L. 89) Da1 Dn D2.4 गाढं (for राजन्). — (L. 90) Dn आर्दयत्. — (L. 96) Da1 Dn D2.4 युधि; M3.5 रणे (for मृधे). — After line 98, G2 ins.:

मर्दयामास संक्रुद्धः पार्थः प्रौढपराक्रमः ।

— (L. 100) Da1 Dn D2.4.5 विनियुक्तेषु; T2 G4.5 पतितेष्वेवं; M3.5 विनिपक्तेषु. — (L. 102) Da1 Dn D2.4.5 G3 अभ्यवर्षत. Dn पांडवं (for पार्षतम्). — (L. 104) Da1 Dn D2.4 धनुश्छित्वा ध्वजं (for ध्वजं छत्रं धनुः). — (L. 106) G1.6 M आददानः. — (L. 107) Da1 Dn D2.4 उद्भूय; D5 T G2.4.5 उद्यम्य (for उद्गृह्य). — (L. 108) Dn D4 T1 सहसापतत्; T2 G4.5 °सा बली. — (L. 110) Da1 Dn D2 पार्थः (for तार्क्ष्यः). — (L. 111) M (except M5) व्यद्रवंत. — (L. 112)

अर्जुनः ।
संबन्धी कुरुवीराणां द्रुपदो राजसत्तमः ।
मा वधीस्तद्बलं भीम गुरुदानं प्रदीयताम् ।
वैशंपायनः ।
भीमसेनस्तदा राजन्नर्जुनेन निवारितः ।
अतृप्तो युद्धधर्मेषु न्यवर्तत महारथः ।

79

After adhy. 128, K4 D4.5 (all suppl. fol. *sec. m.*) S ins.:

वैशंपायनः ।
द्रोणेन वैरं द्रुपदो न सुष्वाप स्मरंस्तदा ।
क्षात्रेण च बलेनास्य नाशंसे पराजयम् ।
हीनं विदित्वा चात्मानं ब्राह्मणेन बलेन च ।
द्रुपदस्त्वमर्षाद्भृपतिः कर्मसिद्ध्यै द्विजोत्तमम् ।
अन्विच्छन्परिचक्राम ब्राह्मणावसथान्बहून् । [5]
नास्ति श्रेष्ठं ममापत्यं धिग्बन्धूनिति चाब्रवीत् ।
निश्वासपरमो ह्यासीद्द्रोणाप्रियचिकीर्षया ।
न सन्ति मम मित्राणि लोकेऽस्मिन्नास्ति वीर्यवान् ।
पुत्रजन्म परीप्सन्वै पृथिवीमन्वियादिमाम् ।
प्रभावशिक्षाविनयाद्द्रोणस्यास्त्रबलेन च । [10]
कर्तुं प्रयतमानोऽपि न शशाक पराजयम् ।
अभितः सोऽथ कल्माषीं गङ्गाकूले परिभ्रमन् ।
ब्राह्मणावसथं पुण्यमाससाद महीपतिः ।
तत्र नाज्ञातकः कश्चिन्न चासीदव्रतो द्विजः ।
तथैव तौ महाभागौ सोऽपश्यच्छंसितव्रतौ । [15]
याजोपयाजौ ब्रह्मर्षी श्रान्यन्तौ पृषतात्मजः ।
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ ।
अरण्ये युक्तरूपौ तौ ब्राह्मणावृषिसत्तमौ ।
स उपामन्त्रयामास सर्वकामैरतन्द्रितः ।
बुद्ध्वा तयोर्बलं बुद्धिं कनीयांसमुपह्वरे । [20]
प्रपेदे छन्दयन्कामैरुपयाजं धृतव्रतम् ।
गुरुशुश्रूषणे युक्तः प्रियकृत्सर्वकामदः ।
पाद्येनासनदानेन तथार्घ्येण फलैश्च तम् ।
अर्चयित्वा यथान्यायमुपयाजोऽब्रवीत्ततः ।
केन कार्यविशेषेण त्वमस्मानभिकाङ्क्षसे । [25]
कृतश्चायं समुद्योगस्तद्ब्रवीतु भवानिति ।
स बुद्ध्वा प्रीतिसंयुक्तमृषीणामुत्तमं तदा ।
उवाच छन्दयन्कामैर्द्रुपदः स तपस्विनम् ।
येन मे कर्मणा ब्रह्मन्पुत्रः स्याद्द्रोणमृत्यवे ।
अर्जुनस्य तथा भार्या भवेद्या वरवर्णिनी । [30]
उपयाज चरस्वैतत्प्रदास्याम्यर्बुदं गवाम् ।
एवमुक्तस्तु तेनर्षिः प्रत्युवाच पुनश्च तम् ।
नाहं फलार्थी द्रुपद योऽर्थी स्यात्तत्र गम्यताम् ।
प्रत्याख्यातस्तु तेनैवं स वै सज्जनसंनिधौ ।
आराधयिष्यन्द्रुपदः स तं पर्यचरत्ततः । [35]
ततः संवत्सरस्यान्ते द्रुपदं द्विजसत्तमः ।
उपयाजोऽब्रवीद्वाक्यं काले मधुरया गिरा ।
ज्येष्ठो भ्राता ममागृह्याद्विचरन्वननिर्झरे ।
अपरिज्ञातशौचायां भूमौ निपतितं फलम् ।
तदपश्यमहं भ्रातुरसांप्रतमनुव्रजन् । [40]
विमर्शं च फलादाने नायं कुर्यात्कथंचन ।
यो नापश्यत्फलं दृष्ट्वा दोषांस्तस्यानुबन्धिकान् ।
विविनक्ति न शौचार्थं सोऽन्यत्रापि कथं भवेत् ।
संहिताध्ययनस्यान्ते पञ्च यज्ञान्निरूप्य च ।
भैक्षमुञ्छेन सहितं भुञ्जानस्तत्तदा ततः । [45]
कीर्तयत्येव राजर्षे भोजनस्य रसं पुनः ।
संहिताध्ययनं कुर्वन्वने गुरुकुले वसन् ।
भैक्षमुच्छिष्टमन्येषां भुङ्क्ते स्म सततं तदा ।
कीर्तयन्गुणमन्नानामथ प्रीतो मुहुर्मुहुः ।
एवं फलार्थिनं तस्मान्मन्येऽहं तर्कचक्षुषा । [50]

Da1 Dn D2.4 स बाह्वोर्बलमात्मनः (Da1 D2.4 °स्थितः). — L. 115 = (var.) 1. 128. 4^{cd}. — (L. 116) M गुरोर्नो द्रुपदो राजा संबंधी सुमहामतिः (M3.5 °बलः). — After line 116, T1 ins.:

गृहीतोऽयं मया युद्धे साहसेनैव वीर्यवान् ।

— (L. 119) G1.5 धर्मयुद्धेषु; M युद्धकरणे. Da1 Dn D2.4.5 महाबलः. — After line 119, D4 (marg. *sec. m.*) T2 G1.2.4.5 ins.:

नागच्छत्तस्य नगरीं काम्पिल्यां कुरुनन्दनः ।

79

The sub-group T2 G4.5 offer many variants for this passage; but being intrinsically unimportant they have been mostly ignored in these notes.

— (L. 4) Hypermetric! K4 द्रुपदोत्प्रमर्षितो राजन्; D4 द्रुपदोमर्षितो राजन्; D5 द्रुपदस्त्यज्य राज्यं तु; G1.6 °स्त्वमर्षणाद्राजा; G2.3 अमर्षाद्रुपदो राजा; M3.5 ततस्त्वमर्षाद्रुपदः; M6-8 °स्त्वमर्षाद्राजेंद्र. — After line 10, D5 ins.:

क्षात्रेण च बलेनापि चिन्तयन्नान्वपश्यत ।

— After line 23, G2 ins.:

तोषयामास तं विप्रं सर्वकामैरतन्द्रितः ।

— K4 T2 G4.5 M om. line 30. — For line 31, D5 subst.:

उपयाज कृते तस्मिन्गावां दतासि तेऽर्बुदम् ।
यच्च तेऽन्यद्विजश्रेष्ठ मनसः सुप्रियं भवेत् ।
सर्वं च ते प्रदाताहं न हि मेऽत्रास्ति संशयः ।

— (L. 50) K4 M6 तमहं; D4 M3.5 तं वै; G1 मन्ये (for

तं वै गच्छेह नृपते स त्वां संयाजयिष्यति ।
जुगुप्समानो नृपतिः फलानां कलुषां गतिम् ।
उपयाजवचः श्रुत्वा द्रुपदः सर्वधर्मवित् ।
भृशं संपूज्य पूजार्हमृषिं याजमुवाच ह ।
गोयुतानि ददाम्यष्टौ याज याजय मां विभो । [55]
द्रोणवैरान्तरे तप्तं विषण्णं शरणागतम् ।
ब्रह्मबन्धुप्रणिहितं न क्षत्रं क्षत्रियो जयेत् ।
तस्माद्रोणभयार्तं मां भवांस्त्रातुमिहार्हति ।
भारद्वाजाग्निना दग्धं संह्लादयितुमर्हसि ।
स हि ब्रह्मविदां श्रेष्ठः क्षत्रास्त्रे चाप्यनुत्तमः । [60]
ततो द्रोणस्तु मा जैषीत्सखिविग्रहकारणात् ।
क्षत्रियो नास्ति तुल्योऽस्य पृथिव्यां कश्चिदग्रणीः ।
भारताचार्यमुख्यस्य भारद्वाजस्य धीमतः ।
द्रोणस्य शरजालानि रिपुदेहहराणि च ।
षडरत्नि धनुश्चास्य खड्गमप्रतिमं महत् । [65]
स हि ब्राह्मणवेगेन क्षत्रवेगमसंशयम् ।
प्रतिहत्य चरत्येव भारद्वाजो महामनाः ।
कार्तवीर्यसमो ह्येष खट्वाङ्गप्रतिमोऽपि वा ।
सहितं क्षत्रवेगेन ब्राह्मं वेगं हि सांप्रतम् ।
उपपन्नं हि मन्येऽहं भारद्वाजं यशस्विनम् । [70]
क्षत्रच्छेदपरायत्तं जामदग्न्यमिवोद्यतम् ।
नेषवस्तं पराकुर्युर्न च प्रासा न चासयः ।
ब्राह्मं तस्य हरेत्तेजो मन्त्राहुतिहुतं यथा ।
तस्य ह्यस्त्रबलं घोरमप्रसह्यं परैर्भुवि ।
शत्रून्समेत्य जयति क्षत्रधर्मपुरस्कृतम् । [75]
ब्रह्मक्षत्रे च सहिते ब्रह्मतेजो विशिष्यते ।
सोऽहं क्षत्रबलाद्धीनो ब्रह्मतेजः प्रपेदिवान् ।
द्रोणाद्विशिष्टमासाद्य भवन्तं ब्रह्मवित्तमम् ।
द्रोणान्तकमहं पुत्रं लभेयं युधि दुर्जयम् ।
द्रोणमृत्युर्यथा मेऽद्य पुत्रो जायेत वीर्यवान् । [80]
तत्कर्म कुरु मे याज निर्वपाम्यर्बुदं गवाम् ।
तथेत्युक्त्वा तु तं याजो याज्यार्थं वाक्यमब्रवीत् ।
मा मैस्त्वं संप्रदातास्मि कर्मणा भवतः सुतम् ।
क्षिप्रमुत्तिष्ठ चाग्र्यः संभारांश्चोपकल्पय ।
एवमुक्त्वा प्रतिज्ञाय कर्म चास्याददे मुनिः । [85]
याजो द्रोणविनाशाय याजयामास तं नृपम् ।
गुर्वर्थं याजयन्कर्म याजस्यापि समीपगः ।

ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः ।
आचख्यौ कर्म वैतानं तदा पुत्रफलाय वै ।
स च पुत्रो महावीर्यो महातेजा महाबलः । [90]
इष्यते यद्विधो राजन्भविता स तथाविधः ।
भारद्वाजस्य हन्तारं सोऽभिसंधाय भूमिपः ।
आजहे तं तथा यज्ञं द्रुपदः कर्मसिद्धये ।
ब्राह्मणो द्विपदां श्रेष्ठो जुहाव च यथाविधि ।
कौकिलीं नाम तां तस्य चक्रे वै पुत्रगृद्धिनः । [95]
सौत्रामणीं तु तं पत्नीं ततः कालेऽभ्ययात्तदा ।
याजस्तु हवनस्यान्ते देवीमाह्वापयत्तदा ।
प्रैहि वै राज्ञि पृषति मिथुनं त्वामुपस्थितम् ।
कुमारश्च कुमारी च पितृवंशविवृद्धये ।

पृषती ।

नालिकं वै मम मुखं पुण्यान्गन्धान्बिभर्मि च । [100]
न पत्नी तेऽस्मि सूत्यर्थं तिष्ठ याज मम प्रिये ।

याजः ।

याजेन स्पृष्टं हव्यमुपयाजेन मन्त्रितम् ।
कथं कामं न संदध्यात्पृषति प्रैहि तिष्ठ वा ।

वैशंपायनः ।

एवमुक्ते तु याजेन हुते हविषि संस्कृते ।
उत्तस्थौ पावकात्तस्मात्कुमारो देवसंमितः । [105]
ज्वालारूपो घोरवर्णः किरीटी वर्म धारयन् ।
वीरः सखड्गः सशरो धनुष्मान्विनदन्मुहुः ।
सोऽध्यारोहद्रथवरं तेन च प्रययौ तदा ।
जातमात्रे कुमारे च वाक्किलान्तर्हिताब्रवीत् ।
एष शिष्यश्च मृत्युश्च भारद्वाजस्य जायते । [110]
ततः प्रणेदुः पाञ्चालाः प्रहृष्टाः साधु साध्विति ।
भयापहो राजपुत्रः पाञ्चालानां यशस्करः ।
राज्ञः शोकापहो जात एष द्रोणवधाय हि ।
इत्यवोचन्महद्भूतमदृश्यं खेचरं तदा ।
द्वितीयायां च होत्रायां हुते हविषि मन्त्रिते । [115]
कुमारी चैव पाञ्चाली वेदिमध्यात्समुत्थिता ।
प्रत्याख्याते पृषत्या च याजके भरतर्षभ ।
पुनः कुमारी पाञ्चाली सुभगा वेदिमध्यमा ।
अन्तर्वेद्यां समुद्भूता कन्या सा सुमनोहरा ।
श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्धजा । [120]
मानुषं विग्रहं कृत्वा साक्षादमरवर्णिनी ।

एवं). K4 D4 T2 G5 M मन्ये; G1 तं वै (for तस्मात्). K4 D4 T2 G1.5 M भ्रातरं (for मन्येऽहं). — (L. 56) T2 G °वैराभितप्तं मां त्वं हि त्रातुमिहार्हसि. — K4 D4 M om. lines 57–58. — T2 G5 ins. after line 62:

न जयेत्क्षत्रियस्तं वै पृथिव्यां कश्चिदग्रणीः ।

— K4 D4 M om. lines 68–70, 72–73; D5 om. lines 69–70. — (L. 75) K4 T2 G1.3.6 M6 क्षत्रं ब्रह्मपुर°. — K4 D4 M om. line 80. — (L. 81) K4 D4.5 M प्रददाम्यर्बुदं. — (L. 84) K4 D4 M °श्चोपपादय. — After line 85, D5 G (except G5) ins.:

ब्राह्मणो द्विपदां श्रेष्ठो यथाविधि यथाक्रमम् ।

— K4 D4 G2 M om. lines 86–87. — (L. 107) K4 D4

नीलोत्पलसमो गन्धो यस्याः क्रोशात्प्रवायति ।
या बिभर्ति परं रूपं यस्या नास्त्युपमा भुवि ।
देवदानवयक्षाणामीप्सिता देववर्णिनी ।
तां चापि जातां सुश्रोणीं वागुवाचाशरीरिणी । [125]
सर्वयोषिद्वरा कृष्णा क्षयं क्षत्रं नितीषति ।
सुरकार्यमियं काले करिष्यति सुमध्यमा ।
अस्या हेतोः क्षत्रियाणां महदुत्पत्स्यते भयम् ।
तच्छ्रुत्वा सर्वपाञ्चालाः प्रणेदुः सिंहसंघवत् ।
न चैनान्हर्षसंपूर्णानियं सेहे वसुंधरा । [130]
तथा तु मिथुनं जज्ञे द्रुपदस्य महात्मनः ।
कुमारश्च कुमारी च मनोज्ञौ भरतर्षभ ।
श्रिया परमया युक्तौ क्षात्रेण वपुषा तदा ।
तौ दृष्ट्वा पृषती राजन्प्रपेदे सा सुतार्थिनी ।
न वै मदन्यां जननीं जानीयातामिमाविति । [135]
तथेत्युवाच तां याजो राज्ञः प्रियचिकीर्षया ।
तयोस्तु नामनी चक्रुर्द्विजाः संपूर्णमानसाः ।
धृष्टत्वादप्रधृष्यत्वाद्धर्षाद् द्युम्नभवादपि ।
धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति ।
कृष्णेत्येवाब्रुवन्कृष्णां कृष्णाभूत्सा हि वर्णतः । [140]
तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे ।
वैदिकाध्ययने पारं धृष्टद्युम्नो गतस्तदा ।
धृष्टद्युम्नं तु पञ्चाल्यमानीय द्रुपदात्मजम् ।
उपाकरोदस्त्रहेतोर्भारद्वाजः प्रतापवान् ।
अमोक्षणीयं दैवं हि भावितत्वान्महामतिः । [145]
तथा तत्कृतवान्द्रोण आत्मकीर्त्यर्थरक्षणात् ।
सर्वास्त्राणि तु स क्षिप्रमाप्तवान्दृष्टमात्रया ।

Colophon.

जनमेजयः ।
द्रुपदस्यापि ब्रह्मर्षे श्रोतुमिच्छामि संभवम् ।
कथं चापि समुत्पन्नः कथमस्त्राण्यवाप्तवान् ।
एतदिच्छामि भगवंस्त्वत्तः श्रोतुं द्विजोत्तम । [150]
कौतूहलं जन्मसु मे कथ्यमानेष्वतीव हि ।

वैशंपायनः ।
राजा बभूव पाञ्चालः पुत्रार्थी पुत्रकारणात् ।
वनं गत्वा महाराजस्तपस्तेपे सुदारुणम् ।
आराधयन्प्रयत्नेन तस्यापत्यस्य कारणात् ।
तस्य संतप्यमानस्य वने मृगगणायुते । [155]
कालस्तु सुमहान्राजन्प्रत्ययात्सुतकारणात् ।
स तु राजा महावीर्यस्तपस्तीव्रं समादधे ।
किंचित्कालं वायुभक्षो निराहारस्तथैव च ।
तस्यैवं तु महाबाहो वर्तमानस्य भारत ।
कालस्तत्र महान्राजन्प्रत्ययाद्नृपसत्तम । [160]
ततः प्राप्ते महाराज वसन्ते कामदीपने ।
फुल्लाशोकवने काले प्राणिनां सुमनोहरे ।
नद्यास्तीरमथो गत्वा गङ्गायाः पद्मलोचनः ।
नियमस्थः स राजासीत्तदा भरतसत्तम ।
ततो नातिचिरात्कालाद्वनं तन्मनुजेश्वर । [165]
संप्राप्ता सहसा राजन्मेनकेति परिश्रुता ।
नद्यास्तीरे चरन्ती वै क्रीडन्ती च पुनः पुनः ।
पुष्पद्रुमान्प्रभञ्जाना राज्ञो दर्शनमागमत् ।
न ददर्श तु सा राजंस्तथा स्थानगतं नृपम् ।
दृष्ट्वा चाप्सरसं तां तु शुक्रं राज्ञोऽपतद्भुवि । [170]
तच्च राजा तु राजेन्द्र लज्जया नृपतिः स्वयम् ।
पद्भ्यामाक्रमतायुष्मंस्ततस्तु द्रुपदोऽभवत् ।
ततस्तु तस्य तपसा राजर्षेर्भावितात्मनः ।
पुत्रः समभवत्त्वार्द्रात्पादान्तस्यान्तरेण तु ।
ते तस्य ऋषयः सर्वे समागम्य तपोधनाः । [175]
नाम चक्रुर्हि विद्वांसो द्रुपदोऽस्त्विति भूमिप ।
स तस्यैवाश्रमे राजन्भरद्वाजस्य भारत ।
ववृधे च सुखं तत्र कामैः सर्वैर्नृपोत्तम ।
पाञ्चालोऽपि हि राजेन्द्र स्वराज्यं गतवान्प्रभुः ।
भरद्वाजस्य शिक्षार्थं सुतं दत्त्वा महात्मनः । [180]
स कुमारस्ततो राजन्द्रोणेन सहितो वने ।
वेदांश्चाधिजगे साङ्गान्धनुर्वेदं च भारत ।
परया स मुदा युक्तो विचचार वने सुखम् ।
तस्यैवं वर्तमानस्य वने वनचरैः सह ।
कालान्नातिचिराद्राजन्पिता स्वर्गमुपेयिवान् । [185]
स समागम्य पाञ्चालैः पाञ्चालेष्वभिषेचितः ।
प्राप्तश्च राज्यं राजेन्द्र सुहृदां प्रीतिवर्धनः ।
राज्यं ररक्ष धर्मेण यथा चेन्द्रस्त्रिविष्टपे ।

M धनुर्विस्फारयन्मुहुः. — K₄ D₄ M om. lines 109–110, 131–133. — (L. 138) K₄ D₅ T₂ G₂.₄.₅ M₆ द्युत्संभवादपि; G₁ द्युम्नस्य संभवात्. — (L. 140) D₄ G₁.₃.₆ M₆–₈ °वाभवत्कृष्णा. — K₄ D₄ M om. line 142. — (L. 145) K₄ D₄ भवितेति; D₅ स तु मत्वा; G₁.₂.₆ एवं मत्वा; M₆–₈ एवमुक्त्वा. K₄ D₄ M om. line 147. — Colophon. *Adhy. no.*: T₂ G₃–₅ M 82; G₁.₆ 83; G₂ 84. — (L. 174) K₄ D₄ T₂ G₂.₄.₅ M चास्य; D₅ राजन् (for त्वार्द्रात्). K₄ D₄ M पादौ तस्यांत°; T₂ G₂.₄.₅ पादयोरंतरे तु सः. — (L. 175) K₄ D₄.₅ तेनास्य ऋ°; T₂ G₂.₄.₅ तस्य चाप्यृष°; M तेन चास्यर्ष°. — (L. 188) K₄ D₄ T₂ G₂.₄.₅ M प्रजारक्षणधर्मेण. — After line 188, D₅ ins.:

कथितं जन्म राजेन्द्र द्रुपदस्य सुतस्य च ।

— Colophon om. in G₂.₄. *Adhy. no.*: D₄ 140; T₂ G₃.₅ M 83; G₁.₆ 84.

एतन्मया ते राजेन्द्र यथावत्परिकीर्तितम्।
द्रुपदस्य जन्म राजर्षे धृष्टद्युम्नस्य चैव हि। [190]

Colophon.

वैशंपायनः।
धृतराष्ट्रस्तु राजेन्द्र यदा पौरवनन्दनः।
युधिष्ठिरमजानाद्वै समर्थं राज्यधारणे।
यौवराज्येऽभिषेकार्थममन्त्रयत मन्त्रिभिः।
ते तु बुद्ध्वान्वतप्यन्त धृतराष्ट्रात्मजास्तदा।

☞ The first adhy. of this passage is an *anticipation* (with v. l.) of adhy. 155. In S the present passage constitutes the longer version, its repetition (in S) after adhy. 154 being only a summary. See also the remarks at the end of the footnotes to adhy. 128 (p. 574). The passage is followed by passage No. 80 below.

80

N V1 B Da Dn D1.2 ins. after adhy. 128: K4 D4.5 S after passage No. 79 above:

वैशंपायन उवाच।
ततः संवत्सरस्यान्ते यौवराज्याय पार्थिव।
स्थापितो धृतराष्ट्रेण पाण्डुपुत्रो युधिष्ठिरः।
धृतिस्थैर्यसहिष्णुत्वादानृशंस्यात्तथार्जवात्।
भृत्यानामनुकम्पाच्च तथैव स्थिरसौहृदात्।
ततोऽदीर्घेण कालेन कुन्तीपुत्रो युधिष्ठिरः। [5]
पितुरन्तर्दधे कीर्तिं शीलवृत्तसमाधिभिः।
असियुद्धे गदायुद्धे रथयुद्धे च पाण्डवः।
संकर्षणादशिक्षद्वै शश्वच्छिक्षां वृकोदरः।
समाप्तशिक्षो भीमस्तु द्युमत्सेनसमो बले।
पराक्रमेण संपन्नो भ्रातॄणामचरद्वशे। [10]
प्रगाढदृढमुष्टित्वे लाघवे वेधने तथा।
क्षुरनाराचभल्लानां विपाठानां च तत्त्ववित्।
ऋजुवक्रविशालानां प्रयोक्ता फाल्गुनोऽभवत्।
लाघवे सौष्ठवे चैव नान्यः कश्चन विद्यते।
बीभत्सुसदृशो लोके इति द्रोणो व्यवस्थितः। [15]
ततोऽब्रवीद्वृडाकेशं द्रोणः कौरवसंसदि।
अगस्त्यस्य धनुर्वेदे शिष्यो मम गुरुः पुरा।
अग्निवेश्य इति ख्यातस्तस्य शिष्योऽस्मि भारत।
तीर्थात्तीर्थं गमयितुमहमेतत्समुद्यतः।
तपसा यन्मया प्राप्तममोघमशनिप्रभम्। [20]
अस्त्रं ब्रह्मशिरो नाम यद्धेत्पृथिवीमपि।
ददता गुरुणा चोक्तं न मनुष्येष्विदं त्वया।
भारद्वाज विमोक्तव्यमल्पवीर्येष्वपि प्रभो।

80

(L. 1) D5 (orig.) S (except T1) पांडुपुत्रो महायशाः (for the posterior half). — (L. 2) S यौवराज्ये (for पाण्डु°). — T2 om. lines 3-5; G M om. lines 3-4. — (L. 4) Dn D4.5 °मनुर्कपार्थं. — (L. 5) G1 M6-8 अथ दीर्घेण; G2.4-6 अदीर्घेण च; M3.5 अथादी°. — (L. 6) T2 G M5 पित्र्यां; M3.6-8 पैत्रीं (for पितुः). — (L. 7) G2 रथोचोगे; G2.6 रथे याने (for गदायुद्धे). Ñ1 अस्त्रयुद्धे; D5 G1-3.6 बाहुयुद्धे (for रथयुद्धे). T2 G4.5 M भीमसेनोसियुद्धं च गदायुद्धं च पांडवः. — (L. 8) D5 G1-3.6 संकर्षणाच्छिक्षितवान्; T2 G4.5 M अगृह्णाद्बलदेवात्तु. Some MSS. transp. शश्वत् and शिक्षां. T2 G4.5 M बाहुयुद्धं च वीर्यवान्. — After line 8, G1-3.6 ins.:

ते तं बुद्ध्वान्वतप्यन्त धृतराष्ट्रात्मजास्तदा।

— (L. 9) D5 S (except T1) समाप्तविद्यः सोप्यासीत्. G3 M (except M5) °समो बली. — After line 9, T G3.5.6 repeat line 1 (with S reading). — (L. 10) D5 S गदाबलाभ्यां सं°. — (L. 11) D5 T2 G लाघवे चातिवेधने. — After line 11, D4 (marg. *sec. m.*).5 S (except T1 G1.3) ins.:

लक्ष्यवेध्ये च मोक्षे च तोमरग्रहणेऽपि च।
असिशक्तिगदायुद्धे बभूवाप्रतिमोऽर्जुनः।

— (L. 12) D5 T2 G M सुतेजसां; Ñ (Ñ3 om.) V1 Dn D1 T1 च भारत (for च तत्त्ववित्). — (L. 13) D5 T2 G M पांडवो (for फाल्गुनो). — After line 13, D4 (marg. *sec. m.*) S (except G1.3.6) read lines 33-34. — (L. 14) T2 G लाघवात्सौष्ठवाच्. — (L. 15) S (except T1) बीभत्सोः स°. D5 S (except T1) द्रोणोभ्यभाषत. — After line 15, G1.3.6 read lines 33-34, 31-32; while T2 G4.5 read lines 31, 32; G2, on the other hand, read the lines 8, 12, 13 of the passage given under line 30, followed by lines 31-32. — (L. 16) S (except T1) अथाब्रवीत्तदा द्रोणः फल्गुनं जनसंसदि. — (L. 17) Ñ1 D4.5 S (except T1) सदा (for पुरा). — (L. 19) D4.5 M3 °र्थं गतः पार्थ; T2 G1.2.4.5 तीर्थादधिगतः पार्थ; G3.6 °र्थं गतं पार्थ; M5-8 °र्थागतः पार्थ. S (except T1) मया संक्रामितं त्वयि (M °तस्त्वयि). — (L. 20) S (except T1) इदं (for यत्). — (L. 21) Ñ M इमां (for अपि). — (L. 22) S (except T1) ददता चास्मि संदिष्टो. — (L. 23) G1.3.6 M प्रयोक्तव्यं. T2 G2.4.5 प्रयोक्तव्यं त्वया वीर. D5 G1.3.6 M अस्त्रं संयुग(M संग्राम)मूर्धनि; T2 G2.4.5 प्रदेयं च तथैव हि. — After line

यस्त्वयास्मिदं वीर दिव्यं नान्योऽर्हति त्विदम् ।
समयस्तु त्वया रक्ष्यो मुनिसृष्टो विशां पते । [25]
आचार्यदक्षिणां देहि ज्ञातिग्रामस्य पश्यतः ।
ददानीति प्रतिज्ञाते फाल्गुनेनाब्रवीद्गुरुः ।
युद्धेऽहं प्रतियोद्धव्यो युध्यमानस्त्वयानघ ।
तथेति च प्रतिज्ञाय द्रोणाय कुरुपुंगवः ।
उपसंगृह्य चरणौ स प्रायादुत्तरां दिशम् । [30]

स्वभावादगमच्छब्दो महीं सागरमेखलाम् ।
अर्जुनस्य समो लोके नास्ति कश्चिद्धनुर्धरः ।
गदायुद्धेऽसियुद्धे च रथयुद्धे च पाण्डवः ।
पारगश्च धनुर्युद्धे बभूवाथ धनंजयः ।
नीतिमान्सकलां नीतिं विबुधाधिपतेस्तदा । [35]
अवाप्य सहदेवोऽपि भ्रातॄणां वचने वशे ।
द्रोणेनैव विनीतश्च भ्रातॄणां नकुलः प्रियः ।

23, K4 D6 S ins.:

यद्यप्यन्तर्हितं भूतं किंचिद्युध्येत हि त्वया ।
भारद्वाज तदा तेन हन्यास्त्वक्लेन संयुगे ।

[L. 1) T G °युद्धे त्वया सह. — (L. 2) T G शक्लेन (for अक्लेन).]

G1 cont.:

तत्त्वया हि प्रयोक्तव्यमेतद्वै गुरुशासनम् ।
महातेजस्तदेतेन हन्याः शक्लेन संयुगे ।

— (L. 24) K4 B1 Dn T1 त्वया प्राप्तमिदं वीर; T2 G M अवाप्तं तत्त्वया वी°. K4 दिव्यं नानार्थसाधकम्; T2 G M नान्यो दिव्यं (or दिव्यं नान्यस्) त्वदर्हति. — (L. 25) T2 G4.6 M बलवान्समयो रक्ष्यः; G1-3.6 समश्च रक्ष्यो बलवान्. N3 मुनिनोक्तो; D8 मन्निसृष्टो; T2 G4.6 इति दृष्टो; G1-3.6 ईदृशो हि; M इति शिष्यं. — (L. 26) M ज्ञातिसंग्राममूर्धनि. — (L. 27) Om. in M. Many MSS. ददामीति. D4 T G फल्गुनेन. — (L. 28) T2 G °मानोऽहं रणे; M °मानो हि संयुगे. — T2 G4.6 ins. after line 28: T1 (om. line 1), after line 29: G1 (lines 30–42 only), after line 30:

तं तथेति प्रतिज्ञाते द्रोणाय कुरुपुंगवे ।
द्रोणो जगाद वचनं समालिङ्ग्य तु फल्गुनम् ।
यन्मयोक्तं पुरा पार्थ तव लोके नरः क्वचित् ।
सदृशं कारये नैव सर्वप्रहरणे युधि । [5]
तत्कृतं च मया सम्यक्तव तुल्यो न वर्तते ।
देवा युधि न शक्तास्त्वां योद्धुं दैत्या न दानवाः ।
नाहं त्वत्तो विशिष्टोऽस्मि किं पुनर्मानवा रणे ।
एकस्तवाधिको लोके यो हि वृष्णिकुलोद्भवः ।
कृष्णः कमलपत्राक्षः कंसकालीयसूदनः ।
स जेता सर्वलोकानां सर्वप्रहरणायुधः । [10]
नैतावता ते पार्थाहं भवाम्यनृतवागिह ।
तदधीनं जगत्सर्वं तत्प्रलीनं तदुद्भवम् ।
तत्पदं न विजानन्ति ब्रह्मेशानादयोऽपि वा ।
तन्नाभिप्रभवो ब्रह्मा सर्वभूतानि निर्ममे ।
स एव कर्ता भोक्ता च संहर्ता च जगन्मयः । [15]
स एव भूतं भव्यं च भवच्च पुरुषः परः ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ।
प्रादुर्भवति योगात्मा पालनार्थं स लीलया ।
तत्तुल्यो हि न जायेत न जातो न जनिष्यते ।
स हि मातुलजोऽभूत्ते चराचरगुरुः पिता । [20]
को हि तं जेतुमीहेत जानन्नात्महितं नरः ।
इयालश्च ते सखा चासौ तस्य त्वं प्राणवल्लभः ।
स्नेहमभ्यधिकं तस्य तव सख्यमवस्थितम् ।
न तेन भवतो युद्धं भविता नमतोऽपि वा ।
अपि चार्थे तव पुरा शक्रेण किल चोदितः । [25]
गोकुले वर्धमानस्तु नन्दगोपस्य कारणात् ।
ममांशः पाण्डवो लोके पृथिव्यां पुरुषोत्तमः ।
कौन्तेयावरजः श्रीमानर्जुनो नाम वीर्यवान् ।
भुवो भारापहरणे साहाय्यं ते करिष्यति ।
तदर्थमभयं देहि पाहि चासत्कृते प्रभो । [30]
इत्युक्तः पुण्डरीकाक्षस्तदा शक्रेण फल्गुन ।
तमुवाच ततः श्रीमाञ्शङ्खचक्रगदाधरः ।
जानामि पाण्डवे वंशे जातं पार्थं पितृष्वसुः ।
पुत्रं परमधर्मिष्ठं सर्वशस्त्रभृतां वरम् ।
पालयामि त्वदर्शं तं जीवलोकमहामुजम् । [35]
आवयोः सख्यसदृशं न च लोके भविष्यति ।
यस्तद्भक्तः स मद्भक्तो यस्तं द्वेष्टि स मामपि ।
यन्मे वित्तं तु तत्तस्य तं विनाहं न जीवये ।
इति पार्थं पुरा शक्रमाह सर्वेश्वरो हरिः ।
तस्मात्त्वापि सदृशस्तं विनाभ्यधिकः पुमान् । [40]
न चेह भविता लोके तमेव शरणं व्रज ।
शरण्यः सर्वभूतानां देवदेवो जनार्दनः ।

— (L. 29) S तत्तथेति प्रति°. — (L. 30) S युधिष्ठिरवशोभवत् (for the posterior half). — After line 30, D8 ins.:

सर्वामधीतवान्नीतिं पातालाधिपतेस्तथा ।
जितवान्सकलान्नित्यात्लोकान्बुद्धिमतां वरः ।

— After line 15, T2 G4.6 M read lines 31–32; G1.3.6, lines 33–34, 31–32. — (L. 31) T2 G (except G2.6) अभवत् (for अगमत्). — (L. 33) D4 T2 G2.4.6 M गजपृष्ठेश्वपृष्ठे च; T1 G1.3.6 गजयुद्धेश्वयुद्धे च. T2 G (except G2.3) भारत (for पाण्डवः). — After line 33, T G (except G2.3) ins.:

दिव्यमानुषसंभूतानवाप सुमहायशाः ।
सर्वांस्तथाखिलानस्त्रान्छस्त्राणि च तथा गुरोः ।

— (L. 34) M पारगो भुजयुद्धे च. — (L. 35) S (except

चित्रयोधी समाज्ञातो बभूवातिरथोदितः ।
त्रिवर्षकृतयज्ञस्तु गन्धर्वाणामुपप्लवे ।
अर्जुनप्रमुखैः पार्थैः सौवीरः समरे हतः । [40]
न शशाक वशे कर्तुं यं पाण्डुरपि वीर्यवान् ।
सोऽर्जुनेन वशं नीतो राजासीद्यवनाधिपः ।
अतीव बलसंपन्नः सदा मानी कुरून्प्रति ।
वित्तलो नाम सौवीरः शस्तः पार्थेन धीमता ।
दत्तमित्रमिति ख्यातं संग्रामकृतनिश्चयम् । [45]
सुमित्रं नाम सौवीरमर्जुनोऽदमयच्छरैः ।
भीमसेनसहायश्च रथिनो मरुधन्वसु ।
अर्जुनः समरे प्राच्यान्सर्वानेकरथोऽजयत् ।
तथैवैकरथो गत्वा दक्षिणामजयद्दिशम् ।
धनौघं प्रापयामास कुरुराष्ट्रं धनंजयः । [50]
एवं सर्वे महात्मानः पाण्डवा मनुजोत्तमाः ।
परराष्ट्राणि निर्जित्य स्वराष्ट्रं वबृधुः पुरा ।
ततो बलमभिख्यातं विज्ञाय दृढधन्विनाम् ।
दूषितः सहसा भावो धृतराष्ट्रस्य पाण्डुषु ।
स चिन्तापरमो राजा न निद्रामलभन्निशि । [55]
Colophon.

☞ In some MSS. this passage is followed by passage No. 81 below.

81

K₄ Ñ V₁ B D M₅₋₈ (the latter four MSS. om. lines 49–103) ins. after passage No. 80 above: T G₂.₄.₅, after passage No. 83: G₁.₃.₆, after adhy. 130: M₈ (om. lines 49–103), after 1. 129. 1:

वैशंपायन उवाच ।

श्रुत्वा पाण्डुसुतान्वीरान्बलोद्रिक्तान्महौजसः ।
धृतराष्ट्रो महीपालश्चिन्तामगमदातुरः ।
तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम् ।
कणिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः ।

धृतराष्ट्र उवाच ।

उत्सिक्ताः पाण्डवा नित्यं तेभ्योऽसूये द्विजोत्तम । [5]
तन्न मे निश्चिततमं संधिविग्रहकारणम् ।
कणिक मतमाचक्ष्व करिष्येऽहं वचस्तव ।

T₁) उद्धवात्सकलां नीतिं भोजाद्वृष्णिमतां वरः. — After line 35, S ins.:

अस्त्रे शस्त्रे च शास्त्रे च रथनागाश्वकर्मणि ।

— (L. 36) S (except T₁) अचरत् (for वबृते). — (L. 38) V₁ Dn T₁ समाख्यातो. D₂ °रथोधिकः; T₂ G₁.₅ °रथो भुवि. G₁ बभूवास्त्रविदां वरः; M °वास्त्रविशारदः. — (L. 39) S °कृतयत्नैस्तु गांधाराणा°. — (L. 40) N₃ वीरैः; M सर्वैः (for पार्थैः). D₅ S सौवीराः and हताः. — (L. 42) K₄ D₅ S स राजा (for राजासीद्). — (L. 43) S बलसंमत्तस्त्वस्ति (T₂ G₄.₅ °भि) मानी. — (L. 44) K₄ D₅ S कुंतलो; Ñ V₁ विपुलो; B₅ Da वितुलो (for. वित्तलो). D₅ S दांतः (for शस्तः). — (L. 45) Dn दत्तामित्रः; D₅ S दं(*or* दां)तवक्रः (*or* क्रं). D₅ S पुरं (D₅ G₁ M पुरा) पार्थस्य कर्मणा (T₁ सर्वं समृद्धिमत्; G₄ संप्राप्य तेजसा; G₅ M °स्य तेजसा). — After line 45, D₅ (which om. line 46) ins.:

जितः स समरे प्राच्यान्सर्वानेकरथोऽजयत् ।

— (L. 46) S (except T₁ G₃.₆ M₅) अमित्रं. G (except G₄.₅) अमर्दयत्. T₂ G₁.₂.₄–₆ M मृधे; G₃ रणे (for शरैः). — (L. 47) K₄ Ñ V₁ B₃.₆ Dn D₁ रथानां; D₅ T₁ G₃ गत्वा वै; T₂ G₁.₂.₄–₆ हत्वा च (G₁ यो; G₂.₆ वै); M सरथो (for रथिनो). K₄ Ñ V₁ B₅ Dn D₁ अयुतं च सः; D₅ T₁ मरुधन्वनः. — After line 47, S (except T₁ G₃) ins.:

प्रतीच्यान्समरे राजञ्जिगाय भरतर्षभ ।

— (L. 48) Om. in M. T₂ G transp. प्राच्यान् and सर्वान्. — (L. 49) T₂ G जित्वा (for गत्वा). M तथा वै कौरवो जित्वा. D₅ S दाक्षिणात्यान्नराधिपान्. — (L. 50) M धनौघान्. — After line 50, S (which om. lines 51–52) ins.:

अतः पञ्चदशे वर्षे सर्वमेतच्चकार सः ।
तं दृष्ट्वा धार्तराष्ट्राणां ततो भयमजायत ।
स सर्वान्धृतराष्ट्रस्य पुत्रान्विप्रचकार ह ।
भीमसेनो महाबाहुर्बलाद्बलवतां वरः ।
अदुष्टभावं तं दोषैर्जगृहुर्दुष्टबुद्धयः ।
धार्तराष्ट्रास्तथा सर्वे भयाद्भीमस्य कर्मणः ।
तान्दृष्ट्वा कर्मभिः पार्थान्सर्वानहितलक्षणान् ।
बलाद्बहुगुणांस्तेभ्यो बिभियुर्दोषबुद्धयः ।

— (L. 53) Some MSS. अतिख्यातं. — S om. line 55. — Colophon om. in K₄ Ñ V₁ D₂. *Adhy. no.:* B₁ 136; B₅ 132; Dn₂.ns 138; D₄ 141; T₁ 134; T₂ G₃₋₅ M 84; G₁.₂.₆ 85.

81

T₂ G₅ M om. lines 1–7; T₁ G₁₋₄.₆ om. lines 1–3. — S spells the name of the fictitious minister throughout as कणिङ्क. — (L. 4) D₂ मंत्रं पप्रच्छ कणिकममात्यं मंत्रवित्तमम्; G (G₅ om.) ततः कर्णिकमानाय्य धृतराष्ट्रोब्रवीदिदम्. — (L. 5) T₁ तेभ्योसूयाम्यहं द्विज; G (G₅ om.) तेभ्योसूयामि वै सदा. — (L. 6) G (G₅ om.) तस्य मे सहपुत्रस्य यद्भवेत्क्षेमकारकम्. — (L. 7) N₃ B₁.₅ त्वं समाचक्ष्व; Dn D₅ त्वं ममाच°; D₄ एतन्ममा°; G (G₅ om.) तत्त्वमा° (for मतमाच°).

वैशंपायन उवाच ।
स प्रसन्नमनास्तेन परिपृष्टो द्विजोत्तमः ।
उवाच वचनं तीक्ष्णं राजशास्त्रनिदर्शनम् ।
कणिक उवाच ।
शृणु राजन्निदं तत्र प्रोच्यमानं मयानघ । [10]
न मेऽभ्यसूया कर्तव्या श्रुत्वैतत्कुरुसत्तम ।
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः ।
अच्छिद्रच्छिद्रदर्शी स्यात्परेषां विवरानुगः ।
नित्यमुद्यतदण्डाद्धि भृशमुद्विजते जनः ।
तस्मात्सर्वाणि कार्याणि दण्डेनैव विधारयेत् । [15]
नास्य च्छिद्रं परः पश्येच्छिद्रेण परमन्वियात् ।
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ।
नासम्यक्कृतकारी स्यादुपक्रम्य कदाचन ।
कण्टको ह्यपि दुश्छिन्न आस्रावं जनयेच्चिरम् ।
वधमेव प्रशंसन्ति शत्रूणामपकारिणाम् । [20]
सुविदीर्णं सुविक्रान्तं सुयुद्धं सुपलायितम् ।
आपद्यापदि काले च कुर्वीत न विचारयेत् ।
नावज्ञेयो रिपुस्तात दुर्बलोऽपि कथंचन ।
अल्पोऽप्यग्निर्वनं कृत्स्नं दहत्याश्रयसंश्रयात् ।
अन्धः स्यादन्धवेलायां बाधिर्यमपि चाश्रयेत् । [25]
कुर्यात्तृणमयं चापं शयीत मृगशायिकाम् ।
सान्त्वादिभिरुपायैस्तु हन्याच्छत्रुं वशे स्थितम् ।
दया तस्मिन्न कर्तव्या शरणागत इत्युत ।
निरुद्विग्नो हि भवति न हताज्जायते भयम् ।
हन्यादमित्रं दानेन तथा पूर्वापकारिणम् । [30]
हन्याद्भीन्पञ्च ससेति परपक्षस्य सर्वशः ।
मूलमेवादितश्छिन्द्यात्परपक्षस्य नित्यशः ।
ततः सहायांस्तत्पक्षान्सर्वांश्च तदनन्तरम् ।
छिन्नमूले ह्यधिष्ठाने सर्वे तज्जीविनो हताः ।
कथं नु शाखास्तिष्ठेरंश्छिन्नमूले वनस्पतौ । [35]

D2 मनसाचक्ष्व कणिक. Dn करिष्ये वचनं तव; G (G5 om.) करिष्यामः कथं वयं. — After line 7, D5 S (except T1 G5) ins.:

वैशंपायनः ।
दुर्योधनोऽथ शकुनिः कर्णदुःशासनावपि ।
कणिङ्कमुपसंगम्य मन्त्रिणं सौबलस्य च ।
पप्रच्छुर्भरतश्रेष्ठ पाण्डवान्प्रति नैकधा ।
प्रवृद्धाः पाण्डवा ह्येते नित्यं तेभ्यस्त्रसाम्यहम् ।
अत्र मे सहपक्षस्य यद्भवेत्क्षेमकारकम् ।
कणिङ्क तत्त्वमाचक्ष्व करिष्यामः कथं वयम् ।

— (L. 8) S उपसन्नाय (T G5 उपपन्नाय; G1-4.6 संप्रपन्नाय) तस्यै स परिमृश्यार्थं(T1 G6 परिपृष्टार्थ-; G1.2 °पृष्टोर्थ-; G3 °पृष्टोसि)-चिंतया. — (L. 9) D4 राजधर्मार्थदर्शनं; Dn राजशास्त्रार्थदर्शनं; D1 नीतिशास्त्र°; S (except T2 G4.5) °निदर्शनात्. — S (except T1) om. lines 10–11. — (L. 12) T2 G1.2.4.5 उद्यत°; G3.6 M च कृत° (for विवृत°). — T G1.2.4.5 ins. after line 12:

नित्यं च ब्राह्मणाः पूज्या नृपेण हितमिच्छता ।
सृष्टो नृपो हि विप्रस्य पालने दुष्टनिग्रहे ।
उभाभ्यां वर्धते धर्मो धर्मवृध्या जितावुभौ ।
लोकश्चार्यं परश्चैव तस्माद्धर्मं समाचरेत् ।

— G6 om. lines 14–18. — (L. 15) S (G6 om.) भूतानि (for कार्याणि). K4 B1.3 D2 प्रसाधयेत्; S (G6 om.) अभिपालयेत् (for विधारयेत्). — After line 15, T G1.2.4.5 ins.:

कृतापराधं पुरुषं दृष्ट्वा यः क्षमते नृपः ।
तेनावमानमाप्नोति पापं चेह परत्र च ।
यो विभूतिमवाप्योच्चै राज्ञो विकुरुतेऽधमः ।
तमानयित्वा हत्वा च दद्याद्धीनाय तद्धनम् ।
नो चेद्धरि नियुक्ता ये स्यास्यन्ति वशमात्मनः ।
राजा नियुञ्ज्यात्पुरुषानान्ध्यमार्थकोविदान् ।
ये नियुक्तास्तथा केचिद्राष्ट्रं वा यदि वा पुरम् ।
ग्रामं जनपदं वापि बाधेयुर्यदि वा न वा ।
परीक्षणार्थं विसृजेदानर्तांश्छद्मरूपिणः ।
परीक्ष्य पापकं जह्याद्धनमादाय सर्वशः ।

— G3 M6-8 om. line 16. — Before line 19, G2.6 (om. line 1) ins.:

न श्रुत्वानक्षराजेन्द्र कर्तव्या हि कदाचन ।
न शत्रुपक्षादुत्पन्नो विमोक्तव्यः कथंचन ।

— (L. 19) S °को हि दुरुच्छिन्नः. — M3.5 om. lines 21–27; M6-8 om. lines 21–28. Ñ3 T2 G3-6 read lines 21–28 after line 35; G1.2 read lines 21–27 after line 35. — (L. 21) K4 B1.5 °चीर्णं; Ñ3 D4 T1 °स्तीर्णं (for °दीर्णं). T2 G सुविक्रांतं सुविस्तीर्णं. T G (except G1.2) सुपलायनं. — (L. 22) T2 G आपदामथ (G2.4 °गम-) कालेषु कुर्यान्नात्र विचारणा. — After line 22, T G ins.:

कथं नु परियास्यामो न च शायामहे वयम् ।
दातृत्वेन गृहीताश्च न प्रयच्छेम कर्हिचित् ।

(cf. ins. in B5 after line 35). T2 G om. lines 23–24. — (L. 25) S (except T1) संश्रयेत्. — T2 G om. lines 27–28. — (L. 29) S हत्वा च रिपुमोजसा (for the posterior half). — (L. 30) S दंडेन (for दानेन). S (except T1) हन्यात् (for तथा). — (L. 33) S ततोस्यानंतरं पक्षान्छिन्द्यात्सर्वानशेषतः. — (L. 35) T2 G M3 तिष्ठेयुः; M5-8 जीवेयुः. — After line 35, Ñ3 T2 G3-6 read lines 21–28; G1.2, lines 21–27. — After line 35, B5 ins.:

कथंकारं शपामोऽन्यान्नावशायामहे कथम् ।
दातृत्वेन गृहीताश्च न प्रयच्छेम कस्यचित् ।

cf. ins. in T G after line 22. — M om. lines 36–42.

एकाग्रः स्यादविवृतो नित्यं विवरदर्शकः ।
राजन्नाज्यं सपत्नेषु नित्योद्विग्नः समाचरेत् ।
अश्याधानेन यज्ञेन काषायेण जटाजिनैः ।
लोकान्विश्वासयित्वा च ततो लुम्पेद्यथा वृकः ।
अङ्कुशं शौचमित्याहुरर्थानामुपधारणे । [40]
आनाम्य फलिनीं शाखां पक्वं पक्वं प्रशातयेत् ।
फलार्थोऽयं समारम्भो लोके पुंसां विपश्चिताम् ।
वहेदमित्रं स्कन्धेन यावत्कालस्य पर्ययः ।
ततः पर्यागते काले भिन्द्याद्घटमिवाश्मनि ।
अमित्रो न विमोक्तव्यः कृपणं बह्वपि ब्रुवन् । [45]
कृपा तस्मिन्न कर्तव्या हन्यादेवापकारिणम् ।
हन्यादमित्रं सान्त्वेन तथा दानेन वा पुनः ।
तथैव भेददण्डाभ्यां सर्वोपायैः प्रशातयेत् ।

धृतराष्ट्र उवाच ।

कथं सान्त्वेन दानेन भेदैर्दण्डेन वा पुनः ।
अमित्रः शक्यते हन्तुं तन्मे ब्रूहि यथातथम् । [50]

कणिक उवाच ।

शृणु राजन्यथा वृत्तं वने निवसतः पुरा ।
जम्बुकस्य महाराज नीतिशास्त्रार्थदर्शिनः ।
अथ कश्चित्कृतप्रज्ञः शृगालः स्वार्थपण्डितः ।
सखिभिर्न्यवसत्सार्धं व्याघ्राखुवृकबभ्रुभिः ।
तेऽपश्यन्विपिने तस्मिन्बलिनं मृगयूथपम् । [55]
अशक्ता ग्रहणे तस्य ततो मन्त्रममन्त्रयन् ।

जम्बुक उवाच ।

असकृद्यतितो ह्येष हन्तुं व्याघ्र वने त्वया ।
युवा वै जवसंपन्नो बुद्धिशाली न शक्यते ।
मूषिकोऽस्य शयानस्य चरणौ भक्षयत्वयम् ।
अथैनं भक्षितैः पादैर्व्याघ्रो गृह्णातु वै ततः । [60]
ततो वै भक्षयिष्यामः सर्वे मुदितमानसाः ।

कणिक उवाच ।

जम्बुकस्य तु तद्वाक्यं तथा चक्रुः समाहिताः ।
मूषिकाभक्षितैः पादैर्मृगं व्याघ्रोऽवधीत्तदा ।
दृष्ट्वा विचेष्टमानं तु भूमौ मृगकलेवरम् ।
स्नात्वागच्छत भद्रं वो रक्षामीत्याह जम्बुकः । [65]
शृगालवचनात्तेऽपि गताः सर्वे नदीं ततः ।
स चिन्तापरमो भूत्वा तस्थौ तत्रैव जम्बुकः ।
अथाजगाम पूर्वं तु स्नात्वा व्याघ्रो महाबलः ।
ददर्श जम्बुकं चैव चिन्ताकुलितमानसम् ।

व्याघ्र उवाच ।

किं शोचसि महाप्राज्ञ त्वं नो बुद्धिमतां वरः । [70]
अशित्वा पिशितान्यद्य विहरिष्यामहे वयम् ।

जम्बुक उवाच ।

शृणु मे त्वं महाबाहो यद्वाक्यं मूषिकोऽब्रवीत् ।
धिग्बलं मृगराजस्य मयाद्यायं मृगो हतः ।
मद्बाहुबलमाश्रित्य तृप्तिमद्य गमिष्यति ।
गर्जमानस्य तस्यैवमतो भक्ष्यं न रोचये । [75]

व्याघ्र उवाच ।

ब्रवीति यदि स ह्येवं काले ह्यस्मिन्प्रबोधितः ।
स्वबाहुबलमाश्रित्य हनिष्येऽहं वनेचरान् ।
खादिष्ये तत्र मांसानि इत्युक्त्वा प्रस्थितो वनम् ।

— (L. 36) T_2 G एकत्र चापि वसतो (G एकत्रापि वर्षस्तात), and °दर्शनं (for °दर्शकः). — $\tilde{N}_1$ om. lines 37–46. — (L. 37) $\tilde{N}_3$ राजन्क्षत्रसपत्नेषु; B_5 राजा राज्यं स°; Dn राजन्नित्यं स°; T_2 G राजन्न (G1.3.4 राजानः; G_5 राजन्ना) क्षत्रसंपन्नो. K_4 सदा भवेत्; T_2 G ततो भवेत् (for समा°). — (L. 39) T_2 G लोकं प्रस्थाप(G3 °क्षाल; G5.6 °स्थाप)यित्वा च. — (L. 40) S उपपादने (for °धारणे). — (L. 41) $\tilde{N}_{2.3}$ V_1 B_1 Dn फलितां. $\tilde{N}_3$ B_5 D_{n3} D_5 फलं पक्वं; T G पक्त्वा पक्वं. — T_2 G om. line 42. — (L. 44) $\tilde{N}_2$ Dn T_1 प्रत्यागते. T_2 G M ततः काल(T2 G1.4.5 सार)मुपादाय. — (L. 45) K_4 T_2 G8.5.6 अमित्रस्तु न मोक्तव्यः; G1.2.4 अमित्रो न च मुच्येत; M °त्रो नास्य मुच्येत. — (L. 46) Some MSS. transp. तस्मिन् and न. K_4 दुःखं तस्य न कर्तव्यं; S दुःखमस्मिन्न कर्तव्यं. — (L. 48) S (except T_1) तथा भेदेन दंडेन. For प्रशातयेत्, MSS. °साध°, °पात°, °शांत°, °ताप°. — M om. lines 49–103! — (L. 49) T_2 G भेदैर्दंडैरथापि वा. — (L. 51) T_2 G वने वसति जंबुकः. — T_2 G om. lines 52–53. — (L. 54) T_2 G सखायस्तस्य व्याघ्रश्च वृको नकुलमूषिकौ. — (L. 55) G (except G_4) हि वने (for विपिने). — (L. 56) T_2 G अकुर्वत (for अमन्त्रयन्). — (L. 59) B_5 D_5 S (G1 om.) चरणान्. — (L. 60) V_1 B (except B_5) Da D_5 मृद्नातु (for गृह्णातु). K_4 T_2 G2.5.6 ततो व्याघ्रः प्रधावतु; G3.4 मृगं व्याघ्रो हनेत्तदा. — All MSS. except Dn3 om. कणिक उ°. — (L. 63) T_2 G अहनत् (for अवधीत्). — T_2 G om. line 64. — (L. 64) $\tilde{N}$ Dn दृष्ट्वैवाचेष्ट°. — (L. 65) T_2 G रक्षामि मृगयूथपं. — After line 66, V_1 $B_{5.6}$ $D_{4.5}$ T G ins.:

संचिन्तयन्तो मनसा मांसतृप्तिं पुनः पुनः ।

— V_1 B_5 D_4 T G om. line 67. — (L. 68) T_2 G अथागच्छतु पूर्वं हि. — (L. 69) V_1 B_5 $D_{4.5}$ T_2 G जंबुकश्चाभवत्तत्र (V1 B_5 $D_{4.5}$ आस्ते च जंबुकस्तत्र) तदा चिंतापरो (*or* °कुलो) नृप. — (L. 71) T_2 G पिशितस्याशितारोत्र वि° सुखम्. — (L. 72) T G महाप्राज्ञ. T_2 G यद्वचो (G3.6 यां वाचं). — (L. 74) T_2 G तृप्तिर्यस्य भविष्यति. — (L. 75) T_2 G तस्यैवं गर्जितस्यद्य (T2 G1.5 गदतस्तदत्) ततो etc. — (L. 76) T_2 G (G2 om.) यद्येवमब्रवीत्तस्मात्काले चास्म्यवबो°. — (L. 77)

एतस्मिन्नेव काले तु मूषिकोऽप्याजगाम ह ।
तमागतमभिप्रेक्ष्य शृगालोऽप्यब्रवीद्वचः । [80]

जम्बुक उवाच ।

शृणु मूषिक भद्रं ते नकुलो यदिहाब्रवीत् ।
मृगमांसं न खादेयं गरमेतन्न रोचते ।
मूषिकं भक्षयिष्यामि तद्भवाननुमन्यताम् ।
तच्छ्रुत्वा मूषिको वाक्यं संत्रस्तः प्राद्रवद्भयात् ।
ततः स्नात्वा स वै तत्र आजगाम वृको नृप । [85]
तमागतमिदं वाक्यमब्रवीज्जम्बुकस्तदा ।
मृगराजो हि संक्रुद्धो न ते साधु भविष्यति ।
सकलत्रस्त्विहायाति कुरुष्व यदनन्तरम् ।
एवं संचोदितस्तेन जम्बुकेन तदा वृकः ।
वृकावलुम्पनं कृत्वा प्रयातः पिशिताशनः । [90]
एतस्मिन्नेव काले तु नकुलोऽप्याजगाम ह ।
तमुवाच महाराज नकुलं जम्बुको वने ।
स्वबाहुबलमाश्रित्य निर्जितास्तेऽन्यतो गताः ।
मम दत्त्वा नियुद्धं त्वं भुङ्क्ष्व मांसं यथेप्सितम् ।

नकुल उवाच ।

मृगराजो वृकश्चैव बुद्धिमानपि मूषिकः । [95]
निर्जिता यत्त्वया वीरास्तस्माद्वीरतरो भवान् ।
न त्वयाभ्युत्सहे योद्धुमित्युक्त्वा सोऽप्युपागमत् ।

कणिक उवाच ।

एवं तेषु प्रयातेषु जम्बुको हृष्टमानसः ।
खादति स्म तदा मांसमेकः सन्मन्त्रनिश्चयात् ।
एवं समाचरन्नित्यं सुखमेधति भूमिपः । [100]
भयेन भेदयेद्वीरं शूरमञ्जलिकर्मणा ।
लुब्धमर्थप्रदानेन समं न्यूनं तथौजसा ।
एवं ते कथितं राजञ्शृणु चाप्यपरं तथा ।
पुत्रः सखा वा भ्राता वा पिता वा यदि वा गुरुः ।
रिपुस्थानेषु वर्तन्तः कर्तव्या भूतिवर्धनाः । [105]
शपथेनाप्यरिं हन्यादर्थदानेन वा पुनः ।
विषेण मायया वापि नोपेक्षेत कथंचन ।
उभौ चेत्संशयोपेतौ श्रद्धावांस्तत्र वर्धते ।
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य न्याय्यं भवति शासनम् । [110]
क्रुद्धोऽप्यक्रुद्धरूपः स्यात्स्मितपूर्वाभिभाषिता ।
न चाप्यन्यमपध्वंसेत्कदाचित्कोपसंयुतः ।
प्रहरिष्यन्प्रियं ब्रूयात्प्रहरन्नपि भारत ।
प्रहृत्य च कृपायीत शोचेत च रुदेत च ।
आश्वासयेच्चापि परं सान्त्वधर्मार्थवृत्तिभिः । [115]
अथास्य प्रहरेत्काले यदा विचलिते पथि ।
अपि घोरापराधस्य धर्ममाश्रित्य तिष्ठतः ।

T₂ G हनिष्यामि. — (L. 78) T₂ G खादिष्यामि तु मांसा°. — After line 79, G₈ ins.:

वध्यस्य मूषिकस्येति नकुलायाब्रवीद्वचः ।

— (L. 80) Om. in Ñ₈ T₂ G. Ñ₂.₈ Dn D₅ °प्रेक्ष्य. — (L. 82) B₁.₆ D₂ T₁ शवं (for गरं). V₁ B₆ Da रोचये. T₂ G कथमसद्विधस्य तत् (for the posterior half). — (L. 84) Ñ₂ Da Dn D₁ °स्तः प्रगतो (Da °ययौ) बिलं. — (L. 85) T₂ G ततः स्नातस्तदा तत्र त्वाज°. — T₂ G (except G₁.₂) om. line 86. — (L. 87) T₂ G °द्धो न नः साधु करिष्यति. — (L. 90) K₄ वृकोप्यनशनं कृ°; Ñ₁.₂ V₁ Dn D₂.₄.₅ ततोवलुंपनं कृ°; Ñ₃ वृकोदरमलं कृ°; T G भीतो(T₁ वृको)वलिप्तं कृत्वाश. — (L. 92) T₂ G ततो राजन् (for महाराज). — (L. 93) T₂ G₁.₂.₄.₅ °स्ते मया हताः; G₃.₆ °स्ते समागताः. — (L. 97) K₄ न त्वया उत्स°; Ñ V₁ B₈ Da Dn D₁ T₁ न त्वयाप्युत्स°; D₂ न तेहमुत्स°; G₁.₂.₆ नाहमप्युत्स°; G₂ न ह्यहं ह्युत्स°; G₄ न त्वहं ह्युत्स°; G₅ न त्वामभ्यु°. K₄ D₁.₄.₅ °त्वा सोप्युपाक्रमत्; B₁.₅ °त्वा सावपाग°; T₂ G °त्वा गां विवेश ह. — (L. 98) B₁.₅ T₂ G तेष्वपयातेषु. — (L. 99) T₂ G (except G₃.₆) इत्येवं मंत्रनिश्चयात्. — G₅ om. lines 100–102. — (L. 100) Om. in T G₁–₅. Ñ₁.₂ V₁ Dn D₁ एधेत. Dn भूपतिः. — (L. 102) T₂ G (G₅ om.) सख्येनैव समौजसं (for the posterior half). — (L. 103) T₂ G₁.₂.₄.₅ मम; G₃.₆ नृप (for तथा). — (L. 104) S (except G₃.₆) यदि पुत्रो यदि पिता यदि भ्राता सखा यदि. — (L. 105) S (except T₁) अर्थे (G₁ M नात्र) पर्यवतिष्ठेरन्. K₄ Ñ V₁ B₁m D₂.₄.₅ T G₁.₄.₅ हंतव्या. K₄ Ñ V₁ B₁m Dn₁ D₂.₄.₅ T₁ भूतिमिच्छता; B₃.₅.₆ Da G₁.₆ भूमिवर्धनाः; T₂ G₃.₄ M₃.₅ भूरिवर्धनाः. — (L. 106) S (except T₁) °रिं हन्यान्न दोष इति भार्गवः. — S (except T₁) om. line 107. — (L. 108) Om. in Ñ₂ B₃.₆ Da D₄.₅. S (except T₁) उभावपि शपेयातां श्रद्धधानस्तु वध्यते (M₆–₈ हीयते). — (L. 110) T₂ G₁.₄–₆ M₆–₈ दंडो; G₃ M₃.₅ कार्यं (for न्याय्यं). T₂ G₁.₄–₆ शोभनः; M₆–₈ शासनः. — (L. 111) T₁ G₅ M शुक्रः; T₂ शक्यं; G₁ शक्तया; G₂ सख्यः; G₃–₅ शक्यः (for स्मित-). — (L. 112) K₄ Ñ₃ V₁ B₆ न चाप्यन्यायविध्वस्तं; S न चैनं क्रोधसंदीप्तं. K₄ Ñ₃ V₁ B₆ D₄.₅ विद्याच्च कृपयान्वितः; S विद्यात्कश्चित्कथंचन. — (L. 114) Ñ₃ कृपोपेतः; T₁ M कृपा येन; T₂ G₁.₂.₄.₅ प्रियं ब्रूयात्. S शोचन्निव रुदन्निव. — (L. 115) Ñ₂ V₁ B₃.₅ Da T₁ सांत्वदानार्य°; T₂ G₁.₂.₄.₅ सामदानार्य°; M साम्ना धर्मा°. — (L. 116) B₃.₆ Da आश्वास्य; T₁ G₃.₆ अथ तं; T₂ G₁.₂.₄.₅ तदा तं; M ततस्तं (for अथास्य). K₄ N₂ V₁ B₃.₅ D₂ विचरते; Ñ₁ Da D₁ विचलते; S विचलितः. — (L. 117) T₁ M अपकारापराद्धस्य. — (L. 118) K₄ T₂ G₁.₂.₄.₅ अपि; G₃.₆ M अभि- (for स हि). T₂ G₁.₂.₄.₅

स हि प्रच्छाद्यते दोषः शैलो मेघैरिवासितैः ।
यः स्यादनुप्राप्तवधस्तस्यागारं प्रदीपयेत् ।
अधनान्दाम्भिकांश्चोरान्विषये स्वे न वासयेत् । [120]
प्रत्युत्थानासनाद्येन संप्रदानेन केनचित् ।
प्रतिविश्रब्धघाती स्यात्तीक्ष्णदंष्ट्रो निमज्जकः ।
अशङ्कितेभ्यः शङ्केत शङ्कितेभ्यश्च सर्वशः ।
अशङ्क्याद्भयमुत्पन्नमपि मूलं निकृन्तति ।
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् । [125]
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ।
चारः सुविहितः कार्यं आत्मनश्च परस्य च ।
पाषण्डांस्तापसादींश्च परराष्ट्रेषु योजयेत् ।
उद्यानेषु विहारेषु देवतायतनेषु च ।
पानागारेषु रथ्यासु सर्वतीर्थेषु चाप्यथ । [130]
चत्वरेषु च द्यूतेषु पर्वतेषु वनेषु च ।
समवायेषु सर्वेषु सरित्सु च विचारयेत् ।
वाचा भृशं विनीतः स्याद्धृदयेन तथा क्षुरः ।
श्लक्ष्णपूर्वाभिभाषी स्यात्सृष्टो रौद्रेण कर्मणा ।
अञ्जलिं शपथं सान्त्वं शिरसा पादवन्दनम् । [135]

आशाकरणमित्येकं कर्तव्यं भूतिमिच्छता ।
सुपुष्पितः स्यादफलः फलवान्स्याद्दुरारुहः ।
आमः स्यात्पक्वसंकाशो न च जीर्येत कर्हिचित् ।
त्रिवर्गे त्रिविधा पीडा अनुबन्धास्तथैव च ।
अनुबन्धाः शुभा ज्ञेयाः पीडास्तु परिवर्जयेत् । [140]
धर्मं विचरतः पीडा सापि द्राभ्यां नियच्छति ।
अर्थः स्यादर्थलुब्धस्य कामस्यातिप्रवर्तिनः ।
अगर्वितात्मा युक्तश्च सान्त्वयुक्तोऽनसूयिता ।
अवेक्षितार्थः शुद्धात्मा मन्त्रयीत द्विजैः सह ।
कर्मणा येन तेनेह मृदुना दारुणेन वा । [145]
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ।
न संशयमनारूढो नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ।
यस्य बुद्धिः परिभवेत्तमतीतेन सान्त्वयेत् ।
अनागतेन दुर्बुद्धिं प्रत्युत्पन्नेन पण्डितम् । [150]
योऽरिणा सह संधाय शयीत कृतकृत्यवत् ।
स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते ।
मन्त्रसंवरणे यत्नः सदा कार्योऽनसूयता ।

धनैरर्कं (*for* शैलो मेघैर्). — M om. lines 119–20. — (L. 119) T₂ G यस्य स्यात्तु वधः प्राप्तस्तस्यागारोपदीपनं. — (L. 120) N₂ B (except B₈) Dn T₂ नास्तिकान्; T₂ G भिक्षुकान् (for दाम्भिकान्). T G विषकर्मसु योजयेत्. — (L. 121) S (except T₁ G₃.₆) प्रत्युत्थानाभिवादाभ्यां. — (L. 122) S प्रतिप्रच्छन्नघाती. D₅ S °दंष्ट्र इवोरगः. — (L. 123) B₆ D₄.₅ S (except T₁ G₃.₆) अशंकिताच्च. S (except T₁ G₃.₆) नित्यं शंकेत शंकितात्. — (L. 124) T₂ G (except G₃.₆) शंकिताद्भयमुत्पन्नं समूलमपि कृंतति. — (L. 126) S (except T₁) आप्नोति (for उत्पन्नं). S (except T₁) तस्मात् सर्वत्र नाश्वसेत् (G₁–₄ सर्वान्न विश्वसेत्). — (L. 127) B₁.₃ T₂ G₁.₂.₄.₅ चारस्तु (B₁.₃ °रः सु-) विदितः का°; G₃.₆ चारास्तु विदिताः कार्याः; M (except M₅) चारैः सुवित्तं यत्कार्यं. — (L. 128) T₂ G₁.₂.₄.₅ M पाषंडादीनविज्ञातान्; G₃.₆ पाषंडब्राह्मणादींश्च. — After line 128, T G (except G₃.₆) ins.:

स्वराष्ट्रे विदितांश्चारान्परीक्षार्थं मुहुर्मुहुः ।
स्वकीयान्वीरदोषेषु रक्षार्थं विसृजेन्नृपः ।

— (L. 130) N₁ V₁ B D₈ D₂.₄ वेश्यासु; T₂ G₁–₅ देशेषु; M वा राजन्. S (except T₁) चत्वरेषु सभासु च. — (L. 131) N₁.₂ Dn D₁ कूपेषु (for द्यूतेषु). T₂ G₁.₂.₄.₅ M द्यूतेषु जनपातेषु (M °वादेषु); G₃.₆ ब्राह्मणायतने द्यूते. — (L. 132) S (except T₁) तीर्थेषु (for सर्वेषु). — (L. 134) N₂ V₁ B₃.₆ Dn D₁.₂.₄.₅ T₁ स्मित-; T₂ G₁.₂.₄.₅ M मृदु-; G₃.₆ शुद्धं (for श्लक्ष्ण-). B₃ D₈ S रौद्राय कर्मणे. — N₁ om. lines 135–146. — (L. 135) K₄ N₂.₃ V₁ B₁ Dn D₄.₅ अंजलिः शपथः. — (L. 136) T₂ G₁.₄.₅ अत्र; G₂.₃.₆ M एतत् (for एवं). — (L. 137) M पुष्पितः स्यादनारूढो. S दुरारोहः फलान्वितः. — (L. 138) S (except T₁) कस्यचित्. — (L. 140) S °बंधांस्तु सेवेत. — (L. 141) S (except T₁) धर्मोतिचरितः पीडां सह द्रा°. — (L. 142) N₂ B₁m.₃ Dn₃ G₂ M₃.₅ अर्थे चाप्यर्थ°; D₈ Dn₂ D₂ T₂ G₃–₆ M₆–₈ अर्थश्चाप्य(D₈ °त्य)र्थ°. N₂ B₁m.₃ Dn₃ कामं चातिप्र°; S कामश्चातिप्रसंगिनः. — (L. 143) S (except T₁ G₃.₆) सात्वशीलेन चोज्ज्वलः (M °लोन्वपेक्षिता). — (L. 144) S मंत्रयेत्तद्विधैः (T₂ G₃.₆ °येत द्विजैः; M₆–₈ °येद्विविधैः) सह. — (L. 145) N₂ V₁ Dn₁.₃ तेनैव; Dn₂ T G₁.₂.₄.₅ M केनैव (केनापि *or* केनेह). G₃.₆ मृदुना केनचिद्राजन्कर्मणा दा°. — (L. 146) S (except T₁ G₃.₆) पश्चाद्धर्मं समाचरेत्. — (L. 147) T₂ G (except G₃.₆) असंशयम्. K₄ N₁.₂ Dn D₁.₂ S अनारुह्य (G₁.₂.₄.₅ अथारुह्य). — (L. 148) T₂ G₁.₂.₄.₅ वा न वा (for पश्यति). — (L. 149) T₂ G₁ यः सुबुद्धिं; G₂.₄ यं सुबुद्ध्या; G₃ M₆–₈ यः स्वबुद्धिं; G₅ ऋजुबुद्धिं. G₆ बुद्धिं परिभवेत्तसादतीतेन हि सां°. — (L. 151) G₃.₆ वैरिणा संधिमास्थाय. — (L. 152) S (except T₁) पतनेन (G₃ M °त्रेव) प्रबुध्यते. — T₂ G₁.₂.₄.₅ ins. after line 153:

न रात्रौ मन्त्रयेद्विद्वान्न च कैश्चिदुपासितः ।
प्रासादाग्रे शिलाग्रे वा विशाले विजनेऽपि वा ।
समन्तात्तत्र पश्यद्भिः सहासीरेव मन्त्रयेत् ।
नैव संवेशयेत्तत्र मन्त्रवेश्मनि शारिकाम् ।
शुकान्वा शारिका वापि बालमूर्खजडानपि । [5]

आकारश्चात्मनो रक्ष्यश्चारेणाप्यनुपालितः ।
नाच्छित्त्वा परमर्माणि नाकृत्वा कर्म दारुणम् । [155]
नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियम् ।
कार्शितं व्याधितं क्लिन्नमपानीयमघासकम् ।
परिविश्वस्तमन्दं च प्रहर्तव्यमरेर्बलम् ।
नार्थिकोऽर्थिनमभ्येति कृतार्थे नास्ति संगतम् ।
तस्मात्सर्वाणि कार्याणि सावशेषाणि कारयेत् । [160]
संग्रहे विग्रहे चैव यत्नः कार्योऽनसूयता ।
उत्साहश्चापि यत्नेन कर्तव्यो भूतिमिच्छता ।
नास्य कृत्यानि बुध्येरन्मित्राणि रिपवस्तथा ।
आरब्धान्येव पश्येरन्सुपर्यवसितानि च ।
भीतवत्संविधातव्यं यावद्भयमनागतम् । [165]
आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् ।
दण्डेनोपनतं शत्रुमनुगृह्णाति यो नरः ।
स मृत्युमुपगृह्यास्ते गर्भमश्वतरी यथा ।
अनागतं हि बुध्येत यच्च कार्यं पुरः स्थितम् ।
न तु बुद्धिक्षयात्किंचिदतिक्रामेत्प्रयोजनम् । [170]
उत्साहश्चापि यत्नेन कर्तव्यो भूतिमिच्छता ।
विभज्य देशकालौ च दैवं धर्मादयस्त्रयः ।
नैःश्रेयसौ तु तौ ज्ञेयौ देशकालाविति स्थितिः ।
तालवत्कुरुते मूलं बालः शत्रुरुपेक्षितः ।
गहनेऽग्निरिवोत्सृष्टः क्षिप्रं संजायते महान् । [175]
अग्निं स्तोकमिवात्मानं संधुक्षयति यो नरः ।
स वर्धमानो ग्रसते महान्तमपि संचयम् ।
आशां कालवतीं कुर्यात्कालं विघ्नेन योजयेत् ।
विघ्नं निमित्ततो ब्रूयान्निमित्तं चापि हेतुतः ।
क्षुरो भूत्वा हरेत्प्राणान्निशितः कालसाधनः । [180]
प्रतिच्छन्नो लोमवाही द्विषतां परिकर्तनः ।
पाण्डवेषु यथान्यायमन्येषु च कुरूद्वह ।
वर्तमानो न मज्जेस्त्वं तथा कृत्यं समाचर ।
सर्वकल्याणसंपन्नो विशिष्ट इति निश्चयः ।
तस्मात्त्वं पाण्डुपुत्रेभ्यो रक्षात्मानं नराधिप । [185]
भ्रातृभ्यो बलिनो यस्मात्पाण्डुपुत्रा नराधिप ।
ब्रवीमि तस्माद्विस्पष्टं यत्कर्तव्यमरिंदम ।
सपुत्रः शृणु तद्राजञ्श्रुत्वा च भव यत्नवान् ।
यथा भयं न पाण्डुभ्यस्तथा कुरु नराधिप ।

प्रविष्टानपि निर्वास्य मन्त्रयेद्धार्मिकैर्द्विजैः ।
नीतिशैर्न्यायशास्त्रैश्च इतिहासे सुनिष्ठितैः ।
रक्षां मन्त्रस्य निश्छिद्रां मन्त्रान्ते निश्चयेत्स्वयम् ।
वीरोपवर्णितात्तस्माद्धर्मार्थाभ्यामथात्मना ।
एकेन वाथ विप्रेण ज्ञातबुद्धिर्विनिश्चयेत् । [10]
तृतीयेन न चान्येन व्रजेन्निश्चयमात्मवान् ।
षड्भिर्गौश्छिद्यते मन्त्र इति नीतिषु पठ्यते ।
निःसृतो नाशयेन्मन्त्रो हस्तप्राप्तामपि श्रियम् ।
स्वमतं च परेषां च विचार्य च पुनः पुनः ।
गुणवद्वाक्यमादद्यान्नैव कुप्येद्विचक्षणः । [15]

— (L. 154) Ñ1.2 Dn D1 T1 आकारमभिरक्षेत; T2 G (except G3.6) M °रं चात्मनो रक्ष्यं. T2 G (except G3.6) चारयोग्यं च सर्वदा; M विवृतं कार्यनाशनं. — (L. 155) S (except T1) दुष्करं (for दारुणं). — (L. 156) G1.4.5 प्राप्नोति महतीं लक्ष्मीं नाहत्वा मत्स्यबंधनात्. — (L. 157) S (except T1 G1.3.6) तृषितं (for व्याधितं). T2 G2–4 शांतं; G1.5.6 M श्रांतं (for क्लिन्नं). T2 G1.2.4.5 M विपरीतम् (for अपानीयम्). K4 S (except T1) अनायकं (for अघा°). — (L. 158) K4 Ñ1 V1 T G °स्तमल्पं च; B1.3.5 °स्तमार्तं च; D3 °स्तमत्तं च; D2 मत्तं च परिविश्वस्तं; M °स्तकल्पं च. S रिपोर् (for अरेर्). — (L. 159) T G नानर्थकेर्थबंधोस्ति. M न हि कश्चित्कृते कार्ये कर्तारं समवेक्षते. — After line 159, K4 ins.:

अनागतं तु तत्सर्वं प्रयत्नेन विचारयेत् ।

— (L. 160) Dn D1.5 T1 साध्यानि (for कार्याणि). — (L. 161) T2 G निग्रहे (for वि°). — (L. 162) S वि(T1 सं)ग्रहः कालयुक्तश्च. — (L. 167) T G दैवेन (for दण्डेन). K4 B3 T G उपहतं; N3 उपहितं; V1 उपगतं. T2 G सं(G3.6 प्र)गृह्णाति यदा नृपः. — (L. 168) K4 T G उपगृह्णाति; Ñ1.2 V1 Dn D1.4.5 उपगृह्णीयाद्. — (L. 169) K4 T2 G उपस्थितं. — (L. 170) K4 S अतिक्रांतमपेक्षयेत् (T1 G1.3.6 °मवेक्ष्यते; M3.6–8 °मवेक्षयेत्; M5 °मुपेक्षयेत्). — S (except T1) om. line 171, which is a repetition of 162 (*q. v.*) — (L. 172) S सेव्या (for दैवं). — (L. 173) S निःश्रेयसौ हि तौ ज्ञेयाविह चामुत्र च स्थितौ. — (L. 174) S बलवत्कुरुते रूपं बाल्याच्छत्रुरु°. — (L. 175) T2 G1.2.4.5 संपद्यते; M °दह्यते. — (L. 176) S पंडितः (for यो नरः). — After line 177, S ins.:

आदावेव ददानीति प्रियं ब्रूयान्निरर्थकम् ।
[T1 M आदातव्यं न दातव्यं.]

— (L. 180) T2 G दहन्नेव; M दशन्नेव (for हरेत्प्राणान्). T2 G3.5.6 कटुवारितः; G1 कालसारतं; G2.4 M कटुकायनः. — (L. 181) Dn लोमहारी. G (except G4) M प्रच्छन्नो रोमवापी (M °घाती) स्यात्. M द्विषतामपकारिणां. — (L. 182) S पांडवांश्च तथा राजन्न्यांश्चापि कुरून्प्रति. — (L. 184) Om. in T G2.4.5 M. G1.3.6 न हि कुर्यात्समुत्सन्नान्विनष्टा इति निश्चयं. — (L. 185) G (except G3.6) M विशेषतः (for नरा°). — (L. 186) Ñ3 Dn D1.2 S भ्रातृभ्या. S (except T1) बलवंतस्ते (for बलिनो यस्मात्). — Dn om. lines 187–9; Ñ3 D5 S (except T1) om. 188–9; S (except T1) om.

पश्चात्तापो यथा न स्यात्तथा नीतिर्विधीयताम्। [190]
वैशंपायन उवाच।
एवमुक्त्वा संप्रतस्थे कणिकः स्वगृहं ततः।
धृतराष्ट्रोऽपि कौरव्यः शोकार्तः समपद्यत।

Colophon.

K₄ Ñ V₁ B D T₁ cont.:

वैशंपायन उवाच।
ततः सुबलपुत्रस्तु राजा दुर्योधनश्च ह।
दुःशासनश्च कर्णश्च दुष्टं मन्त्रममन्त्रयन्।
ते कौरव्यमनुज्ञाप्य धृतराष्ट्रं नराधिपम्। [195]
दहने तु सपुत्रायाः कुन्त्या बुद्धिमकारयन्।
तेषामिङ्गितभावज्ञो विदुरस्त्वदार्शिवान्।
आकारेणैव तं मन्त्रं बुबुधे दुष्टचेतसाम्।
ततो विदितवेद्यात्मा पाण्डवानां हिते रतः।
पलायने मतिं चक्रे कुन्त्याः पुत्रैः सहानघः। [200]
ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम्।
ऊर्मिक्षमां दृढां कृत्वा कुन्तीमिदमुवाच ह।
एष जातः कुलस्यास्य कीर्तिवंशप्रणाशनः।
धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतम्।
इयं वारिपथे युक्ता तरङ्गपवनक्षमा। [205]
नौर्यया मृत्युपाशात्त्वं सपुत्रा मोक्ष्यसे शुभे।
तच्छ्रुत्वा व्यथिता कुन्ती पुत्रैः सह यशस्विनी।
नावमारुह्य गङ्गायां प्रययौ भरतर्षभ।
ततो विदुरवाक्येन नावं विक्षिप्य पाण्डवाः।
धनं चादाय तैर्दत्तमरिष्टं प्राविशन्वनम्। [210]
निषादी पञ्चपुत्रा तु जातुषे तत्र वेश्मनि।
कारणाभ्यागता दग्धा सह पुत्रैरनागसा।
स च म्लेच्छाधमः पापो दग्धस्तत्र पुरोचनः।
वञ्चिताश्च दुरात्मानो धार्तराष्ट्राः सहानुगाः।
अविज्ञाता महात्मानो जनानामक्षतास्तथा। [215]
जनन्या सह कौन्तेया मुक्ता विदुरमन्त्रितात्।
ततस्तस्मिन्पुरे लोका नगरे वारणावते।
दृष्ट्वा जतुगृहं दग्धमन्वशोचन्त दुःखिताः।
प्रेषयामासुः राज्ञे च यथावृत्तं निवेदितुम्।
संवृत्तस्ते महान्कामः पाण्डवान्दग्धवानसि। [220]
सकामो भव कौरव्य भुङ्क्ष्व राज्यं सपुत्रकः।
तच्छ्रुत्वा धृतराष्ट्रश्च सह पुत्रेण शोचयन्।
प्रेतकार्याणि च तथा चकार सह बान्धवैः।
पाण्डवानां तथा क्षत्ता भीष्मश्च कुरुसत्तमः।
जनमेजय उवाच।
पुनर्विस्तरशः श्रोतुमिच्छामि द्विजसत्तम। [225]
दाहं जतुगृहस्यैवं पाण्डवानां च मोक्षणम्।
सुनृशंसमिदं कर्म तेषां क्रूरोपसंहितम्।
कीर्तयस्व यथावृत्तं परं कौतूहलं मम।
वैशंपायन उवाच।
शृणु विस्तरशो राजन्ब्रुवतो मे परंतप।
दाहं जतुगृहस्यैतत्पाण्डवानां च मोक्षणम्। [230]

82

S (except G₃.₆) ins. after 1444*: D₄ (om. lines 21–36), after passage No. 81 above (cf. v. l. l. 130. 1):

धृतराष्ट्रस्तु वचनं श्रुत्वा सुमहदप्रियम्।
उवाच मतिमान्वाक्यं दुर्योधनमरिंदमम्।
जात्यन्धश्राप्यहं तात पाण्डुना पूजितो भृशम्।
राजानो यद्यपि श्रेष्ठा धर्महेतोर्भवन्ति हि।
प्रज्ञाचक्षुरनेत्रत्वादशक्तो राष्ट्रगोपने। [5]
न चान्धः परचक्राणि प्रतिव्यूहति संगरे।
अर्थशास्त्रं मयाधीतं साङ्गा वेदाश्च पुत्रक।
धार्तराष्ट्र स्वयं राज्ञा योद्धव्यं धर्मकाङ्क्षिणा।
रणे च मृत्युः स्वर्गाय राजन्यस्य विधीयते।
पुत्रसंक्रामितश्रीर्वा वासाय वनमाश्रयेत्। [10]
ज्येष्ठोऽयमिति राज्ये च स्थापितो विकलोऽपि सन्।
निर्जित्य परराष्ट्राणि पाण्डुर्मह्यं न्यवेदयत्।
कुलधर्मस्थापनाय ज्येष्ठोऽहं ज्येष्ठभाङ् च।
बहूनां भ्रातृणां (!) मध्ये श्रेष्ठो ज्येष्ठो हि श्रेयसा।

---

190. — (L. 192) T₂ G₁.₂.₄.₅ M तदा (M ततो) दुर्योधनो राजा; G₃.₆ तदा सपुत्रो राजा च. — Colophon. *Adhy. no.:* B₁ T₁ 137; Dn₂.n₃ 139; T₂ G₅ 86; G₁.₂.₆ 88; G₃ 87; G₄ M 85. — *S'loka no.:* Dn₂ 5635. — (L. 229) Dn D₁.₅ T₁ वदतो (for ब्रुवतो).

82

(L. 3) M (except M₅) पूर्वं (for तात). — (L. 8) D₄ M धर्मकारणात्. — (L. 10) D₄ M तपसे (for वासाय). T₂ G₁.₂.₄.₅ om. lines 13–16. — (L. 13) M₃.₅ धर्मसंस्थापनार्थाय; M₈(*inf. lin.*).₆₋₈ °धर्मं समास्थातुं. — (L. 18) D₄ M लोकद्वयहितैषिणः (for the posterior half). — (L. 19) D₄ M धर्मे च प्रसवे चैव ज्येष्ठाः पांडुसुतास्तदा. — M om. lines 20–21, and after line 23 ins.:

ततः शांतनवो भीष्मः सत्यवान्दृढविक्रमः।
पूर्वमुक्त्वा तथा वाचं नाद्य राज्यं ग्रहीष्यति।
विदुरः करणत्वाच्च पाण्डवस्त्वभिषिच्यताम्।

— (L. 24) Cf. 1. 129. 7. G₁.₂ M पांडवज्येष्ठं. — Lines 26–27 = 1438*. Lines 28–29 = (var.) 1. 129. 8. — L. 35 = (var.) 1. 130. 15[cd].

कनीयानपि स ज्येष्ठः श्रेष्ठः श्रेयान्कुलस्य वै । [15]
तस्माज्ज्येष्ठश्च श्रेष्ठश्च पाण्डुर्धर्मभृतां वरः ।
तस्य पुत्रा गुणैः ख्याता अर्थे च कृतनिश्चयाः ।
कृतास्त्रा लब्धलक्षाश्च पाण्डुपुत्रा महारथाः ।
धर्मे च नीतिशास्त्रे च तथा च निरताः सदा ।
पौरजानपदानां च प्रीतिरेषु विशेषतः । [20]
कथं नामोत्सहे वत्स नगराच्च विवासितुम् ।

दुर्योधनः ।

पौरजानपदैः सार्धं विप्रा जल्पन्ति नित्यशः ।
प्रज्ञाचक्षुरनेत्रत्वादशक्तो राज्यरक्षणे ।
ते वयं पाण्डवश्रेष्ठं तरुणं वृद्धशीलिनम् ।
राजानमभिषिञ्चामः सत्यं करुणवेदिनम् । [25]
स हि वृद्धानमात्यांश्च ज्ञातींश्चापि महायशाः ।
सत्कृत्य नित्यं पूजार्हान्पाण्डवः पूजयिष्यति ।
पितामहं शांतनवं धृतराष्ट्रं च धर्मतः ।
सपुत्रं विविधैर्भोगैर्वासयिष्यति मानितः ।
इत्येवं विलपन्ति स्म वदन्ति च जना मुहुः । [30]
राजन्दुःखशताविष्टाः पौराः शतसहस्रशः ।
तेषां श्रुत्वा तु वाक्यानि पौराणामशिवानि च ।
युधिष्ठिरानुरक्तानां परितप्स्यामि भारत ।
धृतराष्ट्रस्तु पुत्रस्य श्रुत्वा वाक्यमुवाच ह ।
यथा न वाच्यतां पुत्र गच्छेम च तथा कुरु । [35]

वैशंपायनः ।

एवं तस्य वचः श्रुत्वा प्रविश्य च गृहं महत् ।

☞ In M the above passage is followed by adhy. 129-130; in T₂ G₂.₄.₅ by a *repetition* (with v. l.) of the same two adhy. (for the text of the repetition of adhy. 129, see under No. 83 below); and finally, in G₁ by adhy. 131! See the conspectus of interpolations on p. 573.

83

☞ There is a slight confusion in the notes on page 573 as regards the *repetition* of adhy. 129-130 in T₂ G₂.₄.₅, to which attention must be drawn here. The v. l. given under adhy. 129-130 of the constituted text are for the first occurrence of adhy. 129 and for the second occurrence of adhy. 130; accordingly the texts given *here*, in this App. are that of the first occurrence of 130 and the second occurrence of 129.

T₂ G₂.₄.₅ ins. after (the *first* occurrence of) adhy. 129 a passage which is a repetition (with v. l.) of adhy. 130 (see conspectus on p. 573):

वैशंपायनः ।

धृतराष्ट्रस्तु पुत्रस्य श्रुत्वा वचनमीदृशम् ।
मुहूर्तमिव संचिन्त्य दुर्योधनमथाब्रवीत् ।

धृतराष्ट्रः ।

धर्मवृत्तः सदा पाण्डुः सुवृत्तो मयि गौरवात् ।
सर्वेषु ज्ञातिषु तथा मदीयेषु विशेषतः ।
नात्र किंचन जानाति भोजनानि चिकीर्षति । [5]
निवेदयति धर्मस्थो मयि धर्मभृतां वरः ।
तस्य पुत्रो यथा पाण्डुस्तदा धर्मपरः सदा ।
गुणवाँल्लोकविख्यातो नगरे च प्रतिष्ठितः ।
स कथं शक्यतेऽस्माभिरपकृष्टुं नरर्षभ ।
राज्यमेष हि नः प्राप्तः ससहायो विशेषतः । [10]
भ्रातृभिः पाण्डुनामात्यं बलं च सततं धृतम् ।
धृताः पुत्राश्च पौत्राश्च तेषामपि विशेषतः ।
ते तथा सत्कृतास्तात विषये पाण्डुना नराः ।
कथं युधिष्ठिरस्यार्थे न नो हन्युः सबान्धवान् ।
नैते विषयमिच्छेयुर्धर्मत्यागे विशेषतः । [15]
ते वयं कौरवेयाणामेतेषां च महात्मनाम् ।
कथं न वाच्यतां तात गच्छेम जगतस्तथा ।

दुर्योधनः ।

मध्यस्थः सततं भीष्मो द्रोणपुत्रो मयि स्थितः ।
यतः पुत्रस्ततो द्रोणो भविता नात्र संशयः ।
कृपः शारद्वतश्चैव यत एव वयं ततः । [20]
भागिनेयं ततो द्रौणिं न लक्ष्यति कथंचन ।
क्षत्तार्थबद्धस्त्वत्सासु प्रच्छन्नस्तु यतः परे ।
न त्वेकः स समर्थोऽस्मान्पाण्डवार्थे प्रबाधितुम् ।
सुविस्रब्धान्पाण्डुसुतान्सह मात्रा विवासय ।
वारणावतमद्यैव नात्र दोषो भविष्यति । [25]
विनिद्राकरणं घोरं हृदि शल्यमिवार्पितम् ।
शोकपावकमुद्भूतं कर्मणा तेन नाशय ।

Colophon.

☞ This passage is followed by passage No. 81.

T₂ G₂.₄.₅ ins. after passage No. 82 above, a passage which is a repetition (with v. l.) of adhy. 129 (see conspectus on p. 573):

वैशंपायनः ।

प्राणाधिकं भीमसेनं कृतविद्यं धनंजयम् ।
दुर्योधनो लक्षयित्वा पर्यतप्यत दुर्मतिः ।
तथा वैकर्तनः कर्णः शकुनिश्चापि सौबलः ।
अनेकैरप्युपायैस्ते जिघांसन्ति स्म पाण्डवान् ।
पाण्डवाश्चापि तत्सर्वं प्रतिचक्रुर्यथाबलम् । [5]
उद्भावनमकुर्वाणा विदुरस्य मते स्थिताः ।
गुणैः समुदितान्दृष्ट्वा पौराः पाण्डुसुतांस्तदा ।
कथयांचक्रिरे तेषां गुणान्संसत्सु भारत ।

राज्यप्राप्तिं च संप्राप्तं ज्येष्ठं पाण्डुसुतं तदा ।
कथयन्ति स्म संभूय चत्वरेषु सभासु च । [10]
प्रज्ञाचक्षुरचक्षुष्मान्धृतराष्ट्रो जनेश्वरः ।
राज्यं च प्राप्तवान्पूर्वं स कथं नृपतिर्भवेत् ।
तथा भीष्मः शांतनवः सत्यसंधो जितेन्द्रियः ।
प्रत्याख्याय तदा राज्यं नाद्य जातु ग्रहीष्यति ।
ते वयं पाण्डवश्रेष्ठं तरुणं वृद्धशीलिनम् । [15]
अभिषिञ्चाम साध्वत्र सत्यं करुणवेदिनम् ।
स हि भीष्मं शांतनवं धृतराष्ट्रं च बुद्धिमान् ।
सपुत्रं विविधैर्भोगैर्योजयिष्यति पूजयन् ।
तेषां दुर्योधनः श्रुत्वा तानि वाक्यानि भारत ।
युधिष्ठिरानुरक्तानां पर्यतप्यत दुर्मतिः । [20]
संतप्यमानो दुष्टात्मा तेषां वाचो न चक्षमे ।
ईर्ष्यया चापि संतप्तो धृतराष्ट्रमुपागमत् ।
ततो विरहितं दृष्ट्वा पितरं प्रतिपूज्य च ।
दृष्ट्वा पाण्डोः पुरावृत्तं पश्चादिदमुवाच ह ।
श्रुता मे जल्पतां वाचः पौराणामशिवा गिरः । [25]
आगतोऽहं महाप्राज्ञ पादमूलं वचः शृणु ।
त्वामनादृत्य भीष्मं च पतिमिच्छन्ति पाण्डवम् ।
सौम्ये मतिश्च भीष्मस्य न च राज्यं बुभूषति ।
तस्य पुत्रो ध्रुवं प्राप्तस्तस्य तस्येति चापरः ।
ते वयं राजवंशेन हीनाः सह सुतैरपि । [30]
अविज्ञाता भविष्यामो लोकस्य जगतीपते ।
सततं निरयं प्राप्ताः परपिण्डोपजीविनः ।
न भवेम यथा राजंस्तथा शीघ्रं विधीयताम् ।
अथ त्वमपि राजेन्द्र राजवंशो भविष्यसि ।
यदि हि त्वं पुरा राज्ये भवानास्थापितो नृपः । [35]
ध्रुवं लप्स्यामहे राज्यं वयमप्यवशेन ते ।
स तथा कुरु कौरव्य रक्ष्या वंश्या यथा वयम् ।
संप्राप्नुमः स्वयं राज्यं मत्रयस्व सहानुगैः ।

Colophon.

तस्मात्सहैव वत्स्यामो गलन्यस्तपदा वयम् ।
अस्माकं कालमासाद्य राज्यमाच्छिद्य शत्रुतः ।
अर्धं पैतृकमस्माकं सुखं भोक्ष्याम शाश्वतम् ।
धृतराष्ट्रवचोऽस्माभिः किमर्थमनुमन्यते ।
तेभ्यो भीत्यान्यथा गन्तुं दौर्बल्यं ते कुतो नृप । [10]
आपत्सु रक्षितास्माकं विदुरोऽस्ति महामतिः ।
मध्यस्थ एव गाङ्गेयो राज्यभोगपराङ्मुखः ।
बाह्लिकप्रमुखा वृद्धा मध्यस्था एव सर्वदा ।
अस्मदीयो भवेद्द्रोणः फल्गुनप्रेमसंयुतः ।
तस्मात्सहैव वस्तव्यं न गन्तव्यं पृथङ् नृप । [15]
अथवास्मासु ते कुर्युः किमशक्ताः पराक्रमैः ।
क्षुद्राः कपटिनो धूर्ता जाग्रत्सु मनुजेश्वर ।
किं न कुर्युः पुरा मह्यं किं न दत्तं पुरा विषम् ।
आशीविषैर्महाघोरैः सर्पैस्तैः किं न दंशितः ।
प्रमाणकोट्यां संनद्ध निद्रापरवशे मयि । [20]
सर्पैर्दष्टविषैर्घोरैर्गङ्गायां शूलसंततौ ।
किं तैर्न पातितो भूप तदा किं मृतवानहम् ।
आपत्सु च सुघोरासु दुष्प्रयुक्तासु पापिभिः ।
अस्मानरक्षद्यो देवो जगद्यस्य वशे स्थितम् ।
चराचरात्मकं सोऽद्य यातः क्व नु नृपोत्तम । [25]
यावत्सोढव्यमस्माभिस्तावत्सोढास्मि यत्नतः ।
यदा न रक्ष्यतेऽस्माभिस्तदा पश्याम नो हितम् ।
किं द्रष्टव्यं तदास्माभिर्विगृह्य तरसा बलात् ।
सान्त्ववादेन दानेन भेदेनापि यतामहे ।
अर्धराज्यस्य संप्राप्त्यै ततो दण्डः प्रशस्यते । [30]
तस्मात्सहैव वस्तव्यं तन्मनोर्पितशल्यवत् ।
दर्शयित्वा पृथग्वापि न गन्तव्यं सुभीतवत् ।

☞ In the footnotes to 1. 134. 17–18 it has been erroneously stated that this passage occurs in G1.2 after stanza 17. In all four MSS. it occurs at the same place, namely, after stanza 18.

84

After 1. 134. 18, T1 G1.2.4 ins.:

दर्शयित्वा पृथग्गन्तुं न कार्यं प्रतिभाति मे ।
अशुभं वा शुभं वापि तैर्वसाम सहैव तु ।
अद्य प्रभृति चास्मासु गतेषु भयविह्वलः ।
रूढमूलो भवेद्राज्ये धार्तराष्ट्रो जनेश्वरः ।
तदीयं च भवेद्राज्यं तदीयाः स्युः प्रजा इमाः । [5]

85

K4 N V1 B D M ins. after adhy. 136: T G, after 1. 137. 17:

वैशंपायन उवाच ।
एतस्मिन्नेव काले तु यथासंप्रत्ययं कविः ।
विदुरः प्रेषयामास तद्वनं पुरुषं शुचिम् ।
स गत्वा तु यथोद्देशं पाण्डवान्ददृशे वने ।

85

G1.4 ins. after line 2: G2, after line 129 of passage No. 86 below:

श्रुत्वा तं खनकेनोक्तं कौन्तेयोदन्तमादितः ।
आत्मनः पाण्डवानां च विश्वास्य ज्ञानपूर्वकम् ।
गङ्गासंतरणार्थाय ज्ञानाभिज्ञानवाचकम् ।

— (L. 3) K4 Ñ1 D5 यथोद्दिष्टं; S (except T1) वनोद्देशे. K4 N1 S (except T1) वने प्रेक्षत (K4 Ñ1 °पश्यत) पांडवान्.

जनन्या सह कौरव्य मापयानान्नदीजलम् ।
विदितं तन्महाबुद्धेर्विदुरस्य महात्मनः । [5]
ततस्तस्यापि चारेण चेष्टितं पापचेतसः ।
ततः संप्रेषितो विद्वान्विदुरेण नरस्तदा ।
पार्थानां दर्शयामास मनोमारुतगामिनीम् ।
सर्ववातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
शिवे भागीरथीतीरे नरैर्विस्रम्भिभिः कृताम् । [10]
ततः पुनरथोवाच ज्ञापकं पूर्वचोदितम् ।
युधिष्ठिर निबोधेदं संज्ञार्थं वचनं कवेः ।
कक्षघ्नः शिशिरघ्नश्च महाकक्षे बिलौकसः ।
न हन्तीत्येवमात्मानं यो रक्षति स जीवति ।
तेन मां प्रेषितं विद्धि विश्वस्तं संज्ञयानया । [15]
भूयश्चैवाह मां क्षत्ता विदुरः सर्वतोऽर्थवित् ।
कर्णं दुर्योधनं चैव भ्रातृभिः सहितं रणे ।
शकुनिं चैव कौन्तेय विजेतासि न संशयः ।
इयं वारिपथे युक्ता नौरप्सु सुखगामिनी ।
मोचयिष्यति वः सर्वानस्मादेशान्न संशयः । [20]
अथ तान्व्यथितान्दृष्ट्वा सह मात्रा नरोत्तमान् ।
नावमारोप्य गङ्गायां प्रस्थितानब्रवीत्पुनः ।
विदुरो मूर्ध्न्युपाघ्राय परिष्वज्य च वो मुहुः ।
अरिष्टं गच्छताव्यग्राः पन्थानमिति चाब्रवीत् ।
इत्युक्त्वा स तु तान्वीरान्पुमान्विदुरचोदितः । [25]
तारयामास राजेन्द्र गङ्गां नावा नरर्षभान् ।
तारयित्वा ततो गङ्गां पारं प्राप्तांश्च सर्वशः ।
जयाशिषः प्रयुज्याथ यथागतमगाद्धि सः ।
पाण्डवाश्च महात्मानः प्रतिसंदिश्य वै कवेः ।
गङ्गामुत्तीर्य वेगेन जग्मुर्गूढमलक्षिताः । [30]

In T G this passage is followed by a *repetition* of 1. 137. 17^{cd}, a sure indication that it is an interpolation.

Colophon.

— (L. 4) K$_4$ Ñ$_{1.3}$ S (*except* T$_1$) सह मात्रा नरव्याघ्रान्. K$_4$ Ñ$_{1.3}$ D$_5$ प्रयाताज्जाह्नवीं नदीं; T$_2$ G M$_{8.5}$ अनयज्जाह्नवीं ततः; M$_{6-8}$ अनर्हां यादवीं तदा. — After line 4, D$_4$ (marg. *sec. m.*) ins.:

उवाच चैनान्निभृतं पाण्डवान्भयपीडितान् ।

— (L. 6) N$_1$ S (except T G$_8$) तत्रस्थस्यापि चा°. K$_4$ N$_1$ D$_5$ S (except T$_1$) पापानां वै चिकीर्षितं. — (L. 7) K$_4$ Ñ$_{2.3}$ V$_1$ D$_3$ Dn$_2$ D$_4$ प्रवासितो; Ñ$_1$ D$_5$ संप्रहितो. S (except T$_1$) ततो धर्मविदा तेन प्रहितः पुरुषः शिवः. — (L. 8) Om. in S (except T$_1$). Ñ$_1$ B (except B$_6$) D$_5$ पार्थान्संदर्श°. — (L. 9) T$_2$ G सर्वगां जवनां नावं. T$_2$ G युक्तारित्रां प°; M युक्तां चित्रप°. — (L. 10) K$_4$ Ñ$_1$ D$_5$ S (except T$_1$) विश्वास्यै(K$_4$ Ñ$_1$ D$_5$ °श्वस्तै)र्मनुजैर्वृतां. S (except T$_1$), which om. lines 11–12, ins. after line 10:

पाण्डवान्दर्शयामास वचनं चेदमब्रवीत् ।

— (L. 13) S कक्षघ्नं शिशिरघ्नं च महाक(G$_{1-3}$ M$_8$ °कु)क्षिबिलौकसं. S (except T$_1$), which om. line 14, ins. after line 13:

बोद्धव्यमिति यत्प्राह विदुरस्तदिदं तथा ।

— (L. 15) T$_2$ G विश्वस्तं वै (G$_2$ नौरेषा तु) महात्मना; M विश्वासजननाय वै (M$_8$ विश्वासार्थमिहागधाः). — (L. 16) T$_2$ G अब्रवीच्च महाबाहुः (*or* °बुद्धिः). K$_4$ D$_3$ S (except T$_1$) सर्वधर्मवित्; Ñ$_{2.3}$ B (except B$_6$) सर्वशास्त्रवित्. — After line 16, K$_4$ B$_8$ (both with v. l.), D$_4$ S (except T$_1$) ins.:

अधिक्षिपन्धार्तराष्ट्रं सभ्रातृकमुदारधीः ।

— (L. 17) K$_4$ S (except T$_1$) कर्णं च दुर्मतिं क्रूरं शकुनिं चापि सौबलम्. — (L. 18) S (except T$_1$) दुर्योधनः कुलस्यास्य कीर्तिधर्मप्रणाशनः. — After line 18, K$_4$ S (except T$_1$) ins.:

गान्धारराजसहितः पितरं पातयिष्यति ।

K$_4$ S (except T$_1$) cont.: D$_4$ ins. after line 18:

राजा चाप्यपरिज्ञातः स्नेहबद्धो दुरात्मसु ।
धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतम् ।

T$_2$ G cont.:

वैशंपायनः ।
पाण्डवाश्चापि गत्वाथ गङ्गायास्तीरमुत्तमम् ।
निषादाधिपतिं वीरं दाशं परमधार्मिकम् ।
दीपिकाभिः कृतालोकं मार्गमाणं च पाण्डवान् ।
ददृशुः पाण्डवेयास्ते नाविकं त्वरयान्वितम् ।
निषादस्तत्र कौन्तेयानभिज्ञानं न्यवेदयत् । [5]
विदुरस्य महाबुद्धेर्म्लेच्छभाषादि यत्तदा ।
नाविकः ।
विदुरेणासि संदिष्टो दत्त्वा बहु धनं महत् ।
गङ्गातीरे निविष्टस्त्वं पाण्डवांस्तारयेति ह ।
सोऽहं चतुर्दशीमद्य गङ्गाया अविदूरतः ।
चारैरन्वेषयाम्यस्मिन्वने मृगगणान्विते । [10]
प्रभवन्तोऽथ भद्रं वो नावमारुह्य गम्यताम् ।
युक्तारित्रपताकां च निर्दिष्टद्रां मन्दिरोपमाम् ।

— (L. 19) K$_4$ S (except T$_1$) तथैव (for नौरप्सु). — (L. 20) S (except T$_1$) मृत्युपाशात्समातृकान्. — (L. 21) K$_4$ S (except T$_1$) ततस्तान् व्यथितान् (M सहितान्) सर्वान्सह मात्रा परंतपान्. — (L. 22) K$_4$ S (except T$_1$) प्रयातः (K$_4$ M प्रयातान्) पुनरब्रवीत्. — (L. 23) K$_4$ मुहुः; N V$_1$ Dn D$_{1.2.4}$ वचो (for च वो). — After line 24, T$_2$ G ins.:

86

After 1. 137. 16, S ins.:

ततः प्रव्यथितो भीष्मः पाण्डुराजसुतान्मृतान् ।
मात्रा सहेति ताञ्श्रुत्वा विललाप रुरोद च ।
हा युधिष्ठिर हा भीम हा धनंजय हा यमौ ।
हा पृथे सह पुत्रैस्त्वमेकरात्रेण स्वर्गता ।
मात्रा सह कुमारास्ते सर्वे तत्रैव संस्थिताः । [5]
न हि तौ नोत्सहेयातां भीमसेनधनंजयौ ।
तरसा वेगितात्मानौ निर्भेत्तुमपि मन्दिरम् ।
परासुत्वं न पश्यामि पृथायाः सह पाण्डवैः ।

(Here follows a colophon in M MSS. only.)

T G cont.:

सर्वथा विकृतं तत्तु यदि ते निधनं गताः ।
धर्मराजः स निर्दिष्टो ननु विप्रैर्युधिष्ठिरः । [10]
पृथिव्यां चरतां श्रेष्ठो भविता स धनंजयः ।
सत्यव्रतो धर्मदत्तः सत्यवाक् शुभलक्षणः ।
कथं कालवशं प्राप्तः पाण्डवेयो युधिष्ठिरः ।
आत्मानमुपमां कृत्वा परेषां वर्तते तु यः ।
सह मात्रा तु कौरव्यः कथं कालवशं गतः । [15]
परिपालितश्चिरं कालं फलकाले यथा द्रुमः ।
भग्नः स्याद्वायुवेगेन तथा राजा युधिष्ठिरः ।
यौवराज्याभिषिक्तेन पितुर्येनाहृतं यशः ।
आत्मनश्च पितुश्चैव सत्यधर्मार्यवृत्तिभिः ।
स ब्रह्मण्यः परप्रेक्षी हृदि शोकं निधाय मे । [20]
कालेन स हि संभग्नो धिक्कृतान्तमनर्थदम् ।
यच्च सा वनवासेन क्लेशिता दुःखभागिनी ।
पुत्रगृद्धुतया कुन्ती न भर्तारं मृता त्वनु ।
अल्पकालं कुले जाता भर्तुः प्रीतिमवाप या ।
दग्धाद्य सह पुत्रैः सा असंपूर्णमनोरथा । [25]
एतच्च चिन्तयानस्य बहुधा व्यथितं मनः ।
अवधूय च मे देहं हृदयेऽग्निर्न दीर्यते ।
पीनस्कन्धश्चारुबाहुर्मेरुकूटसमो युवा ।
मृतो भीम इति श्रुत्वा मनो न श्रद्दधाति मे ।
अतित्यागी च योगी च क्षिप्रहस्तो दृढायुधः । [30]
प्रवृत्तिमाँल्लब्धलक्ष्यो रथयानविशारदः ।
दूरपाती त्वसंभ्रान्तो महावीर्यो महास्त्रवित् ।
अदीनात्मा नरव्याघ्रः श्रेष्ठः सर्वधनुष्मताम् ।
येन प्राच्यास्तु सौवीरा दाक्षिणात्याश्च निर्जिताः ।
ख्यापितं येन शूरेण त्रिषु लोकेषु पौरुषम् । [35]
यस्मिञ्जाते विशोकाभूत्कुन्ती पाण्डुश्च वीर्यवान् ।
पुरंदरसमो जिष्णुः कथं कालवशं गतः ।
कथं तौ वृषभस्कन्धौ सिंहविक्रान्तगामिनौ ।
मर्त्यधर्ममनुप्राप्तौ यमावरिनिबर्हणौ ।

वैशंपायनः ।

तस्य विक्रन्दितं श्रुत्वा उदकं च प्रसिञ्चतः । [40]
देशकालं समाज्ञाय विदुरः प्रत्यभाषत ।
मा शोचस्त्वं नरव्याघ्र जहि शोकं महाव्रत ।
न तेषां विद्यते पापं प्राप्तकालं कृतं मया ।
तच्च तेभ्यः स उदकं विप्रषिञ्चतु भारत ।
सोऽब्रवीत्किंचिदुच्चार्य कौरवाणामशृण्वताम् । [45]
क्षत्तारमनुसंगृह्य बाष्पोत्पीडकलस्वरः ।

भीष्मः ।

कथं ते तात जीवन्ति पाण्डोः पुत्रा महारथाः ।
कथमस्मत्कृते पक्षः पाण्डोर्न हि निपातितः ।

इत्युक्त्वा तान्समारोप्य तारयामास पाण्डवान् ।

— (L. 25) S (except T1) इत्युक्ताः सह मात्रा ते तस्मान्मुक्ता महाभयात्. — S (except T1) om. lines 26-29. — (L. 30) K4 च भृशं; S (except T1) कौंतेयाः (for वेगेन). K4 S (except T1) वर्त्म जग्मुर्यथासुखं (G1.2 °मैहानिशि). — After line 30, T2 G ins.:

ततस्तां तत्र तीर्त्वा तु गङ्गां भागीरथीं नदीम् ।

— T G om. colophon.

86

In G1.2.4 the passage is preceded by:

विदुरो धृतराष्ट्रस्य जानन्सर्वं मनोगतम् ।
केनायं विधिना सृष्टः कौटिल्यः कपटालयः ।
इत्येवं चिन्तयन्प्राज्ञो विदुरो विदुषां वरः ।
लोकानां दर्शयन्दुःखं दुःखितैः सह बन्धुभिः ।
मनसा चिन्तयन्पार्थान्कियद्दूरं गमिष्यति ।
सहिता पाण्डवैः पुत्रैरिति चिन्तापरोऽभवत् ।

— (L. 11) T1 G1 °व्यां च नरश्रेष्ठो; G2.3.6 °व्यां च रथश्रेष्ठो. — After line 39, T1 G1.2.4 ins.:

क्व गता वत्सा मां वृद्धं विहाय भृशमातुरम् ।
हा कृष्ण वत्से वार्ष्णेयि निधाय हृदि मे शुचम् ।
वारणावतयात्रायां के स्युर्वः शकुनाः पथि ।
एवमल्पायुषो लोके भविष्यन्ति पृथासुताः ।
संशप्ता इति कैर्यूयं वत्सान्दर्शय मे विधे ।
ममैव नाथा मन्नाथा मम नेत्राणि पाण्डवाः ।
हा पाण्डवा मे हा वत्सा हा सिंहशिशवो मम ।
मातङ्गा हा मदोत्तुङ्गा हा ममानन्दवर्धनाः ।
मम हीनस्य युष्माभिः सर्वे लोकास्तमोवृताः ।
कदा द्रष्टास्मि कौन्तेयांस्तरुणादित्यवर्चसः ।
दृष्ट्वा युष्मान्कदा रंस्ये पूर्ववन्मम नन्दनाः ।
का गतिर्मे क्व वत्स्यामि कुतो द्रक्ष्यामि मे शिशून् ।
हा युधिष्ठिर हा भीम हा हा फल्गुन हा यमौ ।

कथं मत्प्रमुखाः सर्वे प्रमुक्ता महतो भयात्।
जननी गरुडेनेव कुमारास्ते समुद्धृताः। [50]

वैशंपायनः।

एवमुक्तस्तु कौरव्यः कौरवाणामशृण्वताम्।
आचचक्षे स धर्मात्मा भीष्मायाद्भुतकर्मणे।

विदुरः।

धृतराष्ट्रस्य शकुनेः राज्ञो दुर्योधनस्य च।
विनाशे पाण्डुपुत्राणां कृतो मतिविनिश्चयः।
तत्राहमपि च ज्ञात्वा तस्य पापस्य निश्चयम्। [55]
तं जिघांसुरहं चापि तेषामनुमते स्थितः।
ततो जतुगृहं गत्वा दहनेऽस्मिन्नियोजिते।
पृथायाश्च सपुत्राया धार्तराष्ट्रस्य शासनात्।
ततः खनकमाहूय सुरङ्गां वै बिले तदा।
सगृहां कारयित्वा ते कुन्त्या पाण्डुसुतास्तदा। [60]
निष्क्रामिता मया पूर्वं मा स्म शोके मनः कृथाः।
ततस्तु नावमारोप्य सहपुत्रां पृथामहम्।
दत्त्वाभयं सपुत्रायै कुन्त्यै गृहमदाहयम्।
तस्मात्ते मा स्म भूदुःखं मुक्ताः पापात्तु पाण्डवाः।
निर्गताः पाण्डवा राजन्मात्रा सह परंतपाः। [65
अग्निदाहान्महाघोरान्मया तस्मादुपायतः।
मा स्म शोकमिमं कार्षीर्जीवन्त्येव च पाण्डवाः।
प्रच्छन्ना विचरिष्यन्ति यावत्कालस्य पर्ययः।
तस्मिन्युधिष्ठिरं काले द्रक्ष्यन्ति भुवि मानवाः।
विमलं कृष्णपक्षान्ते जगच्चन्द्रमिवोदितम्। [70]
न तस्य नाशं पश्यामि यस्य भ्राता धनंजयः।
भीमसेनश्च दुर्धर्षो माद्रीपुत्रौ च भारत।

Colophon.

मा गच्छत निवर्तध्वं मयि कोपं विमुञ्चताम्।

— After line 48, T1 ins.

कथं पश्चात्त्वया क्षत्तः पाण्डोः पक्षः समुद्धृतः।;

while G8 ins.:

कथं तव कृतं पक्षः पाण्डोर्नापि निपातितः।

— For line 67, G1 reads:

भवान्भीष्म मनःशोकं मा कार्षीः पाण्डवान्प्रति।
मुक्ता जतुगृहादग्नेः सम्यग्जीवन्ति पाण्डवाः।

— After line 72, G8.6 ins. a colophon (*Adhy. no.*: G8 94; G8 95), while T G1.2.4.5 ins.:

वैशंपायनः।

ततः संहृष्टसर्वाङ्गो भीष्मो विदुरमब्रवीत्।
युक्तं चैवानुरूपं च कृतं तात शुभं त्वया।
वयं विमोक्षिता दुःखात्पाण्डुपक्षो न नाशितः।
एवमुक्त्वा विवेशाथ पुरं जनशताकुलम्।
कुरुभिः सहितो राजा नागरैश्च पितामहः।
अथाम्बिकेयः सामात्यः सकर्णः सहसौबलः।
सात्मजः पार्थनाशस्य स्मरंस्तथ्यं जहर्ष च।
भीष्मस्तु राजन्दुर्धर्षो विदुरश्च महामतिः।
जहर्षाते स्मरन्तौ तौ जातुषाग्नेर्विमोचनम्।
सत्यशीलगुणाचारै रागैर्जानपदोद्भवैः।
द्रोणादयस्तु धर्मैश्च तेषां तान्मोचितान्विदुः।
शौर्यलावण्यमाहात्म्यै रूपैः प्राणबलैरपि।
स्वस्यान्पार्थानमन्यन्त पौरजानपदास्तदा।
अन्ये जनाः प्राकृताश्च स्त्रियश्च बहुधा तथा।
शङ्कमाना वदन्ति स्म दग्धा जीवन्ति वा न वा।

Here follows a colophon.

T1 G1.2,4 cont.:

वैशंपायनः।

पाण्डवान्महतो दाहान्मोचयित्वा महामते।
म्रियमाणं महाक्लेशैर्भवान्मां समजीवयत्।
प्रच्छन्ना विचरिष्यन्तो यथोक्तं भवता तदा।
न व्यक्तं तत्त्वया तात यत्र कुत्रापि न क्वचित्।
इतोऽपि प्रेषयित्वाप्तान्योगक्षेमं विचारय।
दूराद्दूरतरं पार्थान्प्रस्थापय वनाद्वनम्।
तत्र तत्र प्रेषयित्वा दूतानाप्तान्शुभांस्तव।
योगक्षेमं पाण्डवानां गूढं सम्यग्विचारय।
भीष्मेणेत्थं समादिष्टो विदुरः खनकं पुनः।
गुप्तं तं प्रेषयामास खनकं जनमेजय।
सोऽपि गत्वा पृथापुत्रान्दृष्ट्वा सिद्धवटे तदा।
म्लेच्छभाषां वदन्नेव विदुरेण पुरेरिताम्।
रात्रौ पाण्डुसुतान्दृष्ट्वा सान्त्वयित्वा वचोऽब्रवीत्।

खनकः।

आयुष्मद्भिर्न मेतव्यं भवद्भिः कौरवा न हि।
जानन्ति जीवतो युष्मान्निश्चितोऽभूद्भवन्मृतौ।
जानाति युष्मान्गाङ्गेयो विदुरेण प्रबोधितः।
शनैः शनैश्च गन्तव्यं न भीत्या त्वरया न च।
दक्षिणां दिशमाश्रित्य वटकाननमुत्तमम्।
विद्यते भारतश्रेष्ठास्तत्र गच्छन्तु निर्भयाः।
सर्वेप्रवास एतावान्भवतां पुण्यशीलिनाम्।
क्षमावतां च युष्माकं सुखोदर्कं भविष्यति।
इत्याह विदुरो युष्मान्मया तत्कथितं शुभाः।
युष्मभ्यं यामि भद्रं वो गच्छतारिष्टमार्गगाः।

वैशंपायनः।

निवृत्ते खनकेनेत्थं पाण्डवा जनमेजय।
किमकुर्वत ते सर्वे शृणु राजन्पितामहाः।

87

After 1. 143. 15, S ins.:

महतोऽत्र स्त्रियं कामाद्बाधितां त्राहि मामपि ।
धर्मार्थकाममोक्षेषु दयां कुर्वन्ति साधवः ।
तं तु धर्ममिति प्राहुर्मुनयो धर्मवत्सलाः ।
दिव्यज्ञानेन पश्यामि अतीतानागतानहम् ।
तस्माद्रक्ष्यामि वः श्रेय आसन्नं सर उत्तमम् । [5]
अद्यासाद्य सरः स्नात्वा विश्रम्य च वनस्पतौ ।
श्वः प्रभाते महद्भूतं प्रादुर्भूतं जगत्पतिम् ।
व्यासं कमलपत्राक्षं दृष्ट्वा शोकं विहास्यथ ।
धृतराष्ट्राद्विवासश्च दहनं वारणावते ।
त्राणं च विदुरात्तुभ्यं विदितं ज्ञानचक्षुषा । [10]
आवासे शालिहोत्रस्य स वो वासं विधास्यति ।
वर्षवातातपसहः अयं पुण्यो वनस्पतिः ।
पीतमात्रे तु पानीये क्षुत्पिपासे विनश्यतः ।
तपसा शालिहोत्रेण सरो वृक्षश्च निर्मितः ।
कादम्बाः सारसा हंसाः कुर्यैः कुररैः सह । [15]
रुवन्ति मधुरं गीतं गान्धर्वस्वनमिश्रितम् ।

वैशंपायनः ।

तस्यास्तद्वचनं श्रुत्वा कुन्ती वचनमब्रवीत् ।
युधिष्ठिरं महाप्राज्ञं सर्वशास्त्रविशारदम् ।
त्वं हि धर्मभृतां श्रेष्ठ मयोक्तं शृणु भारत ।
राक्षस्येषा हि वाक्येन धर्मं वदति साधु वै । [20]
भावेन दुष्टा भीमं सा किं करिष्यति राक्षसी ।
भजतां पाण्डवं वीरमपत्यार्थं यदीच्छसि ।

88

After 1. 143. 18, S ins.:

प्राक् संध्यातो विमोक्तव्यो रक्षितव्यश्च नित्यशः ।
एवं रमस्व भीमेन यावद्गर्भस्य वेदनम् ।
एष ते समयो भद्रे शुश्रूष्यश्चाप्रमत्तया ।
नित्यानुकूलया भूत्वा कर्तव्यं शोभनं त्वया ।

Colophon.

वैशंपायनः ।

युधिष्ठिरेणैवमुक्ता कुन्त्या चाङ्केऽधिरोपिता । [5]
भीमार्जुनान्तरगता यमाभ्यां च पुरस्कृता ।
तिर्यग्युधिष्ठिरे याति हिडिम्बा भीमगामिनी ।
शालिहोत्रसरो रम्यमासेदुस्ते जलार्थिनः ।
तत्तथेति प्रतिज्ञाय हिडिम्बा राक्षसी तदा ।
वनस्पतितलं गत्वा परिमृज्य गृहं यथा । [10]
पाण्डवानां च वासं सा कृत्वा पर्णमयं तथा ।
आत्मनश्च तथा कुन्त्या एकोद्देशे चकार सा ।
पाण्डवास्तु ततः स्नात्वा शुद्धाः संध्यामुपास्य च ।
तृषिताः क्षुत्पिपासार्ता जलमात्रेण वर्तयन् ।
शालिहोत्रस्तदा ज्ञात्वा क्षुधार्तान्पाण्डवांस्तदा । [15]
मनसा चिन्तयासास पानीयं भोजनं महत् ।
ततस्ते पाण्डवाः सर्वे विश्रान्ताः पृथया सह ।
यथा जतुगृहे वृत्तं राक्षसेन कृतं च यत् ।
कृत्वा कथा बहुविधाः कथान्ते पाण्डुनन्दनम् ।
कुन्ती राजसुता वाक्यं भीमसेनमथाब्रवीत् । [20]
यथा पाण्डुस्तथा मान्यस्तव ज्येष्ठो युधिष्ठिरः ।
अहं धर्मविधानेन मान्या गुरुतरी तव ।
तस्मात्पाण्डुहितार्थं मे युवराज हितं कुरु ।
निकृता धार्तराष्ट्रेण पापेनाकृतबुद्धिना ।
दुष्कृतस्य प्रतीकारं न पश्यामि वृकोदर । [25]
तस्मात्कतिपयाहेन योगक्षेमं भविष्यति ।
क्षेमं दुर्गमिमं वासं वसिष्यामो यथासुखम् ।
इदमद्य महद्दुःखं धर्मकृच्छ्रं वृकोदर ।
इष्ट्वैव त्वां महाप्राज्ञ अनक्षेणाभिचोदिता ।
युधिष्ठिरं च मां चैव वरयामास धर्मतः । [30]
धर्मार्थं देहि पुत्रं त्वं स नः श्रेयः करिष्यति ।
प्रतिवाक्यं तु नेच्छामि ह्यावाभ्यां वचनं कुरु ।

89

After 1. 143. 26, Ds S ins.:

यथा च सुकृती स्वर्गे मोदतेऽप्सरसा सह ।
स तथा परमप्रीतस्तया रेमे महाद्युतिः ।
शुभं हि जघनं तस्याः सुवर्णमणिमेखलम् ।
न ततर्प मुदा मद्रन्भीमसेनो मुहुर्मुहुः ।
रमयन्ती ततो भीमं तत्र तत्र मनोजवा । [5]
सा रेमे तेन संहर्षादतृप्यन्ती मुहुर्मुहुः ।
अहःसु विचरन्ती सा निशाकालेषु पाण्डवम् ।
आनीय वै स्वके गेहे दर्शयामास मातरम् ।
भ्रातृभिः सहितो नित्यं स्वपते पाण्डवस्तदा ।
कुन्त्याः परिचरन्ती सा तस्याः पार्श्वेऽवसन्निशाम् । [10]

88

M om. lines 1-4 and the colophon. — For the details of the colophon cf. v. l. I. 143. 18. — For lines 5-7, M subst.:

एवमुक्त्वा तदा तत्र हिडिम्ब्या सह भारत ।

89

M om. lines 1-6. — (L. 5) = (var.) 1. 143. 27^{ab}. — (L. 7) G1. 2 M रमयंती (for विचरन्ती).

कामांश्च मुखवासादीनानयिष्यति भोजनम् ।
तस्यां रात्र्यां व्यतीतायामाजगाम महाव्रतः ।
पाराशर्यो महाप्राज्ञो दिव्यदर्शी महातपाः ।
तेऽभिवाद्य महात्मानं कृष्णद्वैपायनं तदा ।
तस्थुः प्राञ्जलयः सर्वे ससुषा चैव माधवी । [15]

90

This passage was found to be only a *repetition* (with v. l.) of 1. 145. 25–37, and is therefore not cited here *in extenso*. The passage is followed by a colophon (*adhy. no.* 61).

91

After 1. 148. 5, S ins.:

पुरुषादकेन रौद्रेण भक्ष्यमाणा दुरात्मना ।
अनाथा नगरी नाथं त्रातारं नाधिगच्छति ।
गुहायां च वसंस्तत्र बाधते सततं जनम् ।
स्त्रियो बालांश्च वृद्धांश्च यूनश्चापि दुरात्मवान् ।
अत्र मन्त्रैश्च होमैश्च भोजनैश्च स राक्षसः । [5]
ईडितो द्विजमुख्यैश्च पूजितश्च दुरात्मवान् ।
यदा च सकलानेवं प्रसूदयति राक्षसः ।
अथैनं ब्राह्मणाः सर्वे समये समयोजयन् ।
मास्मान्कामाद्वधी रक्षो दास्यामस्ते सदा वयम् ।
पर्यायेण यथाकाममिह मांसोदनं प्रभो । [10]
अन्नं मांससमायुक्तं तिलचूर्णसमन्वितम् ।
सर्पिषा च समायुक्त व्यञ्जनैश्च विभूषितम् ।
स्रजश्चित्रास्तिलान्पिण्डाल्लाजापूपसुरासवान् ।
शृताश्शृतान्पानकुम्भान्स्थूलमांसं शृताश्शृतम् ।
सर्पिःकुम्भांश्च विविधानन्यांश्च विविधान्बहून् । [15]
अद्य सिद्धैः समायुक्तैस्तिलचूर्णैः समाकुलान् ।
कुलात्कुलाच्च पुरुषं बलीवर्दौ च कालकौ ।
प्राप्स्यसि त्वमसंक्रुद्धो रक्षोभागं प्रकल्पितम् ।
तिष्ठेह समयेऽस्माकमित्ययाचन्त तं द्विजाः ।
बाढमित्येव तद्रक्षस्तद्वचः प्रत्यगृह्णत । [20]
परचक्रान्न बिभ्यंश्च रक्षणं स करोति च ।
तस्मिन्भागे विनिर्दिष्टे चास्थितः समयं बली ।

92

For 1. 151. 1, D₅ (see footnotes) S subst.:

वैशंपायनः ।
अथ रात्र्यां व्यतीतायां भीमसेनो महाबलः ।
ब्राह्मणं समुपागम्य वाक्यं चेदमुवाच ह ।
भीमसेनः ।
आपदस्त्वां मोचयेयं सपुत्रं ब्राह्मणप्रिय ।
मा भैषी राक्षसात्तस्मान्मां ददातु बलिं भवान् ।
इह मामाशितं कर्तुं प्रयतस्व द्विजोत्तम । [5]
अथात्मानं प्रदास्यामि तस्य घोराय रक्षसे ।
त्वरध्वं किं विलम्बध्वं मा चिरं कुरुतानघाः ।
व्यवस्येयं मम प्राणैर्युष्मान्रक्षितुमद्य वै ।
वैशंपायनः ।
एवमुक्तस्तु भीमेन ब्राह्मणो भरतर्षभ ।
सुहृदां तत्समाख्याय ददावन्नं सुसंस्कृतम् । [10]
पिशितोदनमाजह्रुरथास्मै पुरवासिनः ।
सघृतं सोपदंशं च सूपैर्नानाविधैः सह ।
तदश्नित्वा भीमसेनो मांसानि विविधानि च ।
मोदकानि च मुख्यानि चित्रोदनचयान्बहून् ।
ततोऽपिबद्घृतघटान्सुबहून्द्रोणसंमितान् । [15]
तस्य भुक्तवतः पौरा यथावत्समुपार्जितम् ।
उपजह्रुर्भृतभागं समृद्धमनसस्तदा ।
ततो रात्र्यां व्यतीतायां सव्यञ्जनदधिप्लुतम् ।
समारुह्यान्नसंपूर्णं शकटं स वृकोदरः ।
प्रययौ तूर्यनिर्घोषैः पौरैश्च परिवारितः । [20]

91

(L. 1) Hypermetric! T₁ G₅ पुरुषादेन रौद्रेण; T₂ G₁₋₄ M तेनेयं पुरुषादेन. — (L. 7) M स कुलान्येव. — (L. 8) M (except M₃) संन्ययोज°. — G₅ M om. lines 11–12. — (L. 13) T₁ G₁₋₃ पिंडाल्लाजांस्तथापूपान्सूपं बहुविधोदनं. — M om. lines 14–16. — (L. 14) G₁.₂ °शृतानि मांसानि पानपूर्णघटानपि. — After line 14, G₁.₂ ins.:

वन्यमाहिषवाराहं भाल्लूकं च शृताशृतम् ।

— (L. 17) M °पं युवानं बलिनं प्रभो. — For lines 18–19 T₂ G₁₋₃ subst. एतद्भागं प्रदास्यामः समये यदि तिष्ठसि. — (L. 20) M वचः प्रतिगृहीतवान्. — (L. 21) T₁ G₁.₂ परचक्राटवी-केभ्यः; G₃ °क्रात्तु भूतेभ्यो; M °क्राटवीभ्यश्च.

92

D₅ (which has many v. l. mostly ignored here) ins. lines 2–17 of this passage after 1. 151. 1^{ab}, and lines 19–46 after 1^{cd}. — (L. 2) T G (G₃ om.) एतद् (for चेदम्). — (L. 5) M °ह मामशितं क°. T₁ स्वके गृहे; G₃ M सकृद्गृहे; G₅ भवद्गृहे (for द्विजो°). — After line 5, D₅ ins.:

श्रमेण मे गता रात्रिर्भुक्त्वा तु बलवानहम् ।

(L. 17) G₄ महाभागं; M भृतं भागं. — (L. 41) G₁.₂ M °र्ज्यं हि (G₁.₂ स्यात्) शवस्पर्शे.

आत्मानमेषोऽन्नभृतो राक्षसाय प्रदास्यति ।
तरुणोऽप्रतिरूपश्च दृढ औदरिको युवा ।
वाग्भिरेवंप्रकाराभिः स्तूयमानो वृकोदरः ।
चुचोद स बलीवर्दौ युक्तौ सर्वाङ्गकालकौ ।
वादित्राणां प्रणादेन ततस्तं पुरुषादकम् । [25]
अभ्यगच्छत्सुसंहृष्टः स तत्र मनुजैर्वृतः ।
संप्राप्य स च तं देशमेकाकी समुपायथौ ।
पुरुषादभयाद्भीतस्तत्रैवासीज्जनव्रजः ।
स गत्वा दीर्घमध्वानं दक्षिणामभितो दिशम् ।
यथोपदिष्टमुद्देशे ददर्श विटपद्रुमम् । [30]
केशमज्जास्थिमेदोभिर्बाहूरुचरणैरपि ।
आर्द्रैः शुष्कैश्च संकीर्णमभितोऽथ वनस्पतिम् ।
गृध्रकङ्कबलच्छन्नं गोमायुगणसंकुलम् ।
उग्रगन्धमचक्षुष्यं श्मशानमिव दारुणम् ।
तं प्रविश्य महावृक्षं चिन्तयामास वीर्यवान् । [35]
यावन्न दृश्यते रक्षो बकस्तु बलदर्पितः ।
आचितं विविधैर्भोज्यैरन्नैर्गिरिनिभैरिदम् ।
शकटं सूपसंपूर्णं यावद्द्रक्ष्यति राक्षसः ।
तावदेव हि भोक्ष्येऽहं दुर्लभं वै पुनर्भवेत् ।
विप्रकीर्येत सर्वं हि प्रयुद्धे मयि रक्षसा । [40]
अभोज्यं च शवं स्पृष्ट्वा निगृहीते बके भवेत् ।
स त्वेवं भीमकर्मा तु भीमसेनोऽभिलक्ष्य च ।
उपविष्टः शनैरन्नं प्रभुङ्क्ते स्म परं वरम् ।
ते ततः सर्वतोऽपश्यन्द्रुमानारुह्य नागराः ।
नारक्षो बलिमश्नीयादेवं बहु च मानवाः । [45]
भुङ्क्ते ब्राह्मणरूपेण बकोऽयमिति चाब्रुवन् ।
स तं हसति तेजस्वी तदन्नमुपयुज्य च ।

93

M ins. after 1. 151. 18: T G, after 1. 151. 20:
जग्राह भीमः पाणिभ्यां गृहीत्वा चैनमाक्षिपत् ।

आक्षिप्तो भीमसेनेन पुनरेवोत्थितो हसन् ।
आलिङ्ग्यापीड्य चैवैनं न्यहनद्वसुधातले ।
भीमो व्यसर्जयच्चैनं समाश्वसिहि चेत्यपि ।
आस्फोटयामास बली उत्तिष्ठेति च सोऽब्रवीत् । [5]
समुत्पत्य ततः क्रुद्धो रूपं कृत्वा महत्तरम् ।
विरूपः सहसा तस्थौ तर्जयित्वा वृकोदरम् ।
अहसद्भीमसेनोऽथ राक्षसं भीमदर्शनम् ।
भीमसेनस्तु जग्राह ग्रीवायां भीमदर्शनम् ।
भुजाभ्यां जानुनैकेन पृष्ठे समभिपीडयत् । [10]
ततः क्रुद्धो विसृज्यैनं स भीमस्तस्य रक्षसः ।
स्रां कटीमीषदुत्क्षिप्य बाहू चैव परामृशत् ।
तस्य बाहू समादाय त्वरमाणो वृकोदरः ।
उत्क्षिप्य चावधूयैनं पातयन्बलवान्भुवि ।
तं तु वामेन पादेन क्रुद्धो भीमपराक्रमः । [15]
उरस्येनं समाजघ्ने भीमस्तु पतितं भुवि ।
स संक्रुद्धः समुत्पत्य भीममभ्यहनद्भृशम् ।
व्यात्ताननो दीप्तजिह्वो बाहुमुद्यम्य दक्षिणम् ।
तेनाभिद्रुत्य क्रुद्धेन भीमो मूर्ध्नि समाहतः ।
मुष्टिना जानुना चैव वामपार्श्वे समाहतः । [20]
एवं निहन्यमानः सन्राक्षसेन बलीयसा ।
रोषेण महताविष्टो भीमो भीमपराक्रमः ।
ततः क्रुद्धः समुत्पत्य भीमो जग्राह राक्षसम् ।
तावन्योन्यं पीडयन्तौ पुरुषादवृकोदरौ ।
मत्ताविव महानागावन्योन्यं विचकर्षतुः । [25]
बाहुविक्षेपशब्दैश्च भीमराक्षसयोस्तदा ।
वेत्रकीयपुरी सर्वा वित्रस्ता समपद्यत ।
तयोर्वेगेन महता तत्र भूमिरकम्पत ।
पादपान्वीरुधश्चैव चूर्णयामासतुश्च तौ ।
समागतौ च तौ वीरावन्योन्यवधकाङ्क्षिणौ । [30]
अङ्गमिः पादवेगैश्च चूर्णयामासतुस्तदा ।
अथ तं लोलयित्वा तु भीमसेनो महाबलः ।

93

(L. 3) T1 G1-3 M आविध्य (for आपीड्य). — (L. 5) M उत्तिष्ठस्वेति चाब्र°. — (L. 6) M transp. समुत्पत्य and ततः क्रुद्धः. — (L. 7) M सहसोत्तस्थौ. — (L. 9) G1. 2 अंसे (G2 असौ) गृहीत्वा पाणिभ्यां पृष्ठतश्च व्यवस्थितः. — (L. 10) M बाहु° (for भुजा°). G1. 2 जानुभ्यां पीडयित्वाथ पातयामास भूतले. — (L. 11) G1. 2 राक्षसं क्रोधदीपितम्; M भीमस्तस्य तु रक्षसः. — For lines 17–19 G1. 2 subst.:

क्रुद्धः सोऽपि समुत्पत्य वेगेन महता रुषा ।
उद्धत्य पाणियुगलं भीमस्योरस्यपातयत् ।
व्यात्ताननेन घोरेण लम्बजिह्वेन रक्षसा ।
दक्षिणं बाहुमुद्यम्य तेनाभिद्रुत्य वेगितः ।
क्रुद्धेन भीमो भीमेन वेगान्मूर्ध्नि समाहतः ।

— (L. 20) G1. 2 जानुभ्यां चैव मुष्टिभ्यां. G3-6 वामे पार्श्वे समर्पितः. — (L. 25) M व्यपकर्षतुः. — (L. 28–29) = (var.) 1. 151. 20. — After line 30, G1. 2, 4 ins.:

गिरिभिर्गिरिशृङ्गैश्च पाषाणैः पर्वतच्युतैः ।

— (L. 31) G1. 2, 4 अन्योन्यं ताडयन्तौ तौ; M आत्मनः पादवेगेन. — After line 31, G1. 2, 4 ins.:

आयामविस्ताराभ्यां च परितो योजनत्रयम् ।
निर्महीरुहपाषाणं गिरिकुञ्जलतावधम् ।
चक्रतुर्युद्धदुर्मत्तौ कूर्मपृष्ठोपमां महीम् ।
मुहूर्तमेवं संयुध्वा समं रक्षःकुरूत्तमौ ।
ततो रक्षोविनाशाय मतिं कृत्वा वृकोदरः ।

अगृह्णात्परिरभ्यैनं बाहुभ्यां भरतर्षभ ।
जानुभ्यां परिजग्राह भीमसेनो बकं बलात् ।
विस्फुरन्तं महाकायं विचकर्ष महाबलः । [35]
विकृष्यमाणो भीमेन कर्षश्च युधि पाण्डवम् ।
समयुज्यत तीव्रेण श्रमेण पुरुषादकः ।

94

After adhy. 155, D1 marg. *sec. m.* ins.:

ब्राह्मण उवाच ।
ततः सा ववृधे बाला याज्ञसेनी द्विजोत्तम ।
क्रमेण यौवनं प्राप्ता मन्मथानलदीपिका ।
दृष्ट्वा तामनवद्याङ्गीं द्रुपदो हृष्टमानसः ।
यदृच्छया संचरन्तीमास्थाने समभाषत ।
अर्जुनाय ददामीति हृदयं व्यावृणोत्तदा । [5]
श्रुत्वा द्रुपदराजस्य वचनं व्यथितस्तदा ।
मन्त्री वसुप्रदो नाम शनैरिदमभाषत ।
कुन्त्या सह महेष्वासाः पाण्डवा राजसत्तम ।
दग्धा जतुगृहे सुप्ता दुर्योधनधिया रहः ।
अर्जुनाय कथं दद्याः पाञ्चालीं पृषतात्मजाम् । [10]
तस्य वाक्यं तु नृपतिः श्रुत्वा प्रव्यथितोऽभवत् ।
व्यथितं द्रुपदं दृष्ट्वा पुरोधा ज्ञानसागरः ।
जानामि शकुनाद्राजन्न दग्धास्तेत्यभाषत ।
हृष्टोऽथ नृपतिः प्राह द्रष्टव्यास्ते कथं द्विज ।
ज्ञानसागर उवाच ।
स्वयंवरेण द्रष्टासि तत्कुरुष्व नराधिप । [15]
तच्छ्रुत्वा सर्वपाञ्चालाः साधु साध्विति चाब्रुवन् ।
ततः संघोषयामास दुहितुश्च स्वयंवरम् ।
फाल्गुने मासि सप्तम्यामितः सप्ततिमेऽहनि ।
मञ्चांश्च कारयामास राजयोग्यान्बहून्नृपः ।
मेरुमन्दरसंकाशान्स्वर्णरत्नपरिच्छदान् । [20]
द्रुपदश्च धनुश्चित्रं दुरानामं क्षितीश्वरैः ।
कारयामास शुल्कार्थमर्जुनस्य दिदृक्षया ।
मत्स्ययन्त्रं च कृतवान्दूरे वर्णपरिष्कृतम् ।
अनेन धनुषा यो वै शरेणेमं जलेचरम् ।
पातयिष्यति यो जायां पाञ्चालीं स्वां करिष्यति । [25]
इतस्तदुत्सवदिनं समीपे वर्तते द्विजाः ।
राजानो राजपुत्राश्च पृथिव्यां ये विलासिनः ।
प्रयान्ति च तथा विप्राः सूतमागधबन्दिनः ।
अहं तदुत्सवं द्रष्टुं यामि द्रव्यार्जनाय च ।
भवतां गमने बुद्धिः प्रयतध्वं द्विजोत्तमाः । [30]
इति वः सर्वमाख्यातं यथादृष्टं यथाश्रुतम् ।

95

After adhy. 155, S ins. the foll. addl. adhy.:

ब्राह्मणः ।
श्रुत्वा जतुगृहे वृत्तं ब्राह्मणाः सपुरोहिताः ।
पाञ्चालराजं द्रुपदमिदं वचनमब्रुवन् ।
धार्तराष्ट्राः सहामात्या मन्त्रयित्वा परस्परम् ।
पाण्डवानां विनाशाय मतिं चक्रुः सुदुष्कराम् ।
दुर्योधनेन प्रहितः पुरोचन इति श्रुतः । [5]
वारणावतमासाद्य कृत्वा जतुगृहं महत् ।
तस्मिन्गृहे सुविश्वस्तान्पाण्डवान्पृथया सह ।
अर्धरात्रे महाराज दग्धवान्स पुरोचनः ।
अग्निना तु स्वयमपि दग्धः क्षुद्रो नृशंसवत् ।
एतच्छ्रुत्वा तु संहृष्टो धृतराष्ट्रः सबान्धवः । [10]
श्रुत्वा तु पाण्डवान्दग्धान्धृतराष्ट्रोऽम्बिकासुतः ।
अल्पशोकः प्रहृष्टात्मा शशास विदुरं तदा ।
पाण्डवानां महाप्राज्ञ कुरु पिण्डोदकक्रियाम् ।
एतावदुक्त्वा करुणो धृतराष्ट्रस्तु मारिषः ।
अद्य पाण्डुर्मृतः क्षत्तः पाण्डवानां विनाशने । [15]
अहो विधिवशादेव गतास्ते यमसादनम् ।
इत्युक्त्वा प्रारुदत्तत्र धृतराष्ट्रः ससौबलः ।
श्रुत्वा भीष्मेण विधिवत्कृतवानौर्ध्वदेहिकम् ।
पाण्डवानां विनाशाय कृतं कर्म दुरात्मना ।
एवं कार्यस्य कर्ता तु न दृष्टो न श्रुतः पुरा । [20]
एतद्वृत्तं महाराज पाण्डवान्प्रति नः श्रुतम् ।
श्रुत्वा तु वचनं तेषां यज्ञसेनो महामतिः ।
यथा तज्जनकः शोचेदौरसस्य विनाशने ।

दन्तान्कटिकटीकृत्य दष्ट्वा च दशनच्छदम् ।
नेत्रे संवृत्य विकटं तिर्यक्प्रैक्षत राक्षसम् ।
अथ जानुप्रहारैश्च मुष्टिभिर्वज्रसंनिभैः ।
घोरैः पादप्रहारैश्च क्षोभयामास राक्षसम् ।

— After line 33, G1.2 ins.:

जानुभ्यां पार्श्वयोः कुक्षौ पृष्ठे वक्षसि जघ्निवान् ।
भग्नोरुपादकूर्चैश्च विस्रंसद्देहबन्धनः ।
प्रस्वेदो दीर्घनिःश्वासो निर्यज्जिह्वाक्षितारकः ।
अजाण्डास्फोटनं कुर्वन्नाक्रोशच्छ्वाससंचयैः ।
भूमौ निपत्य लुलुठे दण्डाहत इवोरगः ।

Lines 34–37 *repeat* (with v. l.) 1. 151. 17[ed], 18[ed], and 19. — (L. 34) T1 G3 M बाहु° (for जानु°). — (L. 36) G1.2 M °माणो त्रेगेन पाण्डवेन बलीयसा.

95

After line 15, T1 G2.5.6 M6–8 ins.:

तस्माद्भागीरथीं गत्वा कुरु पिण्डोदकक्रियाम् ।

— (L. 18) T1 G2.3 M विदुरः (for विधिवत्). — (L. 34)

तथातप्यत पाञ्चालः पाण्डवानां विनाशने ।
समाहूय प्रकृतयः सहिताः सर्वबान्धवैः । [25]
कारुण्यादेव पाञ्चालः प्रोवाचेदं वचस्तदा ।
अहो रूपमहो धैर्यमहो वीर्यं च शिक्षितम् ।
चिन्तयामि दिवारात्रमर्जुनं प्रति बान्धवाः ।
आतृभिः सहितो मात्रा सोऽदह्यत हुताशने ।
किमाश्चर्यमितो लोके कालो हि दुरतिक्रमः । [30]
मिथ्याप्रतिज्ञो लोकेषु किं वदिष्यामि सांप्रतम् ।
अन्तर्गतेन दुःखेन दह्यमानो दिवानिशम् ।
याजोपयाजौ सत्कृत्य याचितौ तु मयानघाः ।
भारद्वाजस्य हन्तारं देवीं चाप्यर्जुनस्य वै ।
लोकस्तद्वेद यच्चैव तथा याजेन नः श्रुतम् । [35]
याजेन पुत्रकामीयं हुत्वा चोत्पादितावुभौ ।
धृष्टद्युम्नश्च कृष्णा च मम तुष्टिकरावुभौ ।
किं करिष्यामि ते नष्टाः पाण्डवाः पृथया सह ।
इत्येवमुक्त्वा पाञ्चालः शुशोच परमातुरः ।
दृष्ट्वा शोचन्तमत्यर्थं पाञ्चालं चेदमब्रवीत् । [40]
पुरोधाः सत्त्वसंपन्नः सम्यग्विद्याविशेषवान् ।
वृद्धानुशासने युक्ताः पाण्डवा धर्मचारिणः ।
तादृशा न विनश्यन्ति नैव यान्ति पराभवम् ।
मया दृष्टमिदं सत्यं शृणु त्वं मनुजाधिप ।
ब्राह्मणैः कथितं सत्यं वेदेषु च मया श्रुतम् । [45]
बृहस्पतिमतेनाथ पौलोम्यापि पुरा श्रुतम् ।
नष्ट इन्द्रो बिसग्रन्थ्यामुपश्रुत्या विदर्शितः ।
उपश्रुतिर्महाराज पाण्डवार्थे मया श्रुता ।
यत्र वा तत्र जीवन्ति पाण्डवास्ते न संशयः ।
मया दृष्टानि लिङ्गानि इहैवैष्यन्ति पाण्डवाः । [50]
यन्निमित्तमिहायान्ति तच्छृणुष्व नराधिप ।
स्वयंवरः क्षत्रियाणां कन्यादाने प्रदर्शितः ।
स्वयंवरस्तु नगरे घुष्यतां राजसत्तम ।
यत्र वा निवसन्तस्ते पाण्डवाः पृथया सह ।
दूरस्था वा समीपस्थाः स्वर्गस्था वापि पाण्डवाः । [55]
श्रुत्वा स्वयंवरं राजन्समेष्यन्ति न संशयः ।
तस्मात्स्वयंवरो राजन्घुष्यतां मा चिरं कृथाः ।
श्रुत्वा पुरोहितेनोक्तं पाञ्चालः प्रीतिमांस्तदा ।
घोषयामास नगरे द्रौपद्यास्तु स्वयंवरम् ।

पुष्यमासे तु रोहिण्यां शुक्लपक्षे शुभे तिथौ । [60]
दिवसैः पञ्चसप्तभ्यां भविष्यति स्वयंवरः ।
देवगन्धर्वयक्षाश्च ऋषयश्च तपोधनाः ।
स्वयंवरं द्रष्टुकामा गच्छन्त्येव न संशयः ।
तव पुत्रा महात्मानो दर्शनीया विशेषतः ।
यदृच्छया तु पाञ्चाली गच्छेद्वा मध्यमं पतिम् । [65]
को हि जानाति लोकेषु प्रजापतिविधिं शुभम् ।
तस्मात्सपुत्रा गच्छेथा ब्राह्मणि यदि रोचते ।
नित्यकालं सुभिक्षास्ते पाञ्चालास्तु तपोधने ।
यज्ञसेनस्तु राजासौ ब्रह्मण्यः सत्यसंगरः ।
ब्रह्मण्या नागराः सर्वे ब्राह्मणाश्चातिथिप्रियाः । [70]
नित्यकालं प्रदास्यन्ति आगन्तॄणामयाचितम् ।
अहं च तत्र गच्छामि ममैभिः सह शिष्यकैः ।
एकसार्थाः प्रयातास्मो ब्राह्मण्या यदि रोचते ।

वैशंपायनः ।

एतावदुक्त्वा वचनं ब्राह्मणो विरराम ह ।

Colophon.

96

After adhy. 157, S (except G8) ins.:

वैशंपायनः ।

ते प्रयाता नरव्याघ्रा मात्रा सह परंतपाः ।
ब्राह्मणान्गच्छतोऽपश्यन्पाञ्चालान्सगणान्बहून् ।
अथ ते ब्राह्मणा ऊचुः पाण्डवान्धर्मचारिणः ।
क्व भवन्तो गमिष्यन्ति कुतो वागच्छतेति ह ।

युधिष्ठिरः ।

प्रयातानेकचक्राया सोदर्यान्देवदर्शिनः । [5]
भवन्तो नोऽभिजानन्तु सहितान्मातृचारिणः ।
गच्छतो नस्तु पाञ्चालान्द्रुपदस्य पुरीं प्रति ।
इच्छामो भवतो ज्ञातुं महत्कौतूहलं हि नः ।

ब्राह्मणाः ।

एकसार्थं प्रयाताः स्म वयमप्यत्र गामिनः ।
तत्राप्यद्भुतसंकाश उत्सवो भविता महान् । [10]
ततस्तु यज्ञसेनस्य द्रुपदस्य महात्मनः ।
यासावयोनिजा कन्या स्थास्यते सा स्वयंवरे ।
दर्शनीयानवद्याङ्गी सुकुमारी यशस्विनी ।

G2.3 M तथार्जुने (for अर्जुनस्य वै). — (L. 46) T1 G3 °सुतेनाहं; G2.6 M6-8 °मुखेनाथ (for °मतेनाथ). — After line 63, T1 G1 M6-8 ins.:

तत्रस्थस्तदहं श्रुत्वा स्वगृहोत्सवबान्धवः ।
अर्थार्थी त्वरितो द्रष्टुं यामि यास्यथ सत्तमाः ।

— (L. 71, 73) T1 G1.2.6 M6-8 आमंत्रणम् (for आगन्तॄणाम्), and ब्राह्मणि (for ब्राह्मण्या). Colophon. *Adhy. no.*: T1 162; T2 G2.4.5 115; G1 117; G3 112; G6 M 116.

96

(L. 6) M भवतो हि (M3 °तोभि-; M5 °तोपि) विजानंतु. — (L. 11) G2.3 M यज्ञसेनस्य दुहिता (for the prior half). — After line 12, G4 ins.:

धृष्टद्युम्नस्य भगिनी द्रोणशत्रोः प्रतापिनः ।
जातो यः पावकाच्छूरः सशरः सशरासनः । [15]
सुसमिद्धान्महाभागः सोमकानां महारथः ।
तस्मिन्संजायमाने च वागुवाचाशरीरिणी ।
एष मृत्युश्च शिष्यश्च भारद्वाजस्य जायते ।
स्वसा तस्य तु वेद्याश्च जाता तस्मिन्महामखे ।
स्त्रीरत्नमसितापाङ्गी श्यामा नीलोत्पलं यथा । [20]
तां यज्ञसेनस्य सुतां द्रौपदीं परमस्त्रियम् ।
गच्छामस्तत्र वै द्रष्टुं तं चैवास्याः स्वयंवरम् ।
राजानो राजपुत्राश्च यज्वानो भूरिदक्षिणाः ।
स्वाध्यायवन्तः शुचयो महात्मानो धृतव्रताः ।
तरुणा दर्शनीयाश्च बलवन्तो दुरासदाः । [25]
महारथाः कृतास्त्राश्च समेष्यन्तीह भूमिपाः ।
ते तत्र विविधं दानं विजयार्थे नरेश्वराः ।
प्रदास्यन्ति धनं गाश्च भक्ष्यं भोज्यं च सर्वशः ।
प्रतिलभ्य च तत्सर्वं द्रष्टुं कृष्णां स्वयंवरे ।
यं च सा क्षत्रियं राज्ञे कुमारी वरयिष्यति । [30]
नटा वैतालिकाश्चैव नर्तकाः सूतमागधाः ।
नियोधकाश्च देशेभ्यः समेष्यन्ति महाबलाः ।
एतत्कौतूहलं तत्र द्रष्टुं वै प्रतिगृह्य च ।
सहास्माभिर्महात्मानो मात्रा सह निवर्त्स्यथ ।
दर्शनीयांश्च वः सर्वानेकरूपानवस्थितान् । [35]
समीक्ष्य कृष्णा वरयेत्संगत्यान्यतमं पतिम् ।
अयमेकश्च वो भ्राता दर्शनीयो महाभुजः ।
नियुध्यमानो विजयेत्संगत्या द्रविणं महत् ।
युधिष्ठिरः ।
परमं भो गमिष्यामो द्रष्टुं तत्र स्वयंवरम् ।
द्रौपदीं यज्ञसेनस्य कन्यां तस्यास्तथोत्सवम् । [40]

☞ This passage is really an anticipation (in a variant form) of our adhy. 175. All S MSS. hitherto examined read it in fact at *both* places, here (i. e. after adhy. 157) and in its proper place (i. e. after adhy. 174). The printed editions of the S recensions, however, generally avoid this (seemingly unnecessary) repetition by erroneously reading the adhy. only at its first occurence in S MSS., namely, after adhy. 157; only the Grantha edition (Sarfojīrājapuram) *repeats* the adhy. in its proper place, and is in this respect a more correct representative of the Southern tradition. — The remark at the end of the footnotes to adhy. 156 to the effect that passage No. 96 of this App. is ins. in S (except G_8) *after adhy. 156* is erroneous and should be deleted.

97

D_4 (marg. *sec. m.*) T_2 G (except G_8) ins. after 1. 165. 40: T_1, after 1. 165. 41^{ab}:

विश्वामित्रस्ततो दृष्ट्वा क्रोधाविष्टः स रोदसी ।
ववर्ष शरवर्षाणि वसिष्ठे मुनिसत्तमे ।
घोररूपांश्च नाराचान्क्षुरान्भल्लान्महामुनिः ।
विश्वामित्रप्रयुक्तांस्तान्वैणवेन व्यमोचयत् ।
वसिष्ठस्य तदा दृष्ट्वा कर्मकौशलमाहवे । [5]
विश्वामित्रोऽपि कोपेन भूयः शत्रुनिपातनः ।
दिव्यास्त्रवर्षं तस्मै स प्राहिणोन्मुनये रुषा ।
आग्नेयं वारुणं चैन्द्रं याम्यं वायव्यमेव च ।
विससर्ज महाभागे वसिष्ठे ब्रह्मणः सुते ।
अस्त्राणि सर्वतो ज्वाला विसृजन्तः प्रपेदिरे । [10]
युगान्तसमये घोराः पतंगस्येव रश्मयः ।
वसिष्ठोऽपि महातेजा ब्रह्मशक्तिप्रयुक्तया ।
यष्ट्या निवारयामास सर्वाण्यस्त्राणि स स्वयन् ।
ततस्ते भस्मसाद्भूताः पतन्ति स्म महीतले ।
अपोह्य दिव्यान्यस्त्राणि वसिष्ठो वाक्यमब्रवीत् । [15]
निर्जितोऽसि महाराज दुरात्मन्गाधिनन्दन ।
यदि तेऽस्ति परं शौर्यं तदृश्यं मयि स्थिते ।
विश्वामित्रस्तथा चोक्तो वसिष्ठेन नराधिपः ।
नोवाच किंचिद्व्रीडाढ्यो विद्रावितमहाबलः ।

☞ In T_1 G_2 this passage is followed by a *repetition* of 41^{ab}.

98

After 1. 176. 29^{ab}, D_4 (suppl. fol. *sec. m.*) ins.:

मैत्रे मुहूर्ते तत्तस्या राजदाराः पुराविदः ।
पुत्रवत्यः सुवसनाः प्रतिकर्मोपचक्रमुः ।
स्वर्णपात्रं च कौशेयं दूर्वासिद्ध्यर्थसंयुतम् ।
निधाय तैलं स्नानार्थं निन्युर्बाला हरिप्रियाः ।

दर्शनीया पृथुश्रोणी अर्थरूपा बृहत्स्तनी ।
— (L. 16) M पावकात्तु (for सोम°). — (L. 22) M संगच्छाम वयं द्रष्टुं. — (L. 29) M प्रतिगृह्य. — (L. 32) G_{1-8} M (M_8 om.) समवेता महा°. — (L. 34) M बहूनब्दान् (for महात्मानो). — (L. 35) M देवरूपान् (for एक°). — (L. 37) M (except M_8) °मेकतरो भ्राता. — (L. 38) M निर्यत्नवानपि जयेत्. — Colophon is om. in M. *Adhy. no.:* T_2 $G_{4.5}$ 117; G_1 119; G_2 136; G_3 115.

लोध्रकल्कहृताभ्यङ्गतैलं कालेयचन्दनम् । [5]
चतुष्काभिमुखीं निन्युरभिषेकाय योषितः ।
वैडूर्यमणिपीठेषु निविष्टां द्रौपदीं तदा ।
सतूर्यं स्नापयांचक्रुः स्वर्णकुम्भस्थितैर्जलैः ।
तां निवृत्ताभिषेकां च दुकूलद्वयधारिणीम् ।
निन्युर्मणिस्तम्भयुतां वेदीं वै सुपरिष्कृताम् । [10]
निवेश्य प्राङ्मुखीं हृष्टां विस्मिताक्षाः प्रसाधिकाः ।
केनानुकारणेनेमामिति अन्योन्यं व्यलोकयन् ।
धूपोष्मणा च केशानामार्द्रभावं व्यपोहयन् ।
बबन्धुरस्या धम्मिल्लं माल्यैः सुरभिगन्धिभिः ।
दूर्वामधूकरचितं माल्यं तस्या ददुः करे । [15]
चक्रुश्च कृष्णागरुणा पत्रभङ्गं कुचद्वये ।
रेजे सा चक्रवाकाङ्का स्वर्णदीर्घसरिद्वरा ।
अलकैः कुटिलैस्तस्या मुखं विकसितं बभौ ।
आसक्तभृङ्गं कुसुमं शशिबिम्बं जिगाय तत् ।
कालाञ्जनं नयनयोराचारार्थं समादधुः । [20]
भूषणै रत्नखचितैरलंचक्रुर्यथोचितम् ।
माता च तस्याः पृषती हरितालमनःशिलाम् ।
अङ्गुलीभ्यामुपादाय तिलकं विदधे मुखे ।
अलंकृतां वधूं दृष्ट्वा योषितो मुदमाययुः ।
माता न मुमुदे तस्याः पतिः कीदृग्भविष्यति । [25]
सौविदल्लाः समागम्य द्रुपदस्याज्ञया ततः ।
एनामारोपयामासुः करिणीं कुथभूषिताम् ।
ततोऽवाद्यन्त वाद्यानि मङ्गलानि दिवि स्पृशन् ।
विलासिनीजनश्चापि प्रवरं करिणीशतम् ।
माङ्गल्यगीतं गायन्त्यः पार्श्वयोरुभयोर्ययुः । [30]
जनापहरणे यत्ताः प्रतिहार्यः पुरो ययुः ।
कोलाहलो महानासीत्तस्मिन्पुरवरे तदा ।
धृष्टद्युम्नो ययावग्रे हयमारुह्य भारत ।
द्रुपदो रङ्गदेशे तु बलेन महता युतः ।
तस्थौ व्यूह्य महानीकं पालितं दृढधन्विभिः । [35]
तस्यां वराङ्गनायन्त्यां मञ्चस्था नृपसत्तमाः ।
तां दृष्ट्वा मन्मथाविष्टा विलासान्विदधुः किल ।
कश्चिदभ्रामयद्भूयः कमलं सुमनोहरम् ।
लोलपत्रं चलद्भृङ्गं परिवेष्टितकेसरम् ।
कश्चिद्विलासी गलितं लग्नमङ्गदकोटिभिः । [40]
भ्रालम्बमकरोदंसे साचीकृतमुखाम्बुजम् ।
लिलेख पीठं पादेन हैमं तिर्यञ्चुखत्विषा ।
केतकीदलमन्योऽपि प्रियं कर्णविभूषणम् ।
नखाग्रैः पाटयामास कुशालेखविशारदैः ।
कश्चित्कमलशोणेन नखेन स्वस्तिपाणिना । [45]
रत्नाङ्गुलीयप्रभया विद्धानक्षानवासृजत् ।
यथाभा तस्य विमला स्वस्थानाच्चलिता तथा ।
कश्चिद्व्यापारयामास कररत्नाङ्गुलीयकम् ।
भूयानेवंविधांस्तत्र द्रौपदी कमलेक्षणा ।
नीलोत्पलमयं देशं कुर्वाणेवावलोकयत् । [50]

99

T₂ G₃₋₅ ins. after 1. 181. 25: G₆, after 1. 181. 24: D₄ (marg. *sec. m.*) T₁ G₁, after 1. 181. 26^{ab}:

ततो राजसमूहस्य पश्यतो वृक्षमारुजत् ।
ततस्तु भीमं संज्ञाभिर्वारयामास धर्मराट् ।
आकारज्ञस्ततो भ्रातुः पाण्डवोऽपि न्यवर्तत ।
धर्मराजश्च कौरव्यं दुर्योधनममर्षणम् ।
एतस्मिन्नन्तरेऽविध्यद्बाणेन नतपर्वणा । [5]
दुर्योधनममित्रघ्नं धर्मराजो युधिष्ठिरः ।
ततो दुर्योधनः क्रुद्धो दण्डाहत इवोरगः ।
प्रत्ययुध्यत राजानं यत्नं परममास्थितः ।
छित्त्वा राजा धनुः सज्यं धार्तराष्ट्रस्य संयुगे ।
अभ्यवर्षच्छरौघैस्तं स हित्वा प्राद्रवद्रणम् । [10]
दुःशासनस्तु संक्रुद्धः सहदेवेन पार्थिव ।
युद्ध्वा च सुचिरं कालं धनुषा स महारथः ।
विसृज्य च धनुः संख्ये वर्म चादाय भास्वरम् ।
असिमाकाशसंकाशमभिदुद्राव पाण्डवम् ।

99

There appears to have been a short lacuna after line 4 in an exemplar, which has been filled up differently in different MSS. The variant readings follow.

D₄ (which om. line 4) ins. after line 3: T₂ G₁, ₅, after line 4:

ततस्तु पाण्डवश्रेष्ठो दुर्योधनमयोधयत् ।
ततो दुर्योधनस्तं तु वारयामास च त्रिभिः ।
वरमात्रे जिते तस्मिन्कः कामः स्यान्महत्कृतम् ।;

— After line 4, T₁ G₆ ins.:

सुमहच्चापमादाय द्रुपदस्य निवेशने ।
धनुषी यमयोर्दत्त्वा योधयामास पाण्डवः ।
ततस्तु पाण्डवश्रेष्ठो राजा तत्र महायशाः ।
ब्रह्मरूपप्रतिच्छन्नो राजानं समयोधयत् ।
भीतो दुर्योधन इति वारयामास च त्रिभिः ।;

while G₂, ₄ ins.:

जितमात्रे जिते त्वस्मिन्कः कामः स्यान्महत्कृतम् ।
आयोधनाद्रणे राजन्पश्यतां च महीभृताम् ।
दुर्योधनो धर्मसुतं तौ यमावप्ययोधयत् ।
कर्णे पराजिते यत्र मया तत्र कथं भवेत् ।
चिन्तयन्तमिति ज्ञात्वा राजा विप्राकृतिस्तदा ।

विकर्णचित्रसेनाभ्यां निगृहीतश्च कौरवः ।
दुःषहो नकुलाच्चापि अपकृष्टश्च कौरवैः ।
निवर्तन्तां भवन्तो वै कुतो विप्रेषु विग्रहः ।
न चेमे केवलं विप्रा न चैषां मानुषं बलम् ।
द्वावत्र ब्राह्मणौ क्रूरौ द्वाविन्द्रसदृशौ बले ।
ये वा के वा नमस्तेभ्यो गच्छामः स्वपुरं वयम् ।
एवं संभाष्य ते वीरा विनिवर्तन्त कौरवाः ।
प्रजहुर्ब्राह्मणास्तत्र समेतं राजमण्डलम् ।
प्रयातास्ते ततस्तत्र क्षत्रिया रणमूर्धनि ।
ब्राह्मणाश्च जयं प्राप्ताः कन्यामादाय निर्ययुः ।

100

D₄ (suppl. fol. *sec. m.*) S ins. after adhy. 188: K₄ (with a few additions, some omissions and many variants), after 1. 189. 49:

व्यासः ।
मा भूद्राजंस्तव तापो मनःस्थः
पञ्चानां भार्या दुहिता ममेति ।
मातुरेषा पार्थिव प्रार्थिता स्या-
त्पञ्चानां भार्या दुहिता ममेति ।
याजोपयाजौ धर्मरतौ तपोभ्यां
तौ चक्रतुः पञ्चपतित्वमस्याः ।
सा धर्मतः पाण्डुपुत्रैरवाप्ता
भार्या कृष्णा मोदतां वै कुलं ते ।
लोके नान्यो नाथवांस्त्वद्विशिष्टः
सर्वारीणामप्रधृष्योऽसि राजन् ।
भूयस्तु मे शृण्विदं त्वं विशोको
यथागमं पञ्चपतित्वमस्याः ।
एषा नाळायनी पूर्वं मौद्गल्यं स्थविरं पतिम् ।
आराधयामास तदा कुष्ठिनं तमनिन्दिता ।
स्थगस्थिभूतं कटुकं लोलमीर्ष्युं सुकोपनम् ।
सुगन्धेतरगन्धाढ्यं वलीपलितधारिणम् ।
स्थविरं विकृताकारं शीर्यमाणनखत्वचम् ।
उच्छिष्टमुपभुञ्जाना पर्युपास्ते महाव्रता ।
ततः कदाचिदङ्गुष्ठो भुञ्जानस्य व्यशीर्यत ।
अन्नादुद्धृत्य तच्चान्नमुपायुङ्क्ताविशङ्किता ।
तेन तस्याः प्रसन्नेन कामव्याहारिणा तदा ।
वरं वृणीष्वेत्यसकृदुक्ता वव्रे वरं तदा ।

ऋषिः ।
नास्ति वृद्धो न कटुको नेर्ष्युर्नैवातिकोपनः ।
न च दुर्गन्धवदनो न कृशो न च लोलुपः ।
कथं त्वां रमयामीह कथं त्वां वासयाम्यहम् ।
वद कल्याणि भद्रं ते यथा त्वं मनसेच्छसि ।

व्यासः ।
सा तमक्लिष्टकर्माणं वरदं सर्वकामदम् ।
भर्तारमनवद्याङ्गी प्रसन्नं प्रत्युवाच ह ।

नाळायनी ।
पञ्चबाणातिविद्धाहं मन्मथस्य महामते ।
पञ्चधा मां विभक्तात्मा भगवाँल्लोकविश्रुतः ।
रमय त्वमचिन्त्यात्मन्पुनश्चैकत्वमास्थितः ।

व्यासः ।
तां तथेत्यब्रवीद्धीमान्ब्रह्मर्षिर्वै महातपाः ।
स पञ्चधानुभूत्वा तां रमयामास सर्वशः ।
नाळायनीं सुकेशान्तां मुद्गलश्चारुहासिनीम् ।
आश्रमेष्वधिकं चापि पूज्यमानो महर्षिभिः ।
विचचार यथाकामं कामरूपवपुः पुनः ।
यदा ययौ दिवं चापि तत्र देवर्षिभिः सह ।
सुधामृतरसाहारः सुरलोके चचार ह ।
पूज्यमानस्तथा शच्या शक्रस्य भवनेष्वपि ।
महेन्द्रसेनया सार्धं पर्यधावद्गिरंसया ।
सूर्यस्य च रथं दिव्यमारुह्य भगवान्प्रभुः ।
पर्युपेत्य पुनर्मेरुं मेरौ वासमरोचयत् ।
आकाशगङ्गामाप्लुत्य तया सह तपोनिधिः ।
अंशुजालेषु चन्द्रस्य उवास च यथानिलः ।
गिरिरूपं यदा दध्रे स महर्षिस्तदा पुनः ।
तत्प्रभावेन सा तस्य मध्ये जज्ञे महानदी ।
यदा पुष्पाकुलः सालः संजज्ञे भगवानृषिः ।
लतात्वमथ संपेदे तमेवाभ्यनुवेष्टती ।
पुपोष च वपुर्यस्य तस्य तस्यानुगं पुनः ।
सा पुपोष समं भर्तुः स्कन्धेनापि चचार ह ।
ततस्तस्य च तस्याश्च तुल्या प्रीतिरवर्धत ।
तथा हि भगवांस्तस्याः प्रसादादृषिसत्तमः ।
विजज्ञुषी च सा तत्र दैवयोगेन भामिनी ।
स च तां तपसा देवीं रमयामास योगतः ।

— After line 9, T₁ G₆ ins.:
नाराचेन सुतीक्ष्णेन कायावरणभेदिना ।
हृदि विव्याध भूयोऽस्य बाह्वोरुरसि चार्पयत् ।
— (L. 13) D₄ T₂ G₁.₅.₆ जानुभ्यामेव कौरवः (for the posterior half). — (L. 14) D₄ T₂ G₁.₅.₆ पांडवं त्वभिदुद्राव सोऽसिं जग्राह चर्म च.

100

D₄ G₂.₅.₆ om. (? hapl.) lines 4-6. — (L. 17) T G₃.₄ नैर्ष्यो वा नाति°; G₁ नेर्ष्यर्नैवाति°; G₂ नेर्ष्टं नैवाति°. — K₄ D₄ G₂.₅.₆ M₆ om. line 23. — (L. 27) K₄ स चैव पंचधा भूत्वा; G₆ स पंचधावपुर्भू°. — Colophon. *Adhy. no.*: D₄ (after corr.) 200; T₁ 196; D₄ (before

एकपत्नी पुरा भूत्वा सदैवाग्रे यशस्विनी ।
अरुन्धतीव सीतेव बभूवातिपतिव्रता । [50]
दमयन्त्याश्च मातुः सा विशेषमधिकं ययौ ।
एतत्तथ्यं महाराज मा ते भूद्बुद्धिरन्यथा ।
एषा नाळायनी जज्ञे दैवयोगेन केनचित् ।
राज्ञस्त्वात्मजा कृष्णा वेद्यां तेजस्विनी शुभा ।
तस्मिंस्तस्या मनः सक्तं न शशाक कदाचन । [55]
तथा प्रणिहितो ह्यात्मा तस्यास्तस्मिन्द्विजोत्तमे ।

द्रुपदः ।

ब्रूहि तत्कारणं येन ब्रह्मज्ञाता तपस्विनी ।
सुता ममाध्वरे कृष्णा सर्ववेदविदां वर ।

Colophon.

व्यासः ।

शृणु राजन्यथा ह्यस्या दत्तो रुद्रेण वै वरः ।
यदर्थं चैव संभूता तव यज्ञे यशस्विनी । [60]
अहं ते कथयिष्यामि कृष्णायाः पौर्वदेहिकम् ।
इन्द्रसेनेति विख्याता पुरा नाळायनी शुभा ।
मौद्गल्यं पतिमासाद्य चचार विगतज्वरा ।
मौद्गल्यस्य महर्षेश्च रममाणस्य वै तया ।
संवत्सरगणा राजन्व्यतीयुः क्षणवत्तदा । [65]
ततः कदाचिद्धर्मात्मा तृप्तः कामाद्व्यरज्यत ।
अन्विच्छन्परमं ब्रह्म त्यागधर्मपरोऽभवत् ।
उत्ससर्ज स तां विप्रः सा तदा चापतद्भुवि ।
मौद्गल्यो राजशार्दूल तपोभिर्भावितः सदा ।
कामभोगातुराभ्येत्य वचनं चेदमब्रवीत् । [70]

इन्द्रसेना ।

प्रसीद भगवन्मह्यं न मामुत्स्रष्टुमर्हसि ।
अवितृप्तास्मि ब्रह्मर्षे कामानां कामसेवनात् ।
मारो मां बाधतेऽत्यर्थमनुगृह्णातु मां भवान् ।
तर्पयस्व ममाक्षाणि गुह्यं मां बाधतेऽनिशम् ।

ऋषिः ।

यस्मात्त्वं मयि निःशङ्का ह्यवक्तव्यं प्रभाषसे । [75]
आचरन्ती तपोविघ्नं तस्माच्छृणु वचो मम ।
भविष्यसि नृलोके त्वं राजपुत्री यशस्विनी ।
पाञ्चालराजस्य सुता द्रुपदस्य महात्मनः ।
भवितारस्तु ते तत्र पतयः पञ्च विश्रुताः ।
तैः सार्धं मधुराकारैश्चिरं रतिमवाप्स्यसि । [80]

व्यासः ।

सैवं शप्ता तु विमना वनं प्राप्ता यशस्विनी ।
भोगैरतृप्ता देवेशं तपसाराधयत्तदा ।
निराशीर्मारुताहारा निराहारा तथैव च ।
अनुवर्तमाना त्वादित्यं तथा पञ्चतपाभवत् ।
तीव्रेण तपसा तस्यास्तुष्टः पशुपतिः स्वयम् । [85]
वरं प्रादात्तदा रुद्रः सर्वलोकेश्वरः प्रभुः ।
भविष्यति परं जन्म मानुषेषु वराङ्गने ।
भविष्यन्ति च ते भद्रे पतयः पञ्च सुव्रताः ।
महेन्द्रवपुषः सर्वे महेन्द्रसमविक्रमाः ।
तत्रस्था च महत्कर्म सुराणां त्वं करिष्यसि । [90]

नाळायनी ।

एकः खलु मया भर्ता वृतः पञ्चापि मे कथम् ।
भविष्यन्ति ममैकस्याः पतयस्तद्ब्रवीहि मे ।

महेश्वरः ।

पञ्चकृत्वस्त्वया ह्युक्तः पतिं देहीत्यहं पुनः ।
पञ्च ते पतयो भद्रे भविष्यन्ति सुखावहाः ।

नाळायनी ।

धर्म एकः पतिः स्त्रीणां पूर्वमेव प्रकल्पितः । [95]
बहुपत्नीकता पुंसां धर्मश्च पितृभिः कृतः ।
स्त्रीधर्मः पूर्वमेवायं निर्मितो मुनिभिः पुरा ।
सहधर्मचरी भर्तुरेका एकस्य चोच्यते ।
एको हि भर्ता नारीणां कौमार इति लौकिकः ।
आपत्सु च नियोगेन संतानार्थे परः स्मृतः । [100]
गच्छेत या तृतीयं तु तस्या निष्कृतिरुच्यते ।
चतुर्थे पतिता धर्मात्पञ्चमे वर्धकी भवेत् ।
एवं गते धर्मपथे न वृणे बहुपुंस्कताम् ।
अलोकाचरितात्तस्मात्कथं मुच्येय संकरात् ।

महेश्वरः ।

अनावृताः पुरा नार्यो ह्यासञ्शुध्यन्ति चार्तवे । [105]
सकृदुक्तं त्वया नैतन्नाधर्मस्ते भविष्यति ।

नाळायनी ।

यदि मे पतयः पञ्च वरमिच्छामि तैर्मिथः ।
कौमारं च भवेत्सर्वैः संगमे संगमे च मे ।
पतिशुश्रूषया चैव सिद्धिः प्राप्ता पुरा मया ।
भोगेच्छा च मया प्राप्ता स च भोगश्च मे भवेत् । [110]

---

corr.) T_3 G_{4-6} 148; $G_{1,3}$ 150; G_2 147; M_6 149. — After line 60, K_4 ins.:

कृष्णा मतिमतां श्रेष्ठ तव सा पूर्वमीरिता ।

— (L. 66) D_4 T_1 $G_{5,6}$ M_6 तप्तुकामो (for तृप्तः कामाद्). D_4 $G_{1,2,5,6}$ M_6 om. lines 70, 73–74. — After line 111, G_1 ins.:

दुर्भगा लप्स्यसे सिद्धिं भोगेन बहुजन्मताम् ।

— After line 116, K_4 ins.

एवं कृत्वा महत्कार्यं मनुष्येषु वराङ्गना ।
गमिष्यसि हि तान्लोकान्सत्यमेतद्ब्रवीमि ते ।

Colophon. *Adhy. no.:* D_4 201; T_1 177; T_3 G_{4-6} 149; $G_{1,3}$ 151; G_2 148; M_6 150.

महेश्वरः ।
रतिश्च भद्रे सिद्धिश्च न भजेते परस्परम् ।
अभोगा लप्स्यसे सिद्धिं योगेनापि महत्त्वताम् ।
अन्यदेहान्तरे च त्वं रूपभाग्यगुणान्विता ।
पञ्चभिः प्राप्य कौमारं महाभागा भविष्यसि ।
गच्छ गङ्गाजलस्था च नरं पश्यसि यं शुभे । [115]
तमानय ममाभ्याशं सुरराजं शुचिस्मिते ।
व्यासः ।
इत्युक्ता विश्वरूपेण रुद्रं कृत्वा प्रदक्षिणम् ।
जगाम गङ्गामुद्दिश्य पुण्यां त्रिपथगां नदीम् ।

Colophon.

101

After the (additional) colophon following 1. 189. 40, D_4 (marg. *sec. m.*) S ins. the foll. addl. adhy.:

व्यासः ।
इदं चापि पुरावृत्तं तन्निबोध च भूमिप ।
कीर्त्यमानं नृपर्षीणां पूर्वेषां दारकर्मणि ।
नितन्तुर्नाम राजर्षिर्बभूव भुवि विश्रुतः ।
तस्य पुत्रा महेष्वासा बभूवुः पञ्च भूमिपाः ।
साल्वेयः शूरसेनश्च श्रुतसेनश्च वीर्यवान् । [5]
तिन्दुसारोऽतिसारश्च क्षत्रियाः क्रतुयाजिनः ।
नातिचक्रुरन्योन्यमन्योन्यस्य प्रियंवदाः ।
एतान्नैतन्तवान्पञ्च शैब्या चात्र स्वयंवरे ।
अवाप सा पतीन्वीरान्भौमाश्वी मनुजाधिपान् ।
वीणेव मधुरारावा गान्धारस्वरमूर्च्छिता । [10]
उत्तमा सर्वनारीणां भौमाश्वी ह्यभवत्तदा ।
यस्या नैतन्तवाः पञ्च पतयः क्षत्रियर्षभाः ।
बभूवुः पृथिवीपालाः सर्वैः समुदिता गुणैः ।
तेषामेकाभवद्भार्या राज्ञामौशीनरी नृप ।
भौमाश्वी नाम भद्रं ते तदा रूपगुणान्विता । [15]
पञ्चभ्यः पञ्चधा पञ्च दायादान्सा व्यजायत ।
तेभ्यो नैतन्तवेभ्यस्तु राजशार्दूल वै तदा ।
पृथगाख्याभवत्तेषां मत्स्यानां पञ्चधा भुवि ।
यथावत्कीर्त्यमानांस्तान्शृणु मे राजसत्तम ।
साल्वेयाः शूरसेनाश्च श्रुतसेनाश्च पार्थिवाः । [20]
तिन्दुसारातिसाराश्च वंशा एषां नृपोत्तम ।
एवमेकाभवद्भार्या भौमाश्वी भुवि विश्रुता ।

Colophon.

102

After 1. 189. 46, T_3 $G_{2-4.6}$ ins.:

सैव नाळायनी भूत्वा रूपेणाप्रतिमा भुवि ।
मौद्गल्यं पतिमासाद्य शिवाद्वरमवाप्य च ।,

which is followed by 1. 189. 47^{ab}. T_3 G_{2-4} cont.:

शृणु गुह्यं महीपाल वदतः सावधानतः ।
संश्रद्धत्स्व वचो मह्यं ततः पश्यसि पाण्डवान् ।
हत्वा वृत्रं सुरपतिस्त्वाष्ट्रं स्वर्गात्स ह च्युतः । [5]
ब्रह्महत्यामवाप्याथ धर्मादिरहितस्तदा ।
ऐन्द्रो धर्मो यममगाद्बलं वायुमथाविशत् ।
वीर्यं वरं ज्ञानरूपे नासत्यावभिजग्मतुः ।
ह्रीश्च लक्ष्मीश्च कीर्तिश्च संनतिर्मतिरेव च ।
एता विनिर्गता इन्द्राद्वाग्देवीं ताः समाश्रिताः । [10]
पूर्वेन्द्रवरदानाच्च महेशस्याज्ञया नृप ।
धर्मादीन्पाण्डवान्विद्धि ह्रियाद्या द्रौपदी तथा ।
तदिमे पाण्डवा राजन्निन्द्र एको न संशयः ।
एकैव द्रौपदी राजन्पौलोमी ते न संशयः ।
शृणु गुह्यतमं चान्यद्रहस्यं देवनिर्मितम् । [15]
यच्छ्रुत्वा संशयस्तेऽद्य शतधा विफलिष्यति ।
सद्योजातमुखादीनि मुखानि च महेशितुः ।
पाण्डवाः पञ्च यानि स्युः पार्वती द्रौपदी त्वियम् ।
इदमन्यद्रहस्यं ते देवगुह्यं सनातनम् ।
भवतः प्रत्ययार्थं च निःसंशयकरं महत् । [20]
चत्वारश्च भुजा विष्णोः शङ्खचक्रादिलाञ्छिताः ।
धर्मराजश्च भीमश्च यमौ च नृपसत्तम ।
अर्जुनस्तु स्वयं विष्णुः पाञ्चाली कमलावती ।
चतस्रो मूर्तयो विष्णोः स्वयं विष्णुश्च सिन्धुजा ।
चतुरः पाण्डवान्विष्णुं कृष्णां विद्धि महीश्वर । [25]
चतुर्मूर्तिश्चतुर्व्यूहो वासुदेवादिभिः सह ।
अवतीर्णो महीं विष्णुः पाञ्चाली कमला स्वयम् ।
पञ्चायतनसंज्ञश्च पञ्चमूर्तिः सदाशिवः ।
निवृत्तादिलयान्पञ्च पाञ्चालीं विद्धि भूमिप ।
तस्मात्ते संशयो मा भूत्पाण्डवेभ्यः प्रदीयताम् । [30]
कृष्णा तव सुता राजन्पञ्चभिः पूर्वसंभवात् ।
पञ्चाग्नयः पाण्डवाः स्युः स्वाहा कृष्णा प्रकीर्तिता ।

☞ The passage is followed by a *repetition* of 1. 189. 47^{ab} (v. l. ततो for हि सा), a sure indication that the passage is interpolated!

101

In the footnotes to 1. 189. 40, the number of lines in this passage is erroneously stated to be 25; the correct number is 22. — Colophon. *Adhy. no.:* D_4 200; T_1 199; T_3 G_{4-6} 151; $G_{1.8}$ 153; G_2 150; M_6 152.

103

After 1. 192. 7, K4 D4 (both on suppl. fol; *sec. m.*) S ins.:

धार्मिकान्वृत्तसंपन्नान्मातुः प्रियहिते रतान् ।
यदा तानीदृशान्पार्थानुत्सादयितुमर्हति ।
वैशंपायनः ।
ततः स्वयंवरे वृत्ते धार्तराष्ट्राः स्म भारत ।
मन्त्रयन्ते ततः सर्वे कर्णसौबलदूषिताः ।
शकुनिः ।
कश्चिच्छत्रुः कर्शनीयः पीडनीयस्तथा परः । [5]
उत्सादनीयाः कौन्तेयाः सर्वे क्षत्रस्य मे मताः ।
एवं पराजिताः सर्वे यदि यूयं गमिष्यथ ।
अकृत्वा संविदं कांचित्तद्वस्तप्स्यत्यसंशयम् ।
अयं देशश्च कालश्च पाण्डवोद्धरणाय नः ।
न चेदेवं करिष्यध्वं लोके हास्या भविष्यथ । [10]
यमेते संश्रिता वस्तुं कामयन्ते च भूमिपम् ।
सोऽल्पवीर्यबलो राजा द्रुपदो वै मतो मम ।
यावदेतान्न जानन्ति जीवतो वृष्णिपुंगवाः ।
चैद्यश्च पुरुषव्याघ्रः शिशुपालः प्रतापवान् ।
एकीभावं गता राज्ञा द्रुपदेन महात्मना । [15]
दुराधर्षतरा राजन्भविष्यन्ति न संशयः ।
यावत्त्वचलतां सर्वे प्राप्नुवन्ति नराधिपाः ।
तावदेव व्यवस्यामः पाण्डवानां वधं प्रति ।
मुक्ता जतुगृहान्नीमादाशीविषमुखादिव ।
पुनर्यदिह मुच्यन्ते महन्नो भयमाविशेत् । [20]
तेषामिहोपयातानामेषां च पुरवासिनाम् ।
अन्तरे दुष्करं स्थातुं मेषयोर्महतोरिव ।
हलधृक्प्रगृहीतानि बलानि बलिनां स्वयम् ।
यावन्न कुरुसेनायां पतन्ति पतगा इव ।
तावत्सर्वाभिसारेण पुरमेतद्विनाश्यताम् । [25]
एतदत्र परं मन्ये प्राप्तकालं नरर्षभाः ।
वैशंपायनः ।
शकुनेर्वचनं श्रुत्वा भाषमाणस्य दुर्मतेः ।
सौमदत्तिरिदं वाक्यं जगाद परमं ततः ।
प्रकृतीः सप्त वै ज्ञात्वा आत्मनश्च परस्य च ।
तथा देशं च कालं च षड्विधांश्च नयेद्गुणान् । [30]
स्थानं वृद्धिं क्षयं चैव भूमिं मित्राणि विक्रमम् ।
समीक्ष्याथाभियुञ्जीत परं व्यसनपीडितम् ।
ततोऽहं पाण्डवान्मन्ये मित्रकोशसमन्वितान् ।
बलस्थान्विक्रमस्थांश्च स्वकृतैः प्रकृतिप्रियान् ।
वपुषा भुवि भूतानां नेत्राणि च मनांसि च । [35]
श्रोत्रं मधुरया वाचा रमयत्यर्जुनो नृणाम् ।
न तु केवलदैवेन प्रज्ञा भावेन भेजिरे ।
यद्बभूव मनःकान्तं कर्मणा स चकार तत् ।
न ह्ययुक्तं न चासक्तं नामृतं न च विप्रियम् ।
भाषितं चारुभाषस्य जज्ञे पार्थस्य भारती । [40]
तानेवं गुणसंपन्नान्संपन्नाम्राजलक्षणैः ।
न तान्पश्यामि ये शक्ताः समुच्छेत्तुं यथाबलात् ।
प्रभावशक्तिर्विपुला मन्त्रशक्तिश्च पुष्कला ।
तथैवोत्साहशक्तिश्च पार्थेष्वभ्यधिका सदा ।
मौलमित्रबलानां च कालज्ञो वै युधिष्ठिरः । [45]
साम्ना दानेन भेदेन दण्डेनेति युधिष्ठिरः ।
अमित्रं यतते जेतुं न रोषेणेति मे मतिः ।
परिक्रीय धनैः शत्रून्मित्राणि च धनानि च ।
मूलं च सुदृढं कृत्वा हन्त्यरीन्पाण्डवस्ततः ।
अशक्यान्पाण्डवान्मन्ये देवैरपि सवासवैः । [50]
एषामर्थे सदा युक्तौ कृष्णसंकर्षणावुभौ ।
श्रेयश्च यदि मन्यध्वं मन्मतं यदि वो मतम् ।
संविदं पाण्डवैः सार्धं कृत्वा याम यथागतम् ।
गोपुराट्टालकैरुच्चैरुपतल्पशतैरपि ।
गुप्तं पुरवरं श्रेष्ठमेतदग्निश्च संवृतम् । [55]
तृणधान्येन्धनरसैस्तथा यन्त्रायुधौषधैः ।
युक्तं ह्युरुकवाटैश्च द्रव्यागारतुषादिकैः ।
भीमोच्छ्रितमहाचक्रं बृहदट्टालसंवृतम् ।
दृढप्राकारनिर्यूहं शतघ्नीजालसंवृतम् ।
ऐष्टको दारवो वप्रो मानुषश्चेति यः स्मृतः । [60]
प्राकारकर्तृभिर्वीरैर्नृगर्भस्तत्र पूजितः ।
तदेतन्नरगर्भेण पाण्डरेण विराजते ।
सालेनानेकतालेन सर्वतः संवृतं पुरम् ।
अनुरक्ताः प्रकृतयो द्रुपदस्य महात्मनः ।
दानमानार्चिताः सर्वे बाह्याश्चाभ्यन्तराश्च ये । [65]
प्रतिरुद्धानिमाञ्ज्ञात्वा राजभिर्भीमविक्रमैः ।
उपयास्यन्ति दाशार्हाः समुद्यम्रोच्छ्रितायुधाः ।
तस्मात्संधिं वयं कृत्वा धार्तराष्ट्रस्य पाण्डवैः ।
स्वराष्ट्रमेव गच्छामो यद्यास्मं वचनं मम ।
एतन्मम मतं सर्वैः क्रियतां यदि रोचते । [70]
एतच्च सुकृतं मन्ये क्षेमं चापि महीक्षिताम् ।

Colophon.

वैशंपायनः ।
सौमदत्तेर्वचः श्रुत्वा कर्णो वैकर्तनो वृषा ।
उवाच वचनं काले कालज्ञः सर्वकर्मणाम् ।
नीतिपूर्वमिदं सर्वमुक्तं वचनमर्थवत् ।

103

(L. 17) T1 यावत्प्रचलतां; G5.6 यावदत्वरतां; M6 यावद्बलवतां.

T1 G2.4 M6 नाप्नु°. Colophon. *Adhy. no.:* D4 205; T1 203; T3 G4–6 155; G1.3 157; G2 153; M6 156.

वचनं नाभ्यसूयामि श्रूयतां मद्वचःस्थितिः ।
द्वैधीभावो न गन्तव्यः सर्वकर्मसु मानवैः ।
द्विधाभूतेन मनसा ह्यन्यत्कर्म न सिध्यति ।
संप्रयाणासनाभ्यां तु कर्शनेन तथैव च ।
नैतच्छक्यं पुरं हन्तुमाक्रन्दोऽस्याप्यशोभनः ।
अवमर्दनकालोऽत्र मतश्चिन्तयतो मम ।
यावन्नो वृष्णयः पार्ष्णीं न गृह्णन्ति रणप्रियाः ।
प्रभवन्तो हृष्टतुष्टाः स्वबाहुबलशालिनः ।
प्राकारमवमृद्नन्तु परिघाः पूरयन्त्वपि ।
प्रस्रावयन्तु सलिलं क्रियतां विषमं समम् ।
तृणकाष्ठेन महता खातमस्य प्रपूर्यताम् ।
घुष्यतां राजसैन्येषु परेषां यो हनिष्यति ।
नागमश्वं पदातिं वा दानमानं स लप्स्यते ।
नागे दश सहस्राणि पञ्च चाश्वपदातिषु ।
रथे वै द्विगुणं नागाद्वसु दास्यन्ति पार्थिवाः ।
यश्च कामसुखे सक्तो बालश्च स्थविरश्च यः ।
अयुद्धमनसो ये च ते तु तिष्ठन्तु भीरवः ।
प्रदरश्च न दातव्यो न गन्तव्यमचोदितैः ।
यशो रक्षत भद्रं वो जेष्यामो वै वयं पुरम् ।
अनुलोमाश्च नो वाताः सर्वतो मृगपक्षिणः ।
अग्नयश्च विराजन्ते शस्त्राणि कवचानि च ।
ततः कर्णवचः श्रुत्वा धार्तराष्ट्रप्रियैषिणः ।
निर्ययुः पृथिवीपालाश्चालयन्तः परान्रणे ।
न हि तेषां मनःशक्तिरिन्द्रियार्थेषु सर्वशः ।
यथा पुनररिघ्नानां प्रसवो युद्ध एव च ।
वैकर्तनपुरोवातः सैन्धवोर्मिमहास्वनः ।
दुःशासनमहामत्स्यो दुर्योधनमहाग्रहः ।
स राजसागरो भीमो भीमघोषप्रदर्शनः ।
अभिदुद्राव वेगेन पुरं तदपसव्यतः ।
तदनीकमनाधृष्यं शस्त्राग्निज्वालदीपितम् ।
समुत्कूलितमाज्ञाय चुक्रुशुर्द्रुपदात्मजाः ।
ते मेघसमनिर्घोषैर्बलिनः स्यन्दनोत्तमैः ।
निर्ययुर्नगरद्वाराद्रासयन्तः परान्रणे ।
धृष्टद्युम्नः शिखण्डी च सुमित्रः प्रियदर्शनः ।
चित्रकेतुः सुकेतुश्च ध्वजसेनश्च वीर्यवान् ।
पुत्रा द्रुपदराजस्य बलवन्तो जयैषिणः ।
द्रुपदश्च महावीर्यः पाण्डरोष्णीषकेतनः ।
पाण्डरव्यजनच्छत्रः पाण्डरध्वजवाहनः ।
सपुत्रगणमध्यस्थः शुशुभे राजसत्तमः ।
चन्द्रमा ज्योतिषां मध्ये पौर्णमास्यामिवोदितः ।
अथोद्धूतपताकाग्रमजिह्मगतिमव्ययम् ।
द्रुपदानीकमायान्तं कुरुसैन्यमभिद्रवत् ।

तयोरुभयतो जज्ञे भैरवस्तुमुलः स्वनः ।
बलयोः संप्रहरतोः स्रवन्त्योः सरितोरिव ।
प्रकीर्णरथनागाश्वैस्तान्यनीकानि सर्वशः ।
ज्योतींषि विप्रकीर्णानि सर्वतः प्रचकाशिरे ।
उत्कृष्टभेरीनिनदे संप्रवृत्ते महारवे ।
अमर्षिता महात्मानः पाण्डवा निर्ययुस्ततः ।
रथान्वै मेघनिर्घोषान्युक्तान्परमवाजिभिः ।
धन्विनो ध्वजिनः शुभ्रानास्थाय भरतर्षभाः ।
ततः पाण्डुसुतान्दृष्ट्वा रथस्थानाचकार्मुकान् ।
नृपाणामभवत्कम्पो वेपथुर्हृदयेषु च ।
निर्यातेष्वथ पार्थेषु द्रौपदं तद्बलं रणे ।
आविशत्परमो हर्षः प्रमोदश्च जयं प्रति ।
स मुहूर्तं व्यतिकरः सैन्यानामभवद्भृशम् ।
ततो द्वन्द्वमयुध्यन्त मृत्युं कृत्वा निवर्तनम् ।
जघ्नतुः समरे तस्मिन्सुमित्रप्रियदर्शनौ ।
जयद्रथश्च कर्णश्च पश्यतः सव्यसाचिनः ।
अर्जुनः प्रेक्ष्य निहतौ सुमित्रप्रियदर्शनौ ।
जयद्रथसुतं तत्र जघान पितुरन्तिके ।
वृषसेनादवरजं सुबाहुं वै धनंजयः ।
कर्णपुत्रं महावीर्यं रथनीडादपातयत् ।
तौ सुतौ निहतौ दृष्ट्वा राजसिंहौ तरस्विनौ ।
नामृष्येतां महाबाहू प्रहारमिव सद्भृशौ ।
तौ जग्मतुरसंभ्रान्तौ फल्गुनस्य रथं प्रति ।
प्रतिमुक्ततलत्राणौ त्रायमाणौ परस्परम् ।
संनिपातस्तयोरासीत्फल्गुनेन महात्मना ।
वृत्रशम्बरयोः संख्ये वज्रिणेव महारणे ।
त्रीन्हयाञ्जघ्नतुस्तत्र फल्गुनस्य नरर्षभौ ।
ततः किलिकिलाशब्दः कुरूणामभवत्तदा ।
तान्हयान्निहतान्दृष्ट्वा भीमसेनः प्रतापवान् ।
निमेषान्तरमात्रेण रथमश्वैरयोजयत् ।
उपयातं रथं दृष्ट्वा दुर्योधनपुरःसरौ ।
सौबलः सौमदत्तिश्च समेयातां परंतपौ ।
तैः पञ्चभिरदीनात्मा भीमसेनो महाबलः ।
अयुध्यत बलैर्वीरैरिन्द्रियार्थैरिवेश्वरः ।
तैर्निरुद्धो न संत्रासं जगाम समितिंजयः ।
पञ्चभिर्द्विरदैर्मत्तैर्निरुद्ध इव केसरी ।
तस्य ते युगपत्पञ्च पञ्चभिर्निशितैः शरैः ।
सारथिं वाजिनश्चैव निन्युर्वैवस्वतक्षयम् ।
हताश्वात्स्यन्दनश्रेष्ठादवरुह्य महारथः ।
चचार विविधान्मार्गानसिमुद्यम्य पाण्डवः ।
अश्वस्कन्धेषु चक्रेषु युगेष्वीषासु चैव ह ।
व्यचरत्पातयञ्शत्रून्सुपर्ण इव भोगिनः ।

— (L. 99) K₄ D₃ T₁ G₁ M₆ यथा परपुरघ्नानां. K₄ D₄ G₅ प्रसभो; T₁ प्रभवं; G₁ प्रसभं; G₆ प्रसहो; M₆ प्रसंगो.

विधनुष्कं विकवचं विरथं च समीक्ष्य तम् ।
अभिपेतुर्नरव्याघ्रमर्जुनप्रमुखा रथाः । [160]
धृष्टद्युम्नः शिखण्डी च यमौ च युधि दुर्जयौ ।
तस्मिन्दाशरथे युद्धे प्रवृत्ते शरवृष्टिभिः ।
रथा ध्वजाः पताकाश्च सर्वमन्तरधीयत ।
तत्प्रवृत्तं चिरं कालं युद्धं सममिवाभवत् ।
रथेनाथ महाबाहुरर्जुनोऽभ्यपतत्पुनः । [165]
तमापतन्तं दृष्ट्वैव महाबाहुर्धनुर्धरः ।
कर्णोऽस्त्रविदुषां श्रेष्ठो वारयामास सायकैः ।
स तेनाभिहतः पार्थो वासविर्वज्रसंनिभान् ।
त्रीञ्शरान्संदधे क्रुद्धो वधे कर्णस्य पाण्डवः ।
तैः शरैराहतं कर्णं ध्वजयष्टिमुपाश्रितम् । [170]
अपोवाह रथेनाशु सूतः परपुरंजयम् ।
ततः पराजिते कर्णे धार्तराष्ट्रान्महद्भयम् ।
विवेश समुदग्रांश्च पाञ्चालान्प्रसमीक्ष्य च ।
तत्प्रकम्पितमत्यर्थं दृष्ट्वा वै सौबलो बलम् ।
गिरा गम्भीरया वीरः समाश्वासयतासकृत् । [175]
धार्तराष्ट्रैस्ततः सर्वैर्दुर्योधनपुरःसरैः ।
धृतं तत्पुनरेवासीद्बलं पार्थप्रकम्पितम् ।
ततो दुर्योधनं दृष्ट्वा भीमो भीमपराक्रमः ।
अक्रुध्यत्स महाबाहुरगारं जातुषं स्मरन् ।
ततः संग्रामशिरसि ददर्श विपुलद्रुमम् । [180]
आयामभूतं तिष्ठन्तं स्कन्धपञ्चाशदुन्नतम् ।
महास्कन्धं महोत्सेधं शक्रध्वजमिवोच्छ्रितम् ।
चित्रमाल्याम्बरधरं पताकाशतशोभितम् ।
सालमुद्यम्य पाणिभ्यामुद्भृत्य च रणे बली ।
अभिपेदे परान्संख्ये वज्रपाणिरिवासुरान् । [185]
भीमसेनभयार्तानि फल्गुनाभिहतानि च ।
न शेकुस्तान्यनीकानि धार्तराष्ट्राभिरक्षितुम् ।
तानि संभ्रान्तयोधानि श्रान्तवाजिगजानि च ।
दिशः प्राकालयद्भीमो दिवीवाभ्राणि मारुतः ।
तान्निवृत्तान्निरानन्दान्हतवारणवाजिनः । [190]
नानुससुर्न चाजघ्नुर्नोचुः किंचिच्च दारुणम् ।
स्वमेव शिबिरं जग्मुः क्षत्रियाः शरविक्षताः ।
परेऽप्यभिययुर्हृष्टाः पुरं पौरसुखावहाः ।
मुहूर्तमभवद्वैरं तेषां वै पाण्डवैः सह ।
यावत्तद्युद्धमभवन्महद्देवासुरोपमम् । [195]
सुवृत्तं चक्रिरे सर्वे सुप्रातमब्रुवन्वधूम् ।
कृतार्थं द्रुपदं चोचुर्धृष्टद्युम्नं च पार्षतम् ।
शकुनिः सिन्धुराजश्च कर्णदुर्योधनावपि ।
तेषां तदभवद्दुःखं हृदि वाचा तु नाब्रुवन् ।
ततः प्रयाता राजानः सर्व एव यथागतम् । [200]

धार्तराष्ट्रा हि ते सर्वे गता नागपुरं तदा ।
प्रागेव पुररोधात्तु पाण्डवैरश्वसादिनः ।
प्रेषिता गच्छतारिष्टानस्मानाख्यात शौरये ।
ते त्वदीर्घेण कालेन गत्वा द्वारवतीं पुरीम् ।
ऊचुः संकर्षणोपेन्द्रौ वचनं वचनक्षमौ । [205]
कुशलं पाण्डवाः सर्वानाहुः स्मान्धकवृष्णयः ।
आत्मनश्चाक्षतानाहुर्विमुक्ताञ्जातुषाद्गृहात् ।
समाजे द्रौपदीं स्माहुर्लब्धां राजीवलोचनाम् ।
आत्मनः सदृशीं सर्वे शीलवृत्तसमाधिभिः ।
तच्छ्रुत्वा वचनं कृष्णस्तानुवाचोत्तरं वचः । [210]
सर्वमेतदहं जाने वधात्तस्य तु रक्षसः ।
तत उद्योजयामास केशवश्चतुरङ्गिणीम् ।
सेवां समुपयात्तूर्णं पाञ्चालनगरं प्रति ।
ततः संकर्षणश्चैव केशवश्च महाबलः ।
यादवैः सह सर्वैश्च पाण्डवानभिजग्मतुः । [215]
पितृष्वसारं संपूज्य द्रुपदं च यथाविधि ।
द्रौपदीं भूषणैः शुभ्रैर्भूषयित्वा महाधनैः ।
न्यायतः पूजिता राज्ञा द्रुपदेन महात्मना ।
रेमिरे पाण्डवैः सार्धं पाञ्चालनगरे तदा ।

Colophon.

104

After 1. 197. 29, Ts G2–4 ins.:

अजय्याः पाण्डवा युद्धे हरेण हरिणापि वा ।
त्रैलोक्येनापि भूपाल किमु तैः खलु मानवैः ।
दैवानुकूलाः कौन्तेया दैवं तेषां परायणम् ।
प्रत्यक्षमेतत्सर्वेषां मुक्ता जतुगृहानलात् ।
जित्वा गन्धर्वराजानं धौम्यं प्राप्य पुरोहितम् । [5]
पाञ्चालनगरं प्राप्य हत्वा लक्ष्ममानुषम् ।
अनर्घ्यं धनुरानम्य शिरोभिः सह भूभृताम् ।
चैद्यमागधकर्णाद्यैः किं कृतं तत्र भूमिपैः ।
आरूढमूलाः पार्थाश्च दरिद्रा निर्धना इति ।
जेतुं शक्या न मन्येथा अजय्याः पाण्डवाः सुरैः । [10]
यावत्तिष्ठति लोकेऽस्मिन्कृष्णो यादववंशजः ।
मुरारिः केशिहन्ता च लीलामानुषविग्रहः ।
प्रणतार्तिहरो योगी केशवः क्लेशनाशनः ।
भक्तानुवत्सलो भक्तस्वान्तवेश्मगृही तथा ।
चतुःसागरपर्यन्तां केवलं पृथिवीं न हि । [15]
धर्मात्मजो महाराज तावत्त्रैलोक्यमर्हति ।
अलं कर्णोनया बुद्ध्या नोत्साहय सुयोधनम् ।
शकुने गच्छ मा गाधं निरयं कौरवैः सह ।
पाण्डवाश्च वयं सर्वे भूमिपालाः सबान्धवाः ।

Colophon of No. 103. *Adhy.no.*: K4 D1 206; T1 204; Ts G4–6 156; G1 158; G2 154; G3 M6 157.

वृष्ण्यन्धकपुरोगाश्च यादवाः सहकेशवाः ।
सर्वे संभूय जीवाम सपुत्रपशुबान्धवाः ।
बोधयध्वं तथा यूयं तथैव शरदां शतम् ।
मा पुत्रवशगो भूप तव पुत्रः सुदुर्मतिः ।
आनीय पाण्डवान्साधून्पुत्रांश्च सह सर्वशः ।
अभेदेन निरीक्षस्व न भेदं चक्षुषोः कुरु ।
मनसा स्नेहपूर्णेन निर्भेदो नखमांसवत् ।

धृतराष्ट्रः ।

पार्थिवार्थे प्रियं ब्रूहि नाप्रियं सूतनन्दन ।
पुत्र त्वं च न मे ब्रूहि पार्थानामहितं क्वचित् ।
दुर्योधनमसन्मार्गान्निवर्तय महामते ।

105

After 1. 199. 9, D_4 (marg. *sec. m.*) S ins.:

वैशंपायनः ।

पृथायास्तु तथा वेश्म प्रविवेश महाद्युतिः ।
पादौ स्पृष्ट्वा पृथायास्तु शिरसा च महीं गतः ।
दृष्ट्वा तु देवरं कुन्ती शुशोच च मुहुर्मुहुः ।

कुन्ती ।

वैचित्रवीर्यं ते पुत्राः कथंचिज्जीवितास्त्वया ।
त्वत्प्रसादाज्जतुगृहे भ्रातरः प्रत्यागतास्तव ।
कूर्मश्चिन्तयते पुत्रान्यत्र वा तत्र वा गतः ।
चिन्तया वर्धयेत्पुत्रान्यथा कुशलिनस्तथा ।
तव पुत्रास्तु जीवन्ति त्वं भ्राता भरतर्षभ ।
यथा परभृतः पुत्रानरिष्टा वर्धयेत्सदा ।
तथैव तव पुत्रास्तु मया तात सुरक्षिताः ।
दुःखास्तु बहवः प्राप्तास्तथा प्राणान्तिका मया ।
अतः परं न जानामि कर्तव्यं ज्ञातुमर्हसि ।

वैशंपायनः ।

इत्येवमुक्त्वा दुःखार्ता शुशोच परमातुरा ।
प्रणिपत्याब्रवीत्क्षत्ता मा शोच इति भारत ।

विदुरः ।

न विनश्यन्ति लोकेषु तव पुत्रा महाबलाः ।
अचिरेणैव कालेन स्वराज्यस्था भवन्ति ते ।
बान्धवैः सहिताः सर्वैर्मा शोकं कुरु माधवि ।

106

After 1. 199. 11, D_4 (marg. *sec. m.*) S ins.:

सुवर्णकक्ष्याग्रैवेयान्सुवर्णाङ्कुशभूषितान् ।
जाम्बूनदपरिष्कारान्प्रभिन्नकरटामुखान् ।
अधिष्ठितान्महामात्रैः सर्वशस्त्रसमन्वितान् ।
सहस्रं प्रददौ राजा गजानां वरवर्मिणाम् ।
रथानां च सहस्रं वै सुवर्णमणिचित्रितम् ।
चतुर्युजां भानुमच्च पाञ्चालः प्रददौ तदा ।
सुवर्णपरिबर्हाणां वरचामरमालिनाम् ।
जात्यश्वानां च पञ्चाशत्सहस्रं प्रददौ नृपः ।
दासीनामयुतं राजा प्रददौ वरभूषणम् ।
ततः सहस्रं दासानां प्रददौ वरधन्विनाम् ।
हैमानि शय्यासनभाजनानि
द्रव्याणि चान्यानि च गोधनानि ।
पृथक्पृथक्चैव ददौ स कोटिं
पाञ्चालराजः परमप्रहृष्टः ।
शिबिकानां शतं पूर्णं वाहान्पञ्चशतं वरान् ।
एवमेतानि पाञ्चालो जन्यार्थे प्रददौ धनम् ।
हरणं तत्र पाञ्चाल्या ज्ञातिदेयं तु सौमकिः ।
धृष्टद्युम्नो ययौ तत्र भगिनीं गृह्य भारत ।
नानद्यमानो बहुभिस्तूर्यशब्दैः सहस्रशः ।

Here follows a colophon, which is followed by वैशंपायनः.

107

After the additional colophon following 1. 199. 22, D_4 (marg. *sec. m.*) S ins.:

वैशंपायनः ।

दुर्योधनस्य महिषी काशिराजसुता तदा ।
धृतराष्ट्रस्य पुत्राणां वधूभिः सहिता तदा ।
पाञ्चालीं प्रतिजग्राह द्रौपदीं श्रीमिवापराम् ।
पूजयामास पूजार्हां शचीं देवीमिवागताम् ।
ववन्दे तत्र गान्धारीं माधवी कृष्णया सह ।
आशिषश्च प्रयुक्त्वा तु पाञ्चालीं परिषस्वजे ।
परिष्वज्य च गान्धारी कृष्णां कमललोचनाम् ।
पुत्राणां मम पाञ्चाली मृत्युरेवेत्यमन्यत ।
सा चिन्त्य विदुरं प्राह युक्तितः सुबलात्मजा ।

105

In the footnotes to 1. 199. 9 the passage is erroneously stated as containing 18 lines; the correct number is 17. — (L. 5) D_4 T_1 $G_{1.2}$ M मृताः (for भ्राताः). — (L. 8) D_4 $G_{1.2}$ M त्वद्भक्त्या (for त्वं भ्राता). — G_1 M om. lines 13–17.

106

Line 11 = (var.) 1931*. — (L. 15) Some MSS. सोमकिः. — Colophon om. in T_1 G_1 M_6. *Adhy. no.:* D_4 214; T_3 G_4 165; G_2 162; G_3 166; $G_{5.6}$ 164.

107

(L. 3) G_{2-4} $M_{8.5}$ साध्वीं श्रियमिवापरां.

कुन्तीं राजसुतां क्षत्तः सवधूं सपरिच्छदाम् । [10]
पाण्डोर्निवेशनं शीघ्रं नीयतां यदि रोचते ।
करणेन मुहूर्तेन नक्षत्रेण तिथौ शुभे ।
यथा सुखं तथा कुन्ती रंस्यते स्वगृहे सुतैः ।
तथेत्येव तदा क्षत्ता कारयामास तत्तदा ।
पूजयामासुरत्यर्थं बान्धवाः पाण्डवांस्तदा । [15]
नागराः श्रेणिमुख्याश्च पूजयन्ति स्म पाण्डवान् ।
भीष्मद्रोणौ तथा कर्णो बाह्लीकः ससुतस्तदा ।
शासनाद्धृतराष्ट्रस्य अकुर्वन्नतिथिक्रियाम् ।
एवं विहरतां तेषां पाण्डवानां महात्मनाम् ।
नेता सर्वस्य कार्यस्य विदुरो राजशासनात् । [20]

108

☞ In entire supercession of the remarks in the footnotes (p. 789) to 1. 199. 24–25 regarding this passage, substitute the following.

After 1. 199. 25, D_4 (marg. *sec. m.*) S ins.:

केशवो यदि मन्येत तत्कर्तव्यमसंशयम् ।;

and after 1. 199. 26^{ab}:

वासुदेवेन संमन्त्र्य पाण्डवाः समुपाविशन् ।
धृतराष्ट्रः ।
अभिषेकस्य संभारान्क्षत्तरानय माचिरम् ।
अभिषिक्तं करिष्यामि अद्यैव कुरुनन्दनम् ।
ब्राह्मणा नैगमश्रेष्ठाः श्रेणिमुख्याश्च सर्वशः ।
आहूयन्तां प्रकृतयो बान्धवाश्च विशेषतः । [5]
पुण्याहं वाच्यतां तात गोसहस्रं तु दीयताम् ।
ग्राममुख्याश्च विप्रेभ्यो दीयन्तां सहदक्षिणाः ।
अङ्गदे मकुटं क्षत्तर्हस्ताभरणमेव च ।
मुक्तावलीं च हारं च निष्कादीन्कुण्डलानि च ।
कटिबन्धं च सूत्रं च तथोदरनिबन्धनम् । [10]
अष्टोत्तरसहस्रं च ब्राह्मणाधिष्ठिता गजाः ।
जाह्नवीसलिलं शीघ्रमानयन्तां पुरोहिताः ।
अभिषेकोदकक्लिन्नं सर्वाभरणभूषितम् ।
औपवाह्योपरिगतं दिव्यचामरवीजितम् ।
सुवर्णमणिचित्रेण श्वेतच्छत्रेण शोभितम् । [15]
जयेति द्विजवाक्येन स्तूयमानं नृपैस्तथा ।
दृष्ट्वा कुन्तीसुतं श्रेष्ठमाजमीढं युधिष्ठिरम् ।
प्रीताः प्रीतेन मनसा प्रशंसन्तु पुरे जनाः ।
पाण्डोः कृतोपकारस्य राज्यं दत्त्वा ममैव च ।
प्रतिक्रिया कृतमिदं भविष्यति न संशयः । [20]

वैशंपायनः ।
भीष्मो द्रोणः कृपः क्षत्ता साधु साध्वित्यभाषत ।
श्रीवासुदेवः ।
युक्तमेतन्महाराज कौरवाणां यशस्करम् ।
शीघ्रमद्यैव राजेन्द्र यथोक्तं कर्तुमर्हसि ।
वैशंपायनः ।
इत्येवमुक्त्वा वार्ष्णेयस्त्वरयामास तं तदा ।
यथोक्तं धृतराष्ट्रेण कारयामास कौरव । [25]
तस्मिन्क्षणे महाराज कृष्णद्वैपायनस्तदा ।
आगम्य कुरुभिः सर्वैः पूजितः ससुहृद्गणैः ।
मूर्धावसिक्तैः सहितो ब्राह्मणैर्वेदपारगैः ।
कारयामास विधिवत्केशवानुमते तदा ।
कृपो द्रोणश्च भीष्मश्च धौम्यश्च व्यासकेशवौ । [30]
बाह्लीकः सोमदत्तश्च चातुर्वैद्यपुरस्कृताः ।
अभिषेकं तदा चक्रुर्भद्रपीठे सुसंयतम् ।
जित्वा तु पृथिवीं कृत्स्नां वशे कृत्वा नरर्षभान् ।
राजसूयादिभिर्यज्ञैः क्रतुभिर्भूरिदक्षिणैः ।
स्नात्वा ह्यवभृथस्नानं मोदन्तां बान्धवैः सह । [35]
एवमुक्त्वा तु ते सर्वे आशीर्भिः प्रत्यपूजयन् ।
मूर्धाभिषिक्तः कौरव्यः सर्वाभरणभूषितः ।
जयेति संस्तुतो राजा प्रददौ धनमक्षयम् ।
सर्वमूर्धावसिक्तैश्च पूजितः कुरुनन्दनः ।
औपवाह्यमथारुह्य दिव्यच्छत्रेण शोभितः । [40]
राज्ञामनुगतो राजा महेन्द्र इव दैवतैः ।
ततः प्रदक्षिणीकृत्य नगरं नागसाह्वयम् ।
प्रविवेश तदा राजा नागरैः पूजितो भृशम् ।
मूर्धावसिक्तं पाण्डुसुतमभ्यनन्दन्त पाण्डवाः ।
गान्धारिपुत्राः शोचन्तः सर्वे ते सह बान्धवैः । [45
ज्ञात्वा शोकं तु पुत्राणां धृतराष्ट्रोऽब्रवीन्नृपम् ।
समक्षं वासुदेवस्य कुरूणां च समक्षतः ।
अभिषेकं त्वया प्राप्तं दुष्प्रापमकृतात्मभिः ।
गच्छ त्वमद्यैव नृप कृतकृत्योऽसि कौरव ।
आयुः पुरूरवा राजन्नहुषश्च ययातिना । [50]
तत्रैव निवसन्ति स्म खाण्डवाख्ये नृपोत्तम ।
राजधानी तु सर्वेषां पौरवाणां महाभुज ।
विनाशितं मुनिगणैर्लोभान्मुनिसुतस्य तु ।
तस्मात्त्वं खाण्डवप्रस्थं पुरं राष्ट्रं च वर्धय ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च कृतनिश्चयाः । [55]
त्वद्भक्त्या जन्तवश्चान्ये भजन्त्येव पुरं शुभम् ।
पुरं राष्ट्रं समृद्धं वै धनधान्यैः समावृतम् ।

108

(L. 41) D_4 G_1 M_{6-8} रराज राजानुगतैः. — (L. 44) T_8 G_{2-4} मूर्द्धाभिषिक्तं पांडोस्तु सुतमभ्यर्णपांडवाः ($G_{2.4}$ °बांधवाः). — (L. 53) T_1 G (except $G_{4.5}$) बुध° (for मुनि°). — Line 59 is a *repetition* of 1. 199. 26^{ab}.

तस्माद्गच्छस्व कौन्तेय भ्रातृभिः सहितोऽनघ ।
वैशंपायनः ।

Then follows a *repetition* of 1. 199. 26^{ab}; and finally:

रथैर्नागैर्हयैश्चापि सहितास्तु पदातिभिः ।

109

After 1. 199. 35^{ab}, S ins.:

पुरीं सर्वगुणोपेतां निर्मितां विश्वकर्मणा ।
पौरवाणामधिपतिः कुन्तीपुत्रो युधिष्ठिरः ।
कृतमङ्गलसत्कारो ब्राह्मणैर्वेदपारगैः ।
द्वैपायनं पुरस्कृत्य धौम्यस्यानुमते स्थितः ।
भ्रातृभिः सहितो राजन्केशवेन सहाभिभूः । [5]
तोरणद्वारसुमुखां द्वात्रिंशद्द्वारसंयुताम् ।
वर्धमानपुरद्वारां प्रविवेश महाद्युतिः ।
शङ्खदुन्दुभिनिर्घोषाः श्रूयन्ते बहवो भृशम् ।
जयेति ब्राह्मणगिरः श्रूयन्ते च सहस्रशः ।
संस्तूयमानो बहुभिः सूतमागधबन्दिभिः । [10]
औपवाह्यगतो राजा राजमार्गमतीत्य च ।
कृतमङ्गलसत्कारं प्रविवेश गृहोत्तमम् ।
प्रविश्य भवनं राजा सत्कारैरभिपूजितः ।
पूजयामास विप्रेन्द्रान्केशवेन यथाक्रमम् ।
ततस्तु राष्ट्रं ववृधे नरनारीगणायुतम् । [15]
गोधनैश्च समाकीर्णं सस्यवृद्धिस्तदाभवत् ।

110

After 1. 199. 49, D$_4$ (marg. *sec. m.*) S ins.:

ततस्तु विश्वकर्माणं पूजयित्वा विसृज्य च ।
द्वैपायनं च संपूज्य विसृज्य च नराधिप ।
वार्ष्णेयमब्रवीद्राजा गन्तुकामं कृतक्षणम् ।
तव प्रसादाद्वार्ष्णेय राज्यं प्राप्तं मयानघ ।
प्रसादादेव ते वीर शून्यं राष्ट्रं सुदुर्गमम् । [5]
तवैव तत्प्रसादेन राज्यस्थास्तु भवामहे ।
गतिस्त्वमन्तकाले च पाण्डवानां तु माधव ।
मातास्माकं पिता देवो न पाण्डुं विद्महे वयम् ।
ज्ञात्वा तु कृत्यं कर्तव्यं पाण्डवानां त्वयानघ ।
श्रीवासुदेवः ।
त्वत्प्रभावान्महाभाग राज्यं प्राप्तं स्वधर्मतः । [10]
पितृपैतामहं राज्यं कथं न स्यात्तव प्रभो ।
धार्तराष्ट्रा दुराचाराः किं करिष्यन्ति पाण्डवान् ।
यथेष्टं पालय महीं सदा धर्मधुरं वह ।
धर्मोपदेशः संक्षेपाद्ब्राह्मणान्भर कौरव ।
अद्यैव नारदः श्रीमानागमिष्यति सत्वरः । [15]
आदृत्य तस्य वाक्यानि शासनं कुरु तस्य वै ।
वैशंपायनः ।
एवमुक्त्वा ततः कुन्तीमभिवाद्य जनार्दनः ।
उवाच श्लक्ष्णया वाचा गमिष्यामि नमोऽस्तु ते ।
कुन्ती ।
जातुषं गृहमासाद्य मया प्राप्तं च केशव ।
आर्येणापि तव ज्ञातं कुन्तिभोजेन चानघ । [20]
त्वया नाथेन गोविन्द दुःखं प्राप्तं महत्तरम् ।
किं पुनस्त्वमनाथानां दरिद्राणां विशेषतः ।
सर्वदुःखानि शाम्यन्ति तव संदर्शनान्मम ।
स्मरस्वैतान्महाप्राज्ञ तेन जीवन्ति पाण्डवाः ।
वैशंपायनः ।
करिष्यामीति चामन्त्र्य अभिवाद्य पितृष्वसाम् । [25]
गमनाय मतिं चक्रे वासुदेवः सहानुगः ।

111

After 1. 200. 9^{ab}, D$_4$ (marg. *sec. m.*) S ins.:

आययौ धर्मराजं तु द्रष्टुकामोऽथ नारदः ।
तथा नक्षत्रजुष्टेन सुपर्णचरितेन च ।
चन्द्रसूर्यप्रकाशेन सेवितेन महर्षिभिः ।
नभःस्थलेन दिव्येन दुर्लभेनातपस्विनाम् ।
भूतार्चितो भूतधरां राष्ट्रं नगरमालिनीम् । [5]
अवेक्षमाणो द्युतिमानाजगाम महातपाः ।
सर्ववेदान्तगो विप्रः सर्वविद्यासु पारगः ।
परेण तपसा युक्तो ब्राह्मेण तपसा वृतः ।
नये नीतौ च नियतो विश्रुतश्च महामुनिः ।
परात्परतरं प्राप्तो धर्मात्समभिजग्मिवान् । [10]
भावितात्मा गतरजाः शान्तो मृदुऋजुर्द्विजः ।
धर्मेणाभिगतः सर्वैर्देवदानवमानवैः ।
क्षीणकर्मसु पापेषु भूतेषु विविधेषु च ।
सर्वथा कृतमर्यादो देवेषु विविधेषु च ।
शतशः सोमपा यज्ञे पुण्यकर्मकृदग्निचित् । [15]
ऋक्सामयजुषां वेत्ता न्यायवृत्तान्तकोविदः ।

109

In the footnotes to 1. 199. 35^{ab} the number of lines in this passage is erroneously stated to be 18; the correct number is 16.

110

(L. 20) D$_4$ G$_{5.6}$ °ण चापि न ज्ञातं; T$_1$ °णापि च न ज्ञा°; G$_1$ M$_6$ °ण च न चाज्ञा°.

111

(L. 13) D$_4$ T$_1$ G$_{5.6}$ M$_{6-8}$ भूयेषु; G$_1$ नयेषु (for भूतेषु).

ऋजुरारोहवान्शुक्लो भूयिष्ठपथिकोऽनघः ।
श्लक्ष्णया शिखयोपेतः संपन्नः परमत्विषा ।
अवदाते च सूक्ष्मे च दिव्ये च रुचिरे शुभे ।
महेन्द्रदत्ते महती बिभ्रत्परमवाससी । [20]
जाम्बूनदमये दिव्ये गण्डूपदमुखेन वै ।
अहर्यकसदृशे दिव्ये धारयन्कुण्डले शुभे ।
राजतच्छत्रमुच्छ्रित्य चित्रं परमवर्चसम् ।
प्राप्य दुष्प्रापमन्येन ब्रह्मवर्चसमुत्तमम् ।
भवने भूमिपालस्य बृहस्पतिरिवाद्भुतः । [25]
संहितायां च सर्वेषां स्थितस्योपस्थितस्य च ।
द्विपदस्य च धर्मस्य क्रमधर्मस्य पारगः ।
गाथासामानुसामज्ञः साङ्गां परमवल्गुनाम् ।
आत्मना सर्वमोक्षिभ्यः कृतिमान्कृत्यवित्तथा ।
योक्ता धर्मे बहुविधे मनो मतिमतां वरः । [30]
विदितार्थः स्वसमयच्छेत्ता निगमसंशयान् ।
अर्थनिर्वचने नित्यं संशयच्छिदसंशयः ।
प्रकृत्या धर्मकुशलो नानाधर्मविशारदः ।
लोपेनागमधर्मेण संक्रमेण च वृत्तिषु ।
एकशब्दांश्च नानार्थानेकार्थांश्च पृथक् श्रुतीन् । [35]
पृथगर्थाभिधानं च प्रयोगाणामवेक्षिता ।
प्रमाणभूतो लोकस्य सर्वाधिकरणेषु च ।
सर्ववर्णविकारेषु नित्यं सकलपूजितः ।
स्वरे स्वरे च विविधे वृत्तेषु विविधेषु च ।
समस्थानेषु सर्वेषु समाम्नायेषु धातुषु । [40]
उद्देश्यानां समाख्याता सर्वमाख्यातमुद्दिशन् ।
अभिसंधिषु तत्त्वज्ञः पदान्यङ्गान्यनुस्मरन् ।
कालधर्मेण निर्दिष्टं यथार्थं च विचारयन् ।
चिकीर्षितं च यो वेत्ता यथा लोकेन संवृतम् ।
विभाषितं च समयं भाषितं हृदयंगमम् । [45]
आत्मने च परस्मै च स्वरसंस्कारयोगवान् ।
एषां स्वराणां ज्ञाता च बोद्धा प्रवचनस्वरान् ।
विज्ञाता उक्तवाक्यानां एकतां बहुतां तथा ।
बोद्धा च परमार्थांश्च विविधांश्च व्यतिक्रमान् ।
अभेदतश्च बहुशो बहुशश्चापि भेदतः । [50]
वचनानां च विविधानादेशांश्च समीक्षिता ।
नानार्थकुशलस्तत्र तद्धितेषु च कृत्स्नशः ।
परिभूषयिता वाचां वर्णतः स्वरतोऽर्थतः ।
प्रत्ययांश्च समाख्याता नियतं प्रतिधातुकम् ।
पञ्च चाक्षरजातानि स्वरसंज्ञानि यानि च । [55]

☞ In the footnotes to 1. 200. 9, in the remarks regarding the present passage, for "27 lines" read "55 lines"; deleting "— ^{ad}) S आययौ धर्मराजं तु द्रष्टुकामोऽथ नारदः", as well as the *wavy line* under 9^{cd} of the constituted text.

112

After 1. 209. 24^{abc}, Ñ$_2$ D$_4$ (marg. *sec. m.*) S ins.:

चित्रवाहनमब्रवीत् ।
चित्राङ्गदायाः शुल्कं च गृह्णेमं बभ्रुवाहनम् ।
अनेन तु भविष्यामि ऋणान्मुक्तो जनाधिप ।
चित्राङ्गदां पुनर्वाक्यमब्रवीत्पाकशासनिः ।
इहैव भव भद्रे त्वं बभ्रुवाहनवर्धना । [5]
इन्द्रप्रस्थनिवासं मे आगता तत्र रंस्यसे ।
कुन्तीं युधिष्ठिरं भीमं भ्रातरौ मे कनीयसौ ।
आगता तत्र पश्येथा अन्यानपि च बान्धवान् ।
बान्धवैः सहिता भद्रे नन्दसे त्वमनिन्दिते ।
धर्मे स्थितः सत्यधृतिः कुन्तीपुत्रो युधिष्ठिरः । [10]
जित्वा तु पृथिवीं सर्वां राजसूयं करिष्यति ।
तत्रागच्छन्ति राजानः पृथिव्यां नृपसंज्ञिताः ।
बहूनि रत्नान्यादाय आगमिष्यति ते पिता ।
एकसार्थं प्रयातासि चित्रवाहनसेनया ।
द्रक्ष्यामि राजसूये त्वां पुत्रं पालय मा शुचः । [15]
बभ्रुवाहननामा तु मम प्राणो बहिश्चरः ।
तस्माद्भरस्व पुत्रं वै पूरुवंशविवर्धनम् ।
चित्रवाहनदायादं धर्मात्पौरवनन्दनम् ।
पाण्डवानां प्रियं पुत्रं तस्मात्पालय सर्वदा ।
विप्रयोगेन संतापं मा कृथास्त्वमनिन्दिते । [20]
चित्राङ्गदामेवमुक्त्वा.

113

After 1. 210. 2, D$_4$ (marg. *sec. m.*) S ins.:

चिन्तयामास रात्रौ तु गदेन कथितां कथाम् ।

— (L. 14) Some MSS. वेदेषु (for देवेषु). — (L. 27) D$_4$ G$_{5.6}$ M$_{6-8}$ सर्वस्य (for धर्मस्य). — (L. 44) D$_4$ G$_{5.6}$ श्र(D$_4$ व)र्करीतेन (for यथा लोकेन). — (L. 51) D$_4$ G$_{2.5.6}$ वनानां विविधानां च देशानां च समी°.

112

(L. 2) Ñ$_2$ D$_4$ T$_1$ M (except M$_8$) त्वं (for च). — (L. 3) D$_4$ T$_1$ M ऋणमुक्तो. — (L. 10) N$_2$ D$_4$ G$_1$ M कौंतेयोथ (for कुन्ती°). — (L. 11) D$_4$ G$_1$ M कृत्स्नां (for सर्वां). — After line 21, D$_4$ T$_1$ G$_{5.6}$ ins.:

सागरानूपमाश्रितः ।
स्थानं दूरं समाप्लुत्य दत्त्वा बहुधनं तदा ।
केरलान्समतिक्रम्य.

सुभद्रायाश्च माधुर्यं रूपसंपद्गुणानि च ।
प्राप्तुं तां चिन्तयामास क उपायो भवेदिति ।
वेषवैकृतमापन्नः परिव्राजकरूपधृक् ।
कुकुरान्धकवृष्णीनामज्ञातो वेषधारणात् । [5]
भ्रममाणश्चरन्भैक्षं परिव्राजकवेषवान् ।
येन केनाप्युपायेन प्रविश्य च गृहं महत् ।
दृष्ट्वा सुभद्रां कृष्णस्य भगिनीमेकसुन्दरीम् ।
वासुदेवमतं ज्ञात्वा करिष्यामि हितं शुभम् ।
एवं विनिश्चयं कृत्वा दीक्षितस्तु तदाभवत् । [10]
त्रिदण्डी मुण्डितः कुण्डी अक्षमालाङ्गुलीयकः ।
योगभारं वहन्पार्थो वटवृक्षस्य कोटरम् ।
प्रविशन्नेव बीभत्सुर्वृष्टिं वर्षति वासवे ।
चिन्तयामास देवेशं केशवं क्लेशनाशनम् ।
प्रणतार्तिहरं शंभुं मायारूपेण वञ्चकम् । [15]
केशवश्चिन्तितं ज्ञात्वा दिव्यज्ञानेन दृष्टवान् ।
शयानः शयने धन्ये सत्यभामासहायवान् ।
केशवः सहसा राजञ्जहास च ननन्द च ।
पुनः पुनः सत्यभामा चाब्रवीत्पुरुषोत्तमम् ।
सत्यभामा ।
भगवंश्चिन्तयाविष्टः शयने शयितः सुखम् । [20]
भवान्बहुप्रकारेण जहास च पुनः पुनः ।
श्रोतव्यं यदि वा कृष्ण प्रसादो यदि चेन्मयि ।
वक्तुमर्हसि लोकेश तच्छ्रोतुं कामये ह्यहम् ।
श्रीभगवान् ।
पितृष्वसायाः पुत्रो मे भीमसेनानुजोऽर्जुनः ।
तीर्थयात्रां गतः पार्थः कारणात्समयात्तदा । [25]
तीर्थयात्रासमाप्तौ तु निवृत्तो निशि भारतः ।
सुभद्रां चिन्तयानस्तु तदर्थे चापि मां पुनः ।
चिन्तयन्नेव तां भद्रां यतिरूपधरोऽभवत् ।
यतिरूपप्रतिच्छन्नो द्वारकां प्राप्य माधवीम् ।
येन केनाप्युपायेन दृष्ट्वा तु वरवर्णिनीम् । [30]
वासुदेवमतं ज्ञात्वा प्रयतिष्ये मनोरथम् ।
एवं व्यवसितः पार्थो यतिलिङ्गेन पाण्डवः ।
छायायां वटवृक्षस्य वृष्टिं वर्षति वासवे ।
योगभारं वहन्नेव मानसं दुःखमास्थवान् ।
ईदृशं मां विजानाति माधवो यदि मां स्मरन् । [35]
वैशंपायनः ।
भ्रातरं तव पश्येति सत्यभामामदर्शयत् ।
तत उत्थाय शयनात्प्रस्थितो मधुसूदनः ।

114

S ins. after 1. 212. 1^{cd} (T₃ G₂.₄ after 7^{ab}): D₄ (suppl. fol. *sec. m.*), after 2^{ab}:

चिन्तयानस्ततो भद्रामुपविष्टः शिलातले ।
रमणीये वनोद्देशे बहुपादपसंवृते ।
सालतालाश्वकर्णैश्च बकुलैरर्जुनैस्तथा ।
चम्पकाशोकपुंनागैः केतकैः पाटलैस्तथा ।
कर्णिकारैरशोकैश्च अङ्कोलैरतिमुक्तकैः । [5]
एवमादिभिरन्यैश्च संवृते स शिलातले ।
पुनः पुनश्चिन्तयानः सुभद्रां भद्रभाषिणीम् ।
यदृच्छया चोपपन्नान्वृष्णिवीरान्ददर्श ह ।
बलदेवं च हार्दिक्यं साम्बं सारणमेव च ।
प्रद्युम्नं च गदं चैव चारुदेष्णं विदूरथम् । [10]
भानुं च निशठं चैव पृथुं विपृथुमेव च ।
तथान्यांश्च बहून्पश्यन्हृदि शोकमधारयत् ।
ततस्ते सहिताः सर्वे यतिं दृष्ट्वा समुत्सुकाः ।
वृष्णयो विनयोपेताः परिवार्योपतस्थिरे ।
ततोऽर्जुनः प्रीतमनाः स्वागतं व्याजहार सः । [15]
आस्यतामास्यतां सर्वे रमणीये शिलातले ।
इत्येवमुक्ता यतिना प्रीतास्ते यादवर्षभाः ।
उपोपविविशुः सर्वे सुस्वागतमिति ब्रुवन् ।
ततस्तेषु निविष्टेषु वृष्णिवीरेषु पाण्डवः ।
आकारं गूहमानस्तु कुशलप्रश्नमब्रवीत् । [20]
सर्वत्र कुशलं चोक्त्वा बलदेवोऽब्रवीदिदम् ।
प्रसादं कुरु मे विप्र कुतस्त्वं चागतो ह्यसि ।
त्वया दृष्टानि पुण्यानि वदस्व वदतां वर ।
पर्वतांश्चैव तीर्थानि वनान्यायतनानि च ।
वैशंपायनः ।
तीर्थानां दर्शनं चैव पर्वतानां च भारत । [25]
आपगानां वनानां च कथयामास यादवे ।
ताः कथाः कथयन्नेव कथान्ते जनमेजय ।
कथां धर्मसमायुक्तां वृष्णिवीरे न्यवेदयत् ।
श्रुत्वा धर्मकथां पुण्यां वृष्णिवीरोऽभ्यपूजयत् ।
ततस्तु यादवाः सर्वे मन्त्रयन्ति स्म भारत । [30]
अयं देशातिथिः श्रीमान्यतिलिङ्गधरो द्विजः ।
आवासं कमुपाश्रित्य वसेत निरुपद्रवः ।
इत्येवमब्रुवंस्ते वै रौहिणेयं तु यादवाः ।
ददृशुः कृष्णमायान्तं सर्वे यादवनन्दनम् ।
एहि केशव तातेति रौहिणेयोऽब्रवीद्वचः । [35]

113

D₄ T₃ G₁ M₆₋₈ om. line 35. — After line 35, G₅.₆ ins.:

किंचिद्वाचमवष्टभ्य आप्तैः कतिपयैर्जनैः ।

114

(L. 40) D₄ पांडव; T₁ M₆ माधवः (for मां वद). — (L. 47) T₁ G₁.₂ M₆₋₈ वाग्मी. — After line 51, T₁ ins.:

निःसीमतररूपोऽयं सुभद्रापि तथाविधा ।

यतिलिङ्गधरो विद्वान्देशातिथिरयं द्विजः ।
वर्षरात्रनिवासार्थमागतो नः पुरं प्रति ।
स्थाने यस्मिन्निवसति तन्मे ब्रूहि जनार्दन ।

श्रीभगवान् ।

त्वयि स्थिते महाभाग परवानस्मि धर्मतः ।
स्वयं तु रुचिरे स्थाने वसतामिति मां वद । [40]

वैशंपायनः ।

सुप्रीतस्तेन वाक्येन परिष्वज्य जनार्दनम् ।
बलदेवोऽब्रवीद्वाक्यं चिन्तयित्वा महाबलः ।
आरामे तु वसेद्धीमांश्चतुरो वर्षमासकान् ।
कन्यापुरे सुभद्राया भुक्त्वा भोजनमिष्टतः ।
लतागृहेषु वसतामिति मे धीयते मतिः । [45]
लब्धानुज्ञास्त्वया तत्र मन्यन्ते सर्वयादवाः ।

वासुदेवः ।

बलवान्दर्शनीयश्च वाग्मिच्छ्रीमान्बहुश्रुतः ।
कन्यापुरसमीपे तु न युक्तमिति मे मतिः ।
गुरुः शास्ता च नेता च शास्त्रज्ञो धर्मवित्तमः ।
त्वयोक्तं न विरुध्येऽहं करिष्यामि वचस्तव । [50]
शुभाशुभस्य विज्ञाने नान्योऽस्ति भुवि कश्चन ।

बलदेवः ।

अयं देशातिथिः श्रीमान्सर्वधर्मविशारदः ।
धृतिमान्विनयोपेतः सत्यवाग्विजितेन्द्रियः ।
यतिलिङ्गधरो ह्येष को विजानाति मानसम् ।
त्वमिमं पुण्डरीकाक्ष नीत्वा कन्यापुरं शुभम् । [55]
निवेदय सुभद्रायै मद्वाक्यपरिचोदितः ।
भक्ष्यैर्भोज्यैश्च पानैश्च अन्यैरिष्टैश्च पूजय ।

Colophon.

वैशंपायनः ।

स तथेति प्रतिज्ञाय सहितो यतिना हरिः ।
कृत्वा तु संविदं तेन प्रहृष्टः केशवोऽभवत् ।
पर्वते तौ विहृत्यैव यथेष्टं कृष्णपाण्डवौ । [60]
तां पुरीं प्रविवेशाथ गृह्य हस्ते च पाण्डवम् ।
प्रविश्य च गृहं रम्यं सर्वभोगसमन्वितम् ।
पार्थमावेदयामास रुक्मिणीसत्यभामयोः ।
हृषीकेशवचः श्रुत्वा ते उभे ऊचतुर्भृशम् ।
मनोरथो महानेष हृदि नः परिवर्तते । [65]
कदा द्रक्ष्याम बीभत्सुं पाण्डवं गृहमागतम् ।
इति चिन्तयमानानां पार्थो दुःखमपानुदत् ।
प्राप्तमज्ञातपूजाभिरुत्तमाभिरपूजयत् ।

स तं प्रियातिथिश्रेष्ठं समीक्ष्य यतिमागतम् ।
सोदर्यां भगिनीं कृष्णः सुभद्रामिदमब्रवीत् । [70]
अयं देशातिथिर्भद्रे संयतो व्रतवानृषिः ।
प्राप्नोतु सततं पूजां तव कन्यापुरे वसन् ।
आर्येण च परिज्ञातः पूजनीयो यतिः सदा ।
तस्माद्धरस्व वार्ष्णेयि भक्ष्यैर्भोज्यैर्यतिं सदा ।
एष यद्यदृषिर्ब्रूयात्कार्यमेव न संशयः । [75]
सखीभिः सहिता भद्रे भवास्य वशवर्तिनी ।
पुरापि यतयो भद्रे ये भैक्षार्थमनुव्रताः ।
ते बभूवुर्दशार्हाणां कन्यापुरनिवासिनः ।
तेभ्यो भोज्यानि भक्ष्याणि यथाकालमतन्द्रिताः ।
कन्यापुरगताः कन्याः प्रयच्छन्ति यशस्विनि । [80]
सा तथेत्यब्रवीत्कृष्णं करिष्यामि यथात्थ माम् ।
तोषयिष्यामि वृत्तेन कर्मणा च द्विजर्षभम् ।
एवमेतेन रूपेण कंचित्कालं धनंजयः ।
उवास भक्ष्यैर्भोज्यैश्च भद्रया परमार्चितः ।
तस्य सर्वगुणोपेतां वासुदेवसहोदराम् । [85]
पश्यतः सततं भद्रां प्रादुरासीन्मनोभवः ।
गूहयन्निव चाकारमालोक्य वरवर्णिनीम् ।
दीर्घमुष्णं निशश्वास पार्थः कामवशं गतः ।
न कृष्णां रूपतो मेने वासुदेवसहोदराम् ।
प्राप्तां हृदीन्द्रसेनां वा साक्षाद्वा वरुणात्मजाम् । [90]
अतीतसमये काले सोदर्याणां धनंजयः ।
न सस्मार सुभद्रायाः कामाङ्कुशनिवारितः ।
क्रीडारतिपरां भद्रां सखीजनशतैर्वृताम् ।
प्रीयते स्मार्जुनः पश्यन्स्वाहामिव हुताशनः ।
पाण्डवस्य सुभद्रायाः सकाशे तु यशस्विनः । [95]
समुत्पत्तिः प्रभावश्च गदेन कथितः पुरा ।
श्रुत्वा चाशनिनिर्घोषं केशवेनापि धीमता ।
उपमामर्जुनं कृत्वा विस्तरः कथितः पुरा ।
क्रुद्धमत्तप्रलापश्च वृष्णीनामर्जुनं प्रति ।
पौरुषाण्युपमां कृत्वा प्रावर्धन्त धनुष्मताम् । [100]
अन्योन्यकलहे चापि विवादे चापि वृष्णयः ।
अर्जुनोऽपि न मे तुल्यः कुतस्त्वमिति तेऽब्रुवन् ।
जातांश्च पुत्रान्गृह्णन्त आशिषो वृष्णयोऽब्रुवन् ।
अर्जुनस्य समो वीर्ये भव तात धनुर्धरः ।
तस्मात्सुभद्रा चकमे पौरुषाद्भरतर्षभम् । [105]
सत्यसंधस्य रूपेण चातुर्येण च मोहिता ।
चारणातिथिसंघानां गदस्य च निशम्य सा ।

बलवानिन्द्रियग्रामो न जाने किं भविष्यति ।
— After line 55, T1 (which om. lines 56-57) ins.:
कृष्णः ।
कन्यापुरे यतेर्वासः सुखोदर्कोऽथवा भवेत् ।
सुखोदर्को भवेद्वापि नाहं जाने यदूद्वह ।
भवता परवानस्मि यावदाचन्द्रतारकम् ।
Colophon om. in T1. *Adhy. no.*: D4 229; T3 G4 180; G1.5.6 M6 179; G2 177; G3 181. — (L. 129)

अदृष्टे कृतभावाभूत्सुभद्रा भरतर्षभे ।
कीर्तयन्दृश्ये यो यः कथंचित्कुरुजाङ्गलम् ।
तं तमेव सदा भद्रा बीभत्सुं स्माभिपृच्छति । [110]
अभीक्ष्णशः परिप्रश्नादभीक्ष्णश्रवणात्तथा ।
प्रत्यक्ष इव भद्रायाः पाण्डवः समपद्यत ।
भुजौ भुजगसंकाशौ ज्याघातेन किणीकृतौ ।
पार्थोऽयमिति पश्यन्त्या निःसंशयमजायत ।
यथारूपं हि शुश्राव सुभद्रा भरतर्षभम् । [115]
तथारूपमवेक्ष्यैनं परां प्रीतिमवाप सा ।
सा कदाचिदुपासीनं पप्रच्छ कुरुनन्दनम् ।
कथं देशाः कथं शैला नानाजनपदाः कथम् ।
सरांसि सरितश्चैव वनानि च कथं यते ।
दिशः काश्च कथं प्राप्ताश्चरता भवता सदा । [120]
स तथोक्तस्तदा भद्रां बहुनर्मानृतं ब्रुवन् ।
उवाच परमप्रीतस्तस्या बहु तथा कथाः ।
निशम्य विविधं तस्य लोके चरितमात्मनः ।
कथापरिगतो भावः कन्यायाः समपद्यत ।
पर्वसंधौ च कस्मिंश्चित्सुभद्रा भरतर्षभम् । [125]
रहस्येकान्तमासाद्य हृष्यमाणाभ्यभाषत ।
यतिना चरता लोकान्खाण्डवप्रस्थवासिनी ।
कच्चिद्भगवता दृष्टा पृथास्माकं पितृष्वसा ।
भ्रातृभिः प्रयतैः सर्वैः कच्चिदार्यो युधिष्ठिरः ।
कच्चिद्धर्मपरो भीमो धर्मराजस्य धीमतः । [130]
निवृत्तसमयः कच्चिदपराधाद्धनंजयः ।
नियमे कामभोगानां वर्तमानः प्रियेतरे ।
क्व नु पार्थश्चरत्यद्य बह्वीर्दुर्वसतीर्वसन् ।
सुखोचितो ह्यदुःखार्हो दीर्घबाहुररिंदमः ।
कच्चिच्छ्रुतो वा दृष्टो वा पार्थो भगवतार्जुनः । [135]
निशम्य वचनं तस्यास्तामुवाच हसन्निव ।
आर्या पृथा च कुशला सपुत्रा च सहस्नुषा ।
प्रीयते पश्यती पुत्रान्कुरुक्षेत्रं च पश्यती ।
अनुज्ञातस्तु मात्रा च सोदर्यैस्तु धनंजयः ।
द्वारकामावसत्येको यतिलिङ्गेन पाण्डवः । [140]
पश्यन्ती सततं कस्मान्नाभिजानासि माधवि ।
निशम्य वचनं तस्य वासुदेवसहोदरा ।
निःश्वासबहुला तस्थौ क्षितिं विलिखती तदा ।
ततः परमसंहृष्टः सर्वशस्त्रभृतां वरः ।
अर्जुनोऽहमिति प्रीतस्तामुवाच धनंजयः । [145]
यथा तव गतो भावः श्रवणान्मयि भामिनि ।
त्वद्गतः सततं भावस्तथा शतगुणो मम ।
प्रशस्तेऽहनि धर्मेण भद्रे स्वयमहं वृतः ।
सत्यवानिव सावित्र्या भविष्यामि पतिस्तव ।
एवमुक्त्वा ततः पार्थः प्रविवेश लतागृहम् । [150]
ततः सुभद्रा ललिता लज्जाभावसमन्विता ।
मुमोह शयने दिव्ये शयाना नतथोचिता ।
कन्यापुरे च संवृत्तं ज्ञात्वा दिव्येन चक्षुषा ।
शशास रुक्मिणीं कृष्णो भोजनादिकमर्जुने ।
तदा प्रभृति तां भद्रां चिन्तयन्वै धनंजयः । [155]
आस्ते स्म स तदारामे कार्येणैव सहाभिभूः ।
सुभद्रापि न च स्वस्था पार्थं प्रति बभूव सा ।
कृशा विवर्णवदना चिन्ताशोकपरायणा ।
निःश्वासपरमा भद्रा मानसेन मनस्विनी ।
न शय्यासनभोगेषु रतिं विन्दति केनचित् । [160]
न नक्तं न दिवा शेते बभूवोन्मत्तदर्शना ।
एवं शोकपरां भद्रां देवकी वाक्यमब्रवीत् ।
मा शोकं कुरु वार्ष्णेयि धृतिमालम्ब शोभने ।
निवेदयिष्ये त्वां रामे कृष्णे चैव नरर्षभे ।
पश्चाज्जानामि ते वार्तां मा शोकं कुरु माधवि । [165]
एवमुक्त्वा च सा माता भद्रायाः प्रियकामिनी ।
निवेदयामास तदा भद्रामानकदुन्दुभेः ।
रहस्येकासना तत्र भद्रास्त्स्थेति चाब्रवीत् ।
आरामे तु यतिः श्रीमानर्जुनः सोऽथ नः श्रुतः ।
अक्रूराय च कृष्णाय आहुकाय च सत्यके । [170]
निवेद्यतां महाप्राज्ञ श्रोतव्यं यदि बान्धवैः ।

वैशंपायनः ।

वसुदेवस्तु तच्छ्रुत्वा अक्रूराहुकयोस्तदा ।
निवेदयित्वा कृष्णाय मन्त्रयामास नैकधा ।
इदं कार्यमिदं कृत्यमिदमेवं विनिश्चितम् ।
अक्रूरश्चोग्रसेनश्च सत्यकश्च गदेन च । [175]
पृथुश्चविश्च कृष्णश्च सहिताः शिनिना सह ।
रुक्मिणी सत्यभामा च देवकी रोहिणी तथा ।
वासुदेवेन सहिताः पुरोहितमते स्थिताः ।
विवाहं मन्त्रयामासुर्द्वादशेऽहनि भारत ।
अज्ञातं रौहिणेयस्य उद्धवस्य च भारत । [180]
विवाहं तु सुभद्रायाः कर्तुकामो गदाग्रजः ।
महादेवस्य पूजार्थं महोत्सवमिति ब्रुवन् ।
चतुस्त्रिंशदहोरात्रं सुभद्रार्तिप्रशान्तये ।
नगरे घोषयामास हितार्थं सव्यसाचिनः ।

D4 प्रथितैः; T1 G1.6 M6-8 प्रीयते (for प्रयतैः). — (L. 137) G2.5.6 कुशलिनी (for च कुशला). D4 T1 G1 M6-8 आर्या कुशलिनी कुंती. D4 T1 G (except G3.4) सहपुत्रा (for सपुत्रा च). — (L. 156) D4 G6 M6-8 काश्यैनेव; T1 काश्यर्यजेन. G1 कामेन भृशपीडितः. — After line 181, G3.6 ins.:

उमासखस्य देवस्य ब्रह्मविश्वेशरूपिणः ।

— (L. 182) G3.6 व्याजेन मधुसूदनः (for the posterior

इतश्चतुर्थे त्वहनि अन्तर्द्वीपं तु गम्यताम् । [185]
सदारैः सानुयात्रैश्च सपुत्रैश्च सबान्धवैः ।
गन्तव्यं सर्ववर्णैश्च गन्तव्यं सर्वयादवैः ।
एवमुक्तास्तु ते सर्वे तथा चक्रुश्च सर्वशः ।
ततः सर्वदशार्हाणामन्तर्द्वीपे तु भारत ।
चतुस्त्रिंशदहोरात्रं बभूव परमोत्सवः । [190]
कृष्णरामाहुकाक्रूरप्रद्युम्नशिनिसत्यकाः ।
समुद्रं प्रययुर्हृष्टाः कुकुरान्धकवृष्णयः ।
युक्तयन्त्रपताकाभिर्वृष्णयो ब्राह्मणैः सह ।
समुद्रं प्रययुर्नौभिः सर्वे पुरनिवासिनः ।
ततस्त्वरितमागम्य दाशार्हगणपूजितम् । [195]
सुभद्रा पुण्डरीकाक्षमब्रवीद्यतिशासनात् ।
कृत्यवान्द्वादशाहानि स्थाता स भगवानिह ।
तिष्ठतस्तस्य कः कुर्यादुपस्थानविधिं प्रति ।
तामुवाच हृषीकेशः कस्त्वदन्यो विशेषतः ।
तमृषिं प्रत्युपस्थातुमितो नार्हति मानवः । [200]
त्वमेवास्मन्मतेनास्य महर्षेर्वशवर्तिनी ।
कुरु सर्वाणि कार्याणि कीर्तिं धर्ममवेक्ष्य च ।
तस्य चातिथिमुख्यस्य सर्वेषां च तपस्विनाम् ।
संविधानपरा भद्रे भव त्वं वशवर्तिनी ।

वैशंपायनः ।

एवमादिश्य भद्रां च रक्षां च मधुसूदनः । [205]
ययौ शङ्खप्रणादेन भेरीणां च महास्वनैः ।
ततस्तद्वीपमासाद्य दानधर्मपरायणाः ।
उग्रसेनमुखाः सर्वे विजह्रुः कुकुरान्धकाः ।
सप्तयोजनविस्तार आयतो दशयोजनम् ।
बभूव स महाद्वीपः सपर्वतमहावनः । [210]
सेतुपुष्करिणीजालैराक्रीडः सर्वसात्वताम् ।
वापीपल्वलसंवैश्च काननैश्च मनोरमैः ।
वासुदेवसमैर्द्वीपः स सर्वैः कुकुरान्धकैः ।
बभूव परमोपेतस्त्रिविष्टप इवामरैः ।
चतुस्त्रिंशदहोरात्रं दानधर्मपरायणाः । [215]
उग्रसेनमुखाः सर्वे विजहुः कुकुरान्धकाः ।
विचित्रमाल्याभरणाश्चित्ररूपानुलेपनाः ।
विहाराभिमुखाः सर्वे यादवाः पानसंयुताः ।
सुनृत्तगीतवादित्रै रममाणास्ततोऽभवन् ।
तत्र याते दशार्हाणामृषभे शार्ङ्गधन्वनि । [220]
सुभद्रोद्वाहनं पार्थः प्राप्तकालममन्यत ।

Colophon.

वैशंपायनः ।

वृष्ण्यन्धकपुरात्तस्मादपयानं च पाण्डवः ।
विनिश्चित्य ततः पार्थः सुभद्रामिदमब्रवीत् ।
शृणु भद्रे यथाशास्त्रं यथार्थमृषिभिः कृतम् ।
कन्यायास्तु पिता भ्राता माता मातुल एव च। [225]
पितृभ्राता गुरुश्चापि दाने तु प्रभुतां गताः ।
महोत्सवं पशुपतेर्द्रष्टुकामः पिताहुकः ।
अन्तर्द्वीपं गतो भद्रे पुत्रैः पौत्रैः सबान्धवैः ।
मम चैव विशालाक्षि विदेशस्थास्तु बान्धवाः ।
तस्मात्सुभद्रे गान्धर्वो विवाहः पञ्चमो भवेत् । [230]
समागमे तु कन्यायाः क्रियाः प्रोक्ताश्चतुर्विधाः ।
तेषां प्रवृत्तिं साधूनां शृणु माधवि तत्त्वतः ।
वरमाहूय विधिना पितृदत्ता यथार्थिने ।
सा पत्नी तु बुधैरुक्ता सा तु वश्या पतिव्रता ।
भृत्यानां भरणार्थाय आत्मनः पोषणाय च । [235]
दारे स्थिते गृहीता सा भार्या चेति बुधैर्मता ।
धर्मतो वरयित्वा तु आनीय स्वं निवेशनम् ।
न्यायेन दत्ता तारुण्ये दाराः पितृकृता भवेत् ।
जनयेद्या तु भर्तारं जाया इत्येव नामतः ।
दाराः पत्नी च भार्या च जाया चेति चतुर्विधाः । [240]
चतस्र एवाग्निसाक्ष्याः क्रियायुक्तास्तु धर्मतः ।
गान्धर्वेण विवाहेन रागात्पुत्रार्थकारणात् ।
आत्मनानुगृहीता या सा तु वश्या प्रजावती ।
गान्धर्वस्तु क्रियाहीनो रागादेव प्रवर्तते ।
सकामायाः सकामेन निर्मन्त्रो रहसि स्मृतः । [245]
मयोक्तमक्रियं चापि कर्तव्यं माधवि त्वया ।
अयनं चैव मासश्च ऋक्षं पक्षस्तथा तिथिः ।
करणं च मुहूर्तं च लग्नसंपद्यथाद्य वै ।
विवाहस्य विशालाक्षि प्रशस्तं चोत्तरायणम् ।
वैशाखश्चैव मासानां पक्षाणां शुभ्र एव च । [250]
नक्षत्राणां तथा हस्तस्तृतीया च तिथिष्वपि ।
लग्नो हि मकरः श्रेष्ठः करणानां बवस्तथा ।
मैत्रो मुहूर्तो वैवाह्य आवयोः शुभकर्मणि ।
सर्वसंपदियं भद्रे अद्य रात्रौ भविष्यति ।
भगवानस्तमभ्येति तपनस्तपतां वरः । [255]
नारायणो हि सर्वज्ञो नानुबुध्येत विश्वकृत् ।
धर्मसंकटमापन्ने किं नु कृत्वा शुभं भवेत् ।
मनोभवेन कामेन मोहितं मा प्रलापिनम् ।
प्रतिवाक्यं तु मे देहि किं न वक्ष्यसि माधवि ।

---

half). — D_4 T_1 $G_{5.6}$ om. line 183. — L. 216 = line 208 above. Colophon om. in T_8 G_{2-4}. *Adhy. no.*: D_4 230; T_1 226; $G_{1.5.6}$ M_6 180. — After line 224, G (except $G_{5.6}$) M_{6-8} ins.:

विवाहं बहुधा वत्से वर्णानां धर्मसंयुतम् ।

— (L. 236) D_4 G_1 M_{6-8} मृते (for स्थिते). G_1 M_{6-8} या (for सा). G_{2-4} दाने गृहीता या नारी. G (except $G_{5.6}$) M_{6-8} सा भार्या (for भार्या च). — After line 238, D_4 G_1 M_{6-8} read lines 242-43. — After line 260, G_{2-4} ins.:

वैशंपायनः ।
अर्जुनस्य वचः श्रुत्वा चिन्तयन्ती जनार्दनम् । [260]
नोवाच किंचिद्वचनं बाष्पदूषितलोचना ।
रागोन्मादप्रलापी स्यादर्जुनो जयतां वरः ।
चिन्तयामास पितरं प्रविश्य च लतागृहम् ।
चिन्तयानं तु कौन्तेयं ज्ञात्वा शच्या शचीपतिः ।
सहितो नारदाद्यैस्तु मुनिसिद्धाप्सरोगणैः । [265]
अरुन्धत्या वसिष्ठेन आजगाम कुशस्थलीम् ।
चिन्तितं च सुभद्रायाश्चिन्तयित्वा जनार्दनः ।
निद्रयापहृतज्ञानं रौहिणेयं विना तदा ।
सहाक्रूरेण शिनिना सत्यकेन गदेन च ।
वसुदेवेन देवक्या आहुकेन च धीमता । [270]
आजगाम पुरीं रात्रौ द्वारकां स्वजनैर्वृतः ।
पूजयित्वा तु देवेशं नारदाद्यैर्महर्षिभिः ।
कुशलप्रश्नमुक्त्वा तु देवेन्द्रेणाभियाचितः ।
वैवाहिकक्रियां कृष्णस्तथेत्येवमुवाच ह ।
आहुको वसुदेवश्च सहाक्रूरः ससात्यकिः । [275]
अभिप्रणम्य शिरसा पाकशासनमब्रुवन् ।
देवदेव नमस्तेऽस्तु लोकनाथ जगत्पते ।
वयं धन्याः स्म लोकेषु बान्धवैः सहिता विभो ।
कृतप्रसादास्तु वयं तव वाक्येन विश्वजित् ।
एवमुक्त्वा प्रसाद्यैनं पूजयित्वा प्रयत्नतः । [280]
महेन्द्रशासनात्सर्वे सहिताश्च महर्षिभिः ।
विवाहं कारयामासुः शक्रपुत्रस्य शाश्वतः ।
अरुन्धती शची देवी रुक्मिणी देवकी तथा ।
दिव्यस्त्रीभिश्च सहिताः क्रियां भद्रां प्रयोजयन् ।
महर्षिः काश्यपो होता सदस्या नारदादयः । [285]
पुण्याशिषः प्रयोक्तारः सर्वे ह्यासंस्तदार्जुने ।
अभिषेकं ततः कृत्वा महेन्द्रः पाकशासनिम् ।
लोकपालैस्तु सहितः सर्वैर्देवैरभिष्टुतः ।
किरीटाङ्गदहाराद्यैर्हस्ताभरणकुण्डलैः ।
भूषयित्वा तु तं पार्थं द्वितीयमिव वासवम् । [290]
पुत्रं परिष्वज्य तदा प्रीतिमाप पुरंदरः ।
शची देवी तथा भद्रामरुन्धत्यादिभिस्तदा ।
कारयामास वैवाह्यं मङ्गल्यं यादवस्त्रियः ।
सहाप्सरोभिर्मुदिता भूषणैश्चाभ्यपूजयन् ।
पौलोमीमिव मन्यन्ते सुभद्रां देवयोषितः । [295]
ततो विवाहो ववृधे कृतः सर्वगुणान्वितः ।
तस्याः पाणिं गृहीत्वा तु मन्त्रहोमपुरस्कृतम् ।
यथा तस्यैव हि पिता शच्या इव शतक्रतुः ।
सा जिष्णुमधिकं भेजे सुभद्रा चारुदर्शना ।
पार्थस्य सदृशी भद्रा रूपेण वयसा तथा । [300]
सुभद्रायाश्च पार्थोऽपि सदृशो रूपलक्षणैः ।
इत्यूचुश्च तदा देवाः प्रीताः सेन्द्रपुरोगमाः ।
एवं निवेश्य देवास्तु गन्धर्वैः साप्सरोगणैः ।
आमन्त्र्य यादवान्सर्वे विप्रजग्मुर्यथागतम् ।
यादवाः पार्थमामन्त्र्य अन्तर्द्वीपं गतास्तदा । [305]
वासुदेवस्तदा पार्थमुवाच यदुनन्दनः ।
द्वाविंशद्दिवसान्पार्थ इहोष्य भरतर्षभ ।
मामकं रथमारुह्य सैन्यसुग्रीवयोजितम् ।
सुभद्रया सुखं पार्थ खाण्डवप्रस्थमाविश ।
यादवैः सहितः पश्चादागमिष्यामि भारत । [310]
यतिवेषेण निरतो वस त्वं रुक्मिणीगृहे ।

वैशंपायनः ।
एवमुक्त्वा प्रचक्राम अन्तर्द्वीपं जनार्दनः ।
कृतोद्वाहस्तदा पार्थः कृतकार्योऽभवत्तदा ।
तस्यां चोपगतो भावः पार्थस्य सहसागतः ।
स तया युयुजे वीरो भद्रया भरतर्षभः । [315]
अभिनिष्पन्नया रामः सीतयेव समन्वितः ।
स हि जिष्णुर्विजज्ञे तां ह्रीं श्रियं संनतिक्रियाम् ।
द्वादशानां वरस्त्रीणां रूपेणासदृशीं सतीम् ।
स प्रकृत्या श्रिया दीप्तः संदिदीपे तथाधिकम् ।
उद्यत्सहस्रदीप्तांशुः शरदीव दिवाकरः । [320]
सा तु तं मनुजव्याघ्रमनुरक्ता मनस्विनी ।
कन्यापुरगता भूत्वा तत्परा समपद्यत ।

Colophon.

वैशंपायनः ।
वृष्ण्यन्धकपुरात्तत्र अपयानं धनंजयः ।
विनिश्चित्य तथा पार्थः सुभद्रामिदमब्रवीत् ।
द्विजानां गणमुख्यानां यथार्हं प्रतिपादय । [325]
भक्ष्यैर्भोज्यैश्च कामैश्च प्रयच्छ प्रतियास्यताम् ।
आत्मनश्च समुद्दिश्य महाव्रतसमापनम् ।
गच्छ भद्रे स्वयं तूर्णं महाराजनिवेशनम् ।
तेजोबलजवोपेतै रत्नैर्हयवरोत्तमैः ।
सैन्यसुग्रीवसंयुक्तं रथं तूर्णमिहानय । [330]
क्रीडार्थमिति भाषित्वा सखीभिः सुभगे सह ।
क्षिप्रमादाय पर्येहि रथं सर्वायुधानि च ।
अनुकर्षान्पताकाश्च तूणीरांश्च धनूंषि च ।
सर्वान्रथवरे कुर्याः सोत्सेधाश्च महागदाः ।

बहुप्रकारमुक्तापि अर्जुनेन महात्मना ।
तत्सर्वं वितथीकृत्य चिन्तयन्ती जगद्गुरुम् ।
— After line 317, Me-s ins.:

शच्यहल्या चेन्द्रसेना दमयन्ती यथा रतिः ।
सीता च रुक्मिणी कृष्णा सत्यभामा तिलोत्तमा ।
अरुन्धती च यथा.

वैशंपायनः ।

अर्जुनेनैवमुक्ता तु सुभद्रा भद्रभाषिणी । [335]
जगाम नृपतेर्वेश्म सखीभिस्त्वरिता सह ।
क्रीडार्थमिव तत्रस्थान्प्रक्षिणो वाक्यमब्रवीत् ।
रथेनानेन यास्यामि महाव्रतसमापनम् ।
सैन्यसुग्रीवयुक्तेन सायुधेन च शार्ङ्गिणः ।
सुभद्रयैवमुक्ते तु जनाः प्राञ्जलयोऽब्रुवन् । [340]
रथेनानेन भद्रे त्वं यथेष्टं क्रियतामिति ।
योजयित्वा रथवरं कल्याणैरभिभाष्य ताम् ।
यथोक्तं सर्वमारोप्य सखीभिः सह भामिनी ।
क्षिप्रमादाय कल्याणी सुभद्रार्जुनमब्रवीत् ।
रथोऽयं रथिनां श्रेष्ठ आनीतस्तव शासनात् । [345]
स्वस्ति याहि यथाकामं कुरून्कौरवनन्दन ।
निवेद्य तं रथं भर्तुः सुभद्रा भद्रसंमता ।
ब्राह्मणेभ्यो ददौ हृष्टा तदा सा विविधं वसु ।
स्नेहवन्ति च भोज्यानि प्रददावीप्सितानि च ।
यथाकामं यथाश्रद्धं वस्त्राणि विविधानि च । [350]
तर्पिता विविधैर्भक्ष्यैस्तान्यवाप्य वसूनि च ।
ब्राह्मणाः स्वगृहं जग्मुः प्रयुज्य परमाशिषः ।
सुभद्रया तु विज्ञप्तः पूर्वमेव धनंजयः ।
रश्मिग्रग्रहणे पार्थ न मेऽस्ति सदृशो भुवि ।
तस्मात्सा पूर्वमारुह्य रश्मीञ्जग्राह माधवी । [355]
सोदरा वासुदेवस्य कृतस्वस्त्ययना हयान् ।
वर्जयित्वा तु तल्लिङ्गं समुच्छ्रितमहाधनुः ।
आरुरोह रथश्रेष्ठं शुक्लवासा धनंजयः ।
महेन्द्रदत्तमकुटं तथा ह्याभरणानि च ।
अलंकृत्य तु कौन्तेयः प्रयातुमुपचक्रमे । [360]
ततः कन्यापुरे घोषस्तुमुलः समपद्यत ।
दृष्ट्वा रथगतं पार्थं खड्गपाणिं धनुर्धरम् ।
अभीशुहस्तां सुश्रोणीं अर्जुनेन रथे स्थिताम् ।
ऊचुः कन्यापुरे कन्या वासुदेवसहोदराम् ।
सर्वे कामाः समृद्धास्ते सुभद्रे भद्रभाषिणि । [365]
वासुदेवप्रियं लब्ध्वा भर्तारं वीरमर्जुनम् ।
सर्वसीमन्तिनीनां त्वं श्रेष्ठा कृष्णसहोदरे ।
यस्मात्सर्वमनुष्याणां श्रेष्ठो भर्ता तवार्जुनः ।
उपपन्नस्त्वया वीरः सर्वलोकमहारथः ।
स्वस्ति याहि गृहं भद्रे सुहृद्भिः संगमोऽस्तु ते । [370]

वैशंपायनः ।

एवमुक्ता प्रहृष्टाभिः सखीभिः परिनन्दिता ।
भद्रा भद्रजवोपेतान्पुनरश्वानचोदयत् ।
ततश्चामरहस्ता सा सखी कुब्जाङ्गनाभवत् ।
ततः कन्यापुरद्वारात्सघोषमभिनिःसृतम् ।
दृदृशुस्तं रथश्रेष्ठं जना जीमूतनिःस्वनम् । [375]
सुभद्रासंगृहीतस्य रथस्य महतो रवम् ।
मेघस्वनमिवाकाशे शुश्रुवुः पुरवासिनः ।
सुभद्रया च संपन्ने तिष्ठन्नथवरेऽर्जुनः ।
प्रबभौ परयोपेतः कैलास इव गङ्गया ।
पार्थः सुभद्रासहितो विरराज महारथः । [380]
पार्थस्येव पिता शक्रो यथा शच्या समन्वितः ।
सुभद्रां प्रेक्ष्य धर्मेण ह्रियमाणां यशस्विनीम् ।
चक्रुः किलिकिलाशब्दमासाद्य बहवो जनाः ।
दाशार्हाणां कुलस्य श्रीः सुभद्रा भद्रभाषिणी ।
अभिकामा सकामेन पार्थेन सह गच्छति । [385]
अथापरे हि संक्रुद्धा गृह्यीत क्षत माचिरम् ।
इति संवार्यमाणानां स नादः सुमहानभूत् ।
स तेन जनघोषेण वीरो गज इवार्दितः ।
ववर्ष शरवर्षाणि न तु कंचन रोषयत् ।
मुमोच निशितान्बाणान्दीप्यमानान्स्वतेजसा । [390]
प्रासादवरसंघेषु हर्म्येषु भवनेषु च ।
प्रासादपङ्क्तिस्तम्भेषु वेदिकासु ध्वजेषु च ।
मुमोच निशितान्बाणान्न च कंचन रोषयत् ।
क्षोभयित्वा पुरश्रेष्ठं गरुत्मानिव सागरम् ।
प्रेक्षन्रैवतकद्वारं निर्ययौ भरतर्षभः । [395]

Colophon.

वैशंपायनः ।

शासनात्पुरुषेन्द्रस्य बलेन महता बली ।
गिरौ रैवतके नित्यं बभूव विपृथुश्रवाः ।
प्रवासे वासुदेवस्य तस्मिन्हलधरोपमः ।
संबभूव तदा गोप्ता पुरस्य पुरवर्धनः ।
प्राप्य पाण्डवनिर्याणं निर्ययौ विपृथुश्रवाः । [400]
निशम्य पुरनिर्घोषं स्वमनीकमचोदयत् ।
सोऽभिपत्य तदाध्वानं ददर्श पुरुषर्षभम् ।
निःसृतं द्वारकाद्वारादंशुमन्तमिवाम्बुदात् ।
सविद्युतमिवाम्भोदं प्रेक्ष्य बाणधनुर्धरम् ।
पार्थमासाद्य योधानां विस्मयः समपद्यत । [405]
उदीर्णरथनागाश्वमनीकमभिवीक्ष्य तत् ।
उवाच परमप्रीता सुभद्रा भद्रभाषिणी ।
संग्रहीतुमभिप्रायो दीर्घकालकृतो मम ।
युध्यमानस्य संग्रामे रथं तव नरर्षभ ।
ओजस्तेजोद्युतिबलैराचितस्य महात्मनः । [410]
पार्थस्य वै सारथित्वे भवेथा इत्यशिक्षयन् ।

Colophon om. in T1. *Adhy. no.*: D1 231; T3 G1.1–6 M6–8 181; G2 179; G3 182. — (L. 329) D1 T1 G1.5 M6–8 शुक्लैः; G2.6 श्लक्ष्णैः (for रत्नैः). — (L. 357) D1 T1 G1 M6–8 व्यत्ययित्वा; G5.6 प्रतिलब्ध्वा. — T3 G2–4

एवमुक्तः प्रियां प्रीतः प्रत्युवाच नरर्षभः ।
चोदयाश्वानसंसक्तान्विशन्तु विपृथोर्बलम् ।
बहुभिर्युध्यमानस्य तावकानां जिघांसतः ।
पश्य बाहुबलं भद्रे शरान्विक्षिपतो मम । [415]
एवमुक्ता ततो भद्रा पार्थेन भरतर्षभ ।
चुचोद चाश्वान्विस्रब्धा ततस्ते विविशुर्बलम् ।
तदाहतमहावाद्यं समुद्रध्वजायुतम् ।
अनीकं विपृथोर्हृष्टं पार्थमेवान्ववर्तत ।
रथैर्बहुविधैर्हृष्टाः सदश्वैश्च महाजवैः । [420]
किरन्तः शरवर्षाणि परिवव्रुर्धनंजयम् ।
तेषामस्त्राणि संवार्य दिव्यैरस्त्रैर्महास्त्रवित् ।
आवृणोन्महदाकाशं शरैः परपुरंजयः ।
तेषां बाणान्महाबाहुर्मुकुटान्यङ्गदान्यपि ।
चिच्छेद निशितैर्बाणैः शरांश्चैव धनूंषि च । [425]
युगानीषा वरूथानि यन्त्राणि विविधानि च ।
अजिघांसन्परान्पार्थश्चिच्छेद निशितैः शरैः ।
निर्धनुष्कान्विकवचान्विरथांश्च महारथान् ।
कृत्वा पार्थः प्रियां प्रीतः प्रेक्षतामित्यदर्शयत् ।
सा दृष्ट्वा महदाश्चर्यं सुभद्रा पार्थमब्रवीत् । [430]
अवासार्थांस्ति भद्रं ते याहि पार्थ यथासुखम् ।
संसक्तं पाण्डुपुत्रेण समीक्ष्य विपृथुर्बलम् ।
त्वरमाणोऽभिसंक्रम्य स्थीयतामित्यभाषत ।
तत्तु सेनापतेर्वाक्यं नात्यवर्तन्त यादवाः ।
सागरे मारुतोद्धूता वेलामिव महोर्मयः । [435]
ततो रथवरात्तूर्णमवरुह्य नरर्षभः ।
अभिगम्य नरव्याघ्रं प्रहृष्टः परिषस्वजे ।
सोऽब्रवीत्पार्थमासाद्य दीर्घकालमिदं तव ।
निवासमभिजानामि शङ्खचक्रगदाधरात् ।
न मेऽस्त्यविदितं किंचिद्यद्यदाचरितं त्वया । [440]
सुभद्रासंप्रयोगेन प्रीतस्तव जनार्दनः ।
आश्रमस्थं यतिलिङ्गेन द्वारकां तु धनंजय ।
विसृष्टा सर्ववृष्णीनामृषभेण च सोदरा ।
त्वमिमां वीर दाशार्हीं शचीमिव शचीपतिः ।
भक्तां गुणवतीं भद्रां सदा सत्कर्तुमर्हसि । [445]
बन्धुर्भव सुभद्राया गतिश्च त्वं धनंजय ।
बन्धुमानसि रामेण महेन्द्रावरजेन च ।
मामेव हि सदाकार्षीन्मन्त्रिणं मधुसूदनः ।
अन्तरेण सुभद्रां च त्वां च तात धनंजय ।
इमं रथवरं दिव्यं सर्वशस्त्रसमन्वितम् । [450]
इदमेवानुयात्रं च निर्दिश्य गदपूर्वजः ।
अन्तर्द्वीपं तदा वीर यातो वृष्णिसुखावहः ।
दीर्घकालावरुद्धं त्वां संप्राप्तं प्रियया सह ।
पश्यन्तु भ्रातरस्तत्र वज्रपाणिमिवामराः ।
आगते तु दशार्हाणामृषभे शार्ङ्गधन्वनि । [455]
भद्रामनुगमिष्यन्ति रत्नानि च वसूनि च ।
अरिष्टं गच्छ पन्थानं सुखी भव धनंजय ।
नष्टशोकैर्विशोकस्य सुहृद्भिः संगमोऽस्तु ते ।

वैशंपायनः ।

ततो विपृथुमामन्त्र्य पार्थः प्रीतोऽभिवाद्य च ।
कृष्णस्य मतमास्थाय कृष्णस्य रथमास्थितः । [460]
पूर्वमेव तु पार्थाय कृष्णेन विनियोजितम् ।
सर्वरत्नसुसंपूर्णं सर्वभोगसमन्वितम् ।

115

After 1. 213. 12^{ab}, K$_4$ (marg. *sec. m.*) D$_4$ (suppl. fol. *sec. m.*) S ins.:

उद्योगं कृतवन्तस्ते भेरीं संनाद्य यादवाः ।
अर्जुनस्तु तदा श्रुत्वा भेरीसंनादनं महत् ।
कौन्तेयस्त्वरमाणस्तु सुभद्रामभ्यभाषत ।
आयान्ति वृष्णयः सर्वे ससुहृज्जनबान्धवाः ।
त्वदर्थं योद्धुकामास्ते मदरक्तान्तलोचनाः । [5]
प्रमत्तानशुचीन्मूढान्सुरामत्तान्नराधमान् ।
वामिनो वाशिनादींस्तु करिष्यामि शरोत्तमैः ।
उताहो वा मदोन्मत्तान्नयिष्यामि यमक्षयम् ।
एवमुक्त्वा प्रियां पार्थो न्यवर्तत महाबलः ।
निवर्तमानं दृष्ट्वैव सुभद्रा त्रस्तवां गता । [10]
एवं मा वद पार्थेति पादयोः पतिता तदा ।
सुभद्रा तु कलिर्जाता वृष्णीनां निधनाय च ।
एवं ब्रुवन्तः पौरास्ते जनवादं जनाः प्रभो ।
मम शोकं विवर्धन्ति तस्मात्पापं न चिन्तय ।
परिवादभयान्मुक्ता त्वत्प्रसादाद्भवाम्यहम् । [15]
एवमुक्तस्ततः पार्थः प्रियया भद्रया तदा ।
गमनाय मतिं चक्रे पार्थः सत्यपराक्रमः ।
स्मितपूर्वं तदाभाष्य परिष्वज्य प्रियां तदा ।
उत्थाप्य च पुनः पार्थो याहि याहीति सोऽब्रवीत् ।
ततः सुभद्रा त्वरिता रश्मीन्संगृह्य पाणिना । [20]
चोदयामास जवनाञ्शीघ्रमश्वान्कृतत्वरा ।
ततस्तु कृतसंनाहा वृष्णिवीराः समाहिताः ।

---

om. line 393. Colophon. *Adhy. no.:* D$_4$ 232; T$_1$ 228; T$_3$ G$_{1.4-6}$ M$_{6-8}$ 182; G$_2$ 180; G$_3$ 183. — (L. 410) D$_4$ G$_1$ M$_{6-8}$ अन्वितस्य; T$_1$ ऊर्जितस्य; G$_2$ अर्चितस्य; G$_{3.6}$ अजितस्य.

115

K$_4$ om. lines 1, 8, 16–19, 24–25 and 28 to end. — (L. 7) D$_4$ M$_{6-8}$ वमनं पानशाटीनां; T$_1$ वमनं पानशमनं; G$_1$ वमनं पानमत्तानां; G$_5$ corrupt; G$_6$ om. partly

प्रत्यानयार्थं पार्थस्य जवनैस्तुरगोत्तमैः ।
राजमार्गमनुप्राप्ता दृष्ट्वा पार्थस्य विक्रमम् ।
प्रासादपङ्क्तिस्तम्भेषु वेदिकासु ध्वजेषु च । [25]
अर्जुनस्य शरान्दृष्ट्वा विस्मयं परमं गताः ।
केशवस्य वचस्तथ्यं मन्यमानास्तु यादवाः ।
अतीत्य शैलं रैवतकं श्रुत्वा तु विपृथोर्वचः ।
अर्जुनेन कृतं श्रुत्वा गन्तुकामास्तु वृष्णयः ।
श्रुत्वा दूरं गतं पार्थं न्यवर्तन्त नराधिपाः । [30]
पुरोद्यानान्यतिक्रम्य विशालं च गिरिव्रजम् ।
सानुं मुञ्जावतं चैव वनान्युपवनानि च ।
पुण्येष्वानर्तराष्ट्रेषु वापीपद्मसरांसि च ।
प्राप्य धेनुमतीतीर्थमश्वरोधसरः प्रति ।
प्रेक्ष्यावर्तं ततः शैलमर्बुदं च नगोत्तमम् । [35]
आराच्छृङ्गमुपस्थाय तीर्त्वा कारवतीं नदीम् ।
प्राप्य साल्वेयराष्ट्राणि निषधानभ्यतीत्य च ।
देवापृथुपुरं पश्यन्सर्वतः सुसमाहितः ।
तमतीत्य महाबाहुर्देवारण्यमपश्यत ।
पूजयामासुरायान्तं देवारण्यमहर्षयः । [40]
स वनानि नदीः शैलान्गिरिप्रस्रवणानि च ।
अतीत्य च तथा पार्थः सुभद्रासारथिस्तदा ।
कौरवं विषयं प्राप्य विशङ्कः समपद्यत ।
सोदर्याणां महाबाहुः सिंहाशयमिवाशयम् ।
दूरादुपवनोपेतां दाशार्हप्रतिमां पुरीम् । [45]

Colophon.

वैशंपायनः ।

क्रोशमात्रे पुरस्यासीद्गोष्ठः पार्थस्य शोभनः ।
तत्राभीयात्स बीभत्सुर्निविष्टो यदुकन्यया ।
ततः सुभद्रां सत्कृत्य पार्थो वचनमब्रवीत् ।
गोपालिकानां वेषेण गच्छ त्वं वृजिनं पुरम् ।
कामन्याहारिणी कृष्णा रोचतां ते वचो मम । [50]
दृष्ट्वा तु पुरुषं ब्रूयात्सह तत्र मया गताम् ।
अन्यवेषेण तु गतां दृष्ट्वा सा त्वां प्रियं वदेत् ।
यत्तु सा प्रथमं ब्रूयान्न तस्यास्ति निवर्तनम् ।
तस्मान्मानं च दर्पं च व्यपनीय स्वयं व्रज ।
तस्य तद्वचनं श्रुत्वा सुभद्रा प्रत्यभाषत । [55]
एवमेतत्करिष्यामि यथा त्वं पार्थ भाषसे ।
सुभद्रायाः वचः श्रुत्वा सुप्रीतः पाकशासनिः ।
गोपालान्स समानीय त्वरितो वाक्यमब्रवीत् ।
तरुण्यः सन्ति यावन्त्यस्ताः सर्वा व्रजयोषितः ।
आगच्छन्तु गमिष्यन्त्या भद्रया सह संगताः । [60]
इन्द्रप्रस्थं पुरवरं कृष्णां द्रष्टुं यशस्विनीम् ।
एतच्छ्रुत्वा तु गोपालैरानीता व्रजयोषितः ।
ततस्ताभिः परिवृतां व्रजस्त्रीभिरनिन्दिताम् ।

116

After 1. 213. 20, D4 (suppl. fol., *sec. m.*) S ins.:

ततः सुभद्रां वार्ष्णेयीं परिष्वज्य शुभाननाम् ।
अङ्के निवेश्य मुदिता वासुदेवं प्रशस्य तु ।
ततः किलिकिलाशब्दः क्षणेन समपद्यत ।
हर्षादानर्तयोधानामासाद्य वृजिनं पुरम् ।
देवपुत्रप्रकाशास्ते जाम्बूनदमयध्वजाः । [5]
पृष्ठतोऽनुययुः पार्थं पुरुहूतमिवामराः ।
गोभिरुष्ट्रैः सदश्वैश्च युक्तानि बहुला जनाः ।
ददृशुर्यानमुख्यानि दाशार्हपुरवासिनाम् ।
ततः पुरवरे यूनां प्रहर्षः समजायत ।
प्रभासादागतं पार्थं दृष्ट्वा स्वमिव बान्धवम् । [10]
सोऽभियाय पुरश्रेष्ठं दाशार्हगणसंवृतः ।
पौरैः पुरवरैः प्रीत्या परया चाभिनन्दितः ।
प्राप्य चान्तःपुरद्वारमवरुह्य धनंजयः ।
ववन्दे धौम्यमासाद्य मातरं च धनंजयः ।
स्पृष्ट्वा च चरणौ राज्ञो भीमस्य च धनंजयः । [15]
यमाभ्यां वन्दितो हृष्टः सस्वजेऽभिननन्द च ।
ब्राह्मणप्रमुखान्सर्वान्भ्रातृभिः सह संगतः ।
यथार्हं मानयामास पौरजानपदानपि ।
तत्रस्थान्यनुयात्राणि प्रदाय गुरवे वधूम् ।
पूजयांचक्रुरासाद्य कुन्तीपुत्रं युधिष्ठिरम् । [20]
पुरस्तादेव तेषां तु स महात्मा महायशाः ।
पूजनार्होऽभवद्राजा यथैव गदपूर्वजः ।
पाण्डवेन यथार्हं ते पूजार्हेण सुपूजिताः ।
न्यविशन्ताभ्यनुज्ञाता राज्ञा तुष्टा यशस्विना ।
तामदीनामदीनार्हां सुभद्रां प्रीतिवर्धिनीम् । [25]
साक्षाच्छ्रियममन्यन्त पार्थाः कृष्णसहोदराम् ।
गुरूणां श्वशुराणां च देवराणां तथैव च ।
सुभद्रा स्वेन वृत्तेन बभूव परमप्रिया ।

(meaning?). — After line 27, K4 ins.:

स्तूयमानोऽपि तैश्चापि निवृत्तः पुरुषर्षभः ।

— (L. 35) Some MSS. अंबुदं. — Colophon om. in T1.

Adhy. no.: D4 234; T3 G4-6 M6-8 184; G1 183; G2 182; G3 185.

116

(L. 10) T1 G1. 5. 6 M6-8 प्रवासाद्. — After line 26, T1 ins.:

ते उभे रूपसंपन्ने कृष्णाभद्रे पुरौकसः ।
रूपं नैतादृशं लोके विद्यतेऽत्र विसिष्मिरे ।

117

After 1. 214. 17, S ins.:

विहरन्खाण्डवप्रस्थे काननेषु च माधवः ।
पुष्पितोपवनां रम्यां ददर्श यमुनां नदीम् ।
आलयं सर्वभूतानां खाण्डवं खड्गचर्मभृत् ।
ददर्श स तु तं देशं सहितः सव्यसाचिना ।
ऋक्षगोमायुसंघुष्टं हंससारसनादितम् । [5]
शाखामृगगणैर्जुष्टं निकेतं सर्वरक्षसाम् ।
द्वीपिगोमायुसिंहर्क्षवराहरुरुवारणैः ।
नानामृगसहस्रैश्च पक्षिभिश्च समावृतम् ।
माननार्हं च सर्वेषां देवदानवरक्षसाम् ।
आलयं पन्नगेन्द्रस्य तक्षकस्य महात्मनः । [10]
वेणुशाल्मलिमाल्याङ्गैरुपेतं वेत्रसंवृतम् ।
शाकपद्मकतालैश्च शतशाखैश्च रोहिणैः ।
निरुद्देशतमप्रख्यमावृतं गजसंस्थितैः ।
गुल्मैः कीचकवेणूनामाशीविषनिषेवितम् ।
विगतार्कमहाभोगव्रततिद्रुमसंकटम् । [15]
सुहिवेत्रकुलिङ्गाक्षैर्हिन्तालैश्च समावृतम् ।
व्यालदंष्ट्रिगणाकीर्णं वर्जितं सर्वमानुषैः ।
रक्षसां भुजगेन्द्राणां पक्षिणां च महालयम् ।
भूतानां सर्वदेवेशः सर्वलोकविभागवित् ।
पीताम्बरधरो देवस्तद्वनं बहुधा चरन् । [20]
सद्रुमस्य सयक्षस्य सभूतगणपक्षिणः ।
खाण्डवस्य विनाशं तं ददर्श मधुसूदनः ।

Colophon.

118

After 1. 215. 11, N ins.:

जनमेजय उवाच ।
किमर्थं भगवानग्निः खाण्डवं दग्धुमिच्छति ।
रक्ष्यमाणं महेन्द्रेण नानासत्त्वसमायुतम् ।
न ह्येतत्कारणं ब्रह्मन्नल्पं संप्रतिभाति मे ।
यद्ददाह सुसंक्रुद्धः खाण्डवं हव्यवाहनः । [5]
एतद्विस्तरशो ब्रह्मञ्श्रोतुमिच्छामि तत्त्वतः ।
खाण्डवस्य यथा दाहः पुरा समभवन्मुने ।
वैशंपायन उवाच ।
हन्त ते कथयिष्यामि पुराणमृषिसंस्तुतम् ।
कथामिमां नरश्रेष्ठ खाण्डवस्य विनाशिनीम् ।
पौराणः श्रूयते तात राजा हरिहयोपमः ।
श्वेतकिर्नाम विख्यातो बलविक्रमसंयुतः । [10]
यज्वा दानपतिर्धीमान्यथा नान्योऽस्ति कश्चन ।
ईजे स च महासत्रैः क्रतुभिश्चाप्तदक्षिणैः ।
तस्य नान्याभवद्बुद्धिर्दिवसे दिवसे नृप ।
सत्रे क्रियासमारम्भे दानेषु विविधेषु च ।

117

(L. 9) T1 वनार्हाणां च; G1 नानार्हाणां च; G5.6 माननार्हस्य; M मानार्हस्य च. — (L. 11) G2 M °शाल्मलिबिल्वार्कैः; G5 शब्दतमालिगैः; G6 °शाल्मलितिंडिगैः. — (L. 13) T1 खरक्रोडैः; G1 -समुद्रस्यां; M -समप्रख्यं. — (L. 14) T1 G1 M कंटक° (for कीचक°). — (L. 15) T1 विहगैश्च समाकीर्णं प्रतानक्रम-संकटं; G1.2 विहगौघमहाभासवृतान° (G2 °हिंताल); G5.6 °कं महाभोगवितान°; M5.5 विहितार्कमहारदिमप्रतान°; M6-8 विहारार्थम-संबाधप्रतान°. — After line 16, T1 ins.:

नानाकण्टकवृक्षैश्च तथा कण्टककुञ्जकैः ।
कण्टकीकुञ्जगुल्मैश्च कण्टकाचितभूतृणैः ।
निम्नोन्नतप्रदेशैश्च तीक्ष्णपाषाणसंकुलम् ।
अत्यगाधमहागर्तैर्वनापगमहाभयम् ।

Colophon. *Adhy. no.:* T1 222; T3 G4-6 M 188; G1 187; G2 186; G3 190.

118

For the addl. lines given here, cf. passage No. 121 and the notes thereon. — After line 1, Ñ1 D5 ins.:

कस्य वा विप्रियं कर्तुं कस्य वा प्रियमेव च ।

D5 cont.: N1 subst. for line 3: K2 ins. after line 3:

न ह्यल्पे कारणे वह्निर्निर्बन्धं कर्तुमर्हति ।
दहनं प्रति विप्रेन्द्र खाण्डवस्येति मे मतिः ।

— (L. 6) Some MSS. transp. यथा and पुरा. — After line 6, Ñ1 ins.:

तथा मे कारणं ब्रूहि परं कौतूहलं यतः ।

— After वैशं°, Ñ1.2 K2 ins.:

शृणु मे ब्रुवतो राजन्सर्वमेतद्यथातथम् ।
यन्निमित्तं ददाहाग्निः खाण्डवं पृथिवीपते ।,

a stanza copied faithfully by almost all printed ed.! — (L. 7) Ko.2 D1.5 पुराणां; Ñ V1 B Da Dn D4 पौराणीं. Ko.2 Ñ V1 B Da Dn D4 °संस्तुतां; K4 °सत्तमं; D1 °संमतं; D5 °संयुतां. — (L. 8) Ś1 विदाहिनीं; Ko.4 B (except B1) D4 विनाशनीं. — (L. 9) Ko.3.4 Ñ2 Dn D5 राजन् (for तात). — After line 9, K2-4 Ñ1 ins.:

इक्ष्वाकूणामतिरथो यज्वा विपुलदक्षिणः ।

— After line 11, K (except K1) Ñ1 D5 ins.:

जग्राह दीक्षां स नृपस्तदा द्वादशवार्षिकीम् ।
तस्य सत्रे तदा तस्मिन्समागच्छन्महर्षयः ।
